शुच् । स्त्री॰ शोके ॥ शोचनम् । शुचशोके । सम्पदादित्वात्क्विप् ॥ वयप्राप्तिस्त्रीपितरितनयेवासुहृद्भिषा॰ शुचासव्यव्यक्तेभ्रमुद्गरताडनजधिय । असारेसंसारेविरसपरिणामेतुविदुषांवियोगोवैराग्यद्रढयतिवितन्वन्शमसुखम् ॥

शुचा । स्त्री॰ शोके ॥

शुचि । पु॰ ग्रीष्मे ॥ वह्नौ ॥ सौराग्नौ ॥ यथा । पावक पवमानश्च शुचिरग्निस्त्रयस्त्रय । निर्मथ्य पवमान : स्याद्वैद्युत पावक स्मृत ॥ यश्चासौतपतेसूर्य शुचिरग्निस्त्वसौस्मृत । तेषान्तुसन्तताबन्धचलादिंशन्नपञ्च ॥ पावक पवमानश्चशुचिस्तेषांपितामह : । एतेषकौरणपञ्चाशद्वह्नय परिकीर्त्तिता ॥ कू॰ कौर्म्मे १२ अध्याय ॥ चित्रके ॥ शृङ्गाररसे ॥ उत्तमयुवप्रकृतिकत्वेन॰ जुगुप्सारहितत्वात्॰ शुचि शृङ्गाररस ॥ आषाढेमासि ॥ शुचिपवित्र करोति॰ शुचयति । तत्करोतीतिण्यन्ताद्च्च ॥ यद्वा । शोचति । अन्यभाविनश्यच्चापवे रागुपधात्किदितीन् ॥ शोच तिविरह्णोऽस्मिन्निति वा । शोचत्यनेनवा॥विदुषि ॥ शोचतिजनङ्क्लिश्यमानम् ॥ उपधाशुद्धसचिवे । ज्येष्ठमासे ॥ स्त्री॰ कश्यपपत्न्यास्ताम्राया सुतायाम् ॥ त्रि॰ धवले ॥ शुद्धे ॥ यथा । आसनशयनयानंजयापत्न्यंकमण्डलुम् । आत्मन . शुचिरेतानिपरेषामशुचीनितु ॥ अभावत सस्कारतश्च शुद्धे ॥ बाह्याभ्यन्तरशौचसम्पन्ने ॥ वी

थें शुचिर्हि सशुचिनं महारिशुचि शुचि । मनुपद्रते । शुक्लगुणवि शिष्टे ॥

शुचिता । स्त्री॰ शुचित्वे ॥

शुचिद्रुम । पु॰ पिप्पलवृक्षे ॥

शुचिप्रणी । पु॰ आचमने ॥

शुचिमणि । पु॰ स्फटिके ॥

शुचिमल्लिका । स्त्री॰ नवमालिकायाम् । यथोक्तवायाम् ॥

शुचिरोचि । पु॰ चन्द्रमसि ॥

शुचिव्रत । पु॰ युधिष्ठिरे ॥

शुचिश्रवा । पुं॰ विष्णौ । शुचीनि पावनानि श्रवांसि नामानि श्रवणीयानि यस्य सः ॥

शुचिषद् । पुं॰ परमात्मनि ॥ शुचिषु सीदति । षद्लृ॰ । सत्सूद्विषेति क्विप ॥

शुटीरता । स्त्री॰ वीर्ये । इ॰ नि॰ शि॰ ॥

शुण्ठि । स्त्री॰ शुण्ठ्याम् । शुण्ठति कफम् । शुठि॰ । इन् ॥

शुण्ठी । स्त्री॰ शुष्कार्द्रके । महौषधे । विश्वे । नागरे । विश्वभेषजे । शृङ्गबेरे । कफारौ । सूठ॰ गु॰ भा॰ अस्यागुणायथाभावप्रकाशे । शुण्ठीरुच्यामवातघ्नीपाचनीकटुकालघु । स्निग्धोष्णामधुरापाकेकफवातविबन्धनुत् ॥ हृद्यास्वर्याविमिश्वासशूलकासहृदामयान् । हन्तिश्लीपद

शोथार्शआनाहोदरमारुतान् । आग्नेयत्वाद्भयेवातीयाश्च परिशोषयत् । सङ्ग्रहणातिमलंतत्तुयाहिण्यगुण्ठ्यादयोयथा ॥ विबन्धभेदिनीया तुसाकथयाहिणीभवेत् । बलिविबन्धभेदियायतोनसन्मपातने ॥ शुण्ठतिकफम् । शुठिशोषणे । पचाद्यच । गौरादि ॥ इनितु॰ कृदिकारादितिङीष् ॥

शुण्ठीक्वाथ । पुं॰ विश्वाकषाये ॥ सर्वोक्तोयथा । बातंनिहन्तिकथनक पाकवलयम्लमंनयनृपोनसहंर्ष भिमन्त्यन्प्रभोमनलन्दयनृष्ट्रीगमुत्सारयन । नि शिषजठरामयप्रशमनशुण्ठीपवनपाचकांकासश्वासनिरासमाधनममीविश्वाकषाय क्षलकृति ॥

शुण्ठीपाक । पुं॰ विश्वभेषजप्रधानेपाकविशेषे ॥ यथा । प्रस्थनयमुदुधशुण्ठ्या पचेद्दुग्धे चतुर्गुणे । शुण्ठीसमगवांसर्पि खण्डं चौरसमपचेत् ॥ तामायसिकटाहेच दर्व्यासंघट्टयनपचेत् । जातीफलजीरकेचतलाविफलतथा । एलाद्राक्षोपकुल्याचविदारीलवङ्गकाशुका । बीजखर्जूरकाचाचघनसारकसेवच । पलार्धमाचावैतेषांनासिकोरफलश्च । पश्चात्युष्टीचपाद्दशिलासीदयधुते ॥ चारबीजमि

सिद्धापिगृह्यतेदुग्धपक्वादिकं । चि
हसाया पलचैकसर्वेषामपिशिण्डका
भवेत् ॥ इन्त्यशीतिवातरोगानच
त्वारिंशच्चपित्तजान् । विंशतिश्ले
ष्मजान्तानष्टौचपित्तरोगवान् ॥
दुग्धम्बभवानरोगानन्यानपिनि
वारयेत् । मनौषधप्रसादेनपरम
सुन्दरोभवेत् । इतिपाकावली ॥

शुण्ठाम् ।) न॰
शुण्ठाक ।) पु॰ शुण्ठाम् ॥

शुण्ड । पु॰ मदनिर्झरे ॥

शुण्डक । पु॰ मण्डपारके ॥ युद्ध
वेणौ ॥

शुण्डरोह । पु॰ भल्लर्क ॥

शुण्डा । स्त्री॰ मद्यपानागारे । ज
लहस्तिन्याम् । वेश्यायाम् ॥ ह
स्तिहस्ते ॥ सुरायां । नलिन्या
म् ॥ शुन्यके । शुनगतौ । अम
लाङ्ग ॥

शुण्डापानम् । न॰ मदस्थाने ।

शुण्डार । पु॰ शौण्डिके । स्वल्प
शुण्डायाम् । कलाशुण्डा । कु
टीमरीशुण्डाभ्योर ।

शुण्डाल । पु॰ हस्तिनि ।

शुण्डी । पु॰ शौण्डिके ॥

शुण्डिमषिका ।)
शुण्डिमूषी ।) स्त्री॰ छुच्छुन्द
र्याम ॥ इ॰ रा॰ नि॰ ष्ट॰ ॥

शुण्डौ । स्त्री॰ हस्तिशुण्डावर्षे ॥

शुतुद्रि । स्त्री॰ शतद्रुसरिति ॥ शु
पूजिततुदति । तुद॰ । ड्युपधा
त्किदितौन् । बाहुलकाद्रुक ॥

शुद्दि । प॰ शुक्लपक्षे ॥

शुद्धम् । न॰ मरिचे सैन्धवे ॥

शुद्ध । त्रि॰ पूते । पावने ।
अशुद्धिरहिते । निर्मले । नि
र्लेपे ॥ निर्दोषे ॥ शुक्ले ॥ रा
गाद्यसम्मिश्रितरागे । प्रसन्ने ।
नित्यनिरस्तसमस्तदोषपरमब्रह्मणि
॥ शुद्ध्यतिशुद्ध्यतेऽनेनवा । शु
धशौचे । क्त । प्रशस्ताशुद्धिर
स्यवा । अर्शआद्यच । अहरहित
भवने । रागाद्यशुद्धिरहितेपर
मात्मनि ॥

शुद्धचैतन्यम् । न॰ सर्वधर्मातीते ।

शुद्ध कण्ठ । पु॰ शुक्लकर्णे ।
गर्भे ॥

शुद्धदत् । त्रि॰ शुक्लदन्तयुक्ते । शु
द्धदन्त । शुद्धादन्तायस्य ॥
अयान्तशुद्धशुभ्रवृषवराहेभ्यश्चेति
पक्षेदन्तस्यदत्वादेश ॥

शुद्धमति । स्त्री॰ पवित्रमतौ । सु
मतौ त्रि॰ सुमतिविशिष्टे ॥ प
वित्रबुद्धियुक्ते ॥ शुद्धासौमतिश्च
॥ शुद्धामतिर्यस्य । पु॰ च
तुर्विंशतिभूतार्हदन्तर्गतजिनविशे
षे ।

शुद्धमांसम । न॰ मासव्यञ्जन

विशेषे । सुश्रुतः । सू० भा० ॥ यथा । पाकपात्रे घृतं दद्यात्तैलं वा तदभावतः । तत्र हिङ्गु हरिद्राञ्च भर्जयेत्तदनन्तरम् ॥ छागादेरस्थिरहितं मांसं तत्खण्डितं शुभम् । धौतं निर्गालितं तस्मिन्घृते तत्सर्वं येष्कने ॥ सिद्धयोग्यजलं दत्त्वा तत्र च पाचयेत्ततः । सिद्धेऽजिनस्मिंश्च वेसवारं परिक्षिपेत् ॥ द्रव्याण्येवेसवारस्य नागराजीरकानि च । तण्डुलाश्च लवङ्गानि मरिचानि समासतः ॥ अनेन विधिना सिद्धं शुद्धमांसमिति स्मृतम् । शुद्धमांसं परं हृद्यं बल्यं रुच्यं स्वर्द्वंहणम् । त्रिदोषशमनं श्रेष्ठं दीपनं धातुवर्द्धनम् ॥ इति भावप्रकाशः ॥

शुद्धवती । स्त्री० वरुणस्य पुर्य्याम् ॥ यथा । शुद्धवत्यम्बुनाथस्य स्फटिकोपलनिर्मिता । पाण्डुराभ्रोपमैर्यात्र सौविताभातिधामभिरिति मृगेन्द्रसंहिता ॥

शुद्धवल्लिका । स्त्री० गुडूच्याम् ॥

शुद्धसत्त्वम् । न० रजस्तमोभ्यामस्पृष्टे त्रिगुणायामायायाश्चमूर्ते० विमलसत्त्वगुणे ॥ त्रि० शुद्धान्तःकरणे ॥ शुद्धरागादिकषायरहितसत्त्वमन्तःकरणं यस्य ।

शुद्धान्तः । पु० भूभुजामागारे । अन्तःपुरे अवरोधने ॥ कक्षान्तरे । राजधानीस्थानविशेषेवासगृहाख्ये । इति स्वामी ॥ राजयोषिति ॥ शुद्धोऽन्तोऽस्य । रक्षकाः शुद्धा अन्ते समीपेऽस्य वा । अमरौकान्ते ॥

शुद्धान्तपालकः । पु० अन्तःपुररक्षके । गृहद्वारिके । कञ्चुकिनि । सौविदल्लके ॥ तत्स्वरूपं यथा । शुद्धः कुलीनः सूक्तः प्रियपरास्तथा च शुचिः । राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते ॥ इति मत्स्यपु० ॥

शुद्धान्ता । स्त्री० राजयोषिति ॥

शुद्धापह्नुतिः । स्त्री० अलङ्कारविशेषे ॥ यथा ॥ शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः । नायं सुधांशुः किन्तर्हि व्योमगङ्गासरोरुहम् । इति ॥

शुद्धिः । स्त्री० । मार्जनायाम् ॥ दोषनिरासे ॥ वैदिककर्मार्हत्वप्रयोजकसंस्कारविशेषे ॥ कलिकल्मषदीनानामिहाद्यैनांसुरेश्वरि । मिथ्याऽमिथ्याविचाराणां शुद्धिः श्रौतकर्मणा ॥ न स्मृताद्यैः स्मृतिभिरिष्टसिद्धिर्नृणां भवेत् । विनाह्यागममार्गेण कलौ नास्ति गतिः प्रिये ॥ कलावागममुल्लङ्घ्य योऽन्यमार्गे प्रवर्त्तते । न तस्य गतिरस्तीति सत्यं सत्यं न संशयः ॥ दुर्गायाम् ॥

यथा । स्मरणाच्छिन्नमाशापिशोध्य
तेसच्छिपातकात् । तेनशुद्धिं समा
ख्याता देवीरुद्रतनौ स्थितेति ॥ शुचि
स्त्रियामिति ॥ देवतायै सुराप्रदाने
द्रव्यान्तरसञ्चायाम ॥ यथा । मांस
मीनसमुद्राञ्चफलमूलानिधान्यपि च ।
सुधादाने देवतायै सञ्ज्ञाशुद्धिरी
रितेति ॥

शुद्धिलाभ । पु० प्रायश्चित्ते ॥

शुद्धोदन । पु० नृपविशेषे ॥ शुद्धो
दनोऽस्य । शाक्यादि ॥ शुद्धो
दनीयशोभुक्त्यायवच्छुद्धमोदन
म् ॥

शुद्धोदनसुत । पु० शाक्यमुनौ ॥

शुन । पु० वायौ ॥ कुक्कुरे ॥ य
थाह वाचस्पतिः । कुक्कुरस्तु शु
नि श्वान कपिलोमण्डल शु
नह्विति ॥

शुनःशेप ।) पु०
शुनःशेफ ।) न० मुनिविशेषे । अज
चीकमुनिपुत्रे । आजीगर्त्ते ॥

शुनक । पु० कुक्कुरे । शुनति ।
शुनगती । कुर्त्शिल्पिसञ्चयोरपू
र्वस्यापि ॥

शुनकचञ्चुका । स्त्री० क्षुद्रचञ्चुक्षुपे ॥

शुनकचिल्ली । स्त्री० शाकविशेषे । श्वा
नचिल्लिकायां ॥

शुनाशीर । पुं० इन्द्रे ॥ शुनो वायुः
शीरः सूर्यः ॥ तावस्य ।
अस्ति ताववच् । अन्येषामपीति दी
र्घः ॥ शुनाशीरोऽपि तालव्य सु
नासीरोऽपि दन्त्यकः । तालव्यादि
दन्त्यमध्यः शुनासीरश्च दृश्यते ।
इति भरतः ॥

शुनासीर । पु० इन्द्रे । पुरुहूते ।
पुरन्दरे ॥ शुक्लत्वव्ययस्य पूजार्थक
त्वात् शोभननासीरसेनाविशेषो
यस्य स ॥ यद्वा । शुनो वायुः सी
रश्चादित्यः शुनश्च सीरश्च ती ।
देवताद्वन्द्वे चेत्यानङ् इति हलितका
र । दन्त्यतालव्यपाठो बहुसम्मतः ॥

शुनासीरीयन । न० शुनासीर्य्ये ॥
शुनासीरो देवताऽस्येत्यर्थे ० द्यावा
पृथिवीत्यादिना छ ॥

शुनासीर्य्यम् । न० शुनासीरीये ० इ
ति राढो । शुनासीरो देवतास्येत्य
र्थे ० द्यावापृथिवीशुनासीरमरुत्व
दग्नीषोमवास्तोष्पतिगृहमेधाच्छ चे
ति ० यत् ॥

शुनि । पु० कुक्कुरे । सारमेये ॥

शुनी । स्त्री० कुक्कुर्य्याम् ॥ अश्वालप
च शुनोलिख्यमन ॥ कुम्भाण्डाम्
॥ गौरादित्वान् ङीष् ॥

शुनीर । पु० कुक्कुरीसमूहे ॥ इति
वि० द्वि ॥

शुन्ध्यु । पुं० अग्नौ ॥ शुन्धति । शु
न्ध शुद्धौ । यजिमनिशुन्धिदसिज
निभ्यो युच् ॥

शुन्यम् । न० शुन्ये ॥ शुनेश्चितम् । गवादिषु शुन सम्प्रसारणं वा च दीर्घत्वमितिपत्त् ॥ शुनीमासमूहे ॥

शुभ । पु० विष्कम्भादिषु० सप्तविंशयोगे ॥ तथोत्पन्नस्यफलंयथा । शुभप्रसूतः शुभकृन्नराणां शुभोदयैर्विदुषामभार्जी । करोतिनित्यं शुभकर्मधीमान् शोभाभिरूपः शोभनवेशधारीति ॥ कोष्ठी ॥ शुभर्क्षे सायाम् ग्रहपर्यन्तिके ॥ न० कल्याणे । क्षेमे । भद्रे । मङ्गले । मौक्तिके ॥ पद्मकाष्ठे ॥ स्तरफले ॥ परमानन्दरूपत्वमङ्गलानांमङ्गले मोक्षसुखे ॥ त्रि० सुखरूपे ॥ क्षेमशालिनि ॥ स्वस्त्यादिपुरे ॥ प्रशस्ते ॥ शोभने । शुभशोभायाम् । ग्रहपक्षत्रादीक्षित ॥

शुभयु । त्रि० शुभान्विते । शुभमस्यास्ति । शुभमितिमान्तमव्ययम् । अहंशुभमोर्युस् ॥

शुभकृत् । पु० प्रभवादिषष्ठ्यन्तर्गतसंवत्सरविशेषे । यथा । सुवर्णरूप्यधान्यानि जगत्सर्वं सुशोभनम् । ब्राह्मणाश्चार्चिताश्चतुष्टा शुभकृच्छुभकृतिप्रिये ॥ ३६ ॥ त्रि० शुभकारके ॥

शुभगन्धकम् । न० बोले । त्रि० सुगन्धयुक्ते ॥

शुभयशः । पु० सौम्ययशे ॥ यशोधि-

पः शनीचैवगुरुः शुक्रस्तथैव च । पातालयुगेवृत्त्ये चन्द्रोऽगोष्ठीशुभमहा ॥

शुभङ्कर । त्रि० क्षेमङ्करे । धर्मकारे ॥

शुभङ्करी । स्त्री० पार्वत्याम् ॥

शुभद । पु० अश्वत्थवृक्षे । त्रि० शुभदातरि ॥

शुभदन्ती । स्त्री० सुदन्त्याम् । सुदतृस्त्रियाम् । पुष्पदन्तभार्यायाम् ॥ शुभाशोभनोदन्ताऽस्याः । नासिकोदरौष्ठे त्यङीष ॥

शुभपत्रिका । स्त्री० शालपर्ण्याम् ॥ मङ्गलपत्रिकायाम् ॥

शुभम् । अ० क्षेमे । भद्रे ॥

शुभवासन । पु० सुखवासकारगन्धे । सुखवासने ॥

शुभस्थली । स्त्री० यज्ञभूमौ । भद्रभूमौ ॥

शुभा । स्त्री० गोरोचनायाम् ॥ गोरोचनायाम् ॥ प्रियङ्गौ ॥ शम्याम् ॥ श्वेतदूर्वायाम् । देवसभायाम् ॥ उमासखीविशेषे ॥ मङ्गलान्विकायाम् ॥ छायायाम् ॥ टाप् ॥

शुभाङ्ग । त्रि० मङ्गलावयवयुक्ते । सुन्दरावयविनि । शुभानिकल्याणलक्षितान्यङ्गान्यस्य ॥

शुभाङ्गी । स्त्री० कुबेरपत्न्याम् । कामदेवपत्न्याम् । मङ्गलावयवयुक्ता

याम् ॥

शुभाचार । त्रि० शोभनाचारवति ॥

शुभाचारा । स्त्री० उमासखीभेदे ॥

शुभाञ्जन । पु० शिग्रौ ॥

शुभात्मिका । स्त्री० कल्पायाम । शुभोक्तौ ॥

शुभान्वित । त्रि० मङ्गलयुक्ते । शुभयौ । शुभेनान्वित कर्त्तृकरण इतिसमास ॥

शुभ्र । पु० चन्दने ॥ शुक्लवर्णे ॥ शोभते । शुभ दीप्तौ । स्फायितञ्चीतिरक् ॥ न० अभ्रके ॥ रूप्ये ॥ कासीसे ॥ गडलवणे ॥ शाकम्भरीये ॥ त्रि० उद्दीप्ते । शुक्लगुणयुक्ते ॥

शुभ्रदत् । त्रि० शुभ्रदन्त ॥ शुभ्रा दन्ता यस्य स । अग्रान्तशुद्धशुभ्रेति दन्तस्य दत्रादेश ॥

शुभ्रदन्त त्रि० शुभ्रदति ॥

शुभ्रदन्ती । स्त्री० पुष्पदन्तेभकरिण्याम ॥ शुभ्रौ दन्तौ यस्या सा । नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्चेति ङीष् ॥

शुभ्ररश्मि । पुं० चन्द्रे ॥

शुभ्रा । स्त्री० गङ्गायाम् ॥ वंशरोचनायाम् ॥ स्फटिके ॥

शुभ्रांशु । पु० सुधांशौ । शीतांशौ । चन्द्रे ॥ शुभ्राश्चांशवो यस्य ॥ कर्पूरे ॥

शुभ्रालु । पुं० महिषकन्दे ॥

शुम्भि । पु० ब्रह्मणि । कामलारोगे ॥ दर्शनीये ॥ शोभने । शुम्भ शोभनार्थे । अच् इगुपधात् कित् ॥

शुम्भ । पु० कश्यपाद् दनुसुतात् निशुम्भनमुचिभ्यां ज्येष्ठे । शिवाद्वरलाभात् प्रबले असुरोत्तमे ॥ यथा । कश्यपस्य दितिर्नाम भार्या सौदर्य्यसत्तम । तया पुत्रत्रयं जज्ञे सहस्राक्षात् गरीयसाम् । ज्येष्ठ शुम्भ इतिख्यातो निशुम्भश्चापरोऽसुर ॥ तृतीयो नमुचिर्नाम महाबलपराक्रम । इतिवामनपुराणम् ॥

शुम्भघातिनी ।
शुम्भनिबर्हिणी ।) स्त्री० महासरस्वत्याम् ॥

शुम्भपुरम् । न० पत्तने । हरिद्वारे । शुम्भजइत्यधुनाप्रसिद्धे पुरस्थे ॥

शुम्भपुरा । स्त्री० शुम्भ सुरनगराम् । शुम्भपुरे ॥

शुम्भमथनी ।
शुम्भमर्दिनी { स्त्री० दुर्गायाम् । महासरस्वत्या ॥

शुम्भा । स्त्री० शोभायाम ॥ शुम्भति । शुभ शुम्भ शोभायाम् । भावे अच् ॥

शुल्क । पु० न० घट्टादिदेये राजनिमित्तरूपेराजभागे । स्वामिनि शीराजभाग शुल्क० इत्युक्ते । स्थलजलपथादिना० वाणिज्याकारि

स्त्री। [illegible] नुसारेण॰ [illegible] । [illegible] ॥ [illegible] शुल्कप्रती [illegible] ॥ [illegible] स्करवा [illegible] ॥ यथा। यदानीतमर्त्तुः शुल्कं तत्पारकीयं तम्॥ [illegible] ॥ शुल्कयति। शुल्कार्थसमर्जने। च। अ॥

शुल्कशाला। स्त्री॰ [illegible]॥

शुल्वम्। न॰ ताम्रे॥ यज्ञकर्मणि॥ आचारे॥ जलसन्निधौ॥ शलति। शलगतौ। उल्वादयश्चेति साधुः॥ यथा। शुल्वयति। शुल्वयिता। शुल्वमानं॰ वाक्य। एरच्॰ पचाद्यच्। वरटे। रज्जौ॥

शुल्वा। स्त्री॰ रज्जौ॥

शुल्वारिः। पु॰ गन्धके॥

शुश्रुवान्। त्रि॰ श्रुतवति। शृणोतेः क्वसु॥

शुश्रूः। स्त्री॰ मातरि। यथा। शिशुः शुश्रूषणाच्छ्वश्रूरिति मत्वाभारतीं धर्मं॥

शुश्रूषणम्। न॰ सेवायाम्। शुश्रूषायाम्॥

शुश्रूषा। स्त्री॰ उपासने। परिचर्यायाम्। सेवायाम्॥ यथा। भगवान्। नाहमिज्याप्रजातिभ्यां तपसोपशमेन वा। तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा। इति भागवतं॥ श्रोतुमिच्छायाम्॥ शुश्रूषणम्। शुश्रूषा। सन्नन्त। अप्रत्ययात्॥

शुश्रूषुः। पु॰ परिचारके। श्रोतुमिच्छौ॥ यथा। खनन् खनित्रेण नरो वार्य्यधिगच्छति। तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति॥ शृणोतेः सन्नन्तादुप्रत्ययः॥

शुष। पु॰ गर्त्ते। शोषणे। इत्यजयपालः॥

शुषिः। स्त्री॰ शोषे॥ छिद्रे। शुषिरे। शोषणम्। शुषशोषणे। इगुपधात् कित् इतीन्। शुष्यत्यनेनेति वा॥

शुषिरः। पुं॰ न॰ गर्त्ते॥ वह्नौ॥ मूषिके॥ न॰ वंश्यादिवाद्ये। वायुना वाद्यमाने। यथा। वंशीऽथ पारी मधुरीतित्तरी मक्कशङ्खकाः। तीडकोमुरलीबुक्का सुषिराख्यस्वराभवः॥ सर्वकापालिकावंश

सर्मवमस्तथापर । एतैशुषिरभे
दास्तुकथिता पूर्वसूरिभिरिति ॥
विवरे ॥ त्रि॰ सरन्ध्रे । रन्ध्रान्वि
ते शुषिश्छिद्रमस्यास्तिनवाऽस्ति
। अषशुषौतिर ॥ यद्वा । शुष्य
ति । शुष शुषिमदिमुदौतिकि
रच ॥ शुष्कपौत्यन्य ॥

शुषिरा । स्त्री॰ नलीनामगन्धद्रव्ये ॥
शुषिराविद्रुमलताकपोतांघ्रिर्न
टौनलौत्यमर ॥ शुषिरमस्त्यस्य
अर्शआद्यच् ॥

शुषिन । पु॰ समौरणे । वायौ ।

शुष्क । त्रि॰ नौरसे ॥ शुषितः ।
शुष कइति॰ निष्ठातकारस्य
ककार ॥ यद्वा । शुष्यति । शुष॰
। स्वभूशुषमुषिभ्य कक ॥

शुष्कतर्क । पु॰ दुस्तर्के । अनु
याश्वकमानक्षीनतया॰ निरालम्ब
ने॰ ऽहंबैनाशिकादिकल्पितेऽनु
माने ॥

शुष्कपत्रम् । न॰ नीरसदले ॥ आ
तपादिशोषितपट्टशाके । नालि
ता॰ शुक्ता॰ इ॰ गौ॰ दे॰ भा॰
प्र॰ ॥ अस्यगुणायथा । शुष्कपत्र
पयोमिश्रं पित्तश्लेष्मज्वरापहम् ।
तच्छुष्कपत्रं जलदोषनाशनं विशेष
त पित्तकफज्वरापहम् । जल
स्थलस्यापिचपित्तहारकासुरोषनव्य
स्तनयोगकारकमितिराजवल्लभ ॥

शुष्कमत्स्य । पु॰ आतपादिनानी
रसीभूते ॥ शुष्कमत्स्यानमत्स्या:
स्यदुर्जराविड्विबन्धना ॥

शुष्कमांसम् । न॰ आतपादिना॰
अनार्द्रपिशिते । उत्तप्ते । वल्लूरे ॥ य
था । वृद्धानादोषलमांस॰ बाला-
बलतनुघ्नु । त्रिदोषकृद्धयालघु
ष्ट शुष्कं मूलकारगुरु ॥

शुष्करेवती । स्त्री॰ मातृकाविशेषे ॥

शुष्कल । त्रि॰ आमिषे ॥ शुष्क
मांसस्यापणिके । पिशिताशिनि
॥ शुष्कलीमत्स्य । शेषवृत्यण् ।
सञ्ज्ञापूर्वकत्वान्नवृद्ध्यभाव ॥

शुष्कली । स्त्री॰ शुष्कमांसे ॥ मांस
मात्रे ॥

शुष्कवृक्ष । पु॰ पाण्डुतरौ ।
धवे ॥

शुष्कव्रण । पु॰ किणे ॥

शुष्काङ्ग । पु॰ धववृक्षे ॥ त्रि॰ नि
स्तेजोऽवयवे ॥

शुष्काङ्गी । स्त्री॰ गोधायाम ॥

शुष्कार्द्रम न॰ शुण्ठ्याम् ॥

शुष्ण । पु॰ सूर्ये ॥ वह्नौ ॥ शुष्य
त्यनेन । शुष॰ । दृषिशुषिरसि
भ्य कित्न ॥

शुष्म । पु॰ सूर्ये ॥ अग्नौ ॥
अर्चिषि ॥ न॰ तेजसि ॥ ओज
सि । बले ॥ शुष्यतिजलम्॰ शु
षिरन्तर्भावितण्यर्थात्॰ अर्तिसर्ति

सिञ्चिभ्य कित् इति मनप्रत्यय
शुष्यत्यनेनवा । शुष॰ ॥

शुष्म । पु॰ अग्नौ । चित्रकवृक्षे ॥
सूर्य्ये । न॰ तेजसि ॥ शुष्यत्य
नेन । शुष॰ । अर्त्तिभ्योपीति म
निन अत्रापृक्तत्वगुण ॥
शि पयतिवा । वाकुमकारमालुक् ।

शुष्मी । त्रि॰ बलिष्ठे । मत्ते ॥
अस्त्यर्थे इनि ॥

शूक । पु॰ शूङ्गे । अनुकम्पायां
। क्रियारारभ्यस्मिन॰ अनुकम्पा
याम् । समुद्रादिरन्यतशूकाद्यका
दिकबरटकी ॥ श्यति । शीतशूकर
वो । उन्॰ कादयश्चेतिसाधु ॥
दयायाम् । न॰ शूकतृणे ॥

शूकक । पु॰ प्रावृटे । यवे । रसे

शूककीट । पु॰ हस्तिकी ॥ शूकका
नकीट । शूकयुक्त कीट ।
शाकपार्थिवादि ॥ कर्मादिभव
क कीटविशेषाश्चिक शूक
कीटस्य॰ भ्रमरप्रभेदोयम् ॥

शूककीटक । पु॰ शूककीटे ॥

शूकतृणम् । न॰ तृणविशेषे । शूकी ।
शूकाढ्य । कनिष्ठी ॥ शू॰ रा॰
राट ॥

शूकधान्यम् । न॰ यवगोधूमादौ ॥ शू
कस्यधान्यम् ॥

शूकपिण्डिका ।) स्त्री॰ शूकशिम्ब्याम् ॥
शूकपिण्डी ।)

शूकर । पु॰ कृमिवरविशेषे । वराहे
क्रोडे । शूकोस्त्यस्य॰ स्वरोमत्वा
त् । र ॥ यद्वा । शूकरात्ति । रा॰
पातश्चेतिक ॥ यद्वा । शू॰ इति
ध्वनिकरोति । अच्॰ टाबा ॥ शा
लिविशेषे ॥

शूकरकन्द । पु॰ वाराहीकन्दे ॥

शूकरपादिका । स्त्री॰ कोलशिम्ब्याम् ।
सुवरासिमद्धतिभपापमिवायाम ॥

शूकरमुखम् । न॰ नरकविशेषे ॥

शूकराक्रान्ता । स्त्री॰ वराहक्रान्ताया
म् ॥

शूकरी । स्त्री॰ शूकरस्त्रियाम् । ङा
तेरितिङीष् । वृन्दस्यामुपिशूक
पस्यवसुविद खेचनास्यन्तरस्वेच्छा
कामनयोतयोरपिसुधाविष्टाचका
स्यायनम् । रम्भाचातुपिशूकरीवप
रमप्रेमास्यदमतुल सवासीपि
सम । स्वकमंगतिभिशान्याभ्यभा
व सम ॥ वराहक्रान्तायाम् ।

शूकरेष्ट । पु॰ कशेरुणि । त्रि॰ शू
करप्रियवस्तुनि ॥

शूकल । पु॰ दुर्विनीताश्वे ।

शूकवान् त्रि॰ शूकयुक्ते ॥

शूकवती । स्त्री॰ कपिकच्छाम् ॥

शूकशिम्बा ।	स्त्री॰	कपिकच्छाम् ॥
शूकशिम्बि ।	पुं॰	
शूकशिम्बिका ।	स्त्री॰	
शूकशिम्बी ।		

। कौमुद्ः भा० ॥ शूकयुक्ताशिम्बा ० शिम्बि शिम्बिका० शिम्बीश ॥

शूकशिम्बा । } स्त्री०
शूकशिम्बि } पु० कपिकच्छाम् ।
शूकशिम्बी । } स्त्री०

मर्कट्याम् । कौच० भा० प्र० ॥

शूका । स्त्री० शूकशिम्बायाम् ॥

शूकाख्यम् । न० शूकतृणे ॥

शूकापत्ट्र । पु० तृणाख्याहिविषि । तृ णामणौ । कपूरद्ः भा० प्र० ॥ द्ू ० हा० ली ॥

शूतिपर्णं । पु० आरग्वधे ॥

शूद्र । पु० अवरवर्णे । वृषले । जघन्यजे ॥ अस्यान्नादिग्रहणं वैदिक ब्राह्मणेनकर्त्तव्यमित्याह्नाराय ण । शूद्रान्नं शूद्रसम्पर्कं शूद्रेण चसहासनम् । तेयान्तिनरकघोरं यावच्चन्द्रदिवाकराविति ॥ अस्योत्प त्तिरग्निपुराणे जातिमालायामुक्ता । तथाहि । आदौप्रजापतेर्जातामु खाद्विप्रा सदारका । वाह्वोश्च विशाजातास्त्वर्वश्याविजज्ञिरे ॥ पादाच्छूद्रस्ससम्भूतस्त्रिवर्णस्यवसे वक ॥ भीमनामासुतस्तस्यप्रदी पस्तस्यपुत्रक ॥ कायस्थस्तस्य- पुत्रोऽभूद्भूर्लिपिकारक । काय स्थस्यचपुत्रावित्यास्तानगतौतत ॥ चित्रगुप्तश्चित्रसेनोविचित्रस्तथैव च । चित्रगुप्तोगत : स्वर्गेविचित्रौ

नागसन्निधौ ॥ चित्रसेन पृथिव्यां वेइतिशूद्र प्रपद्यतइति ॥ शोच ति । शुचशोके । शुचेर्दश्चेतिरक्० दौर्घश्च ॥ अहहारेत्वाशूद्रेतिश्रुतौ तु० रूढेरभावात्० योगएवपुरस्कृत तथाचोत्तरतन्त्रे भगवान्व्यास । शुगस्यतदनादरश्रवणात्० तदाद्रव णात्सूच्यतेहि ॥ १ । ३ । ३४ । अ स्यार्थं । छान्दोग्येचतुर्थप्रपाठ के० शिष्यम्प्रतिशूद्रेतिसम्बोधना च्छूद्रेधिकारइतिचेन्न । शुगस्येति । जानश्रुते ० तदनादरश्रवणाद्याशु क्० तया० आशीघ्र० रैक्वगुरुं प्रे द्रवणात्सशूद्र । एतच्छिहत्त ० शू द्रेतिसम्बोध्य० सर्वज्ञत्वख्यापनाय रैक्वेणसूच्यते ॥

शूद्रक । पु० अतिकुत्सितेशूद्रे ॥ कुत्सायांकन् ॥

शूद्रकर्म्म । न० द्विजपरिचर्यायाम् ॥ यथाहभगवान् । परिचर्यात्मकं कर्म्म शूद्रस्यापिस्वभावजम् इति । स्वभावज रजउपसर्जनतमोगुणस्व भावाज्जातम् काशिकातोपि । द्विजातिसेवाऽर्च्चनिदेवताश्रयाधर्म्मो विधि शूद्रनिसर्गकर्म्म च । स्व भावकर्म्मप्रविहाययोन्यथास्थयत्नरे त्सोन्त्यजकर्म्मनर्म्मभागिति ॥ शू द्रस्यकर्म्म ॥ अथनिषिद्धानिकर्म्मा

क्रियया । शूद्राणां स्ववहारेऽतः यथे
ष्टधनसञ्चय । शुश्रूषा कृतका
र्य्यस्य कृतसन्तानकर्म्मणः ॥ अभ्य
नुज्ञातराजस्य शूद्रस्य जगतीपते ।
अल्पान्तरगतस्यापि दशधर्म्मगतस्य
च । आश्रमा विहिताः सर्व्वे वर्ज्ज
यित्वा निराशिषमिति पाद्मे स्वर्गख
ण्डे ॥

शूद्रकृत्यम । न॰ शूद्रकर्त्तव्यकर्म्म
णि ॥

शूद्रधर्म्मः । पु॰ शूद्रस्याचरणीय
वृत्ताचारे ॥ सप्तवर्णाश्रमशब्दे द्र
ष्टव्यः ॥

शूद्रप्रिय । पु॰ पलाण्डौ ॥ त्रि॰
तदिष्टद्रव्ये ॥

शूद्रप्रेष्य । पु॰ शूद्रस्य परिचारके
ब्राह्मणादौ ।

शूद्रयाजक । पुं॰ शूद्रसम्बन्धियज्ञा
द्यनुष्ठायिनि ॥ शूद्रस्य याजक ॥

शूद्रासनम् । न॰ पट्टे । मकुली ।
शूद्रस्याधिकारे ॥ स्मृति॰ त्रि॰
शुभ ॥

शूद्रागम्य । त्रि॰ शूद्राचाराकरणा
दध्ययनकर्त्तरि ।

शूद्रा । स्त्री॰ शूद्रजातौ । अन्यभार्य्या
यामपि शूद्रजातीयायाम् ॥ शूद्री शू
द्रस्य भार्य्या स्यात् शूद्रा तज्जातिरे
व चेत् अमर ॥ शूद्राणामसत्पूर्व्वा
जातिरिति टाप् ॥

शूद्रान्नम् । न॰ शूद्रस्याभिमतान्नं ॥
यथा । शूद्रान्नेन तु भुक्तेन उदरस्थे
न योऽमृतः । स वै खरत्वमुष्ट्रत्वं शूद्र
त्वञ्चाधिगच्छति ॥

शूद्राभार्य्य । पुं॰ शूद्रास्वामिनि ।
शूद्रा भार्य्या यस्य स ॥

शूद्राणी । स्त्री॰ प्रियङ्गुवृक्षे ॥

शूद्रावेदी पु॰ सवर्णापरिणीयकृत
शूद्राविवाहे ॥ शूद्राविन्दति॰ प
रिणयति विदधीति ॥ शू
द्रावेदीपतत्यत्रे रुतथ्यतनयस्य च ।
शौनकस्य सुतोत्पत्त्या तदपत्यतया भृ
गोः ॥ अपिच ॥ शूद्रागमनमारो
प्य ब्राह्मणोयान्त्यधोगतिम् । जनयि
त्वा सुतं तस्यां ब्राह्मण्यादेव हीयते ॥

शूद्री । स्त्री॰ शूद्रस्य भार्य्यायाम् ।
भिन्नजातीयायाम् शूद्रभार्य्यायाम् ॥

शूद्रक्षौ । पु॰ यौगादाव्या
यामितिकोष ॥

शून । } त्रि॰ शोथिनि, स्फीते ।
शूनवान् । }
श्वित । उत्स्फीयतेस्म । कर्म्मणि
ष्टयतेः क्तवतू । यजादित्वा
त् सम्प्रसारणे पूर्व्वरूपे ओदितश्चे
ति नत्वे चकारकृतिदीर्घे ॥

शूनाय । त्रि॰ । उच्छूनतायां ॥

शून्यम् । न आकाशे ॥ बिन्दौ ।
त्रि॰ निर्ज्जनदेशादौ । तुच्छे । रि
क्ते । सु॰ मा॰ रीता॰ रू॰ भा॰ ॥

अविद्यजीवनशून्य दिकशून्याचेद्बान्धवा । पुत्रहीनगृहशून्यसर्वशून्यादरिद्रता ॥ खपुष्पादिवदत्यन्ताभावरूपे ॥ यथा । मृगतृष्णाम्भसि स्नातः खपुष्पकृतशेखरः । एष वन्ध्यासुतो याति शशशृङ्गधनुर्द्धरः ॥ शुनेर्हितम् । शुन सम्प्रसारणाच्चदीर्घत्वमितियत् ॥

शून्यकम् । न० शून्यार्थे ॥ त्रि० तुच्छे ॥ शून्यरिक्तइतियावादिषुपाठात्कन् । स्वार्थेकोवा ॥

शून्यता । स्त्री० चित्तस्यदोषे । रागद्वेषादितीव्रवासनयाचित्तस्यस्तब्धीभाविकषाये । शून्यतायाम् ॥ ध्यानचिन्ताहितानांहि शून्यताश्वासतापकृत् ॥ शून्यस्यभाव. तल् ॥

शून्यतिथि । स्त्री० तिथिविशेषे ॥ यथा । अष्टमीनवमीचैव पक्षयोरुभयोरपि । माघवैशाखयोस्याज्यापक्षयोरुभयोस्तथा । ज्यैष्ठेचयोदशीनिन्द्यासिते० कृष्णेचतुर्द्दशी । आषाढेकृष्णपक्षषष्ठी० शुक्ले च सप्तमी । द्वितीयाचतृतीयाचश्रावणेसितकृष्णयोः । प्रथमाचद्वितीयाचनभस्ये मासिनिन्दिता ॥ दशम्येकादशीनिन्द्या० मासीषेशुक्लकृष्णयोः । अन्नचतुर्द्दशीशुक्लाकृष्णपक्षेतुपञ्चमी ॥ सप्तमीचाष्टमीसौम्येपक्षयोरुभयोरपि । पौषेपक्षद्वयेचैवचतुर्थीपञ्चमीतथा ॥ माघेतुपञ्चमीषष्ठीकृष्णेशुक्लेयथाक्रमम् । तृतीयाचचतुर्थीचफाल्गुनेसितकृष्णयोः ॥ तिथयोमासशून्याख्याबित्तवंशविनाशिका । आसु आव प्रकुर्वीतनैवमङ्गलमाचरेदितिवशिष्ठ ॥

शून्यनक्षत्रम् । न० शून्यभे ॥ यथा । अश्विनीरोहिणीचैवशून्यभेपरिकीर्त्तिते । चित्रास्वातीचवैशाखे० ज्यैष्ठेविश्वेज्यतारके ॥ भगवासवमाषाढे० श्रावणेहरिविश्वभे । नभस्येचारुणाख्यञ्चमजपादश्वयुज्यपि ॥ कार्त्तिकेपित्र्यवह्न्योश्चसौम्येचित्रादिदैवते । पौषेहस्तराद्रौ स्युर्माघेमूलश्रविष्ठाभम् ॥ तपस्येश्वभरणीशून्यभान्याहुरग्रजा. । एषुयत्कृतकर्मधनंसद्वविनश्यति ॥

शून्यभम् । न० शून्यनक्षत्रे ॥

शून्यमध्य । पु० नले । पोटगले ॥

शून्यराशि । पु० मासविशेषगतराशिविशेषे ॥ यथा । घटमत्स्यवृषायुग्म मेष कन्या सवृश्चिका. । तुलाचापकुलीराख्यामृगसंज्ञाश्चराशय ॥ चैत्रादौराशिशून्याख्याबित्तवंशविनाशदा. ॥

शून्यलग्नम् । न॰ दग्धलग्ने ॥ यथा । पञ्चादितस्त्वोजतिथौ घटैणौ मृगेन्द्रनक्रौ मिथुनाङ्गने च । चापेन्द्रमेषौ कर्कटझषान्त्यौ गोन्त्यौ च नेष्टे तिथिशून्यलग्ने • तस्यातस्ता तिथौ• दृष्ट् लग्ने नेष्टे• निषिद्धे ॥

शून्यवादी । प॰ माध्यमिके । सौगते ॥ अस्य मतं यथा । विज्ञान घणिकमात्माविद्या द्व्यनिमेयमत् । अनयस्यानुपलब्धत्वाच्छून्यं माध्यमिका जगुरिति । अनयापवादो यथा । अभावोयेनभावेनज्ञायते शून्यवादिनातस्य भावस्य सत्तावीदकेन निवार्यते ॥ अपिच । शून्यस्यापिहि शून्यत्वं तत्साक्षिसत्तोच्यते । असाक्षिक चेतत्त्सिद्ध्यमाक्षिवत्सयात्स्वयमप्रमिति ॥ शून्यवद्स्थवद्यम् । आ वग्यकेणिनि ॥

शून्यवृत्ति । स्त्री॰ अभाववृत्ती ॥

शून्यशून्य । त्रि॰ शून्यप्रकारे । अत्यर्थप्राये ॥ प्रकारेगुणवचनस्येतिद्विभाव ॥

शून्या । स्त्री॰ नलयाम् ॥ तूलिकायाम् ॥ महाकागटकिन्याम् । नागधूसर॰ नागफणाय सर॰ कु॰ भा॰ ॥ वन्ध्यायाम् ॥

शून्यालय । पु॰ निजनमन्दिरे ॥

शूर । पुं॰ भटे । वीरेयुद्धसमर्थ्य, स्याहशक्ति । यादवे । वसुदेवस्यपितरि ॥ सूर्ये ॥ शूरयति । शूरवीरविक्रान्तौ । चुरादाव ॥ यद्वा । शवति । शु सौक्ष्म्यगत्योः । शुसिचिमीनांदीर्घश्चेतिक्रन् । सिंहे । शूकरे ॥ कुक्कुरे ॥ चित्रकव्याघ्रे ॥ चित्रकवृक्षे ॥ साले ॥ लकुचे ॥ मसूरे ॥ रगणे ऽ । ऽ ॥

शूरक । पु॰ कोकिलाख्ये ॥

शूरण । पु॰ अर्शोघ्ने । कन्दे ॥ अस्य गुणा यथा । शूरणोदीपनोरूक्षः कषायः कण्डुकृत्कटुः । विष्टम्भी विशदोरुच्यः कफार्शःकृन्तनोलघुः ॥ विशेषादर्शसेपथ्यः प्लीहगुल्मविनाशनः । सर्वेषांकन्दशाकानां शूरणः श्रेष्ठउच्यते । दद्रूणां रक्तपित्तानां कुष्ठानांनहितोहि सः । सन्धानयोगसम्प्राप्तः । शूरणोगुणकृत्परः । शूयते । शूरीहिंसायाम् । बहुलमन्यत्रापीतियुच् । वर्षारित्युक्ता ॥

शूरणोद्भव । पु॰ हरिद्रपक्षि णि ॥

शूरदेव । पुं॰ आर्य्यगद्भेषि ॥

शूरसेन । पु॰ चन्द्रवंशीयनृपतिविशेषे ॥ शूरा सेनायांयस्य । शूराणां सेनासौयस्यवा ॥ पु॰ भू॰ मि॰ मथुरादेशेषु ॥

शूर्प्प । पु • द्रोणद्वयात्मकपरिमाणे ॥ पुं • न • प्रस्फोटने । सूप • इ • भा • । शूर्पयति । शूर्प्यतेऽनेनवा । शूर्पमाने । पचाद्यच् • पुसीति घोषा ॥ यद्वा । शृणाति । शृ • । सुशृभ्यांनिच्चेतिप । बाहुलकादुत्वम् • रपरत्वम् • हलिचेतिदीर्घ ॥ न • शोधितभाजने ॥

शूर्प्पक । पु • कामदेवारातावसुरविशेषे ॥

शूर्प्पकर्ण । पु • गजे । नागे । गणेशे । विघ्नराजे ॥ शूर्पाविवकर्णौ यस्य ॥

शूर्प्पकाराति ।) पुं • कामदेवे ।
शूर्प्पकारि ।)

शूर्प्पणखा । स्त्री • रावणभगिन्याम् ॥ शूर्प्पेनखानियस्याः । पूर्वपदादितिणत्वम् । नखमुखात्सज्ञायामितिनङीष । केवलयौगिकत्वेतु ङीष् ॥

शूर्प्पणखी । स्त्री • रावणस्वसरि ॥ शूर्पशोधितभाजनम् • नखविदूषयतीतिधातुः । शूर्पेण • शोधितभाजनेनयस्मादिक्रियानखयतिदूषयतीतिशूर्पणखी ॥ यद्वा । शूर्पाकाराणिनखानियस्याः • साङीष् ।

शूर्प्पपर्णी । स्त्री • मुद्गपर्ण्याम् ॥

शूर्प्पवात । पं • सूर्पवायौ । कुत्सफाले ॥

शूर्प्पश्रुति । पु • हस्तिनि ॥ इ • हा • ली ॥

शूर्प्पी । स्त्री • शूर्पणखायाम् ॥ गौरादित्वान ङीष् ॥ क्षुद्रसूर्पे ॥

शूर्म्म । पु •)
शूर्म्मि । स्त्री •)
शूर्म्मिका । स्त्री •) शूर्मिकायाम्
शूर्म्मी ।)

। लौहप्रतिमायाम् ॥

शूल । पुं • न • आयुधविशेषे वर्छा • भाला • इ • भा • प्र • । मृत्यौ ॥ केतने ॥ विष्कम्भादिषुनवमयोगे • तज्जातस्यफल यथा । भीतोदरिद्रोदयिताप्रियश्चशूलोऽङ्गशूलइवस्वबन्धो । विद्यामयाभ्यारहितोथशूलोकरोतिलेकेनहितंकदाचित् ॥ सुतीक्ष्णे ॥ वधहेतावग्र कीलके ॥ व्यथायाम् ॥ विक्रेतव्ये ॥ यथा । अट्टशूलाजनपदा शिवशूलाश्चतुष्पथा । प्रमदाः केशशूलिन्योभविष्यन्तिकलौयुगे ॥ इतिमहाभारतेआदिपर्व ॥ रोगविशेषे ॥ अस्यदानादिकं भावप्रकाशे • शूलाधिकारेद्रष्टव्यम् ॥ राजकोरादिमध्यान्तेपुनश्चान्त्यादिमध्यत । मध्येचान्तेतथादोषदोषैर्नाल्पातिशूलकृत् ॥ भुक्तेजीर्यतिजीर्णेऽन्ने जीर्णेभुक्तेचजीर्यति । जीर्णेजीर्यतिभुक्तेचदोषैर्नाल्प •

तिलकक्रमात् ॥ | दीर्घवातपि त्तकफै शूलकृच्छूलाख्योरोग । रविवायवच्चरात्यन्तोतयोरादि मध्यान्तेपुभागेषु वातेनशूलकृत् नभवतिगमप्राप्नोति । अस्याभवति ईषत्प्रादुर्भवति । अतिभवतिच त्यन्तभवति ॥ रात्र्यन्तोरम्भ्यादिम ध्यत अत्यादिमध्येपुपित्तेनशूलकृत् नभवत्यावल्यन्तात्तुभवति ॥ तयोरवम ध्येत्यन्त्येचादौचकफनशूलरोगोना स्तीतिभवतीत्यर्थः । । भुक्ताद्विति । अन्नेभुक्तेभक्ष्यवकृतेसतिजीर्यतिपा कं गच्छति । जीर्णेपाकं गतेअन्ने च ति सर्वस्यसम्भवति । तेनायमर्थः । भुक्तेअन्नेवातशूलकृत्नभवति ज्यन्तोभवतीत्यर्थः । जीर्यतिच त्याभवति । जीर्णेचातिभवति ॥ पित्तशूलकृत् जीर्णेऽन्ने । भुक्ते ऽल्पा । जीर्यतिचातिभवतिश्लेष्म शूलकृत् जीर्णेऽन्ने । जीर्यति त्वल्पा । भुक्तेऽतिभवति ॥ शूल ति । शूलरुजायाम् । कृत्प्रत्ययेति कः ॥

शूलघ्नी । स्त्री॰ मालादूर्वायाम् ॥

शूलघातनम् । न॰ मण्डूरे ॥

शूलघ्न । पु॰ तुम्बुरुवृक्षे । तीक्ष्ण फले ॥ त्रि॰ शूलघातके ॥

शूलटिट् । पु॰ शिग्रुणि ॥

शूलधन्वा । पु॰ शम्भौ । शिवे ॥

शूलधर । पु॰ शिवे ॥ त्रि॰ शूल धारिणि ॥

शूलधरा । स्त्री॰ दुर्गायाम् ॥

शूलधारी । पु॰ शूलिनि ॥

शूलधारिणी स्त्री॰ दुर्गायाम् ॥

शूलधृक् । पु॰ शिवे । स्त्री॰ दुर्गा याम् ॥

शूलनाशनम् । न॰ सौवर्चलल वणे ॥

शूलपर्णी । स्त्री॰ गौडदेशप्रसिद्धाया लतायाम् ॥

शूलपाणि । पु॰ ईश्वरे । शिवे । शूलपाणिर्महेश । प्रत्यर्थार्थ्य परेषितासमम्भोभवत ॥

शूलप्रोत । पु॰ नरकविशेषे ॥

शूलभृत् । पु॰ शङ्करे ॥

शूलशत्रु । पु॰ एरण्डवृक्षे ॥

शूलहन्त्री । स्त्री॰ यवान्याम् ॥

शूलहृत् । पु॰ सूपधूपने । हिङ्गु नि ॥

शूला । स्त्री॰ पण्ययोषिति । दुष्ट भार्यावेश्यायाम् ॥

शूलाकृतम् । त्रि॰ शूलविद्धपक्वमांसा दौ । भटित्रे । शूल्ये । शूला॰ कृ॰ भा॰ प्र॰ ॥ शूलिनकृतम् । शूला त्पाकेकृतिडाच् ॥

शूलिक । पु॰ शशके ॥ न॰ शू ल्यं अङ्गारपरिपाचितमांसे ॥

शूली । पु॰ शिवे । महेश्वरे ॥ यथा

। शूलं शूलीचक्रमादाय चक्री पाशं
पाशी वज्रमादाय वज्री धावन्त्येते पृ
ष्ठतः पार्श्वतो वा दुर्गा दुर्गा वादिनो
रक्षणाय ॥ त्रि॰ शूलरोगयुक्ते ॥
यथा । वर्जयेद्विदलं शूली कुष्ठी मांसं
ज्वरी स्त्रियमिति ॥ शूलमस्यास्ति ।
इनि ॥
शूलिक । पु॰ भाण्डीरवृक्षे ॥
शूलिनी । स्त्री॰ दुर्गायाम् ॥
शूली । स्त्री॰ तृणप्रभेदे । शूलपर्ण्याम्
। धूम्रमूलिकायाम्
शूलोत्खा । स्त्री॰ सोमराज्याम् ॥
शूल्यम् । त्रि॰ शूलके । लोहशलाक
यापक्वमांसे । शूलाकृते ॥ शूले संस्कृ
तमांसम् । तत्र संस्कृतमित्यर्थे ॰ शू
लोखाद्यत् ॥ तत्पाकप्रकारो य
था । कोलखण्डानि मांसानि ग्रथि
तानि शलाकया । घृतसैन्धवदध्याक्ता
निर्धूमे दहने पचेत् ॥ तत्तु शूल्यमि
ति प्रोक्तं पाककर्मविचक्षणैः । शू
ल्यं मांसं सुधातुल्यं रुच्यं वह्निकरं लघु
। कफवातहरं बल्यं किञ्चित्पित्तक
रं हितम् ॥ अन्योपि । अङ्गारकर्प
रं भ्राष्ट्रस्थूलयन्त्रपुटितश्च । भर्ज
नविधिना प्रोक्तः सूपकारविशारदैः
॥ जलेन सह दत्वा पूर्वं प्रोतं शूलान्तरा
न्तरम् । दध्यार्द्रं लवणं सिक्तं
मं साङ्गारपाचितम् ॥ तच्छूल्यन्तु
सुधातुल्यं रुच्यं वह्निप्रदं लघु । तद्व

वाङ्गारतप्तन्तुपक्वं बलशातनम् ॥
शूल्यकम् । त्रि॰ शूलविद्धपक्वमांसे ।
भटित्रे । शूल्यमेव । कन् ॥
शृगाल । पु॰ शिवायाम् । भूरिमा
ये । गोमायौ । मृगधूर्त्तके ॥ सि
याल॰ इ॰ भा॰ ॥ सृजतिमायाम्
। सृज॰ आलुकात्कालन् । न्य
ङ्क्वादि । पृषोदरादि ॥ असृ
गालिश । पृषोदरादि ॥ सृगं
भिन्दिपालमलतीति वा । पूर्ववत्
॥ तालव्यादि । तालव्यापि दन्त्या
शशस्वशस्वलशूकरा । रश्मनापि च
जिह्वायां शृगाल कश्यपोपि चेति श
ब्दभेदात् ॥ दैत्यभेदे ॥ वासुदेवे ॥
खले ॥ निष्ठुरे ॥ भीरौ ॥
शृगालकण्टक । पु॰ सियालकांटा इ॰
भा॰ प्र॰ क्षुपे ॥
शृगालकोलि । पुं॰ क्षुद्रबदर्याम् ।
गोपघण्टायाम् । झडबेरी इ॰
भा॰ ॥
शृगालघण्टी । स्त्री॰ कोकिलाक्षे ॥
शृगालजम्बू । स्त्री॰ गोडुम्बे ॥
घोंटाफले ॥
शृगालविन्ना । स्त्री॰ पृश्निपर्ण्याम् ॥
शृगालिका स्त्री॰ शृगालयोषिति ।
शिवायाम् ॥ लोमालिकायाम् ।
दीप्तजिह्वायाम् । लोमडी इ॰
भा॰ प्र॰ ॥ त्रासात्पलायने । विद्रु
तौ । भाजड़॰ इ॰ भा॰ प्र॰ ॥

शृगाली । स्त्री० विद्रवे । डमरे । भीत्यापलायने ॥ कोकिलाक्षे ॥ विदार्याम् । सियाला० इ० भा० ॥

शृङ्खल । त्रि० पुंस्कटीवस्त्रबन्धे । कौधनी० इ० भा० प्र० । पुंस्कटीभूषणे । तगडी० इ० भा० प्र० । निगडे । पुरुषप्रचारनिरोधके । लोहरज्जौ । बेडी० इ० भा० प्र० । बन्धने ॥ शृङ्गं खलति । खल सञ्चये । अच् । पृषोदरादिः ॥

शृङ्खलकः । पुं० दारुविकारशृङ्खलाप्रायबन्धनयुक्ते० करभे । करभाः स्युः शृङ्खलका दारवैः पादबन्धनैरित्यमरः । शृङ्खलं बन्धनमस्य । शृङ्खलस्य बन्धनकारकत्वात् कन् उष्ट्रे ॥

शृङ्खला । स्त्री० पुंस्कटीवस्त्रबन्धे ॥ निगडे ॥ कपाटादिबन्धयोग्यवस्तुनि । सङ्कल० सांकर० इ० भा० प्र० ॥ परम्परायाम् । परिपाट्याम् ॥ शृङ्गं प्राधान्यं खलति । खल० । चलनसञ्चयार्थः । अच् । पृषोदरादिः ॥ शृङ्गात् प्राधान्यात् खलत्यनेन । पुंसीति घ । भिदाद्यङ् वा । पृषोदरादिः ॥ कोकिलाक्षे ॥

शृङ्गली ।) स्त्री० कोकिलाक्षे ॥
शृङ्गलीका ।)

शृङ्ग । पुं० कूर्चशीर्षकाख्ये । औषधौ । मुनिविशेषे ॥ न० प्रभुत्वे ॥ शिखरे । कूटे । पर्वतोपरिभागे ॥ चिह्ने । क्रीडाम्बुयन्त्रे ॥ विषाणे ॥ उत्कर्षे ॥ पर्वतसमभूभागे । सानौ ॥ महिषादिशृङ्गनिर्मितवाद्यविशेषे ॥ यथा । अथिवद् नारायणमौद्धनुषात् प्राप्त समुत्थाय धनुषस्तत्पात् । प्रबोधयन् शृङ्गरवेण पाण्डवान् विनिर्गतो वत्सपुरस्थ रघुवीरहरिः ॥ शृणाति । शॄ० । शृणातेर्ह्रस्वश्चेति० गन्नुट् च ॥ कामोद्रेके ॥

शृङ्गकः । पुं० जीवकवृक्षे ॥ विषविशेषे ॥ परीक्षाऽस्य यथा । यस्मिन् गोशृङ्गकोषे दुग्धं भवति लोहितम् । स शृङ्गक इति प्रोक्तो द्रव्यतत्त्वविशारदैरिति ॥

शृङ्गकन्द । पुं० शृङ्गाटके ॥

शृङ्गजः । त्रि० शृङ्गजाते ॥ न० अगुरौ ॥

शृङ्गमूल । पुं० शृङ्गाटके ॥

शृङ्गमोही । पुं० चम्पके ॥

शृङ्गला । स्त्री० वनशृङ्ग्याम् ॥

शृङ्गवान् । पुं० कुलाचलोत्तरवर्षि सहस्रयोजनविस्तीर्णे पूर्वतोदीर्घे कुरुवर्षमर्यादागिरौ ॥

शृङ्गवेरम् । न० आर्द्रके । शुण्ठ्याम् ॥ शृङ्गमिव बेरं शरीरमस्य ॥ राममित्रनिषादाधिपतेर्गुहस्य पुरे ॥

शृङ्गवेरकम् । न० आर्द्रके ॥

शृङ्गवेरपुरम् । न० तीर्थविशेषे । अ स्यामेगङ्गामुत्तीर्णः ॥

शृङ्गवेराभमूलक । पु० गुन्द्रायाम् । गोंदपटेरा० हू० भा० प्र० ॥

शृङ्गाट । पु० अम्बुकण्टके स्वादु कण्टके ॥ कामाख्यादेशस्थपर्वत विशेषे । दीपवत्या पूर्वतस्तुशृङ्गा टोनामपर्वत ॥ न० चतुष्पथे ॥

शृङ्गाटक । पु० वारिकण्टके ॥

शृङ्गाटकम् । न० चतुष्पथे । वारि कण्टके । सिँघाड़ा० हू० प्र० जल जलताफले । गुणायथा । शृङ्गा टकं हिमस्वादुगुरुवृष्य कषायकम् । ग्राहिशुक्रानिलश्लेष्मप्रदंपित्तास्र दाहनुत् । मासशृङ्गाटके ॥ शृ ङ्गप्राधान्यमटति । अट० । कर्म ण्यण् । सञ्ज्ञायांकन् ॥

शृङ्गाटी । स्त्री० जीवन्त्याम् ॥

शृङ्गार । पु० सुरते । गजभूषणे । राजमण्डने । मण्डने । नाट्यर से । तल्लक्षण यथा । पुंसः स्त्रियां स्त्रियाः पुंसि सम्भोग प्रतियास्पृहास । शृङ्गारइतिख्यातोरतिक्रीडादि कारणम् । अपिच । शृङ्गंहिमन्म थोद्भेदस्तदागमनहेतुक । उत्तम प्रकृतिप्रायोरस शृङ्गारइष्यते० इ ति । शृङ्गप्राधान्यमियर्ति । ऋ० । कर्मण्यण् । यद्वा । शृङ्गा रंशृङ्गमालिनि० शृङ्गारिरन् । तुन्० गुरु० इगुप । न० लव ङ्गे ॥ नागसम्भवे । चूर्णे । का लागुरुणि ॥

शृङ्गारक । पु० शृङ्गारे ॥ स्वा र्थेकः । न० सिन्दूरे । त्रि० शृ ङ्गवति ॥ शृङ्गमस्त्यस्य । शृ ङ्गवृन्दाभ्यामारकन् ॥

शृङ्गारभूषणम् । न० सिन्दूरे ॥

शृङ्गारयोनि । पु० कामदेवे ॥

शृङ्गारित । त्रि० मण्डिते । अल ङ्कृते । सिंगारा० हू० भा० । शृ ङ्गारोमण्डनसञ्जातमस्य । तार कादित्वादितच् ॥

शृङ्गारी । पु० गजे । द्विपे । पूगे । क्रमुके । पद्मरागे । माणिक्ये ॥ त्रि० सशृङ्गारे ॥ सुवेषे ॥ शृ ङ्गारोऽस्त्यस्मिन्नृषा । अतइनिठना विति ॥

शृङ्गि । स्त्री० मत्स्यविशेषे । शृङ्ग्या म् ॥

शृङ्गिक । पु० न० विषप्रभेदे ॥

शृङ्गिका । स्त्री० प्रतिविषायाम् ॥

शृङ्गिण । पु० मेषे ॥ शृङ्गमस्त्यस्य । ज्योत्स्नातमिस्राशृङ्गिणोर्ज्स्वि नामृङ्गादिनच् निपात्यते ॥

शृङ्गिणी । स्त्री० माहेय्याम् । सौर भेय्याम् । गवि ॥ शृङ्गमस्त्यस्या । अतइनि: ॥

शृङ्गी । पुं० नगे । ऋषिभिन्ने ऋषौ ॥ पर्वते ॥ वर्षपर्वतविशेषे ॥ ऋ
साकर्षितनये ॥ वटे ॥ प्रलयाब्धि
सिशृङ्गवतिमत्स्यविशेषस्वरूपेश्वरे
॥ अस्त्यर्थे शृङ्गी स्यात् । त्रि
॥ त्रि० शृङ्गयुक्ते ॥

शृङ्गी । स्त्री० विषायाम् । अतिवि
षायाम् ॥ कुण्डलादिभूषणार्थस्व
र्णे ॥ मीनविशेषे । मद्गुरप्रिया
याम् । सींगीमत्स्यो० रू० भा०
प्र० ॥ कर्कटशृङ्ग्याम् । शृङ्गीतु
वातघ्नमीरितश्वासश्लेष्मापहा ।
रसितत्त्वकषायाबलस्वीकव्यास्त्
त बुधैरिति ॥ ऋषभौषधे । वीर
कौषधे । कर्कटशृङ्ग्याम् । यथा
स्यात् । शृङ्गीकषायातिक्तो
ष्णाकफवातक्षयज्वरान् । श्वासोर्ध्व
वाततृट्कासहिक्कारुचिवमीर्हरेत्
॥ शृणाति । शॄ० । शृङ्गादयश्च
इति० गन्० श्रवत्व० नुडागम
श्च । पुंयोगादिति० आदेरित्यत्र
ङीष् । गौरादित्वात् ङीष् ॥

शृङ्गीकनकम् । न० कुण्डलाद्यल
ङ्कारसुवर्णे ॥ शृङ्गियामो० शृ
ङ्गीकनकमिति । कनीदौमी । कुम् ॥

शृणिः । पुं० स्त्री० अङ्कुशे । चाक
स० रू० भा० प्र० ॥ शृणाति ।
शॄ० । सृघृषिभ्यां कित्सिरिति
वाक्यात् ॥ दन्त्यादिरेवसाधुः ॥

शृत । त्रि० क्षीरादिविषये पाके ॥
श्रायतेस्त । श्रापाके । शृत पाके०
इतिसाधु । अनेनश्रातिश्रायत्यो
रद्रादिभ्यः क्षीरहविर्भ्यांचान्यत्रा
शृभावेनिपात्यते० क्षीरहविषि पा
के । यथा० शृतं क्षीरं० स्वयमेव
निष्पन्नं पक्वं चेत्यर्थ । शृत हविः
स्वयमेव ॥ क्षीराज्यपयसां पाके ॥
क्वथिते ॥ इतिरत्नमालाभट्टमल्लि
नाथ ॥ यथा । ....
ईषत्पक्वौ यथाविधि . विधिर्देव
तोभ्यं तं यदिति शृताविधायता: ॥

शृदर । पुं० भुजङ्गमे ॥ शृणाति
। शॄ० । शदरादयश्च शदरप्रत्ययान्ता
निपातिता ॥

शृधु । पुं० गुदे । अपाने । शर्धुगु
दवत्त्यानम् । .... ॥

शेखर । पुं० आपीडे । शिखाशिरः
समानार्थाम् ॥ शिरोभूषणे ॥ अ०
वतंसे ॥ शिखामणौ ॥ शिखरस्य
ति । शिखिनामी । बाहुलकादर ।
। अपाममध्यात्मत्वात्तनुम ॥ प
रमात्मा विज्ञायपक्वमेधमेदे० ॥ ५०।०॥

शेखरित । त्रि० मुकुटवत्त्याम् ॥

शेखरी । स्त्री० वन्दाकाम् ॥

शेप : । पुं० शिश्ने । शेपांसि ॥ शेते
इति । पाति । शीङ्पुछम्पे ॥ काकुश
ब्दादुपसंख्या : ॥

शेप : । न० शिश्ने ॥ शीङ्विता : पाति ।

वङ्शीङ्भ्यांरूपसंगयो फुट
चेत्यसुन् ॥
शेपाल । पुं० न० शैवालि ॥ इ०
श० र० लौ ॥
शेफ । पुं० मेढ्रे । शिश्ने ॥ शेते
रेत पातानन्तरम् । बाहुलकात्
फप्रत्यय ॥
शेफ । पुं० मेढ्रे । शिश्ने ॥ शेतेरे
त : पाते । शीङ्० । वङ्शीङ्-
भ्यांरूपसंगयो फुट्चेत्यसुन् ।
अत्रपक्षगेंद्वितीयेप्यागमे ॥
शेफसी । स्त्री० शिश्ने ॥
शेफालि । स्त्री० शेफालिकायाम् ॥
शेफालिका । स्त्री० सुवहायाम् ।
निर्गुण्ड्याम् ॥ नीलिकायाम् ।
हारशृङ्गार० पारिजात० इ०
भा० प्र० पुष्पवर्गे । शिउली०
गौ० दे० भा० प्र० ॥ चत्वारि
शेफालिकामाने । शियलीतिख्या
तनीलपुष्पायांशेफालिकायामिति
केचित् । शेफालिकाद्वितयशेफा-
लिकामाने० निर्गुण्ड्यादिद्वय
नीलपुष्पशेफालिकायामितिकेचि
त् । न्यवारीतिख्यातपुष्पविशेषे०
इतिचान्ये ॥ श्वेतरत्नावल्युक्ता ।
पर्यायास्तु । शेफाली० मल्लिका०
रजनीहासा० निशिपुष्पिका० सा
शुक्लाचेत्० श्वेतसुरसा० भूतवे
शीति ॥ राजनिर्घण्टोक्तास्तु ।
शुक्लाङ्गीश्वेतमञ्जरी० विजया०
वातारि० भूतकेशीति ॥ शेतेवृ
त्तिवे० शीङ्विच् । शयफालय
ति । शिफलाविसरणे । अच् ।
स्वार्थेकन्कृत्वा ॥ शेफालिकाया
पुष्पम् ॥ शेफालिका । पुष्पमूले
लुवकुलमिति० अनुदात्तादेरञोऽ
वकलुप् । लुपियुक्तवत् ॥ शेर
तेशेफाबलयोऽस्याम् । वा । ङीष्
। सूर्यकन् ॥
शेफाली । स्त्री० निर्गुण्ड्याम् । शे
फालिकायाम् । न्यवारीतिख्याते
पुष्पवर्गे । हारशृङ्गार० इ० च०
भा० प्र० ॥ शेरतेशेफाबलयोऽ
स्याम् । वाङीष ॥ नीलसिन्दुवा
रे । सभालू० इ० भा० ॥
शेमुषी । स्त्री० बुद्धौ । प्रज्ञायाम् ।
मतौ ॥ शेतेवृत्तिवे० शीङ्विच् ।
शे० मोह० तमुष्णातीति० शेमु
षी । मुषस्तेये । मूलविभुजादि
त्वात्क । गौरादित्वात्ङीष ॥
शेयाल । पुं० जलनील्याम् । शैव
ले । जलेशेते० तिष्ठति । शीङो
वालन् ॥ बाहुलकात्तद्वय ॥
शेलु । पुं० श्लेष्मातके । बहुवार
के । लसोड़ा इ० भा० प्र० ॥
शिलति । शिल० । बाहुलकादु ॥
शेव : । पुं० पत्नी ॥ शिश्ने ॥
चि० उन्नते ॥ शेते । इण्शीभ्यां

स्त्विति॰ शीङ्शयन । शेतेऽस्यर्थ म् । शिवयङ्कतिसाधु र्वो ॥ सु ख ॥

शिवधि । पु॰ मामान्यनिधौ शि कल्याणे॰ शोईवा॰ अवधि । तत्पु रुषसमासत् ॥ यथा । शिवे ऽस्मिनशिवसुखम् । दृष्टशोभ्यावन् । शवधीयतेरस्मिन् । कर्मण्यधिक रणे चेतिकि ॥

शिवलम् । न॰ शैवाले ॥

शिवालम् । न॰ शैवले ॥ अशिवतेति बति । शीर्षेध कलाबलजबाल मङ्गतिवालम् ॥

शिवालिनी । स्त्री॰ नद्याम् ॥

शिवाली । स्त्री॰ आकाशमांस्याम् ॥

शिव । पु॰ भगवतीद्वितीयायाम् र्यौ ॥ यथा । एकाभगवतीमूर्त्ति र्ज्ञानरूपाशिवामला । वासुदेवाभि धानासामुणतीतासुनिष्कला ॥ द्वितीयाकालसज्ञाऽन्यातामसीशिव सज्ञिता । निष्कलिसकलाया- स्तेवेद्याशेषरमातनुर्विनिर्मी ४८ ऽध्याय ॥ सङ्कर्षणे । सौ रपायो । बलदेवे ॥ वधे ॥ अनन्ते । नागजातिराजौ । फणास हस्रसयुक्ते ॥ शिष्यती । शिष्कवि शिषणे॰ शिषअसर्वोपयोगेवा । च ञ् ॥ पराथ : शेषकृतिमीमांस का : ॥ अष्टय ॥ पु॰ न॰ उपयु

क्ते तरे ॥ परमात्मिकस्यापसमप्रभेदे ॥ ॥ ऽ॰ ॥ त्रि॰ अन्ते । सूक्ष्मति तरवस्तुनि ॥ अवशेषे । यथा । अ स्यादूरपरोविहितमोदमान स्थिरां श्रियम् । अन्ते शेषमुक्तावित्र क्ते शेषनशेषयेत् ॥ अपिच । रूप शेमसमितिशेषमाप्तप तथैव च । पुन पुन प्रवर्द्धन्ते तस्माच्छेषं नशेषयेदि तिगरुडपु॰ १६६ अ॰ ॥ शिष्यति परिशिष्यते । शिषित्र ञ् ॥

शेषत्वम् । न॰ उपकारित्वे ॥ पारा र्थ्ये । परोद्देश्यप्रवृत्तिकत्वे ॥ यथा । शेषत्वमुपकारित्वं दृश्यादावाक्या दृ । पाराथ्यं शेषतातस्यसर्वं श्च स्तौतिकं मिनिरित्यधिकरणमाला यांमाधवाचार्य्यः ॥

शेषभूत । त्रि॰ अङ्गभूते ॥

शेषरात्रि : । स्त्री॰ रात्रिशेषे । उष सि । अपररात्रे ॥

शेषवत् । न॰ अनीतानुमाने ॥ शेष एवविषयतयाक्षयास्त्यनुमानस्यानु म॰ तच्छेषवत् ।

शेषा । स्त्री॰ प्रसादेनदत्तनिर्माल्यापर्णे । निर्माल्यदाने ॥ अर्चनान्ता दे । यथा । कन्दोनिद्धि : प्रेताश्च हिर्वर्षरेखा । सर्वेष्वाशिषस्त्रीषा साख्याच्छेषा ॥ यथा । शिबाकुर्वी कान्त । ईशाने वाजात : स्त्रीमान्ते, सम्पूर्णयाता प्राणास्तूर्णम् ॥

शैषावस्था । स्त्री० वर्द्धक्ये ॥

शैषित । त्रि० उर्व्वरिते ॥

शैक्ष । पु० प्रथमारब्धवेदे । प्राथमकल्पिके ॥ शिक्षामधीते । तदधी तद्वत्यण ॥ शिक्षायाअयम्० तत्र भवोवा ॥ यद्वा । शिक्षांलभते । शैषद्यत्यण् ॥ यद्वा । शिक्षाशीलमस्य । छत्रादिभ्योण् ॥

शैख । पु० सङ्कीर्णजातिविशेषे । । भूर्जकण्टके ॥

शैखरिक । पु० अपामार्गे ॥ शिखरेप्रायेणभवति । अध्यात्मादित्वाट्ठञ् ॥

शैखरेय । पुं० अपामार्गे ॥

शैत्यम् । न० शीतत्वे ॥ भावेष्यञ् ॥ शैत्य इयत्संप्रकृतिर्जलस्य ॥

शैथिल्यम् । न० शिथिलतायाम् ॥ अनुद्यमे ॥ भावेष्यञ् ॥

शैनेय । पु० शिनेर्नप्तरि । सात्यकौ । श्रीकृष्णसारथौ ॥ शिनेर्गोत्रापत्यम् । इतश्चानिञइतिढक् ॥

शैर्षच्छेदिक । त्रि० शीर्षच्छेद्ये ॥ शिरश्छेदंनित्यमर्हति । शीर्षच्छेदाद्यच्चेतिठञ्० प्रत्यययोगेनशिरसः शीर्षभावश्च ॥

शैल । पुं० महीध्रे । अचले । शिलोच्चये ॥ प्रचुरा शिला संत्यत्र । ज्योत्स्नादित्वादण् ॥ न० शैलेये । तार्क्ष्यशैले । रसाञ्जने ॥ शिलाजतुनि ॥

शैलकम् । न० शैलजे ॥

शैलगन्धम् । न० शावरचन्दने ।

शैलगर्भा । स्त्री० शिलावल्कायाम् ॥

शैलगर्भाह्वा । स्त्री० शिलावल्कायाम् ॥ इ० रा० नि० व० ॥

शैलजम् । न० शैलेये । सुगन्धिद्रव्यविशेषे । शैलेजातम् । जनौ० । सप्तम्याजनेर्डः ॥ त्रि० पर्वतोत्पन्नेवस्तुनि ॥

शैलजा । स्त्री० गिरिजायाम् । पार्वत्याम ॥ शैलाज्जाता । जनौ० । पञ्चम्यामितिड ॥ गजपिप्पल्याम् ॥ सैंहल्याम् ॥

शैलधन्वा । पु० शम्भौ । शिवे ॥ इ० त्रि० शेष ॥

शैलधर । पु० गिरिधरे । श्रीकृष्णे ॥ इतिधनञ्जय ॥

शैलधातुजम् । न० शिलाजतुनि ॥

शैलनिर्यास । पु० अश्मजे । शिलाजतुनि ॥ शैलस्यनिर्यासइव ॥

शैलपत्र । पु० बिल्ववृक्षे ॥

शैलपीलु । पु० अक्षोटे ॥

शैलभित्ति । स्त्री० टङ्के ॥

शैलराज । पु० मेरुपर्वते ॥ हिमालये ॥ शैलानाराजा । टच् ॥

शैलराजतनया । स्त्री० पार्वत्याम् ॥

शैलराजसुता । स्त्री० पार्वत्याम् ।

दुर्गायाम् ॥ यथा । अरूपापर
भावत्वाद्विरूपाक्रियात्मिका । श्या
तास्य शैलेन्द्रगेहे सा शैलराजसुतात
त ॥ इति देवीपुराणे ४५ अ० ॥

शैलवल्कला । स्त्री० शिलावल्कला
याम् ॥

शैलवीज । पुं० भल्लातकवृक्षे ॥

शैलशिखरम् । न० शार्ङ्गे । धर
णीध्रे । सम दृ ॥

शैलसुता । स्त्री० अम्बिकायाम् ।
पार्वत्याम् ॥ ज्योतिष्मत्याम् ॥

शैलाख्यम् । न० शै [illegible] ॥

शैलाग्रम् । न० शिखरे । शैल
शृङ्गे ॥

शैलाजम् । न० शैलेये ॥ इ०
रा० यट ॥

शैलाट । पु० देवले ॥ सिंहे ।
शुक्लकाचे । किराते ॥ इ० मे०
आर ॥

शैलादि । पुं० नन्दिनि । शिवग
णविशेषे ॥

शैलापगा । स्त्री० क्षुद्रनद्याम् ॥

शैलाली । पुं० नटे ॥ शिलालि
नाप्रोक्तं नटसूत्रमधीते । पाराश
र्यशिलालिभ्यां भिक्षुनटसूत्रयोरि
ति णिनि ॥

शैलिक्य । पु० सर्वलिङ्गिनि ॥
शिलिकस्य भाव कर्म वा ष्यञ् ॥

शैली । स्त्री० सरणौ ॥ प्रशस्ति :

परिभाषायां शैलीसङ्केतसमयाचारा-
श्चेति शब्दार्णव ॥ समयपालन
पूर्वकार्यप्रवृत्तौ ॥ यथा ब्राह्मणे
सद्ब्राह्मणामेव्यन्ते ऋषिर्यं सद
ऋषियाइति ॥ शीलभवा । अण्
ङीप् ॥

शैलूष । पु० बिल्वे । मालूरवृ
क्षे ॥ नटे ॥ शिलूषस्यापत्यम् ।
अण् । शैलूषप्रवर्तित० नाटकप
त्वात् ॥

शैलूषिक । पु० नटवृत्त्यन्वेषिणि ॥

शैलूषिकी । स्त्री० शैलूषिकजा
तिस्त्रियाम् ॥

शैलेन्द्र । पु० हिमालये ॥

शैलेन्द्रस्थ । पु० भूर्जवृक्षे ॥

शैलेय । पु० मधुपे । भ्रमरे ॥
सिंहे, न० तालपर्ण्याम् । सैन्धवे
। शैलजे शैलजातगन्धद्रव्ये । छरी
ला० इ० भा० प्र० ॥ तत्पर्यायादि
र्यथा । शैलेयन्तु शिलापुष्पंवृद्ध
कालानुसार्यकम् ॥ शैलेयं शीतलं
हृद्यं कफपित्तहरं लघु । कण्डूकु
ष्ठाश्मरीदाहविषहृद्रक्तहृदिति
॥ त्रि० शिलातुल्ये ॥ शिलाया
मुत्पन्ने ॥ शिलायाम्भवः । न
द्यादिभ्यो ढक् ॥ शिलेव ।
शिलाया इति शाखादिभ्यो ढञ् वा ॥
स्त्रीयां शैलेयी ॥

शैलेयी । स्त्री० पार्वत्याम् ॥

शैलोदा । स्त्री॰ निम्नगान्तरे ॥

शैलोद्भवा । स्त्री॰ क्षुद्रपाषाणभेद्याम् ॥ अम्बिकायाम् ॥

शैव । त्रि॰ शिवोपासके । शौर्द्धस्रोतसिके ॥ न॰ शिवप्रोक्तमार्गे ॥ यथा । नपादुकापरोमन्त्रो न देव श्रीगुरोः परः । नहि शैवात्परोमार्गो नपुण्यं कुलपूजनात् ॥ आचारविशेषे ॥ यथा । अष्टाङ्गयोगसंयुक्तो यत्रैवं शैवविधानत यावद्ध्यानसमाधिस्थतावच्छैव प्रपश्यति ॥ विवाहविशेषे ॥ यथा । शैवोविवाहोद्विविध कुलचक्रे विधीयते । चक्रस्य नियमे नैको द्वितीयोजीवनावधि ॥ अपि च । परिणीतानरमिताज्ञ्याविधवाभवेत् ॥ साप्युद्वाह्या पुन पित्रा शैवधर्मेष्वयं विधि ॥ शिवस्यायम् । तस्येदमित्यण् ॥ शिवे । स्वार्थेऽण् ॥ वसुके । बकपुष्पे ॥ धत्तूरे ॥ देशविशेषे ॥ शिवोनामविषयोदेश । विषयोदेशस्यण् ॥ न॰ शिवपुराणे ॥ शैवालि ॥ त्रि॰ शिवसम्बन्धिनि ॥

शैवल । पु॰ शैवाले ॥ न॰ पद्मकाष्ठे ॥ जलेशीतेतिष्ठति । शीङो वृकलुक्वलच्बालमडुलिवलच् ॥

शैवावधूतः । पुं॰ अवधूतविशेषे ॥ सचेत श्रीमहानिर्वाणे सदाशिवेन । पूर्णाभिषेकविधिना संस्कृतार्थमानवाः । शैवावधूतास्ते ज्ञेया पूजनीया कुलार्चितैरिति ॥

शैवलिनी । स्त्री॰ तरङ्गिण्याम् ॥ तटिन्याम् । नद्याम् ॥ शैवलमस्त्यस्याम् । अतइनिठनाविति नि । वर्णेभ्योङीप् ॥

शैवालम् । न॰ जलनील्याम् । शेवाले ॥ शैवालतुवरतिक्तमधुरशीतललघु । स्निग्धदाहतृषापित्तरक्तज्वरहरपरम् ॥

शैवालिनी । स्त्री॰ नद्याम ॥

शैवी । स्त्री॰ शैवविवाहेनोढाहितायाम ॥

शैव्य । पुं॰ श्रीकृष्णरथस्याश्वविशेषे ॥ यथा । तुरगाः शैव्यसुग्रीवमेघपुष्पबलाहकाः ॥ पाण्डवानांसेनापतिविशेषे ॥

शैशवम् । न॰ शिशुत्वे । बाल्ये ॥ शिशोर्भाव कर्म वा । इगन्ताच्चलघुपूर्वादित्यण् ॥

शैशिर । पुं॰ श्यामचटके ॥ दन्तरोगविशेषे ॥ त्रि॰ शिशिरसम्बन्धिनि ॥

शैशुमारम । न॰ शिशुमाराकारे ज्योतिश्चक्रे ॥

शोकः । पुं॰ मन्यौ । शुचि । व्या

कुलतायाम । दृष्टवियोगानु'च ल्पने । इष्टवियोगर्जनितमनस सन्तापे । इष्टवियोगेनजाभा दु ताज्ञाने ॥ सह्यानुचितदुःखं यत । शोचन्तां नानुकम्पे हायात्मथा सुहृदस्तथा । मातरमिन्द्रगतस्वर्गाद श्रुपतेनराधप ॥ भ्रूविधु सोमगत स्वर्गपुष्पेऽनपतित पुग । शोचि तो वत्स भगवत्सु तेजं इवपरिष्वज ॥ इति रङ्गपुराण रामर्पातवविशो- कि ॥ विवेकिनामिपत तुनाश्चे वशोकानकाश । यत । पान्या नामिवयत्स्य'नि० क्षितिकर्णानया मिव० अ'स्यता० मेवानामिवपु ष्करे० जलमिथोनायाविकाशामि व । संयोग पितृमातृबन्धुतनय भ्रातृप्रियापांथदासदृषी० दूरवि योगदः० विदुषाशोकोदय कस्त श ॥ शोकभस । शुचशोके । घञ ॥ ससारे ॥ खसकष्ट'पु त शयकयतीतिशोकस्तमीमू'ल . स स । र : । ञस्त्रस्त्रोवियारथग्रुत भि । शोकतरतिचात्मविद्दिति ॥

शोकनाशन । पु'० अशोकहृक्षे ॥ शोकनाशयति । धावसदृशने । नन्द्यादित्वात्ल्यु ॥ परमात्मनि ॥ खाभेदसाक्षात्कारेणसंसारिणां ससारशोकं नाशयति ॥

शोकहारी । पु'० वनबर्व'रिकायाम् ॥

शोकातिग । त्रि० मानसदु'खेर्व र्जि'ते ॥ शोकमतीत्यगच्छतीतिग था ॥

शोकापनुद । पु० पुत्रे । शोकमप नुद'ति । नाट्प्रि'रुप । तुन्दशोक योः परिमृजापनुदोरितिसूत्रखा इत्यर्थ क ॥

शोकारि । पु० कदम्बवृक्षे ॥

शोकार्त त्रि० शोकाकुले ॥

शोचनम् । न० शुचि । शोके ॥ त्रि० शोकयोग्ये । शाचति० तच्छील । शुचशोके । शुचकृभ्यदन्दन्यपद्म भिडनख्शुचलयपतपद । इतियु च ॥

शोचना । स्त्री० शोकात्पादनायाम् ॥

शोचनीय । त्रि० शोच्ये । शोचितु योग्ये । यथा । वेवाजभाविनपठन्ति विद्याविप्रोवनस्यापचनाचदाराः । तेशोचनीयाइहचीवलोकेमनुष्य रूपेणमृगाचरन्तिइति ॥

शोचिष्केश । पु० चवकुंबे । चक्रो । शोचिःपिञ्जवाला केशाइवयस्य । नित्यं समासेऽनुत्तरपदस्थस्ये तिषत्व म् । चित्रकहृक्षे ॥

शोचि । न० दीप्तिषि । प्रभायाम् ॥ शुच्यति० पूतीभवत्यनेन । शु शुचपूतीभावे । अर्चिशुचिहुस विशादिभ्यहि'भ्य : इसि : ॥

शोच्य । त्रि० तपस्विनि । सापराधे ॥

अनुकम्पे

शाच्यक । त्रि० वृद्धे ॥

शाठ । त्रि० मूर्खे ॥ अलसे ॥ धूर्त्ते । नीचे ॥ पापरते ॥

शोण । पु० कृशानौ । अग्नौ ॥ श्योनाके ॥ लोहिताश्वे ॥ नदविशेषे । हिरण्यवाहौ ॥ योयममरकण्टकदेशात्पाटलिपुत्रं गङ्गायामिलितः ॥ समुद्रविशेषे ॥ रक्तेक्षौ ॥ लवणाम्बुधेः पारस्थे रक्तजलेऽगाधेशोणगासिमिलश्चतीपार्श्वे जिनदविशेषे ॥ अनुल्लटरक्ते । कोकनदवर्णे ॥ श्योनाकप्रभेदे ॥ न० सिन्दूरे ॥ रुधिरे ॥ त्रि० कोकनदच्छाये । कोकनदवर्णवति ॥ शोणति । शोणवर्णं गच्छति । पचाद्यच् ॥ रक्तवर्णे ॥

शोणक । पु० श्योनाकतरौ । सोनापाठा० इ० भा० प्र० ॥ स्वार्थे कः ॥

शोणज्योतीरथीसङ्गम । पुं० तीर्थविशेषे ॥

शोणझिण्टिका । स्त्री० रक्तसैरेये ॥

शोणझिण्टी । स्त्री० कुरवके ॥ कण्टकिन्याम् ॥

शोणपद्म । पु० रक्तपुनर्नवायाम् ॥

शोणपद्मम् । शोणपद्मकम् । न० रक्तपद्मे ॥

शोणपुष्प । शोणपुष्पक । पु० कुद्दालि । कोविदारे ॥ शोणानि० रक्तवर्णानि पुष्पाण्यस्य ॥

शोणपुष्पी । स्त्री० सिन्दूरपुष्प्याम् ॥

शोणप्रभव । पु० तीर्थविशेषे ॥

शोणरत्नम् । न० पद्मरागमणौ ॥ माणिक्ये ॥ शोणञ्च तद्रत्नञ्च ।

शोणा । स्त्री० शोणवर्णगुलायाम् । शोभ्याम् ॥ शोणात्प्राचामित्यन्येषांमतेटाप् ॥

शोणाक । पु० श्योनाकवृक्षे । शुकनासे ॥

शोणितम् । न० रुधिरे । रक्ते ॥ कुङ्कुमे ॥ शोणितिस्म । शोणृ० । गत्यर्थे क्त ॥

शोणितचन्दनम् । न० रक्तचन्दने ॥

शोणितपुरम् । न० बाणासुरपुरे सराहण० इ० भा० प्र० । शोणितसंज्ञकपुरम् ॥

शोणितह्वम् । न० कुङ्कुमे ॥

शोणितोत्पलम् । न० रक्तोत्पले ॥

शोणी । स्त्री० रक्तायाम् । रक्तवर्णायाम् स्त्रियाम् । शोणात्प्राचामिति वा ङीप् ।

शोणोपल । पु० माणिक्ये ॥

शोथ । पु० शोफे । श्वयथौ । त्वग्विवर्द्धने ॥ श्वयति । अवगतौ । बाहुलकात्० थ । कुटारित्युठ् ।

धातुः । स स्थापूर्वकत्वादित्वे घञ्ठ् टित्तिनन्वात् यथा । भव ति । श्रुगतौ । पूर्ववत्। थ । अह गामीनर्व्रद्यामधीगामीसुखा तृ्खियम उभयेषां सस्थात शोधि इन्तिनस मय ॥

शाथन । पु॰ शोथि ॥

शोथकृत् । त्रि॰ शोफकारिणि ।

शाथघ्न । त्रि॰ शाथनाशके ॥

शाथघ्नी । स्त्री॰ रक्तपुनर्नवायाम ॥ पुनर्नवायाम् ॥ शाथ इन्ति । अ मनुष्यकर्तृकेपुर्षेतिटक् । ङी प् ॥ शालपर्ण्याम् ॥

शाथजित् । पु॰ भल्लातके ॥ पुनर्नवा याम् ॥ त्रि॰ शाफहारके ॥

शाथहृत् । पु॰ भल्लातके ॥

शोध पु॰ शाधने ॥

शोधक । त्रि॰ शुद्धिकारके ॥ न॰ धात्वष्टके ॥

शोधन । पु॰ निम्ब ॥ निम्बुके ॥ न॰ शुद्धौ । शौचे ॥ मलापनयने ॥ विठायाम् ॥ कासीसे ॥ धा तुनिर्दोषीकरणे । प्रणादिपरिष्क रणे ॥ लिखितपत्रादि प्रमार्जी करणे ॥ विरुद्धलिखितअशुद्ध धीकरणे ॥ अवक्षरणे । त्रि॰ शुद्धिसाधने । शुद्धिकारके ॥

शोधनी । स्त्री॰ सम्मार्जन्याम् । ताम्रवल्ली॰ हृ॰ भा॰ ॥ शाध्यतेऽनया । शुध गौचे । करणे ल्युट् । ङीप् ॥ ताम्रवल्ल्याम् ॥ नील्याम् ॥

शोधनीय । त्रि॰ शोधितव्ये । शो ध्ये ॥

शोधनीबीजम् । न॰ जयपाले । भ ल्लातकविषि ॥

शोधित । त्रि॰ सम्मृष्टे । मलिका द्यपनयनेनकृतशोधनेव्यञ्जनादौ ॥ यथा । व्यञ्जन कीटकोटादिदुष्टे स म्मृष्टशोधितेकृतिबद्धरक्षके । अ पनीतमले । निर्णीते । मृष्टे । धौते ॥ शोध्यते स्म । शुध॰ । क्य न्त कर्तरि क ॥

शोफ । पु॰ शोथे ॥ अवति । अव॰ (बाहुलकात् फ । ऊटोरिमूठ् । भावुक । स स्थापूर्वकत्वादित्वे घञ्ठ् क्तितिनन्वाच्' ॥ बराअवति । अु॰ । पूर्ववत् फ ॥

शोफकृत् । त्रि॰ शोथकृति ॥

शोफघ्नी । स्त्री॰ रक्तपुनर्नवायाम् । शालपर्ण्याम् ॥

शोफनाशन । पु॰ नीलवृक्षे ॥ त्रि॰ शोथनाशके ॥

शोफहृत् । पु॰ भल्लातके ॥ त्रि॰ शोथहारके ॥

शोभन । पु॰ ग्रहे ॥ विष्कम्भादि द्विषु पञ्चमेयोगे ॥ तत्रजातफलं यथा । स्यात्शोभनःशोभनयोगजन्मादर्शाभिपक्षप्रतिपक्षभित्तः ।

सद्गुरस्वादयपु सुधीरस सत्ता नयुक्तामनुल . प्रबोध . ॥ शोभ नक्षतिवत्सरे ॥ तत्फलयथा । सु भिक्ष घंमसारोग्य ष्टपागोत्र।स्रया प्रिये । सुस्थिता. शोभनेवर्षेप्रजा सर्वा . सुखिाधने ॥ १० ॥ न. वारिजे । पद्मे ॥ त्रि० सुन्दरे । सुषमे । मनोज्ञे ॥ शोभते । शुभदीप्तौ । अनुदात्त तस्य ति यु च् । शोभयन्ति । नन्द्यादित्वा र्वा ॥

शोभनक । पु० शिग्रौ ॥

शोभकृत् । पु० शोभनेवर्षे ॥ त्रि० शोभनकारके ॥

शोभना । स्त्री० गोरोचनायाम् ॥ हरिद्रायाम् ॥ इ० रा० स्ट ॥

शोभनीय । त्रि० शोभितव्ये ॥

शोभमान । त्रि० विराजमाने ॥ यथा । मयि . माधोद्वेग . समरविजयीशैतिदृष्टिशो० मदश्रो थोनाग मरदिसरित . स्यामपु लिना . । कलामेयचन्द्र सुरत न्दिताबालवनितातनिम्नाशोभन्ते नलितविभवासाधियुनः प्रावृति ॥

शोभा । स्त्री० कान्तौ । द्युतौ ॥ अमालक्षण यथा । साशोभारूप भोगाद्यैर्यस्यादङ्गविभूषणम् । शोभैवकान्तिराख्याताअनाथप्या यनेोज्ज्वलेति । इच्छायाम् ॥

गोपीविशेषे ॥ गोरोचनायाम ॥ हरिद्रायाम् ॥ छन्दसि २० प्रभेदे ॥ यथा । रसाश्वाश्वै शो भानयुगलजठरामेघविस्फूर्जिता चेत् ॥ यथा । सपीथूशोभीन तृसरसिजयुगलामध्यनम्राफलाभ्या कृतयोत्कुबराजत्तरलकिसलयाश्वि ष्टसुक्षिग्धशाखा । लसन्मुक्तार क्तोत्पलकुवलयवत्चन्द्रविम्बाङ्कित ामध्यशोभामौलोमिलद्बलिपट- ले कृष्णसाकापिवल्ली ॥ शोभय ति । शुभशुम्भशोभायाम् । पवा द्यच् ॥

शोभाञ्जन । पु० शिग्रौ । तीक्ष्ण गन्धके । अक्षीवे । मोचके । स हिजना० सुभञ्जना० इ० भा० प्र० ॥ शोभाञ्जन . कटुस्तिक्त शो थविद्रधिगुल्मनुत् ॥ शोभामन क्ति । अञ्जू व्यक्तिम्रक्षणकान्तिगति षु । कर्त्तरिल्युट् । बहुलमन्य त्रापीतियुक्त्वा ॥

शोभित । त्रि० शोभायुक्ते ॥

शोभनी । स्त्री० शोभनीयायाम् ॥

शोणी । स्त्री० वनहरिद्रायाम् ॥

शोष । पु० शोषणे ॥ यत्क्षयि ॥ सशोभयाद्रसादीनांशोषइत्यभि धीयते । अस्मोषधयथा । यथा निकटकस्स्वकरन्ज देवदारुच । अधिकृत्वाचिफलायैताश्चैवीरण-

शौद्धम ॥ प्रियङ्गुनिम्बविकट-
शीमूलैर्यावघर्षितम् । नस्यमा-
लेपनञ्चैवस्नानमुद्वर्त्तनं तथा ॥
अपस्मारविनाशाद्शौषाख्यमौज्ज्व-
रापहम् । भूतेभ्यश्चभयहन्तारञ्च
द्वारेचयास्तरमिति ॥ रवे पा-
रुष्ये ॥ शौचवति । शुचशौचवे
यथायथम् ॥

शौचक । त्रि० शौचककर्त्तरि ॥

शौचव । पु० कामाख्यविशेषे ॥
शौनाकि ॥ न० रसाञ्जने ।
रसाद्राणे । शौषि ॥ त्रि० शौचकि ॥

शौवसम्भवम् । न० पिप्पलीमूले ॥

शौचापचा । स्त्री० क्षौततमे ॥

शौषित । त्रि० कार्त्ते ॥ यथा ।
समुद्र० शौषितायिनतमगस्तिनमास्य-
हम् ॥

शौक्तम् । न० शुक्तगर्ण्णे ॥ शुक्तानां
समूह० । खण्डिकादित्वादञ् ॥
शुक्तस्यावयवो विकारो वा । प्राणिर
जतादिभ्योऽञ् ॥ क्षौवाकरणान्त-
रे ॥

शौकरम् । } न० तीर्थविशेषे ॥
शौकरवम् । }

शौक्तिकम् । }
शौक्तिकेयम् । न० } मुक्तायाम् ।
शौक्तेयम् । }

शौक्तिकी । शुक्तिसम्भावे ॥

शौक्लम । न० शुक्लतायाम् ॥

शौच । पु० भारद्वाजी ॥ शुचस्याऽ-
पत्यम् । विदश्च शुचे स्त्यादिनाऽण् ॥

शौचम् । न० बाह्याभ्यन्तरभेदभिन्न-
पवित्र्यजनककर्म्मणि । शुचिता वा-
म् । तदुक्तं शौचमाविर्भावितञ्च ।
शौचन्तु द्विविधं प्रोक्तं बाह्याभ्यन्तरभेद-
त । अस्याख्यातमापञ्च वतनञ्चो-
पमान्तरिक उच्यतम् ॥ यद्भवभिक्ष
मायापिमशानामपकर्षणम् । देव
शुचिभिर्वैव्यं नचपि । शौच तदुच्य
ते ॥ गङ्गानद्योऽह्रदावाप्यस्तथा कूपा
श्च पुण्यका । सर्वपवित्रजनन स्व-
र्णद्रौञ्जमत प्रियि ॥ अस्यावयाप्नि
च श्रेष्ठमत जातुमलवर्ज्जिता । या
सिऽजिनद्दघाद्रौनिमृद्यागोपि
सुवते ॥ किमचवहूनोक्तं नशौचा
शौचविधौ मिवे । मन पूतभवेद्यो
नगूहस्थस्तत्तदाचरेत ॥ निद्रान्ते
मैथुनक्षान्ते स्नानान्ते मलमूत्रयो
भोजनान्तेमवेस्पृष्टे च कृ । शौच
विधीयते० इति ॥ पवचर्त्तमाने
प्रयत्निकतो ॥ शौचेयम । सदा
कार्यं शौचमृषिभिः स्मृत ।
शौचाचारविहीनस्य समस्ता निष्फ-
ला क्रिया । मृज्जलादिभि ।
कायादिबाह्यमनन्दितमितमेव्यागमा
दि च० बाह्यम । मैत्र्योमुदितादि
भिर्मदमानादिचित्तमलक्षालनमा-
न्तरम ॥ कायमलानांमृज्जलाभ्यां

बाह्यम आन्तरम् । मनोमलानां गन्धादीनां विषयदोषदृशं नरूपप्र तिपक्षभावनयाऽपनयनमाभ्यन्तर मितिविवेकः ॥ अंशुधर्मंतु चर्यं प्रयोगाद्वीमायाऽनृतादिराचिर्ल्ल• नतुसत्यत्वादिजनितं ग्राह्यं ॥ स र्व्वषामेव शौचानामर्थशौचं परं स्मृ तम् । योऽर्थैः शुचिर्हि सशुचिर्न मृ द्वारिशुचि शुचिरितिमनु ॥ आ ह्निकेशौचविधिर्यथा • । गन्धलेप क्षयकरं शौचकुर्यादतन्द्रितः इति । एतत्सर्व्वसाधारणम् । गृहस्थ स्यतु • एकालिङ्गेगुदेतिस्रोदश वामकरेतथा । उभयोः सप्तदातव्या स्तद् शुद्धिमभीप्सता । पादयो षट्प्रकीर्त्तिता इतिच ॥ द्वतीय शौचमित्युक्तयोर्द्विगुणतुर्गुणम् । वद्विवाविहितं शौचंतदर्द्धं निशि की र्त्तितम् ॥ तदर्द्धमातुरेप्रोक्तमातु रस्यार्द्धमध्वनि । स्त्रीशूद्रबालवृद्धा नामर्द्धमेनसिसूत्रवत् ॥ शौचवि हृत्तिपरस्त • नाध . शौचेनिशो जयेत् । तथैवबामहस्तेनतामेवार्द्धं नशोधयेदिति ॥ मूत्रकरणेशौचन्तु एकालिङ्गकरेतिस्रउभयोर्मृद्द्वयं स्मृ तमिति ॥ अशुद्धवतानिरसनेनशु द्धिरापादकत्वमाशुत्वरूपम् । य था । अभक्ष्यपरिहारस्तुसर्गश्चा प्यनिन्दितैः । स्वधर्मेचव्यवस्थान

शौचमेतत्प्रकीर्त्तितमिति ॥ स अशौच मन शौच शौचमिन्द्रिय निग्रह । सर्वभूतदयाशौचजल शौचन्तुपञ्चमम् ॥ यस्यसत्यञ्चशौच श्चतस्यस्वर्गोनदुर्लभ ॥ शुचि क र्म्म भावो वा । इगन्ताश्चलघुपूर्वादि त्यण् । यो कुलीनन्दुशान्ताथार्त्तैल यक्षेषु । यक्षेषी . । अमीमांस्यानि शौचानि स्त्रीणुवालातुरेषुच । अस्य नामलिनादेशोदेशोवालमन्निर्मल । अस्यशौचमितिज्ञान शौचमेतत् प्रचक्षते ॥

शौचपर । त्रि• बाह्याभ्यन्तरशौचयु क्ते ॥

शौचिक . । पुं• वर्णसङ्करविशेषे । यथा । कैवर्त्तश्चबक्रन्यायाशौचिक कादेवशौचकइतिपराशरपद्धति ॥

शौचेय । पु• रजके ॥ इ• श•र• णी ॥

शौटीर । पु• वीरे ॥ त्यागिनि ॥ शौटतिशौटृगर्वे । कृशौपृकीटीपटि शौटिभ्यईरन ॥

शौटीर्य्यम् । न• वीर्यं । गर्वे ॥ तदे तद्दतिशौटीयमौड्डीमेनस्मृष्यती तिकाल्पतरु ॥ शौटीरस्यभाव । वाह्मणादित्वात्ष्यञ् ॥

शौण्ड । त्रि• मत्ते । मदिरामत्ते ॥ प्रगल्भे ॥ विख्याते ॥ शुण्डायाया नागाश्रिव । तत्रभवइत्यण ॥

शौण्डिक । पुं॰ जातिविशेषे । सा
सुतोवणे । मण्डहारके । शुंडी॰ क
लवार॰ इ॰ भा॰ प्र॰ ॥ अस्योत्प
त्तिर्यथा । तैलिगान्धिककन्यायाङ्के
वर्त्तादेवशौण्डिकः । कैवर्त्तस्य च
कन्यायां शौण्डिकाद्देवसौण्डिकः
॥ ब्र॰ वै॰ पु॰ ॥ शुण्डा सुरा॰ पण्य
मस्य । तदस्य पण्यमित्यष्ठक् । शु
ण्डिकादागतो वा । शुण्डिकादिभ्योऽ
ण् ॥

शौण्डी । पुं॰ शौण्डिके ॥

शौण्डी । स्त्री॰ पिप्पल्याम् ॥ चव्यं
॥ कटभ्याम् । मधुरेणौ ॥ शुण्डा
यां मद्यपानगृहे भवा । तत्र भव इत्य
ण् । ङीप् ॥

शौण्डीरः । त्रि॰ शूरे । अहङ्कारिणि
॥ शौटति । शौट॰ । औणादिक
ईरन् । पृषोदरादित्वात् नुम्॰ टस्य
डश्च ॥

शौण्डीर्य्यम् । न॰ पौरुषे ॥ शौर्य्ये ॥
भावे॰ ष्यञ् ॥

शौद्र । पुं॰ द्वादशविधपुत्रान्तर्गतपु
त्रविशेषे । पारशवे । त्रि॰ शूद्रस
म्बन्धिनि ॥

शौद्धोदनिः । पुं॰ शाक्यवंशीयमुनि
विशेषे । सर्वार्थसिद्धे । गौतमे ।
मायादेवीसुते । शुद्धोदननृपति
विशेषस्यापत्यम् । अतइञ् ।

शौधिका । स्त्री॰ रक्तचन्द्र॰ हे॰
चन्द्र ॥

शौन ः । त्रि॰ पशुघातिनि ॥

शौनक । पुं॰ ऋषिविशेषे । अतिध
न्वनि ॥ शुनकस्यापत्यम् । विदा
द्यञ् । कापेयमुनिविशेषे ॥

शौभ । पुं॰ निलिम्पे । देवे । सुरे
॥ गुवाक । न॰ व्योमपुरे । हरिश्च
न्द्रपुरे । हरचन्द्रावली॰ इ॰ भा॰ प्र॰
॥ त्रि॰ शुभान्विते ॥

शौभाञ्जन । पुं॰ शिग्रौ ॥ शोभाञ्ज
नद्रु । प्रज्ञाद्यण् ॥ अस्य मोचक
कादयः । शिग्रुमूलफलपुष्पपत्र
तैलपक्वमुदकेभ्योऽधिकृतम् । शिग्र
सैन्धवरजोयुतं हि कृष्णोवर्त्तेसमदिग्धी
पनमन्नं ॥ शिग्रुः कटुतीक्ष्णो
ष्णः वायुघ्नोयसमीरजित् । क्रमि
हृत्कासदोषघ्नतयातिशोथघ्नश्च ।

शौभाञ्जनफलम् । न॰ शिग्रुफले ॥
शौभाञ्जनफलस्य तु कषायकफपित्त
नुत् । शूलकुष्ठक्षयश्वासगुल्मघ्नदी
पनं परम् ॥

शौभिक । त्रि॰ इन्द्रजालिके । कुह
कजीविनि ॥ इ॰ शब्दावली ॥

शौरि । पुं॰ वसुदेवे । वासुदेवे ॥ श्री
कृष्णे ॥ शूरस्यापत्यम्॰ अंशत्वात्
। [illegible]भा
ष्यम् । तथापि बाह्वादित्वादिञ् ॥
शनैश्चरे ॥

शौर्य्यम् । न॰ आरभट्याम् ॥ बले ।

शङ्गौ । शूरस्यकर्म भावो वा । ष्य
ञ् । उत्साहे ॥

शौल्क । पु॰ शुल्कसम्बन्धिनि ॥

शौल्कशालिक । पु॰ शुल्कशालाया
मवक्रये ॥ अवक्रयश्चेतिठक् ॥

शौल्किक । त्रि॰ शुल्काध्यक्षे ॥

शौल्किकेय । पु॰ विषप्रभेदे ॥ शु
ल्किकदेशभव । इतिकुक्षीतिशे।
गविभागाट्ढञ् ॥

शौल्बिक । पु॰ कंसकारे । ताम्रकु
ट्टके । कसेरा॰ इ॰ भा॰ प्र॰ ॥ शु
ल्वाघट्टनं शिल्पमस्य । शिल्पमिति
ठञ् ॥

शौव पु॰ श्वभिर्दृष्टे सामविशेषे ।
दृष्ट सामेत्यण् ॥ न॰ शुनांसमूहे
। खण्डिकादित्वाद्ञ् ॥

शौवस्तिकम् । त्रि॰ आगामिदिनस्थायि
नि द्रव्ये । श्वस्तने ॥ श्वोभवम् ।
श्वसस्तुट्चेति॰ ठक् । ऐजागमः ॥

शौवापदम् । त्रि॰ श्वापदे । श्वापद
सम्बन्धिनि ॥ श्वापदस्येदम् । अण्
। पदान्तस्यान्यतरस्यामितिपर्य॰
ऐच् ॥

शौषिर । पु॰ दन्तरोगविशेषे । य
था । श्वयथुर्दन्तमूलेषुरुजावान्
कफरक्तज । लालास्रावीसविज्ञे
य. शौषिरोनाममनात ॥ ४ ॥

शौष्कल । पु॰ शुष्कमांसस्यापणिके
त्रि॰ पिशिताशिनि । शुष्कलीशु
ष्कमांस॰ मांसमात्र वाऽस्ति । शे
षद्भ्यण ॥

श्च्योत । पु॰ प्राग्भारे । क्षरणे ॥
श्च्योतनम् । श्च्युतिर् क्षरणे ।
घञ् ॥

श्च्योतन् । त्रि॰ क्षरति ॥

श्म । न॰ नाम्ना॰ मुखे ॥

श्मशानम् । न॰ प्रेतदाहभूमौ । श
वस्थाने । पितृवने ॥ शवा शेरते
ऽत्र॰ शवानांशयन वा । पृषोदरा
दित्वात्साधु ॥ श्मशब्देनशव प्रो
क्त शानशयनमुच्यते । निर्वचन्ति
श्मशानार्थं मुनेशब्दार्थकोविदा ॥

श्मशानकाली । स्त्री॰ कालीविशेषे ॥

श्मशानवासी । पु॰ शिवे ॥ त्रि॰ श्म
शानवासकर्त्तरि । श्मशानेवस्तु शी
लयस्य । वस॰ । सुप्यजातौणिनि ॥

श्मशानवासिनी । स्त्री॰ कालिकाया
म् ॥

श्मशानवेश्मा । पु॰ गिरिशे । शम्भौ ।

श्मशानालयवासिनी । स्त्री॰ कालि
कायाम् ॥ श्मशानालयेवस्तु शील
मस्या । णिनि । ङीप् ॥

श्मश्रु । न॰ पुंमुखेलोमवृद्धौ । दाढ़ी
॰ भा॰ केशश्मश्रुधारयतामग्र्याभ
वतिसन्ततिरितिदानधर्म भारतम्
॥ श्म॰ मुखंश्रयति । श्रिञ्॰ । श्म
निश्रयतेर्डुन् ॥ यद्वा । श्मनिमुखे
श्रूयते॰ उपलभ्यते । श्रु॰ । मित

द्वादित्वात् ड़ । क्लिब् वा । आग
मशास्त्रस्यानित्यत्वान्नतुक् ॥

श्मश्रुमुखी । स्त्री॰ श्मश्रुयोषिति । पो
टायाम ॥

श्मश्रुल । त्रि॰ प्रवृद्धश्मश्रुरोमवति ।
सिध्मादित्वाल्लच् ।

श्मशानिक । पु॰ पितृवनेपाठादि
कर्त्तरि । नसाधिकृत्य॰ कृ॰ भा॰
प्र॰ । श्मशानेऽधीते । अध्यायिन्य
देशकालादितिठक् ।

श्याम त्रि॰ शीतात्सङ्कुचिते । स
ङ्कुचितमात्रे ॥ श्यायतेस्म । श्यै
ङ्गतौ । क्त । संयोगादेरातोधा
तोर्यण्वतइतिनिष्ठानत्वम ॥

श्याम । पुं॰ प्रयागस्थवटे । वारिदे ॥
वृद्धदारके । पिके । कोकिले ॥
कृष्णवर्णे ॥ हरिद्वर्णे ॥ श्यामाके
॥ धीसुरके ॥ धत्तूरे ॥ दमनकवृ
क्षे ॥ गन्धतृणे ॥ न॰ मरिचे ॥
सिन्धुलवणे ॥ त्रि॰ कृष्णवर्णविशि
ष्टे ॥ हरिद्वर्णवति ॥ श्यायतेम
नोयस्मात् । श्यैङ्॰ । इषियुधीन्धि
दसिश्याधूसूभ्योमगितिमक् ॥ पु
॰ अक्षयभाद्रिकादि॰ तमालदलनि
भे॰ चन्दनविशेषे ॥ श्रीकृष्णे ॥

श्यामक । पुं॰ श्यामाके । सांवा
इतिभाषाप्रसिद्धान्ने । न॰ रोहिष
तृणे ॥ श्याम वर्णं मन्यकाति । अ
क॰ । कर्मण्यण् । प्रकान्तादिः ॥

श्यामकण्ठ । पुं॰ मयूरे ॥ शिवे ॥
पक्षिविशेषे ॥

श्यामकन्दा । स्त्री॰ अतिविषायाम् ॥

श्यामकाण्डा ।) स्त्री॰ गण्डदूर्वाया
श्यामग्रन्थि ।)
म् ॥ गण्डाल्याम् । मीननेत्राया
म् ॥

श्यामपत्र ।) पु॰ तमालपादपे ।
श्यामपत्रक ।)

श्यामल । पु॰ पिप्पले । कृष्णे ।
श्यामे । भीलमार्के । त्रि॰ कृष्ण
वर्णविशिष्टे । सिध्मादित्वाल्लच् ॥

श्यामलचूडा । स्त्री॰ गुञ्जायाम् ॥

श्यामलता । स्त्री॰ शारिवायामोषधौ
॥ श्यामलिनि ॥

श्यामला । स्त्री॰ पार्वत्याम् । कस्तू
र्याम् ॥ जम्बूतरूयाम ॥ जम्ब्वा
म् ॥ काटम्याम् ॥

श्यामलिका । स्त्री॰ नील्याम् ॥

श्यामलीन् । पु॰ कृष्णे ॥

श्यामवल्ल । पु॰ शिरीषे ।

श्यामसुन्दर । पु॰ श्रीकृष्णे ॥

श्यामशालि । पु॰ कृष्णशालौ ॥

श्यामा । स्त्री॰ कालिकायाम् । दुर्गा
याम । पार्वत्याम् । श्यामायाञ्ज
त्पत्तिर्यथा । तत्र साकालिकादि
भीयोगनिद्राजगन्मयी । पूर्वस्य
जसतीरूपाजन्मार्थेनिकाशयौ ॥
समयश्यामुकमिथमैनकाजठरेणिवा

। सम्भूयचसमुत्पन्नासालक्ष्मीरिव
सागरात् ॥ वसन्तसमयेदेवीनवम्यां
मृगयोगतः । अर्द्धरात्रौसमुत्पन्नाग
ङ्गेयशशिमण्डलात् ॥ ततस्तस्यान्तु
जातायांप्रसन्नाश्चाभवन्दिशः । सा
नुकूलोववौवायुर्गन्धीरोगन्धिल
शुभः ॥ ववृषुःपुष्पवृष्टिश्चतोयवृष्टि
परातथा । जज्वलुश्चाग्नयः शा
न्ताजगर्जुश्चघनाघनाः ॥ तस्यान्तु
जायमानायांसर्वंश्यामपद्यत ।
तान्तुदृष्ट्वायथाजातांनीलोत्पलदला
नुगाम् ॥ श्यामांसामेनकादेवीमु
दमायातिहर्षिता । देवाश्चहर्षम
तुलंप्रापुस्तत्रमुहुर्मुहुः । तुष्टुवु
स्तामन्तरीक्षेगन्धर्वाश्चाप्सरोगणाः ।
। तान्तुनीलोत्पलदलश्यामांहिमव
तः सुताम् ॥ कालीतिनाम्नाहिमवा
नाजुहावकृतेदिने । बान्धवास्तु
सन्तानांनाम्नांतांपार्वतीतिच ॥ का
लीतिचतथानाम्नाकीर्तितागिरिन
न्दिनीतिकालिकापुराणे ४० अ
ध्यायः ॥ शारिवौषधौ ॥ कृष्णश्वे
ताशारिवायासाश्यामेतिनिगद्यते
॥ अप्रसूताङ्गनायाम् ॥ नारीविशे
षे । यौवनमध्यस्थायाम् । तल्ल
क्षणं यथा । स्निग्धनखनयनदशना
निरनुशयामानिनीस्थिरस्नेहा । सु
स्पर्शशिशिरमांसलवराङ्गनासाम
ताश्यामेति ॥ छायायाम् । भावा

नुरूपायाम् ॥ प्रियङ्गौ ॥ वाकुची
। सोमलतायाम् ॥ यमुनायाम् ॥
त्रियामायाम् ॥ कृष्णत्रिवृत्तिकौष
धौ । यथा । श्यामात्रिवृत्ततोहीन
गुणातीव्रविरेचिका । मूर्च्छादा
हमदभ्रान्तिकण्ठोत्कर्षणकारिणी
॥ नीलिकायाम् ॥ गुग्गुलौ ॥ गु
न्द्रायाम् । गुडूच्याम् ॥ कस्तूर्या
म् ॥ वटपत्र्याम् ॥ वन्ध्यायाम् ।
रोचनायाम् ॥ नीलपुनर्नवायाम्
॥ पिप्पल्याम् । कृष्णायाम् ॥ ह
रिद्रायाम् ॥ नीलगव्याम् ॥ नील
दूर्वायाम् ॥ स्त्रियाम् ॥ पद्मवीजे ॥
शिंशपायाम् ॥ पक्षिविशेषे । वा
राह्याम् । पाण्डविकायाम् । श
कुन्याम् । पीतक्याम् । कालिका
याम् । शितिसिम्बिन्याम् ॥ श्या
मोवर्णोऽस्त्यस्याः । अर्शआद्यच्
॥ मगन्ताद्टाप् ।

श्यामाकः । पुं० तृणधान्यभेदे । श्या
मके । श्यामेचिवीजे । ऋषिप्रिये
। राजधान्ये । सावां० सांवक०
इ० भा० प्र० ॥ श्यामाकः शोष
णोरूक्षोवातलः कफपित्तहृत् ॥
श्यायते । श्यैङ् । पिनाकादय
श्चेतिसाधु ॥ यथा । श्यामकर्णा
म० अश्नाति । अश० । कर्मण्य
ण् ॥

श्यामाङ्गः । पुं० बुधग्रहे ॥ त्रि० श्या

मशरीरे ॥

अ्यामाङ्गी । स्त्री॰ मेघाख्यायाम् । कृष्णा कालेवरायाम् ॥

अ्यामादनी । स्त्री॰ लाक्ष्या ॥

अ्यामाङ्गी । स्त्री॰ दीर्घशाखिकायाम् । गौलाख्याम् ॥

अ्यामायमान । त्रि॰ शेषिश्यामरूप भवतितत्र । लोहितादिङाजभ्य क्यष् । माक्यषतूत्यात्मनेपदंशान च् । भानेमुक् ॥

अ्यामित । त्रि॰ अ्यामले ॥

अ्यामैककर्ण । पु॰ शुर्व सख्यविशेषे ।

अ्याल । पुं॰ पत्नीसहोदरे । वा भोरि । साला॰ कू॰ ग॰ प्र॰ ॥ अ्यायते । बाहुलकात॰ अ्याङ का जन् ॥ उच्छिष्टमधुरावैग्यायोभ्यया श्वव्द । अ्यालाति । थातीनुर्पात काद्रुतमुकुट ॥

अ्यालक । पु॰ अ्याले ॥ स्वार्थे क ॥

अ्यालिका । स्त्री॰ भैलिकुण्डिकायाम् । पत्नीभगिन्याम् । साली॰ कू॰ भा॰ प्र॰ ॥

अ्याली । स्त्री॰ अ्यालिकायाम् ॥

अ्याव । पुं॰ कपिशे । कृष्णपीतमिश्रितवर्णे । धूम्रे । शुक्लानुविद्धकृष्णवर्णे ॥ आवावर्ण॰ कृतिभावप्रकाश । ॥ सुखाभवर्णेकृतिभट्टोत्पल: ॥ त्रि॰ तद्वर्णवति । अ्यायती । कुगुण कृष्णीवकृति॰ बाहुलकात्॰

गयेडोष ।

अ्यावदन् । त्रि॰ अ्यावदन्त । कृष्ण पीतमिश्रितवर्णदन्तयुक्ते ॥ अ्यावादन्तायमस । विभाषाअ्यावारोकाभ्यामितिपक्षेदन्तस्यदत्रादेश ॥

अ्यावदन्त । त्रि॰ समाने कृष्णदन्ते ॥ अ्यावादन्तायश्च । विभाषा अ्यावारोकाभ्यामितिपक्षे दतादेशाभाव ॥

अ्यावदन्तक । त्रि॰ अ्यावदन्ते ॥ प्रधानदन्तद्वयमध्यस्थलघुदन्तविशिष्टे ॥ प्रधानदन्तोपरिदन्तान्तरयुक्ते ॥ भवर्णया । पयमरक नुभृतदु खानातथैव समुत्पीयानामानुपूर्व्ये लक्षणानिभवन्ति । कुनख्यतिपातक॰ ब्रह्महाश्यावकी॰ सुराप अ्यावदन्तक॰ सुवर्णहारीकुनखी॰ शुक्लतल्पगीदुश्चर्माख्यादि ॥ दन्त रोगविशेषे ॥ यथा । यै अ्यावत्र्मिश्रे पपित्तेर्दग्धादन्तस्त्वशेषत । अ्यावतानीलतांवापिगत , स अ्यावदन्तक । १८ ॥ स्वार्थे क ॥

अ्यैत : । पु॰ शुक्लवर्णे । अत्र ते । पाण्डुरे ॥ त्रि॰ तद्वर्णयुक्ते ॥ अ्यैते । अ्यायाभ्यामितवति॰ अ्यै उप्रतन् ॥

अ्यैतकीलक : । पुं॰ मत्स्यविशेषे । रापरे । पुंठी॰ कू॰ गी॰ भा॰ प्र॰ ॥

श्येन । पु० पक्षिविशेषे । श्यशाद्ने । पक्षिणि । बाज० इ० प्र० ॥ महाकायेऽमन्दवेगे श्येनश्चातत्याख्यातार ॥ श्यायते । श्यैङ० । मास्याङ्कजविभ्यङ्कनच् । पाण्डुरे । शुक्ले ॥ त्रि० तद्वति ॥

श्येनघण्टा । स्त्री० दन्तीवृक्षे । एरण्डफलायाम् ॥

श्येनचित् । पु० चाश्वनीयधारणार्थ० इष्टकानिर्मितैश्चलविशेषे ॥ श्येनइवचित । चिञ० । कर्मण्यग्न्याख्यायामिति क्विप ॥

श्येनजीवी । पु० क्रयविक्रयादिना श्येनजीविति० तस्मिन् ॥

श्येनी । स्त्री० शुक्लवर्णायाम् । वर्णादनुदात्तात्तोपधात्तोनइति० ङीप्० तकारस्य नकारादेशश्च ॥ त्रिष्टुप्छन्द ११ प्रभेदे ॥ यथा । श्येन्युदीरितारजौरलौगुरु ॥ यक्षकौर्त्तिरिन्दुकुन्दचन्दनश्येनशीकलापावनीसदा । अञ्जनीयविश्वबन्द्यविभ्रमातमञ्जमिभावगम्ममच्युतम् ॥ श्येनयोषिति ॥

श्येनीपुत्र । पु० जटायुषि । सम्पातेरनुजे । दशरथराजसखे ॥

श्येनम्पाता । स्त्री० मृगयायाम् ॥ पतनम्पात । श्येनस्यपात । कर्मषष्ठ्यासमास । श्येनपाताऽस्यांवर्त्तते । घञ साक्रियेति तिञ । श्येनतिलस्यपातेञ० इतिम् मागम ॥

श्योनाक । पु० श्योनाकद्रुमे । शोनागाछ इ० गौ० भा० प्र० ॥ अस्यपर्यायायथा । मण्डूकपर्णपत्रोर्णनटकट्वङ्गटुण्टुका । स्योनाकशुकनासर्क्षदीर्घवृन्तकुटन्नटा ॥ शोणकश्चारलौविति । शोनापाटा० इ० भा० प्र० ॥ अस्यगुणा यथा । श्योनाकोदीपन पाककटुकस्तुवरोहिम । ग्राहीतिक्तोनिलश्लेष्मपित्तकासप्रणाशन ॥ टुण्टुकस्यफलंबालंरूक्षं वातकफापहम् । हृद्यंकषायमधुरंरोचनंलघुदीपनम् । गुल्मार्शकृमिहृत् प्रौढं गुरुवातप्रकोपणम् ॥ श्यायते । श्यैङ्गतौ । पिनाकादौ निपातित ॥

श्रत् । अ० श्रद्धायाम् ॥

श्रथनम् । न० वधे ॥ यत्ने ॥ पुनपुनर्हर्षे ॥ बन्धने ॥ मोचने ॥ शिथिलीकरणे ॥

श्रद्दधान । त्रि० श्रद्धायुक्ते । श्रद्धावति ॥ यथा । श्रद्दधान शुभांविद्यामाददीतावरादपि । अन्त्यादपिपरंधर्मं स्त्रीरत्नंदुष्कुलादपीति ॥ श्रत्० श्रद्धादधातेर्भ्वा ॥

श्रद्धा । स्त्री० सम्प्रत्यये । आदरे । आस्तिक्यबुद्धौ । शास्त्रार्थप्रत्यये ॥

गुरुवेदान्तादिवाक्येषु विश्वासे ।
गुरुवेदान्तादिवाक्येषु । इदमित्थ
मेवेतिप्रमारूपायामास्तिक्यबुद्धौ
। शास्त्राचार्य्योपदिष्टेष्वनुभूते
ष्वेवमेवैतदितिविश्वासे ॥ निग
माचार्य्यवाक्येषुभक्तिः श्रद्धेति
विश्रुतेतिपूज्यपादोक्तिः ॥ प्रत्ययो
धर्म्मकार्य्येषु इह श्रद्धेत्युदाहृता ।
नास्तिह्यश्रद्दधानस्यधर्म्मकृत्यप्रयोज
नमितिस्मृतिः ॥ इयंवैराग्यस्यपञ्चौ
। वैराग्यस्यपञ्चभार्य्याश्रद्धाभक्ति
सैत्युक्तेः ॥ श्रद्धानम् । डुधा
ञ० । श्रदन्तरोरुपसर्गवद्वृत्तिर्वा
च्या । आतश्चोपसर्गइत्यङ् । टा
प् ॥ इच्छायाम् । काङ्क्षायाम् ।
स्पृहायाम् ॥ चेतसः प्रसादइति
पातञ्जलभाष्यम् ॥ श्रद्धात्रिवि
धा । सात्त्विक्यादिभेदात् । यथा
हि । श्रीभगवानुवाच । त्रिविधा
भवतिश्रद्धादेहिनांसास्वभावजा
सात्त्विकीराजसीचैवतामसीचेति
तांशृणु ॥ सत्त्वानुरूपासर्व्वस्यश्र
द्धाभवतिभारत । श्रद्धामयोयंपु
रुषोयोयच्छ्रद्धः सएवसः । यज
न्तेसात्त्विकादेवान्यक्षरक्षांसिराज
साः । प्रेतान्भूतगणांश्चान्येयज
न्तेतामसाजनाइति ॥

श्रद्धालुः । स्त्री॰ दोहदवत्याम् ॥
श्रद्दधाति । डुधाञ॰ । स्पृहिगृ

हिपतिदयिनिद्रातन्द्राश्रद्धाभ्यआ
लुजित्यालुच । श्रद्धतेतच्छीलावा
॥ त्रि॰ श्रद्धायुक्ते ॥

श्रद्धावान् । त्रि॰ आढ्ये । आस्ति
केनश्रद्दधाने । श्रद्धासमन्विते ॥
श्रद्धास्त्यस्यास्मिन्वा । मतुप् ॥

श्रद्धाविरहित । त्रि॰ ऋत्विगादेषा
दिनाश्रद्धारहिते । अश्रद्दधाने ॥

श्रद्धेयः । त्रि॰ विश्वसनीये । श्रद्धा
तुमर्हे । आगमोपपत्तिभ्यांविनिश्चि
तोर्थः श्रद्धेयोभवत्यव्यभिचारा
दितिपूज्यपादाः ॥

श्रन्थः । पुं॰ ग्रन्थने ॥

श्रन्थनम् । न॰ ग्रन्थने । गुम्फे । य
था । सन्दर्भोरचनागुम्फः श्रन्थन
ग्रन्थन समाइतिहेम ॥

श्रन्थितः । त्रि॰ ग्रन्थिते । गुम्फिते ॥
ज्ञातवधे ॥

श्रपितः । त्रि॰ पक्वे । घृतदुग्धजल
भिन्नपक्वद्रव्ये ॥ यथा । निष्पक्वंक्व
थितपक्वन्त्वाज्यक्षीरपयःशृतम् ।
अन्यत्तुश्रपितम्पाक्यं समुदक्तोदृष्ट
तोसमे॰ इतिजटाधरः ॥ श्रापाकि
तः ॥

श्रपिता । स्त्री॰ काञ्जिके ॥ इतिकेचि
त् ॥

श्रमः । पुं॰ अभ्यासे । अभ्यसने ॥ श
स्त्राभ्यासे । खुरल्याम् । परिश्र
मे ॥ यत्नातिशये ॥ क्लमे । परिश्र

मे । आयासे । व्यायामे ॥ तपसि ॥ खेदे । गमनादिप्रयुक्तखेदादौ । श्रम ' खेदोऽध्वरत्वादेरितिलक्षणम् ॥ श्राम्यत्यनेन । श्रमुतपसिखेदे । घञ् । नोदात्तोपदेशस्येतिवृद्ध्यभाव ॥

श्रमण · । पु॰ तपस्विनि । श्रमण परिव्राडितिपूज्यपादा ॥ बुद्धभिक्षुके । निर्ग्रन्थे । यती । जति॰ · द्र॰ भा॰ प्र॰ । न॰ श्रमे । त्रि॰ निन्द्यजीविनि ॥ तपस्विनि ॥ श्राम्यति । श्रमु॰ । ल्यु ॥

श्रमणा । स्त्री॰ सुदर्शनायाम ॥ मांस्याम् ॥ मुण्डीर्याम् ॥ शबरीभेदे ॥

श्रमणी । स्त्री॰ चतुर्थाश्रमप्राप्तायाम् । तपस्विन्याम् ॥

श्रमवारि । न॰ आयासेनखेदविन्दौ ॥

श्रमी त्रि॰ श्रमयुक्ते ॥

श्रय . । पु॰ श्रयणे । आश्रये ॥ श्रयणम् । श्रिञ्सेवायाम् । एरच् ॥

श्रयणम् । न॰ आश्रये । आश्रये ॥ श्रिञो ल्युट् ॥

श्रव · । पु॰ कर्णे । श्रवणे ॥ श्रूयतेऽनेनश्रवणं वा । श्रुश्रवणे । ऋदोरप् ॥

श्रवण . । पु॰ नक्षत्रविशेषे । श्रवणायाम् । न॰ श्रुती । श्रोत्रकर्मणि । श्रुतिसहितेतिहासपुराणार्थश्रवणदेतात्पर्यावधारणं । तदर्थनिर्धारणात्

कूलन्यायविचारे ॥ षड्विधलिङ्गैरशेषवेदान्तानामद्वितीयेवस्तुनितात्पर्यावधारणं ॥ वेदान्तानामशेषाणामादिमध्यावसानतः । ब्रह्मात्मन्येव तात्पर्यमितिधी श्रवणं भवेदित्युक्तं ॥ आचार्यस्यमुखादेवश्रवणं स फलंभवेत् ॥ कर्णेन्द्रियेणसगुणस्य निर्गुणस्यवाशब्देनज्ञाने । सुनना॰ द्र॰ भा॰ प्र॰ । पु॰ न॰ कर्णे । कान॰ द्र॰ भा॰ प्र॰ ॥ कर्णपुनपुंसकयो । श्रवणावनिलश्चेति दर्शनात् । नक्षियाश्रवण कर्णइतिहैमसाख्यभिधानाच्च ॥ श्रूयतेऽनेन । करणे ल्युट् ॥

श्रवणद्वादशी । स्त्री॰ श्रवणानक्षत्रयुक्ताया भाद्रशुक्लद्वादश्याम् ॥

श्रवणशीर्षिका । स्त्री॰ श्रावणीवृक्षे । मुण्डीर्याम् ॥

श्रवणा । स्त्री॰ द्वाविंशतितमेनक्षत्रे ॥ तत्रजातस्यफलयथा । शास्त्रानुरक्तो बहुपुत्रमित्र सत्पुत्रभक्तिर्विजितारिवर्ग । चेत्जन्मकालेश्रवणाह्वियस्यप्रमोपुरारश्रवणप्रवीण ॥ श्रावणपूर्णिमायाम् । श्रावण्याम् ॥ श्रवणेनयुक्तापौर्णमासी । नक्षत्रेणयोगयः । तस्य॰ लुबविशेषइतिलुप् । टाप् ॥ मुण्डीरीवृक्षे ॥

श्रवणाह्वा । स्त्री॰ मुण्डीरिकायाम् ॥

श्रव . । न॰ यशसि ॥ कर्णे ॥ श्रूयते

ऽनेनवा । उ॰ । सर्व्वधातुभ्योऽसुन् ॥

श्राय्य । पु॰ यज्ञपर्णी ॥ श्रणोति । उ॰ । श्रुदक्षिस्पृहिगृहिभ्य आय्य ॥ श्राय्य॰ श्रवणीयस्तुतिवेदभाष्यम् । अर्थान्तरे॰ वाच्यलिङ्ग ॥

श्रविष्ठा । स्त्री॰ धनिष्ठानक्षत्रे ॥ अतिशय श्रव । श्रुदोरप् । प्रसिद्ध श्रवोऽस्त्यस्याः । मतुप् । अतिशयेन श्रववति । अतिशयमेतमविष्टनाविति इष्ठन् विन्मतुपोर्लुगिति मतुपो लुक् ॥

श्रविष्ठाज । पु॰ बुधग्रहे ॥ त्रि॰ तज्जातमात्रे ॥

श्रव्यम् । न॰ सुन्दरवाक्ये ।

श्राणम् । त्रि॰ । पक्वे ॥ श्रा ति । श्रा पाके । क्त । संयोगादेरातोधातोर्यण्वतः इति॰ तस्य न ॥ अपिते ।

श्राणा । स्त्री॰ । उष्णिकाभागम् । यवागू म ॥ श्रायते स्म । श्रा॰ । कर्म्मणि क्त । संयोगादेरिति निष्ठानत्वम् ॥ पक्वायाम् ॥

श्राद्धम् । न॰ शास्त्रोक्तविधानेन पितृकार्य्ये ॥ तल्लक्षणं यथा । संस्कृतव्यञ्जनाद्यञ्च पयोदधिघृतान्वितम् । श्रद्धया दीयते यस्मात् श्राद्धं तेन निगद्यते॰ इति पुलस्त्यवचनात्॰ अस्य याऽग्न्यादीनि श्राद्धमिति वैदिकप्रयोगाधीनयौगिकमिति श्राद्धतत्त्वम् ॥ वेदबोधितपात्रालम्भनपूर्व्वकप्रमीतदेवताकत्यागविशिष्टि । सम्बोधनपदोपनीतान्॰ पित्रादीन्॰ चतुर्थ्यन्तपदेनोद्दिश्य॰ हविस्त्यागो । तच्च श्राद्धं द्वादशविधं भवतीत्याह भविष्ये । तथाहि । नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिण्डनम् । पार्व्वणञ्चेति विज्ञेयं गोष्ठ्यां शुद्ध्यर्थमष्टमम् ॥ कर्म्माङ्गं नवमं प्रोक्तं दैविकं दशमं स्मृतम् ॥ यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं स्मृतम् ॥ विस्तरस्तु भविष्यपुराणे यथा । अहन्यहनि यच्छ्राद्धं तन्नित्यमभिधीयते । वैश्वदेवविहीनं तदशक्तावुदकेन तु ॥ एकोद्दिष्टन्तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते । तदप्यदैवं कर्त्तव्यमयुग्मानाशयेद्द्विजान् ॥ कामाय विहितं काम्यमभिप्रेतार्थसिद्धये । पार्व्वणेन विधानेन तदप्युक्तं खगाधिप ॥ वृद्धौ यत् क्रियते श्राद्धं वृद्धिश्राद्धं तदुच्यते । सर्व्वं प्रदक्षिणं कार्य्यं पूर्व्वाह्णे तूपवीतिना ॥ गन्धोदकतिलैर्युक्तं कुर्य्यात् पात्रचतुष्टयम् । अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् ये समाना इति द्वाभ्यामेतज्ज्ञेयं सपिण्डनम् । नित्येन तुल्यं शेषं स्यादेकोद्दिष्टं स्त्रिया अपि ॥ अमावास्यायां क्रियते तत् पार्व्वणमुदाहृ

तम् । क्रियते वा पार्वणे यत् तत् पार्वणमिति स्थितिः ॥ गोष्ठ्यां यत् क्रियते श्राद्धं गोष्ठीश्राद्धं तदुच्यते । बहूनां विदुषां सम्यक् सुखार्थं पितृतृप्तये ॥ क्रियते शुद्धये यत्तु ब्राह्मणानान्तु भोजनम् शुद्ध्यर्थमिति तत्प्रोक्तं वैनतेय मनीषिभिः । निषेककाले सोमे च सीमन्तोन्नयने तथा । ज्ञेयं पुंसवने चैव श्राद्धं कर्माङ्गमेव च ॥ देवानुद्दिश्य यच्छ्राद्धं तद्दैविकमिहोच्यते । हविष्येण विशिष्टेन सप्तम्यादिषु यत्नतः ॥ गच्छन् देशान्तरं यत्तु श्राद्धं कुर्यात्तु सर्पिषा । यात्रार्थमिति तत्प्रोक्तं प्रवेशे च न संशयः ॥ शरीरोपचये श्राद्धमर्थोपचय एव च । पुष्ट्यर्थमेतद्विज्ञेयमौपचायिकमुच्यते । इति ॥ पञ्चविधमपि ब्रह्मपुराणवचनात् तद्यथा । नित्यं नैमित्तकं काम्यं वृद्धिश्राद्धं तथैव च । पार्वणञ्चेति मनुना श्राद्धं पञ्चविधं स्मृतमिति ॥ श्राद्धाचारे । प्रशस्ताः श्राद्धकर्त्तारो यथोक्तास्तथा ॥ यद्वा । श्राद्धाप्रयोजनमस्य । चूडादिभ्य उपसंख्यानमित्यण् ॥ कलाववस्थानुष्ठानमागमोक्तविधिनैव कार्यम् । यथाह भगवान् सदाशिवः । आगमोक्तविधिं हित्वा श्राद्धं कुरुते नरः । श्राद्धस्य फलं सोऽपि पितृभिर्नरकं व्रजेत् । तत्तीर्थं श्रा

णतसमपि यो भोमलमयो भवेत् । तस्मान् मर्त्यः प्रयत्नेन शाङ्करमतमाश्रयेत् इति ॥ त्रि॰ श्रद्धान्विते ॥

श्राद्धदेव । पु॰ अन्तके । धर्मराजे । यमे । श्राद्धस्य देवः अधिभावत्वात् । पितृपतित्वद्वा ॥

श्राद्धप्रदेश । पु॰ गयादितीर्थादिषु ॥

श्राद्धशाकम् । न॰ कालशाके ॥

श्राद्धिक । त्रि॰ श्राद्धिनि । अद्य तनैव श्राद्धान्नभोजिनि । श्राद्धशब्दः कर्मनामधेयं तत्साधनद्रव्ये लक्षणया वर्त्तते । श्राद्धमुक्तमनेन । श्राद्धमनेन भुक्तमिति ठनौ विति ठन् ॥ श्राद्धभोज्यद्रव्ये ॥

श्राद्धी । त्रि॰ श्राद्धिके ॥ श्राद्धमनेन भुक्तमिति इनि ॥

श्रान्त । पु॰ यतौ । शान्ते ॥ त्रि॰ क्लान्ते । श्रमयुक्ते ॥ श्राम्यति स्म क्त ॥

श्रान्तक्लथ । त्रि॰ निवृत्तसन्तापे ॥

श्रान्तसंवाहनम् । न॰ श्रमान्वितस्याऽऽसनादिप्रदानद्वारा श्रमोपशमने ॥

श्राम । पु॰ मासे ॥ मण्डपे ॥ काले ॥

श्रामणेर । पु॰ जिनभिक्षोः शिष्ये । चेलुके । महाभासके ॥

श्राय । पु॰ आश्रये । अश्रणे ॥ आश्रयणम् । श्रिञ् सेवायाम् । श्रिणीभुवोऽनुपसर्गे इति घञ् ॥ त्रि॰ श्रीदेवताकेऽविरादौ ॥ श्रीर्देवताऽस्य

। अण् ॥

श्राव । पु॰ श्रवणे ॥

श्रावक । पु॰ शाक्यमुने शिष्ये ॥ काके । वायसे ॥ दूरध्वनौ । त्रि॰ श्रावयितरि ॥ श्रावयति । श्रु॰ । णवुल् ॥

श्रावण पु॰ मासविशेषे । नभसि श्रावणिके ॥ श्रवणापौर्णमास्य स्मिन् । सास्मिन्पौर्णमासीत्यर्थे विभाषाफाल्गुनीतिपाक्षिकोण ॥ शब्दे ॥ श्रवणेनष्टस्याने । शिषइत्यण् ॥ पाषण्डे ॥ हृ॰ मेढ्रमिखर: ॥

श्रावणा । स्त्री॰ दुग्धालोमुषे ॥

श्रावणिक । पु॰ नभोमासि । श्रावणे ॥ श्रवणापौर्णमास्यस्मिन्नस्ति । विभाषाफाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यइतिठक् ॥

श्रावणी । स्त्री॰ श्रवणायाम् । श्रावणमासस्यपूर्णिमायाम् ॥ अस्यामृषितर्पणं भवति । तच्चकालादिकमाहकालिदासः । पूर्वाह्णकालेसमयाद्युतमारहान्तायापूर्णिमानभसिसङ्गवगातुतस्य म् । विध्यायुक्तातरक्षितासुनितर्पणं स्यात्तत्सन्मोभवतिवायद्दातदान॥कोचित्ससमिच्छतितद्देवतर्पणं श्रुतीवदसेश्रुतिशाखिनोयदि । स्यात्सङ्क्रमेवासतिसर्वशाखिनातर्पणोश्रावणशुक्लपञ्चमी स्यात्सङ्गवान्तेव सुपाङ्कतौस्यात्पूर्वान्वितावापिचपाकयश्च । तथासितापक्षदशमीसमुता:तथाष्टकोतत्समयाभिरूपे । ज्यो॰ २१ अध्याय । ४६ ४८ । श्रवणेनयुक्तापौर्णमासी । नक्षत्रेण्यण् । ङीप् । मुडोर्यम् ।

श्रावस्ती । स्त्री॰ देशविशेषे । धर्मपत्तने ॥

श्राविष्ठीय । त्रि॰ श्रविष्ठायांजाते छण्प्रत्यय ॥

श्राव्यम् । त्रि॰ श्रुतिपथमधुरे ॥

श्रित: । त्रि॰ आश्रिते ॥ सत्क्ते ॥ श्रयति । श्रिञ् ॰ । गत्यर्थाकर्मकेतिकर्त्तरिक्त ॥

श्रितवान् । त्रि॰ श्रिते ॥ श्रिञ । क्तवतु ॥

श्री । पु॰ सोमेश्वरमतेषड्रागान्तर्गतप्रथमरागे ॥ हनुमद्भरतयोर्मते पञ्चमरागे ॥

श्री । स्त्री॰ वेशरचनायाम ॥ शोभायाम् ॥ भारत्याम । सरस्वत्याम् ॥ लवङ्गे ॥ सरलद्रुमे ॥ लक्ष्म्याम् । पद्मालयायाम् । पद्मायाम् । कमलायाम् । हरिप्रियायाम् ॥ त्रिवर्गसम्पत्तौ ॥ विधायाम् ॥ उपकरणे ॥ विभूतौ ॥ मात्मानममम्यंतपूर्वाभिरसहृदिभि । पापश्री : श्रयमन्वच्छ्रीमामन्यंतदुत्तभाम् ॥ म

ती ॥ बिल्वद्रुमे ॥ सरले ॥ च धिकारे ॥ प्रभायाम् ॥ कीर्त्तौ ॥ वृद्धौ ॥ सिद्धौ ॥ ब्रह्मा मातरि ॥ तारायाम् ॥ बुद्ध देव्याम् ॥ श्रयति हरिम् । श्रय न्त्ये तामिति वा । श्रिञ् । क्वि ब्वचीति । क्विब्दीर्घौ ॥ कर्त्तरि विहितस्य क्विपः कर्मण्यसम्भव क्विदिकारादिति ङीष् तुन् । क्तिन्प्रत्य येऽयं इकार इति व्याख्यानात् । कृ दन्त यदिकारान्तमिति पक्षेऽपि कार ग्रहणात् तत्सामर्थ्यादेव केवलग्रहणा त् । दुर्घटस्तु । ङीषि । श्रीमिताय रचितव्युत्पत्तिमाह ॥ विद्याशक्तौ ॥ श्रयति पारतन्त्र्याच्चिदात्मानमिति श्री ॥ राजलक्ष्म्याम् ॥ शरीर शोभायाम् ॥ सर्वैरतिक्रष्टत्वेना त्तेरवाश्रयतया स्त्रीक्रियते प्रलयसुषुप्त्यादौ सर्वभूतैरित्युक्त्या । जीव स्योपाधिभूतायामविद्यायाम् ॥ देवादिनाम्नां पूर्वं श्रीशब्दप्रयोगः कर्त्तव्य इत्याह । देवगुरुगुरुस्था नक्षेत्रक्षेत्राधिदेवताम् । सिद्धसि द्धाधिकारांश्च श्रीपूर्वं समुदीरयेदि ति प्रयोगसार ॥ स्वर्गगामित्वा दिना सिद्धोऽधिकारी येषां नराणा मितरेण । जीवता श्रीशब्दादित्व नाम्नो नतु मृतानां तथेतराधुनिकशि ष्टानामाचार ॥ पत्रे श्रीशब्दद

नप्रमाणं यथा । षड्गुरौ स्वामि नि पञ्च भृत्ये चतुरो रिपौ । श्री शब्दानां त्रयं मित्रे एकं पुत्रभार्य- योरिति ॥ उकथायां १ वृत्तौ ॥ ग श्री । यथा । श्रीस्ते । सास्ता म ॥

श्रीकण्ठ । पु । नीलकण्ठे । शि वे ॥ कालकूटविषधारणात् श्री शोभा कण्ठे यस्य । धृतकण्ठे विष घोरतर । श्रीकण्ठनामेति नीलकण्ठस्तव ॥ कुरुजाङ्गल देशे ॥

श्रीकण्ठपदलाञ्छन । पुं । माल तीमाधवनाटककर्त्तरि । भवभू तिकवौ ॥

श्रीकण्ठसख । पुं । कुबेरे ॥ कु । दृ । युग ॥

श्रीकन्दा । स्त्री । बन्ध्याकर्कोटक्या म् ॥

श्रीकर । पु । विष्णौ ॥ स्मरतां स्त वतां स्तुवतां कीर्त्तयतामर्चयतां भ क्तानां श्रियमीश्वरस्तास्य लक्ष्मीं क रोति । कृञो हेतुताच्छील्यानुलो म्येष्विति टः ॥ न । रक्तो त्पले ॥ त्रि । श्रीकारके ॥ करो ति । डुकृञ् । अच् ॥ श्रिय कर ॥

श्रीकरण । न । लेखन्याम् ॥

श्रीकरी । स्त्री । शक्तिविशेषे ॥

श्रीकान्त । पुं० विष्णौ ॥

श्रीकारी । पुं० मृगावशेषे । हिरिणे ॥ द्रु० रा० नि० वटः ॥

श्रीकुङ्कुमम् । न० सरस्वत्यास्तीर्थे ॥

श्रीखण्ड । पुं० न० चन्दने । द्रु० लि० शिप । ॥

श्रीगर्भ । पुं० विष्णौ ॥ श्रीर्विभूति । गर्भे ॥ खड्गे ॥

श्रीघ्र । पुं० पश्चिमापाकीय आलायाम् । अश्वनिप्रधानम् ॥

श्रीघन । पुं० बुद्धे । बुद्धे । जिने । मुनीन्द्रे ॥ श्रिया० ज्ञानपुण्यसम्भारेण० बुद्धत्वादौ० घन पूर्ण बुभ्रादित्वाश्रवत्वम् ॥ न० दधि ॥

श्रीज । पुं० कामदेवे ॥

श्रीताल । पुं० तालहृक्षसदृशवृक्षविशेषे । मृदुतालि । हिमालयपर्व । मसीशिल्पादौ ॥

श्रीतीर्थम् । न० तीर्थविशेषे ॥

श्रीद । पुं० पुण्यजनेश्वरे । कुबेरे ॥ श्रियद्यति० ददातिवा । देवोद्दाओश्च० आतइतिक. ॥ चि० श्री ६ । श्रीभाद् तरि ॥

श्रीदेवी । स्त्री० तीर्थविशेषे ॥

श्रीधर । पुं० विष्णौ ॥ श्रिया . व क्षसिधरो धारकः ॥ भूताश्वङ्गे ॥ शालग्रामविशेषे । यथा । चतुर्द्रंष्ट्रचक्रमुवनमालाविभूषित म । श्रीधर देविविस्त्रं यश्रीप्रदगृहिणासदा ॥

श्रीनगरम् । न० श्रीविद्यास्थाने ॥

श्रीनन्दन । पुं० कामदेवे ॥

श्रीनिकेतन । पुं० विष्णौ ॥

श्रीनिवास । पुं० विष्णौ । नारायणे ॥ श्रियोनिवास । निजिअयेन० अपायेन० श्रीमतस्य भवायक्षयत्तसिचनपाविनिश्रीव-सति० सत्पुरुष: । यथा । श्रीनिवासोयशोरः पापपापं मुखहृयाम् । वाणीविक्षपात्मनां सारङ्गमापहाम्बुजमिति ॥ यद्वा श्रीयते नश्रीसन्तोऽत्त्यम । श्रीम मतनित्यनिवासोऽस्य । यतोत्र आदौस्त्यतीति वृत्तिरत्युक्त ॥

श्रीपति । पुं० पुरुषोत्तमे । विष्णौ ॥ अमृतमथनेसर्वोत्तस रामसमानृदेवांश्चविहायविष्णुमेवपतित्वेनवरयतीतिविष्णुपुराणप्रसिद्धे ॥ श्रिय ' पति ॥ भूपतौ । पृथिवीनाथे ॥

श्रीपथ: । पुं० राजमार्गे ॥ द्रु० हि० चन्द्र ' ॥

श्रीपर्णम् । न० अग्निमन्थे ॥ पद्मे । पद्मे । श्री पर्णे० पर्णयुक्तास्य । अर्शआद्यच् ॥

श्रीपर्णिका । स्त्री० कटफले । कायफल० द्रु० प्र० ॥ काश्मर्याम् ।

गम्भार्याम् ॥ स्वार्थे कन् । क्रस्व ॥

श्रीपर्णी । स्त्री॰ काश्मर्याम् । ग म्भायाम् ॥ हठे । कुम्भयाम् । बा रिपर्ण्याम् ॥ श्रीयुक्तानिपर्णान्यस्या • श्रीपर्णं पुष्पस्याप्या । पाक्षकर्ण प र्णेत्यादिनाङीष् ॥ कट्फले ॥ शा ल्मलौ ॥

श्रीपर्वत । प॰ श्रीशैले ॥ तीर्थवि शेषे ॥

श्रीपिष्ट । पु॰ सरलद्रुमरसे । सरल द्रवे ॥ श्रिय सरलद्रुमस्यपिष्ट • तच्चूर्णमजनितत्वात् ॥

श्रीपुत्र । पु॰ चन्द्रे ॥ कामदेवे ॥

श्रीपुष्पम् । न॰ लवङ्गे ॥ पद्मकाष्ठे ॥

श्रीप्रसूनम् । न॰ लवङ्गे ॥

श्रीफल । पु॰ बिल्वे । मालूरे ॥ श्रीप्रद • श्रीप्रियवाफलमस्य । शा कपार्थिवादि . । श्रीफलस्तुवरस्ति क्तोग्राहीरूक्षोऽग्निपित्तकृत् । वात श्लेष्महरोबल्योलघुरुष्णश्चपाचन । राजादनवृक्षे ॥

श्रीफला । स्त्री॰ आमलक्याम् ॥ नी ल्याम् ॥ क्षुद्रकारवेल्याम् ॥

श्रीफलिका । स्त्री॰ आमलक्याम् ॥ क्षुद्रकारवेल्याम् ॥ महानीलीवृ क्षे ॥

श्रीफली । स्त्री॰ धात्र्याम् । आमलक्या म् ॥ नीलिकायाम् ॥

श्रीवल्ली । स्त्री॰ कट्फलायाम् ॥

श्रीभद्र । पु॰ चित्रगुप्तसुतेकायस्थ जातिविशेषे ॥

श्रीभद्रा । स्त्री॰ भद्रमुस्तके ॥

श्रीभागवतम् । न॰ पुराणभेदे । महा पुराणान्तर्गतपुराणविशेषे ॥

श्रीभ्राता । पु॰ घोटके ॥ विधौ । च न्द्रे ॥ समुद्रोत्पन्नत्वात् ॥

श्रीमान् । पु॰ तिलकवृक्षे । कुरबे ॥ अश्वत्थवृक्षे ॥ शिवे ॥ विष्णौ ॥ कुबेरे ॥ इन्द्रे ॥ त्रि॰ मनोज्ञे ॥ धनिके । श्रीले ॥ सर्वातिशयितश्रि यि । अखण्डितैश्वर्यसम्पन्ने • म हाराजचक्रवर्त्तिनि ॥ श्री लक्ष्मी सम्पत् • शोभा • कान्तिर्वा • सा स्यास्मिन्वास्ति । तदस्यास्त्यस्मि न्निति मतुप् । शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते । तथा युक्तामहात्मान . श्रीमन्त . शास्त्र सम्मता ॥

श्रीमति . । स्त्री॰ राधायाम् ॥

श्रीमती । स्त्री॰ श्रीयुक्तायाम् ॥ यैषि तामभिधानस्यपूर्वमेतत्प्रयोज्यते ॥

श्रीमद् . । पु॰ धनमदे । सर्वमदाध मे ॥ यथा । नह्यन्योजुषतोजोष्या न्बुद्धिभ्रंशोरजोगुण । श्रीमदादा भिजात्यादिर्यत्रस्त्रीद्यूतमासव ॥ इत्यन्तेपशवोयत्रनिर्दयैरजितात्म भि । मन्यमानैरिमंदेहमजरामृ

स्यु॰ मङ्गलम् ॥

श्रीमलापहा । स्त्री॰ धूम्रपत्रायाम् ॥ गृध्रपत्रायां ॥

श्रीमस्तक । पु॰ रसोने ॥ कृ॰ त्रि॰ शेष ॥

श्रीमुख । पुं॰ सप्तमेवत्सरे ॥ तत्फलं यथा । सुभिक्षं क्षेममारोग्यं वर्षाकाले सुखीजनः । सस्यवृद्धिं विजानीयात् श्रीमुखे सुरवन्दिते ॥ ७ ॥ न॰ शोभितानने ॥

श्रीमूर्त्ति । स्त्री॰ देवताविग्रहे ॥ विष्णुप्रतिमायाम् ॥

श्रीयुक्त । श्रीयुत । त्रि॰ लक्ष्मीविशिष्टे । श्रीमति ॥

श्रीरङ्ग । पुं॰ पुण्यक्षेत्रविशेषे । श्रीरङ्गाख्यं महापुण्यं क्षेत्रं सन्निहितो हरिरिति तन्त्रम् ॥

श्रीरस । पु॰ सरलरसे । श्रीवेष्टे ॥

श्रीराग । पुं॰ षड्रागान्तर्गततृतीयरागे ॥

श्रीराम । पुं॰ दशरथात्मजे ॥

श्रील । त्रि॰ श्रीमति । लक्ष्मीवति । लक्ष्मण्ये । श्रियायुक्ते ॥ श्रीरस्यास्ति । सिध्मादित्वाल्लच् ॥ श्रियलाति वा । आदाने । आतोनुपसर्गे कः ॥

श्रीलता । स्त्री॰ महाज्योतिष्मत्याम् ॥

श्रीवत्स । पुं॰ विष्णोश्चिह्नविशेषे । भृगुवत्सदुर्वासस पदाघातरूपेरेखाविशेषे ॥ महापुरुषलक्षणभूते॰ वक्षःस्थले तदर्थदक्षिणावर्त्तरोमावर्त्तविशेषे ॥ प्रदक्षिणावर्त्तविक्षिपरोमश्रीवत्ससहितस्वविभूषिताङ्गमिति गरुडपुराणात् ॥ वदतिमहत्वम् । वद्व्यक्तायांवाचि । वृतृवदिहनिकमिकषिभ्य सइतिस । श्रीयुक्तोवत्स ॥ विष्णौ । कृष्णे । गृहविशेषे ॥ सुवर्णाप्रभेदे । षट्तीङ्गुली ॥

श्रीवत्सकी । पु॰ बहुतवक्रावर्त्तहये ॥

श्रीवत्सभृत् । पुं॰ हरौ । विष्णौ ॥

श्रीवत्सलाञ्छन । पु॰ विष्णौ । श्रीवत्सोमहापुरुषलक्षणभूतस्तद्रोमावर्त्तविशेषोलाञ्छनं चिह्नमस्येतिविग्रह ॥

श्रीवत्साङ्क । पु॰ विष्णौ ॥

श्रीवराह । पुं॰ आदिवराहे । विष्णौ ॥

श्रीवल्लभ । पुं॰ परमात्मनि ॥ श्रिया विद्याभक्तिवल्लभसहाकारे ॥

श्रीवाटी । स्त्री॰ नागवल्लीभेदे ॥

श्रीवारक । पु॰ शाकविशेषे । सितावरे । सूच्याग्रे । सूचीपत्रके । सिराला॰ सिरयारा॰ सिरियारी॰ इ॰ भा॰ प्र॰ ॥ तच्छाकप्रकारोयथा । श्रीवारकंदलंशाकमारनालेसुसाधितम् । पीडितालोडितं तैलेनासमर्दं समन्वितम् । वातपित्तह

रावक्याविवन्धाध्मानानाशिनी । क फक्रम्यवक्रक्रमीभेदिनीसारसाय नी । सा॰ श्रीवालीत्यर्थः ॥

श्रीवाली । स्त्री॰ श्रीवारकी॰ शाकवि शेषे ॥

श्रीवास । पु॰ विष्णौ । नारायणे ॥ श्रियोवास । श्रस्यवसति॰ श्रीर नपायिनी॰ वसतीत्यर्थः ॥ शिवे । हरे ॥ पङ्कजे । वृकधूपे । सरलद्र वे । श्रीवेष्टे ॥ श्रस्यगुणाः । श्रीवा सोमधुरस्तिक्तः स्निग्धोष्णस्तुवर सर । पित्तलोवातमूर्द्धाक्षिस्वररो गकफापह । रक्षोघ्नःस्वेददौर्गं ध्ययूकाकण्डूव्रणप्रणुत् ॥

श्रीवास्तव । पु॰ चित्रगुप्तात्मजैकाय स्थजातिविशेषे ॥

श्रीविद्या । स्त्री॰ महाविद्याविशेषे । परदेवतायाम् । त्रिपुरसुन्दर्याम् ॥

श्रीवृक्ष । पु॰ बिल्ववृक्षे ॥ अश्वत्थ वृक्षे ॥ श्रीप्रद॰ श्रीप्रियोवावृक्षो स्य । शाकपार्थिवादि ॥

श्रीवत्सः । पु॰ अश्वस्यवक्षआवर्त्ते ॥

श्रीवत्सकी । पु॰ श्रीवत्सकावर्त्तविशि ष्टेऽश्वे ॥ तल्लक्षणं यथा । वक्षोभवा वर्त्तचतुष्टयस्यकण्ठेभवेद्यस्यचरोच मानः । श्रीवत्सकीनामहय : सभ र्त्तुः श्रीपुत्रपौत्रादिविवर्धयेश्चादि ति ॥ श्रीवत्सकीवत्सविदेद्रोमावर्त्तो मुखेदिवेतितुर्वैजयन्ती ॥

श्रीवेष्ट । पु॰ सरलद्रवसारसे । वृक धूपे । श्रीवासे । तस्यगुणायथा । श्रीवेष्ट कटुकस्तिक्तकषाय श्ले ष्मपित्तजित् । योनिदोषव्रणाजीर्ण व्रणाध्मानदोषनुत् ॥ श्रीसम्पदा॰ श्रियोवावेष्टोनियास ॥

श्रीश । पु॰ विष्णौ ॥ श्रीरामे ॥ श्रि यईश ॥

श्रीशैल । पु॰ भारतवर्षस्थपर्वत विशेषे ॥ स्थितयथाविधमनोविल र्थासमर्थाश्रीश्रीशैलस्पृष्टकृष्टरेणुकदोष लब्धे । गाव यथामरलता परिवे ष्टयन्तिकर्णयथाविरचयन्तिसुगान्ध नीडम् ॥ इतियोगतारावली ॥

श्रीसञ्ज्ञम् । न॰ लवङ्गे ॥ श्रिय सञ्ज्ञा सञ्ज्ञायस्य ॥

श्रीहरि । पु॰ परमात्मनि ॥ श्रिय जीवस्योपाधिभूतामविद्यांहरति॰ आत्मज्ञानप्रदानेननाशयति॰ इति श्रीहरिः ॥ श्रिय दधाने । विष्णौ ॥

श्रीहस्तिनी । स्त्री॰ भूरुण्ड्याम् हाती सुंडा॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ ॥ श्रियाहस्त॰ श्रीहस्त । सविद्य तेयस्याः । अतइनि । यद्वा । ह स्त गृह्णातिहस्तयति । अवश्यंश्रि यहस्तयति । आवश्यकेतिणिनि ॥

श्रुप्रका । श्रुघ्नी । स्त्री॰ सर्जिकाक्षारे ॥

श्रुतम् । न॰ शास्त्रे ॥ शास्त्रविचारे ।

वेदे । श्रवणे । सुघना० द्र० भा० ॥ त्रि० विश्रुते । प्रख्याते । श्रवणगोचरे ॥ श्रुयते० श्रूयते स्म । श्रुश्रुवणे । क्त । ॥ भग्नाविवा । श्रु० । क्त ॥

श्रुतकीर्त्ति: । पु० देवर्षौ ॥ स्त्री० ज नकभ्रातुः कुशध्वजकन्यायाम् ॥ त्रि० कीर्त्तियुक्ते ॥

श्रुतदेवी । स्त्री० सरस्वत्यां ॥

श्रुतर्षि । पु० सुश्रुतादृषिषु ॥ सुश्रु ताद्या , श्रुतर्षयइतिविश्वः शब्दभे षः ॥

श्रुतश्रवाः । त्रि० श्रावणश्रितयश्रसि ॥

श्रुतश्रवा । स्त्री० श्रीकृष्णपितृष्वस रि । शिशुपालमातरि ॥

श्रुतश्रवोनुज । पुं० शनैश्चरग्रहे ॥

श्रुतश्रेणी । स्त्री० द्रवन्त्यां ॥

श्रुताध्ययनम् । न० ब्रह्मवादे ॥ ह०चा० रो० ॥

श्रुताध्ययनसम्पन्न ' । त्रि० धर्मशास्त्र ज्ञे ॥ यथा । श्रुताध्ययनसम्पन्ना ' कुलीना सत्यवादिन । राज्ञःसभास द कार्या शत्रौमित्रे चयेसमा . ॥

श्रुतान्वित ' । त्रि० शास्त्रज्ञे ॥

श्रुतार्थ । पुं० शब्दबोधविषयीभू तार्थे । श्रवणमात्रबोध्यार्थे ॥ यथा । श्रुतार्थस्यपरित्यागादश्रुतार्थस्य कल्पनात् । प्राप्तस्यबाधादित्येव परिसङ्ख्यात्रिदोषिकेति ॥

श्रुतायु । पु० सूर्यवंश्योयनृपतिविशे षे ॥

श्रुति । स्त्री० वेदे । आम्नाये । वेदा ख्यपरदेवतायाम् ॥ विनियोगवि धौ सहकारिभूतेप्रमाणविशेषे ॥ तत्रनिरपेक्षोरव श्रुति । साच त्रिविधा । विधात्री० अभिधात्री० विनियोक्त्रीच । तत्राद्यालिङ्गाद्या त्मिका० द्वितीयाव्रीह्यादिश्रुति • यजमानद्रव्यस्वत्वाद्वैतसम्बन्ध ' प्रतीवतेसाविनियोक्त्री । साऽपि त्रिविधा । विभक्तिरूपा० एकाभि धानरूपा० एकपदरूपाचेति । तत्रवि भक्तिश्रुत्याङ्गत्वम् • यथाव्रीहिभि र्यजेतेति० तृतीयाश्रुत्या० व्रीही णांयागाङ्गत्वम् • तद्धिपुरोडाश प्रकृतितया• अङ्गत्वापन्नत्वायान्या गमात्रम् व्रीहिणांयागसम्बन्धस्य आ ख्यातस्याविवक्षितत्वाश्रुत्याङ्गत्व म • तदपिगौरूपद्रव्यपरिच्छेद्यद्वारा० मतुमादम्र्तत्वात् । व्री हीन् प्रोक्षतीतिप्रोक्षणस्यव्रीह्याङ्गत्व द्वितीयाश्रुत्या० तत्प्रोक्षण • नव्री हिस्वरूपार्थंतत्रतैनविनाप्युपपत्ते ' किन्त्वपूर्वसाधनत्वप्रयुक्तम् • व्री हीन्प्रोक्षयागानुष्ठानेऽपूर्वानुपप त्ते : । एवं सर्वत्रहेतु० अपूर्वप्रयु क्तमङ्गत्व बोध्यम् । एवमिमामग्टभ् णन्रशनामृतस्येत्यश्वाभिधानीमा

दस्र॰ मूलस्य॰ द्वितीयास्तुत्या॰ म
न्त्रस्याङ्गाभिधानाङ्गत्वम् । यदाहव
नीयेजुहोतीत्याहवनीयस्य होमाङ्ग
त्व सप्तमीश्रुत्या । एवमन्योपिविभ
क्तिश्रुत्याविनियोगोज्ञेय । पशुना
यजेतेत्यत्रैकत्वपुंस्त्वयोः सामाना
धिकरण्यश्रुत्याकारकाङ्गत्वम् । य
जेतेत्याख्याताऽभिहितसङ्ख्याया
भावनाङ्गत्वम्समानाभिधानश्रुतेरे
वपदश्रुत्याधयाग ङ्गत्वम्॰ नचामू
र्त्यया‌स्या कथभावनाङ्गत्वम॰
कर्तृपरिच्छेदद्वारातदुपपत्ते । क
र्तावाच्च्यपलभ्य॰ आख्यातेनहि
भावनोच्यते॰ साचकर्त्तारंविनाऽनु
पपन्नेतितमाक्षिपति । सेयश्रुति
र्लिङ्गादिभ्य प्रबला॰ लिङ्गादिषु
नप्रत्यक्षोविनियोजक शब्दोऽस्ति॰
किन्तुकल्प्य । यावच्चतैर्विनियोजक
शब्द कल्प्यते॰ तावत्प्र
त्यक्षयाश्रुत्याविनियोगस्य कृतत्वन
तेषांकल्पकत्वशक्तिव्याहतत्वात् । अ
तएवैन्द्र्यालिङ्गमैन्द्रोपस्थानार्थत्व
म्॰ किन्त्वैन्द्र्यागार्हपत्यमुपतिष्ठत
इत्यत्र॰ गार्हपत्यमितिद्वितीया
श्रुत्या॰ गार्हपत्योपस्थानार्थत्वम् ॥
अन्यदेवीगीतायांदेवीवाक्य यथा ।
सर्वज्ञाया . सर्वशक्तिमतोवेद
समुत्थित । अज्ञानस्यममाभावा
दप्रमाणानचश्रुतिरितिसर्वज्ञात्

सर्वशक्तेश्चमत्पङ्क्तिपाठेतुमत्तोमत्
स्वरूपादित्यर्थः ॥ प्रयोगविध्युप
योगिप्रमाणविशेषे ॥ तत्रक्रमप
रश्चनश्रुति । तच्चद्विविधम् ।
केवलक्रमपरम्॰ तद्विशिष्टपदार्थ
क्रमपरञ्च । तत्रवेदंकृत्वावेदिं क
रोतीतिकेवलक्रमपरम्॰ वेदि
करणादेर्वचनान्तरप्राप्तत्वात् । वष
ट्कर्त्तुः प्रथमभक्षइतितुक्रमवि
शिष्टपदार्थपरम्॰ एकप्रसरताभ
ङ्गभयेनभक्षानुवादेनक्रममात्रस्यवि
धातुमशक्यत्वात् । सेयंश्रुतिरित
रप्रमाणापेक्षयाबलवती॰ तेषाम
चनकल्पनद्वाराक्रमप्रमाणत्वात् ।
अतएवाश्विनग्रहस्यपाठक्रमात्तृ
तीयस्यापिग्रहणप्रसक्तावाश्विनोद
शमोगृह्यतइतिवचनाद्दशमस्थानेग्र
हणमित्युक्तम् ॥ कर्णः । अस्यप
र्याय । कर्णशब्दपर्यायोश्च श्रुति
स्त्रीश्रवणा श्रव॰ ॥ अस्यशुभाशुभ
लक्षण यथा । रक्ताल्पकृष्णस्तुक
र्णा स्युः पापमृत्यव. । निर्मां
सैश्चिपिटैर्भोगा. कृपणाङ्गस्वकर्ण
का ॥ शङ्कुकर्णाश्चराजानोरोम
कर्णाः शतायुष । ह्रस्वकर्णाश्च
राजानोधनिन परिकीर्त्तिता
॥ श्रवणे । वाक्यजनितवाक्या
र्थविज्ञाने । मननिदिध्यासन
सहकृतश्रवणज्ञाने ॥ श्रोत्रकर्मणि॥

मार्त्तायाम् ॥ अभ्यासि ॥ षड्जा दिस्वरारम्भकावयवशब्दविशेष ॥ तदुक्तम् । प्रथमश्रवणाच्छब्द श्रूयते ह्रस्वमात्रक । सा श्रुति सम्परिज्ञेया स्वरावयवलक्षणेति ॥ श्रव णं ॥ श्रूयते । स्वर्गास्निन्निति कर्म्मविशिष्टम् ॥ श्रूयतेधर्म्मोऽनयेति वा । श्रुयजोविस्तुश्च · करणद्युति क्तिन् ॥

श्रुतिकट · । पुं॰ प्रायश्चित्ते ॥ पक्षे ॥ सर्पशीर्षे । प्रायश्चित्ते ॥ इ॰ मेदिनिहेमचन्द्रौ ॥

श्रुतिकट . । पुं॰ कठोरशब्दे ॥

श्रुतिजीविका । स्त्री॰ स्मृतौ ॥

श्रुतितत्पर · । त्रि॰ वेदाभ्यासरते ॥ सकर्णे ॥

श्रुतिधर : त्रि॰ श्रुतमात्रधारके ॥ तद्गौषधमुक्तं गारुडे यथा । हरिद्राच । वचाकर्ष-वेमकृत्

शीत्वाघृतयेव्र । सर्वरोगविनिर्मुक्तश्च पूर्णपलशतमिव ॥ सघोरं भक्षितकुर्यात् समाहिनसप्तजं । न रश्रुतिधरंशूरमृगेन्द्रगतिविक्रमम् पद्मगौरप्रतीकाशयुक्तं द्व्यशतायुषा । वाकणाद्धाक्रान्तिविप्रसततंदुग्ध मौञ्जिनम् । मधुसर्पि . समायुक्तं वचमायुष्करंभवेत् । तत्स्वगघ मधुमासार्द्धंद्व्यषणंसञ्चिवम् । कुर्यान्नरंश्रुतिधरंप्रमदाजनवल्लभ मिति ॥ १६१ अध्याय · ॥

श्रुतिवर्जित । त्रि॰ बधिरे ॥ ना स्तिके ॥ श्रुतिभ्यां॰ श्रुत्यावावर्जि त ॥

श्रुतिवेध · । पुं॰ कर्णवेधे ॥

श्रुतिस्फोटा । स्त्री॰ कर्णस्फोटा याम् । त्रिपुटायांलतायाम् ॥

श्रुतोपनिषत्क : । त्रि॰ ज्ञानिनि ॥

श्रेटी । स्त्री॰ लोलावत्युक्ताङ्कविशेषे ॥

श्रेणि · । पु॰ स्त्री॰ वीथ्याम् । पाल्यौ । पङ्क्तौ ॥ सदृशनिकरसंहतौ । कारुसंहतौ । एकेनशिल्पेनपण्येनवायेजीवन्ति॰ तेषांसमूहे ॥ श्रयति॰ श्रीयतेवा । श्रिञ्॰ । वह्निश्रीतनि ॥ एकमुख्येसजाति समूहे । सैकपार्श्वे ॥

श्रेणिक पु॰ मगधदेशीयनृपति विशेषे ॥ इति हेमचन्द्र ।

श्रेणी । स्त्री॰ श्रेणिशब्दार्थे ॥

श्रेणीधर्म · । पुं॰ वणिगादीनांधर्मे ॥

श्रेय · । न॰ मुक्तौ । निर्वाणे । नि श्रेयसि । वेदबोधितपरमपुरुषार्थे । स्वरूपावस्थानि । अनपायिसुखा बाप्तिलक्षणे । आगमज्ञापितेवृत्ते ॥ यथा । कुर्वेश्वनरकव्याधिश्चिकित्सा मकरोतिय : । गत्वानिरौषधदेशं व्याधितस्य किं करिष्यति ॥ याव त्तिष्ठतिदेहोयतावत्तत्त्वं समभ्यसेत् । सन्दीप्तेभवनेकि कुम्भं खनतिपार्व

ति । व्याघ्रीवास्ते जरायायुर्याति भिन्नघटाम्बुवत् । निघ्नन्तिरिपुवद्रोगास्तस्माच्छ्रेय समाचरेत् ॥ यावन्नाश्रयतेदुःखंयावन्नायान्तिचापदः । यावन्नेन्द्रियवैकल्यं तावच्छ्रेय समाचरेत् ॥ कालोनज्ञायतेनानाकार्यैः संसारसम्भवैः । सुखदुःखंजनोहन्तनवेत्तिहितमात्मनः कुतिकुलाद्यैवप्रथमेोल्लासः ॥ कल्याणे । मङ्गले । शुभे ॥ धर्मे । । वेदविहितप्राणिनामभ्युदयनिःश्रेयससाधने० प्रवृत्तिनिवृत्तिलक्षणे । पुण्ये ॥ त्रि० अतिप्रशस्ते । शस्ते ॥ द्वयमनयोरतिशयेनप्रशस्तम् । द्विवचनेतोयसुन् । प्रशस्यस्यश्र । विद्याद्यधिके ॥ धर्मार्थावुच्यतेश्रेय० कामार्थौ० धर्म एवच । अर्थ एवेहवाश्रेयस्त्रिवर्गइतितुस्थिति ॥ अयमुपदेशोवुभूत्सूनप्रतिबोध्य ॥

श्रेयसी । स्त्री० करिपिप्पल्याम् ॥ अभयायाम् । पाठायाम् । अम्बष्ठायाम् । श्रेष्ठायाम् ॥ डुगित्वान्ङीप् ॥

श्रेयाश । पुं० हतार्हद्विशेषे ॥

श्रेष्ठ । पुं० कुबेरे । धनदे ॥ विप्रे ॥ नृपे ॥ मुख्यप्राणे । न० गोदुग्धे । गव्ये ॥ त्रि० मुख्ये । वरे । पुष्कले । सत्तमे । अतिशोभने ॥ अयमेषामतिशयेनप्रशस्यः । अतिशायनेतमबिष्ठनाविति इष्ठन् । प्रशस्यस्यश्र ॥ प्रधानभूते ॥ ज्येष्ठे ॥ वृद्धे ॥

श्रेष्ठवाक् । पुं० शाकवृक्षे ॥

श्रेष्ठता । स्त्री० श्रेष्ठत्वे ॥

श्रेष्ठा । स्त्री० स्थलपद्मिन्याम् ॥ उत्तमायांनार्याम् ॥ ज्येष्ठानक्षत्रे ॥

श्रेष्ठाम्लम् । न० वृक्षाम्ले ॥

श्रेष्ठी । पुं० कुलोत्तमशिल्पिनि ॥

श्रोण । त्रि० अङ्घ्रावेपङ्गौ ॥ श्रोणति । श्रोणृ सङ्घाते । पचाद्यच् ॥ यद्वा । शृणोति । श्रु० । बाहुलकान्न ॥

श्रोणि । स्त्री० कट्याम् ॥ श्रोणति । श्रोणृ० । इन् ॥ यद्वा । श्रूयतेपुंभि । श्रु० । वह्निश्रिश्रुयुद्रुग्लाहात्वरिभ्योनित्ति नि ॥ पथि ॥

श्रोणीफलम् । न० कटौ ॥

श्रोणीफलकम । न० कटिपार्श्वे । कटौ ॥ श्रोणि फलकमिव० चर्माकारत्वात् ॥

श्रोणिबिम्बम् । न० कटिसूत्रे ॥

श्रोणिसूत्रम् । न० खड्गबन्धनसूत्रे । परतला० इ० भा० प्र० ॥

श्रोणी । स्त्री० कट्याम् ॥ पथि ॥ कृदिकारादक्तिनइतिपक्षेङीष् ॥

श्रोतव्य । त्रि० श्रवणीये । श्रोतुं योग्ये । श्रोतव्य श्रुतिवाक्येभ्योम

न्यधोपपत्तिभिः ।

श्रोत्र । न० कर्णः ॥

श्रोता । त्रि० श्रवणकर्त्तृ । यो ह्यर्थं सम्यगवबुध्यते स एव श्रोता भवति ॥ यथा । वक्ता रसविहीनश्चाडम्बरं श्रोता यन्नानुरज्यते । इति ॥ अपि च । बोधविहीने श्रोतरि वक्तुर्वाक्यं प्रयाति वैफल्यम् । नयनविहीने भर्त्तरि लावण्यमिवाङ्गनानाम् ॥ इति ॥ शृणोति । श्रु० । तृच् ॥

श्रोत्रम् । न० श्रुतिः । कर्णः । शब्दग्राहकमिन्द्रियविशेषः । शब्दाभिव्यञ्जकमिन्द्रियम् ॥ शृणोत्यनेनेति श्रोत्रम् । शब्दश्रवणप्रतिकरणम् । श्रूयतेऽनेन वा । श्रु० । ष्ट्रन् ॥ कर्णशष्कुल्यवच्छिन्ननभ एव श्रोत्रम् ॥

श्रोत्रिय । पु० छान्दसः । अधीतवेदः ॥ विद्याचारवान् ॥ छन्दोऽधीते । श्रोत्रियश्छन्दोऽधीते इति । छन्दस् शब्दस्य श्रोत्रभावो घन्प्रत्ययश्छन्दोऽध्यायिनि निपात्यते ॥ छन्दोऽध्यायिनि ॥ श्रोत्रियलक्षणं यथा । जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते । विद्याभ्यासाद्भवेद्विप्रः श्रोत्रियस्त्रिभिरेव हि ॥ इति पाद्मे उत्तरखण्डे ११६ अध्यायः ॥ अपि च । एकां शाखां सकल्पाम् षड्भिरङ्गैरधीत्य च । षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित् ॥ इति दानकमलाकरः ॥

श्रोत्रियता । स्त्री० अवे । श्रोत्रियत्वम् ॥

श्रोत्रियत्वम् । न० श्रोत्र । वेदवेदाङ्गपारगत्वम् । वेदान्तार्थपारगत्वम् । श्रोत्रियस्य भावः । त्व ॥ श्रोत्रिये कामराहित्यात्सर्वानन्दाः सदा स्थिताः । साम्राज्यसकलान्कामान्सर्वतिपात्रिति सारः ॥

श्रौतम् । न० अग्नित्रयी । गार्हपत्याहवनीयदक्षिणाग्नयः । त्रि० वेदसम्बन्धि ॥ श्रुतौ भवम् । श्रुतिरिदमित्यर्थे प्रज्ञाद्यण् । श्रुतिविहितधर्मादौ ॥ यथा । धर्मश्च द्विविधः श्रौतः स्मार्तश्चेति । दाराग्निहोत्रसम्बन्धि इज्या श्रौतस्य लक्षणम् ॥ स्मार्तो वर्णाश्रमाचारो यमैश्च नियमैर्युतः ॥ पूर्वेभ्यो वेदयित्वेदं श्रौतं सप्तर्षयोऽब्रुवन् ॥ ऋचो यजूंषि सामानि ब्रह्मणोऽङ्गानि सा श्रुतिः । मन्वन्तरस्यातीतस्य स्मृत्वा तन्मनुरब्रवीत् ॥ ततः स्मार्तः स्मृतो धर्मो वर्णाश्रमविभागशः । एवं वै द्विविधो धर्मः शिष्टाचारः स उच्यते । शिष्टैः श्रवणाच्छ्रौतः स्मरणात् स्मार्त उच्यते ॥ इत्या वेदात्मक

श्रौत · स्मार्त्तीनवोग्निमात्मकइति
मात्स्ये १२॰ अध्याय ॥
श्रौतयज्ञ । पु॰ अग्निहोत्रदर्शपौ
र्णमासादौ ॥ श्रुत्याप्रोक्त श्रौतः
। अण् । सचासौयज्ञश्च ॥
श्रौतसत्कृति । स्त्री॰ वेदोक्तसत्क्रि
यायाम् । यथा । गृहस्थस्यक्रिया
सर्वाश्चागमोक्ता कलौशिवे । नान्य
मार्गैः क्रियासिद्धि कदापिगृहमेधि
नाम ॥ भैरवकल्प्यामेदेविवेदो
क्त दण्डधारणम् । कलौनास्त्येवत
त्त्वज्ञे यतस्तच्च श्रौतसत्कृतिरिति
म॰ नि॰ तन्त्रम् ॥
श्रौत्रम् । न॰ श्रोत्रियतायाम् । श्रो
त्रियस्यकर्म भावोवा । युवादित्वा
दण् ॰ श्रोत्रियस्ययलोपश्च ॥ श्रोत्रा
णांसमूहे ॥ भिक्षादण् ॥
श्रौषट् । अ॰ देवहविर्दाने ॥ श्रूयते
ऽनेन । श्रु॰ । बाहुलकात् ॰ डौष
ट् ॥
श्लक्ष्ण । त्रि॰ स्तोके । अल्पपर्यायाय
था । स्तोकाल्पक्षुल्लका · सूक्ष्म श्ल
क्ष्णदभ्रकृशंतनु । स्त्रियांमात्राचुटि
॰ पुंसिलवलेशकणाणव ॥ इति
॥ मनोहरे ॥ सुखस्पर्शे । अपरुषे
। स्निग्धे ॥ श्लिष्यते॰ श्लिष्यतिवा ।
श्लिषआलिङ्गने । श्लिषेरच्चोपधाया
इतिक्स ॥
श्लक्ष्णकम् । न॰ पूगफले ॥

श्लक्ष्णतीक्ष्णायम् । न॰ शुक्ते । शूके ॥
श्लक्ष्णकशश्चतत्तीक्ष्णञ्च॰ तच्चतद
यश्च ॥
श्लक्ष्णत्वक् । पुं॰ अश्मन्तकवृक्षे ॥ सु
न्दरवल्कले ॥
श्लक्ष्णभूमि । स्त्री॰ कृष्णमृदि ॥
श्लथ । त्रि॰ शैथिल्ये । शिथिले ॥
श्लाघनम् । न॰ अभिनन्दने ॥
श्लाघा । स्त्री॰ अभिलाषे । इच्छाया
म् ॥ उपास्तौ । परिचर्यायाम् ॥
प्रशंसायाम । अविद्यमानगुणसम्ब
न्धज्ञापने ॥
श्लाघिष्ठ । त्रि॰ श्लाघ्यतमे ॥
श्लाघ्य । त्रि॰ प्रशस्ते । श्लाघनीये ।
स्तुत्ये ॥ आशास्ये ॥
श्लिकु । पु॰ सेवके । भृत्ये ॥ श्लिष्य
ति॰ यावत्कार्यं लगतिव्याप्रियते ।
श्लिषआलिङ्गने । श्लिषि कषेति
कु कसान्तादेश ॥ पिङ्गे ॥ न॰
ज्योतिःशास्त्रे ॥
श्लिषा । स्त्री॰ आलिङ्गने ॥
श्लिष्ट । त्रि॰ सम्पृक्ते । गत्यर्थाऽक
र्मकेति॰ श्लिषि · क्त ॥ श्लेषयुक्त
शब्दादौ । भिन्नार्थैकरूपान्वितवा
क्ये ॥ तल्लक्षणं यथा । श्लिष्टमिष्टम
विस्पष्टमेकरूपान्वितं वचइति ॥
श्लीपदम् । न॰ पादरुग्भिदि । पाद
वल्मीके ॥ अस्यनिदानन्तु । य
सज्वरोवङ्क्षणयोर्भृशार्त्तिः श्री

थोऽन्यथापादगत क्रमेण । तच्छ्री
पदस्यात्कारकार्थं नैव श्लिष्टोऽनास
स्वपिकोपिदाहु ॥ पुराणोदकभू
यिष्ठा सर्वर्त्तुषु च शीतला ये
देशास्ते पुष्पायन्ते श्लीपदानि विशेष
तः ॥ इति ॥ विशेषतस्तद्युक्तेरन्य
त्रापि भवतीति बोध्यम् ॥

श्लीपदप्रभवः । पुं० आम्रवृक्षः ॥

श्लीपदापहः । पुं० पुत्रजीववृक्षः ॥

श्लीपदी । त्रि० व्याधिना स्थूलचरणः ॥

श्लील । त्रि० लक्ष्मीवति । श्रीमति ॥ श्रि
यं लाति । ला० । क । कपिलका
दित्वात् लत्वम् ॥

श्लेषः । पुं० संयोगः । सन्धिः ॥ शब्दा
लङ्कारविशेषः । तस्य लक्षणादि यथा ।
वाच्यभेदेन भिन्ना यद्युगपद्भाष
णस्पृशः । श्लिष्यन्ति शब्दाः श्लेषो
सावक्षरादिभिरष्टधा ॥ अर्थभेदेन
शब्दभेदइति दर्शने० काव्यमार्गे स्व
रोनगण्यतइति च मते० वाच्यभेदेन
भिन्ना अपि शब्दा यद्युगपदुच्चारणेन
श्लिष्यन्ति० भिन्नस्वरूपमपह्नुवते०
सश्लेषः । स च वर्णपदलिङ्गभाषा
प्रकृतिप्रत्ययविभक्तिवचनानां भेदा
दष्टधा । क्रमेणोदाहरणम् । अल
ङ्कारः शङ्काकरनरकपालः परिज
नो विशीर्णाङ्गो भृङ्गी वसु च वृष
एको बहुवयाः । अवस्थेयं स्था
णोरपि भवति सर्वामरगुरोर्वि
धौ वक्रे मूर्ध्नि स्थितवति वयं के पु
नरमी ॥ विधौ चन्द्रे एव० विधौ
दैवे वक्रे कुटिले एव० वक्रे प्रतिकूले
० मूर्ध्नि मस्तके स्थितवति सति सर्वा
मरगुरोर्महादेवस्यापीयमवस्था भव
ति० अमी मानुषा वयं पुनः केषां
गणनायामित्यर्थः । अत्र विधा
वित्युवर्णं० वर्णश्लेषः ॥
पृथुकार्त्तस्वरपात्रं भूषितनि
श्शेषपरिजनं देव । विलसत्करेणु
गहनं सम्प्रति सममावयोः सदन
म् ॥ भक्तिप्रह्वविलोकनप्रणयिनी
नीलोत्पलस्पर्द्धिनी । ध्यानालम्बन
तां समाधिनिरतैर्नीते हित
प्राप्तये । लावण्यैकमहानिधौ रसि
कतां लक्ष्मीदृशोस्तन्वती युष्मा
कं कुरुतां भवार्त्तिशमनं नेत्रे तनुर्वा
हरेः ॥ एवं वचनश्लेषोऽपि ॥ महदे
सुरसन्धम्मे तमव समासङ्गमागमा
हरणे । हरबहुसरणं तं चित्तमो
हमवसरउमे सहसा ॥ अयं सर्वाणि
शास्त्राणि हृदि ज्ञेषु च वक्ष्यति । सा
मर्थ्यकृदमित्राणां मित्राणाञ्च नृपात्म
जः ॥ रक्षितरमणीये पादप
प्रावलोकनसमयपराभ्रापूर्वसम्प
तृसदृशम् । प्रथमनिवासमध्ये जातु
चित्तप्रसादादक्षुभितदृष्टिः कां
न्दितासातथामि ॥ सर्वस्वहरसर्व
स्यभवच्छेदतत्परः । नयोपकार

साम्मुख्यमायासितनुनत्तमम् ॥ भेदाभावात्प्रकृत्यादेर्भेदोपि नवमो भवेत् । नवमोपीत्यपिभिन्नक्रम ॥ उदाहरणम् । योऽसकृत्परगोत्राणांपक्षच्छेदक्षणक्षम । शतकोटिदतांबिभ्रद्विबुधेन्द्र सराजते ॥ अत्र प्रकरणादिनियमाभावात्. द्वावप्यर्थौवाच्यौ ॥ अर्थालङ्कारविशेषे ॥ तल्लक्षणादयोयथा । श्लेष सवाक्यएकस्मिन्यत्रानेकार्थताभवेत् ॥ एकार्थप्रतिपादकानामेवशब्दानांयत्रानेकोर्थ सश्लेष । उदाहरणम् । उदयमयतेदिङ्मालिन्यं निराकुरुतेत-राम्. नयतिनिधनं निद्रामुद्राम्प्रवर्तयतिक्रिया । रचयतितरांस्वैराचारप्रवर्त्तनकर्त्तनम् . बतबतलसत्तेज पुञ्जोविभातिविभाकर ॥ अत्राभिधायानियन्त्रणात्. द्वावप्यर्थौ भूपौवाच्यौ ॥ श्लेषणम् । श्लिष. । घञ् ॥ ऐक्ये ॥ श्लिष्यति । श्यादयोपिलिषा ॥

श्लेषणम् । न. एकीभवने ॥

श्लेष्मक । पु. कफे ॥

श्लेष्मकर । त्रि. कफवर्द्धकद्रव्येषु ॥ तानियथा । भोजनानन्तरस्नानजलपान तृषाविना । तिलतैलस्निग्धतैलंस्निग्धामामलकीद्रवम् ॥ पर्युषितान्नंतक्रसुपक्व रम्भाफल दधि । मायास्वुशर्करालोयसुस्निग्धस्यन्दनम ॥ नारिकेलोदककृष्णस्नानपर्युषितजलम् । तक्रसुस्वापक्वफलसुपक्व कर्कटीफलम् ॥ स्वातस्नानमत्र्येषासु मूलकाथ रोष्मकारणम् । तज्जलवल्लभम्भ्रपक्षह दीयविनाशनमिति. ब्र. वै. १६ अध्याय ॥

श्लेष्मघना । स्त्री. मल्लिकायाम् ॥ केतक्याम् ॥

श्लेष्मघ्न । त्रि. श्लेष्मनाशके । न. मधुनि ॥ श्लेष्माणंहन्ति । हन. । अमनुष्येतिटक् ॥

श्लेष्मघ्ना । स्त्री. मल्लिकायाम् ॥ कम्पिल्लके ॥ इ. हे. न्द्र ॥

श्लेष्मघ्नी । स्त्री. मल्लिकायाम् ॥ ज्योतिष्मत्याम् ॥ टित्वान्ङीप ॥ त्रि कटुनि । त्र्योषे ॥ इ. मे. कर ॥

श्लेष्मण । पु. श्लेष्मले । बहुवारके ॥ सन्धिस्थकफे ॥ त्रि. श्लेष्मवति । श्लेष्माऽस्त्यस्य । पामादित्वान्न ॥

श्लेष्मणा । स्त्री. वृक्षभेदे । तपर्ग्याम् । गुरुस्कन्धे ॥

श्लेष्मा । पुं. कफे ॥ तस्यप्रकोपहेतुर्यथा । गुरुमधुररसातिस्निग्धदुग्धेक्षुभक्ष्यद्रवदधिदिननिद्रापूपसर्पिःप्रपूरैः । तुहिनपतनकाले श्लेष्मण समप्रकोप प्रभवति

दिवसादौ भुक्तमात्रे वसन्ते ॥ तस्य
लक्षणं यथा । स्तैमित्यमधुरत्वस्थता
शिशिरताशीतत्वप्रसेकामलप्राचु
र्य्यस्थिरतारसनत्व कण्डूरति
स्वल्पता । आलस्यचिरकारिताक
ठिनताशायावृत्ति स्निग्धतातन्द्रा
ल्पमल्पदहनाम्लगुरुतापता क
फोन्माद ॥ तत्प्रशमनाकार
णं यथा । गुरुशीतमृदुस्निग्धमधुर
स्थिरपिच्छिला । श्लेष्मणः
प्रशमयान्ति विपरीतगुणैर्गुणाः ॥
रूक्षक्षारकषायतिक्तकटुकव्यायाम
निष्ठीवनधूमसेवाधूमनियुद्धजागर
तिक्तमद्यपद्घाततम । धूमात्यु
पाभिरोविरेचनवमनदीपनाद्दि
कपानाहारविहारभेषजमिदं श्ले
ष्मणामुपशमयेत् ॥ अलिप० । सर्व
धातुभ्यो मलिनम् ॥

श्लेष्मल । पु० शेलौ । श्लेष्मात
कौ ॥ त्रि० श्लेष्मयुक्ते । कफि
नि ॥ श्लेष्मा अस्ति । सिध्मादि
भ्यश्चेति पञ्चम्यां लच् ॥

श्लेष्मवान् । त्रि० श्लेष्मलि ॥ त
जभावे मतुप ॥

श्लेष्मघ्न । पु० कटफलवृक्षे ॥

श्लेष्महर । त्रि० श्लेष्महरद्रव्ये
षु ॥ तानि यथा । वज्रखेदभ्रष्टभ
क्तपक्वतैलविश्राणकाम् । आमम्
शुष्कभक्ष्यशुष्कापक्वहरीतकी ।
पिण्डारकमपक्वस्वरम्भाफलमपक्व
कम् । शशधारसिन्धुवारमनाहा
रमपानकम् ॥ सघृतरीचनाचूर्णं
सघृतशृङ्गवेरम् । मरीचपिप्प
लीशुष्कमार्द्रकक्षीरकमधु ॥ द्र
व्याण्येतानि गन्धर्विसद्यश्लेष्महरा
णि चैतन्त्र० वै० १६ऽध्याय ॥

श्लेष्मात । प० श्लेष्मातकी ।
बहुवारके ॥

श्लेष्मातक । पु० शेलौ । शेलि ।
बहुवारके । लसीडा० कू० भा०
प्र० ॥ श्लेष्माणमन्तति । अत
सातत्यगमने । कर्म्मण्युपपदस्य ख्यी
रपूर्वस्यापि ॥

श्लैष्मिक । त्रि० कफजे ॥ श्ले
ष्मणः शमनः कोपनो वा । तस्यापि
त्वक्प्रभव । शमनकोपनयोरिति ठ
ञ् ॥ कफस्य शमनः ॥

श्लोक । पु० पद्ये । अनुष्टुप्प्र
भेदे ॥ यथा । पञ्चमं लघु सर्वत्र
सममस्तु समेलघु । पादेष्वविष
मेष्वश्लोकोऽनुष्टुप्प्रकीर्त्तित
॥ कश्चित्पादेतु विषमेष्वसमाप्यास
योपिता । तत्रापि सर्वेषां श्लोकि
कान्ति त्वं यशस्वम । यशसि ॥
यथा । पुण्यश्लोको नलो राजा पुण्य
श्लोको युधिष्ठिरः । पुण्यश्लोका
च वैदेही पुण्यश्लोको जनार्द्दनः
॥ वेदमन्त्रे ॥ सङ्घाते ॥ श्लोकय

ते ॥ श्लोकसङ्घाते । घञ् ॥

श्लोककार । पु॰ वाल्मीकिमुनौ ॥ श्लोककृति ॥ श्लोक करोतिकर्मण्यण् ॥

श्लोक्य । त्रि॰ पुण्यकीर्त्यर्हे ॥

श्वःकार्य्यम् । न॰ आगामिन्यहनि कर्त्तव्ये ॥ यथा । श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ॥ नहि मृत्युः प्रतीक्षेत कृतं वाप्यथवा कृतम् ॥ इति कुलार्णवतन्त्रम् ॥

श्वःश्रेयसम् । न॰ शिवे । भद्रे । कल्याणे । मङ्गले । शुभे । शस्ते । अर्थ परपदस्थाच्छ्वःशब्द कालवाच्यपि । अभिधत्ते स्वभावेन॰ तेनैषौ मङ्गलार्थकावितिपाणिनीयमतदर्पणः ॥ परमात्मनि । परानन्दे । धर्मे च । शान्ते । सुखे ॥ श्वः आगामी श्रेयोऽस्य । श्वसीवसीय श्रेयसञ्चेत्यच् समासान्तः ॥ श्वः श्रेयश्चेति विग्रहे॰ मयूरव्यंसकादित्वात्समासः ॥

श्वगण । पु॰ कुक्कुरसमूहे ॥

श्वगणी । त्रि॰ शुनांपोषके ॥ श्वगणी । स्त्र्यश्चङ्गिन ॥

श्वग्राही । त्रि॰ शुनांपोषके ॥ शुनाग्राही ॥

श्वचक्रम् । न॰ कुक्कुरचेष्टायाम् ॥ पश्यवारश्याम् ॥

श्वदंष्ट्रक । पुं॰ गोक्षुरे ॥

श्वदंष्ट्रा । स्त्री॰ गोकण्टकी । गोक्षुरके शुनोदंष्ट्रेव ॥

श्वधूर्त्त पु॰ शृगाले ॥

श्वा । पु॰ ग्राममृगे । अस्य पर्याया यथा । कौलेयक सारमेय कुक्कुरोमृगदंशक । शुनकोभषकः श्वा स्यादिति ॥ शुनोलक्षणं यथा । पदा पञ्चनखास्तस्य ऽयचरणः षड्भिर्नखैर्दक्षिणस्तथौष्ठाग्रनखो मृगेश्वरगतिर्जिघ्रन भुवं यातिच । लाङ्गूलसटः॰ हृग्दृसदृशौ कर्णौ च लम्बौ मृदू यस्य स्यात् सकरोतिपीठरं चिरात्पुष्टां श्रियं वै गृहे ॥ इति वाराही ॥ अस्य परीक्षा तु मृगयार्थं शाकुनार्थं कौतुकार्थं मपीक्षिता । श्वान पोष्यास्ततस्तेषां मन्वच्म्यामिलक्षणम् ॥ गुणजातिप्रभेदेन शुनोभेदा ह्यनेकशः । सात्त्विकाराजसाश्चैव तामसास्त्रिधामताः ॥ अन्नाल्पपरिक्षीणाः पवित्राः॰ स्वल्पभोजिनः । श्वानस्ते सात्त्विकाः प्रोक्ता दृश्यन्ते च क्वचित्क्वचित् ॥ १ ॥ कृशा बहुभुजो दीर्घाः गुरुवक्षसनूदराः । लाङ्गुलस्था चाङ्किकाः श्वानस्ते राजसामताः ॥ २ ॥ अल्पश्रमेणयेश्रान्ता लम्बजिह्वा गुरूदराः । श्वानस्ते तामसाज्ञेयाः सन्त्यावनसमाश्रयाः ॥ ३ ॥ ब्रह्मादिजातिभेदेन चतुर्द्धा सर्व एव हि । शुभ्रादौ ॥ घ्राणश्च कर्णा लघुपुच्छास्तनूदरा

सुश्लक्ष्णरद्नाश्च श्वानस्ते व्रजन्ति नाशं ॥ १ ॥ रक्ताक्षाश्च नुलोमानो लम्बकर्णा नखदराः । दीर्घादीर्घनखरदा श्वानस्ते चञ्चलाः ॥ २ ॥ येषां तत्त्वर्णाः स्युः तनुलोमानप्येवं । कृष्णाः कृष्णालश्च श्वानो वैश्यजातय ॥ ३ ॥ कृष्णवर्णास्तनुमुखा दीर्घरोमाण एव च । चक्षुषा श्यामयुक्ताश्च श्वान शूद्रजातय ॥ ४ ॥ लघुप्रमाणास्तु क्रूदराः येये ऽमेध्यभक्षाश्च पुच्छकाश्च । प्रष्ठपुच्छालघसुप्रदन्तास्ते चान्त्यजा कुकुरजातय स्युः ॥ ५ ॥ द्विजातिष्विह ससर्गात् द्विजाति श्वाभया भवेत् । लक्षणत्रयसम्बन्धात् त्रिजातिर्धननाशनः ॥ चतुर्भो ज । द्विजातिर्विजातिर्विजाति श्वानशोभनास । भयधन क्षयशोक विद्धाति यथाक्रमम ॥ कूतिभोजरा जकलीयुक्तिकल्पतरु ॥ शुन्या लक्षणं यथा । पादे पादे पञ्चपञ्चाऽयपादे वामे यक्ष षण्णखा मल्लिकाख्या । वक्त्रं पुच्छं पिङ्गला सम्यक्वर्णा धासारध्र कुक्कुरी पातिपुष्टा ॥ इति वाराही ॥ श्वयति । टौ चोऽश्वगतिवृद्ध्योः । श्वन् धनि तिसाधु । वास्तुग । स्थानभेदे ॥

श्वानिद्रा । स्त्री० श्वानिद्रायाम् ॥ श्वानिद्रायां श्वानवत्पदसन्निः तां कृष्णा तुहिनशीलां तु । तस्यां किलकि चिन्द्रात्वाना उपवसन्न । तथा च ति र्यगधिकरणे ० शावरभाष्यम् । श्वानवत्तुहिन्यां सुपवसत पश्यामहेति । श्वानानिद्रेति विदन्ते । विभाषासि मासु रात्र्या याम्यालां निन्द्यानामिति निन्द्याल्पतत्पुरुषस्य पाणिनिकौमुद्य म् ॥

श्वनिद्रा । स्त्री० श्वनिद्रि ॥ श्वानि द्रा । विभाषासि निद्रति पक्षे कौमुद्यामा च ॥

श्वपक्ष् । पुं० श्वपचे ॥ निपाद श्वपच । श्वपचिति शे पाणिनि ॥

श्वपच । पु० श्वपाकी । चण्डाली । चान्त्यावसायी मस्यस चाण्डालम् ॥ च ण्डाल धर्मा यथा । चण्डाल श्वपचानान्तु वहिर्ग्रामात्प्रतिश्रय । अपपात्राश्च कर्तव्या धनमेषाश्व गर्दभम् ॥ वा सासि मृत चैलानि भिन्नभाण्डे षु भोजनम् । कार्ष्णायसमलङ्कार. परि ब्रज्या च नित्यश ॥ न तै समयम न्विच्छेत् पुरुषो धर्ममाचरन् । व्य वहारो मिथस्तेषां विवाहः सदृशै सह ॥ अन्नमेषां पराधीनं देयं स्याद्भि न्नभाजने । रात्रौ न विचरेयुस्ते ग्रामे षु नगरेषु च ॥ दिवा चरेयु कार्यार्थं चिह्निता राजशासनै । अबान्धवं शवञ्चैव निर्हरेयुरिति स्थिति ॥ वध्यांश्च हन्यु सतत यथाशास्त्रं नृ

पाकया । वध्यवासांसि गृह्णीयुः
शय्याश्चाभरणानि चेति मनुः ॥ च
ण्डाल, श्वपच, क्षत्ता, सूतो वैदेह
कस्तथा । मागधायोगवौ चैव सप्तै
तेऽन्त्यावसायिनः ॥ इत्यङ्गिराः ॥
श्वपच । डोम० डुमडा० इ० भा०
प्र० ॥ श्वानं पचति । डुपचष्० ।
पचाद्यच् ॥

श्वपदम् । न० कुक्कुरपादे ॥

श्वपाक । पुं० निषादे, चण्डाले ॥
तस्योत्पत्तिर्यथा । क्षत्तुर्जातस्तथो
ग्रायां श्वपाक इति कीर्त्त्यते० इति म
नुः । शूद्रेण वैश्यायां जातः क्षत्ता
० क्षत्रियेण शूद्रायां जाता उग्रा० ते
न तस्यां जातः, श्वपाक इत्युच्यत इति
कुल्लूकभट्टः ॥

श्वफल । पुं० बीजपूरे ॥

श्वफल्क । पुं० वृष्णिपुत्रे । अक्रूर
पितरि ॥

श्वफल्कपुत्र । पुं० अक्रूराख्ययादवे ॥

श्वभीरु । पुं० फेरौ । शृगाले ॥

श्वभ्रम् । न० भूछिद्रे । तत्पर्याया
यथा । कुहरशुषिरविवरबिलम् ।
छिद्रनिर्व्यथनरोकरन्ध्रश्वभ्रवपा
शुषिरिति ॥ श्वभ्रयति । श्वभ्रग
तौ । अदन्त । पचाद्यच् ॥ शुषि
अनमभव्योमान्तरा ॥ विदीर्णभू
भागे ॥

श्वयथु । पुं० शोथे । त्वग्विवर्द्धने
श्वयति० श्वयनमनेनवा । टुओ
श्विगतिवृद्ध्योः । ट्वितोऽथुच् ॥

श्वयीचि । पुं० चन्द्रे ॥ व्याधौ ॥
श्वयति । टुओश्वि० । श्वयते
श्विदितिईचि । गुणायादेशौ ॥

श्ववृत्ति । स्त्री० सेवायाम् । चाक
री० इ० भा० प्र० ॥ सेवातुहीन
हृष्टिस दृशं न स्वामितर्जननीचक्रिया
दिधर्मयोगात् श्वनोवृत्तिरिव ।
शुनइववृत्तिर्वा । सेवाश्ववृत्तिरा
ख्याता तस्मात्तां परिवर्ज्जयेदिति
मनुः ॥

श्वव्याघ्र । पुं० श्वापदे । व्याघ्रादि
हिंस्रपशौ ॥

श्वशुर । पुं० पत्न्याः ॥ पतिपत्न्योः
पितरि ॥ पत्युः पितापत्न्याः श्व
शुरः ० पत्न्याः पितापत्युः श्व
शुरः ॥ शुइत्याश्चर्ये० पूजायांवा
। शुपश्च्यते० अश्नुतेवा । अशूव्या
प्तौ० सङ्घातेच । आवश्रेरामावि
त्युरन् ॥

श्वशुरा । स्त्री० श्वश्र्वाम् ॥

श्वशुरौ । पुं० २ सहोक्त्या० श्वश्रू
श्वशुरयोः ॥ श्वश्रूश्चश्वशुरश्च
तौ । श्वशुरः श्वश्र्वेतिपाक्षि
कएकशेषः ॥

श्वशुर्य्य । पुं० देवरे । श्याले ॥
श्वशुरस्यापत्यम् । राजश्वशुरा
द्यत् ॥

श्वश्रूः । स्त्री० साश्रुधिपि । श्वश्रु रभार्यायाम् पतिवत्नी प्रसाम् । पत्युर्मातापत्न्या श्वश्रू ० प त्न्या । मातापत्न्यु श्वश्रू । श्व शुरस्यस्त्री० श्वशुरस्योकारारात्स्त्री पत्नेत्युङ् । पुयोगलक्षणकङीषि प्रवाद ॥

श्वश्रूश्वशुरौ । पु० २ सत्नीश्वश्रूश्वशुरयो। ॥ श्वश्रूश्च श्वशुरश्चतौ । श्वश्रू पूर्वअपत्नीसमासतुल्या प्रकोतिनतिम श्वशुरश्चमपि तत्वा तूपूर्वनिपात ॥

श्व । अ० अनागतदिने ॥ आगामि अह पूर्वादरादि । ऐषमोश्व . श्वसोन्यतरस्यामितितिद्दश्वश्वा नुकूल ॥

श्वसन । पु० स्पर्शने । वायौ ॥ मद नद्रुमे । मयनफलेतिप्रसिद्धे ॥ न० श्वसिते । श्वासे ॥ श्वसित्यनेन । श्व सप्राणने । ल्युट् ॥ निजलेविशु सिति । नन्द्यादित्वाल्युर्वा ।

श्वसना । स्त्री० श्वासोच्छ्वासवत्यायाम न्याम् ॥

श्वसनाशन: । पु० सर्पे ॥ श्वसनोश नं यस्यस: ॥

श्वसनेश्वर: । पु० अर्जुनद्रुमे ॥

श्वसनोत्सुक: । पु० अहो । सर्पे ॥

श्वसितम् । न० श्वासे ॥ उच्छ्वासमारु ते ॥ फूत्कारे ॥ श्वसिति । श्वस०

। क्त ॥

श्वसुन । पु० शतद्रे । कुकरोधा० क्रू० भा० प्र० ढथ ॥

श्वस्तन । वि० श्वोभवे वस्तुनि ॥ ऐष मो श्व श्वसोन्यतरस्यामिति० त्यव भावेच्यत्युली० तुटच ॥ न० भवि ष्यत्काले । क्रुतिराक्लिचिंगट ॥

श्वस्त्य । वि० श्वोभवे । श्वस्तने ॥ ऐषे मोश्व श्वसोन्यतरस्यामितित्यप् ॥

श्वान्त् । न० शुभान्तमृष्टे ॥ श्वश्चिका दित्वादञ् ॥ पु० कुक्कुरे ॥ क्रू० भ० ३० लो ।

श्वानक । पु० शुन ॥

श्वानचिल्लिका । स्त्री० शाकविशेषे । शुनकचिल्लयाम् ॥

श्वानचीमापह । पु० तीर्थविशे षे ॥

श्वानी । स्त्री० शुन्याम् ।

श्वापद । पु० व्याघ्रादिहिंस्रपशौ ॥ व्याघ्रादयोवनचरा पशव . श्वा पदामता . ॥ शुनोदन्तदंष्ट्राकर्णकु न्दवराहपुच्छपदेषुदोर्घांवाच्यइतिदो र्घ : । वि० श्वापदे ॥ श्वापद स्येदम् । श्वापदस्यान्यतरस्यामि तिपाक्षिकऐत्निषेध ॥

श्वाविन्० त् । पु० शल्यपशौ । सा ०० क्रू० प्र० सूक्ष्मोमवति ॥ श्वा नंविध्यति । व्यध० । क्किप् । नहि वृतीतिदीर्घ ॥

श्वाश्व । पु॰ भैरवे ॥

श्वास । पु॰ श्वसिते । प्राणेनवा श्वयायोरन्तः प्रवेशने । समाध्वङ्गेरेचकविरोधिनि । प्राणवायौ । श्वसिति । श्वस॰ । श्वाद्य चेतिघ ॥ रोगविशेषे ॥ पिप्पलीनस्यं शाणे जायतेश्वासकासवान् । घृततैलप्रद्रातव्यसहस्रमसर्क्षितमिश्रितंतातपीयकम्विपाकं ॥ षष्ठौषध यथाबिभीतकस्यवै चूर्णं मधुश्वासनाशनम् ॥ पिप्पलीचित्रकलाचूर्णं मधुसैन्धवसयुतम् । सर्वरोगज्वरश्वासशोषपीनसहृद्गेर्दितिगारुडे १८९ अध्याय ॥ प्राणे ॥ हारीद्रूपाटने ॥

श्वासकास । पु॰ श्वासयुक्तकासरोगे । श्वासजनककासे ॥ यथा । कासवत्प्राभवेच्छ्वास पूर्वैवादोषकोपनैरितिगरुडपुराणम् ॥

श्वासकुठार॰ । पु॰ । श्वासरोगघ्नौषधविशेषे ॥ यथा । रसोगन्धोविषञ्चापिटङ्कणञ्चमनःशिला । एतानिकर्षमात्राणिमरिचस्याष्टकर्षकम् ॥ कटुत्रयं कर्षयुग्मं पृथगत्रविनिक्षिपेत् । रस । श्वासकुठारोयं सर्वश्वासनिवारणं इतिभावप्रकाश ॥

श्वासप्रश्वासधारणम् । न॰ प्राणायामे ॥ श्वासप्रश्वासयोर्धारणं यत्तत्

श्वासहेति । पुं॰ निद्रायाम् । स्वापे ॥

श्वासारि । पु॰ पुष्करमूले ॥

श्वासी । पु॰ वायौ । त्रि॰ श्वासरोगिणि ॥

श्वित्रम् । न॰ श्वेतकुष्ठे । कुष्ठे ॥

श्वेतमी । श्वेतावरके । स्फाटिकसञ्जीतिरुक् ॥ षष्ठौषधन्तु । धात्रीखदिरयोः क्वाथ पीत्वाबकुचसंयुतम् । शङ्खेन्दुधवलंश्वित्रं हन्तिनसंशयः ॥

श्वित्रघ्नी । स्त्री॰ पीतपर्णाम् । विकुटी॰ कुति॰ गो॰ भा॰ प॰ ॥

श्वित्री । त्रि॰ श्वेतकुष्ठवति । श्वित्रमस्यास्तीतिवासि । चतदुनिठनाविनीनि ॥

श्वेत । पुं॰ शुभ्रवर्णे । सपिट॰ कु॰ भा॰ ॥ द्वीपविशेषे । श्वेतद्वीपे ॥ पर्वतविशेषे । कृताव्रतक्षीराब्धेरिसरस्वयोज्ञानविक्षीर्णं प्राग्भायतेश्वितमवर्षमर्यादागिरौ ॥ वानरविशेषे ॥ यथारामायणे । श्वेतोरजतसङ्काशचपलोभीमविक्रमः । बुद्धिमान्वानरवरःस्त्रिपुलोकिषुविश्रुतहति ॥ कपर्दके ॥ शुक्रग्रहे । शङ्खे । केतावे ॥ जिनावतारविशेषे ॥ न॰ रूप्ये । त्रि॰ शुक्लवर्णविशिष्टे ।

श्वेतती । श्विता॰ । पचादच ॥

श्वेतक पुं॰ वराटके ॥ न॰ रूप्ये ॥

श्वेतकण्टकारी । स्त्री॰ नागदन्त्याम् । कटुवार्त्ताक्यां ॥

श्वेतकन्दा । स्त्री॰ अतिविषायाम् ॥

श्वेतकिणिही । स्त्री॰ गिरिकर्णिकायाम् । शिरीषपर्ण्याम् । विषघ्निकायाम् ॥ श्वेतासौ किणिही च ॥

श्वेतकुञ्जर. । पु॰ ऐरावते ॥ शुक्लगजे ॥ श्वेतश्चासौ कुञ्जरश्च ॥

श्वेतकुश । पु॰ तृणविशेषे ॥ सितदर्भे । ह्रस्वकुशे । पूते । यज्ञभूषणे । सूचीमुखे । पुण्यदर्भे । बर्हिषि ॥

श्वेतकुष्ठम् । न॰ शुक्लकुष्ठे ॥ अस्यौषधं यथा । सोमराजस्य बीजानि नवनीतयुतानि च भक्षणात्स्वादितानि च शुक्लकुष्ठहराणि वै ॥

श्वेतकेतु. । पु॰ उद्दालकस्यर्षेस्तनये । श्रुतिप्रसिद्ध आरुणेयमुनौ ॥ केतुग्रहविशेषे ॥ बुधे ॥

श्वेतकेश. । पु॰ रक्तशिग्रौ ॥ शुक्लकचे ॥

श्वेतकोल । पु॰ शफरमत्स्ये ॥

श्वेतखदिर: । पुं॰ शुक्लखदिरे । सोमवल्के । कदरे ।

श्वेतगज: । पुं॰ इन्द्रहस्तिनि । ऐरावते । अभ्रमातङ्गे । चतुर्दन्ते ॥

श्वेतगरुत् । पु॰ हंसे ॥ श्वेता गरुतोऽस्य ॥

श्वेतगुञ्जा । स्त्री॰ चूडालायाम् । श्वेतकाम्बोज्याम् । काकादन्याम् ॥

श्वेतचन्दनम् । न॰ शुक्लचन्दने ॥

श्वेतचिल्ली । स्त्री॰ शाकभेदे । वास्तुक्याम् । सुपथ्यायाम् । श्वेतचिल्लिकायाम् । ज्वरघ्न्याम् । मृद्वास्तुक्याम् । बथुवा॰ हि॰ भा॰ प्र॰ ॥ अस्या गुणा यथा । श्वेतचिल्ली सुमधुरा क्षारा च शिशिरा च सा । त्रिदोषशमनी पथ्या ज्वरदाहविनाशिनी ॥

श्वेतच्छद: । पु॰ हंसे ॥ श्वेताश्छदा यस्य । गन्धपत्रे । बाबुइ॰ तु॰ भा॰ ॥

श्वेतजीरक. । पु॰ शुक्लाजाज्याम् । गौरजीरके ॥

श्वेतटङ्कणम् । न॰ क्षारविशेषे द्रावके । माललोतीरसम्भवे ॥

श्वेतदूर्वा । स्त्री॰ पाण्डुरदूर्वायाम् । अस्याः पर्यायास्तु । गोलोमी शतवीर्या च गण्डाली शकुलाक्षका इति गुणास्तु । श्वेतदूर्वा कषाया स्यात्तिक्ता वर्ण्या च जीवनी । तिक्ता हिमा विसर्पघ्नी तृट्पित्तकफदाहनुत् इति ॥

श्वेतद्युति. । पुं॰ इन्दौ । चन्द्रे ॥

श्वेतद्विप: । पु॰ शक्रहस्तिनि । हस्तिमल्ले । चतुर्दन्ते । ऐरावते ॥

श्वेतद्वीप । पुं॰ विष्णोर्धामविशेषे ॥ यत्रानिरुद्धमूर्त्तिर्भगवानास्ते ॥

श्वेतधातु । पु॰ खटिकायाम ॥ शुक्लवर्णधातुमात्रे ॥

श्वेतधामा । पु॰ इन्दौ । घनसारे अब्धिफेने ॥

श्वेतनील । पु॰ अम्बुदे । मेघे ॥ शुक्लनीलवर्णे ॥

श्वेतपक्ष । पु॰ हंसे ॥ न॰ शुभ्रपक्षे ॥

श्वेतपत्रर‍थ पु॰ स्रष्टरि ब्रह्मणि । विधातरि ॥ श्वेतपत्रोहंसोरथोवाहनयस्य ॥

श्वेतपद्मम् । न॰ पुण्डरीके । सिताम्भोजे । अम्बुवल्लभे ॥

श्वेतपर्णा । स्त्री॰ कुम्भिकायाम् । वारिपर्ण्याम् ॥

श्वेतपर्णास पु॰ श्वेततुलस्याम् अर्ज्जके । गन्धपर्णे ॥

श्वेतपाटला । स्त्री॰ शुक्लपाटलायाम् ॥

श्वेतपिङ्ग । पुं॰ सिंहे । इ॰ द्रै॰ न्द्र ॥

श्वेतपिङ्गल . । पुं॰ सिंहे ॥ त्रि॰ शुक्लपिङ्गलवर्णयुक्ते ॥

श्वेतपिण्डीतक : । पुं॰ महापिण्डीतके ॥

श्वेतपुष्प : । पुं॰ सिन्धुवारवृक्षे ॥

श्वेतार्के । श्वेतकरवीरे ॥ वरुणद्रुमे । न॰ शुक्लवर्णकुसुमे ॥

श्वेतपुष्पक । पु॰ करवीरवृक्ष ॥

श्वेतपुष्पा । स्त्री॰ मृदग्न्याम । श्वेतघोषा॰ इ॰ गो॰ भा॰ प्र॰ ॥ नागदन्त्याम । मृगेर्वारौ ॥ श्वेतानिपुष्पाण्यस्या ॥

श्वेतपुष्पिका । स्त्री॰ महाशणपुष्पिकायाम् ॥ पुत्रदात्र्याम् ॥ इ॰ रा॰ स्ट . ॥

श्वेतप्रसूनक । पु॰ वृक्षविशेषे । वरुणद्रुमे ॥

श्वेतभण्डा । स्त्री॰ श्वेतापराजितायाम ॥

श्वेतमन्दारक । पु॰ पृथ्वीकुरबके । दीर्घायुष्ये । श्वेतचाकद्रू॰ भा॰ प्र॰ ॥

श्वेतमरिचम् । न॰ शिग्रुबीजे ॥ श्वेतमरिचमिव ॥ शुक्लमरिचे ॥

श्वेतरक्त । पुं॰ पाटलवर्णे ॥ श्वेतयुक्तोरक्त : ॥

श्वेतरञ्जनम् । न॰ सीसके ॥

श्वेतरथ । पु॰ दैत्यगुरौ । शुक्रे ॥ श्वेतोरथोऽस्य ॥ शुक्लवर्णस्यन्दने ॥

श्वेतराजी । स्त्री॰ चिचिण्डे । सुदीर्घफले ॥

श्वेतरोचि : । पुं॰ चन्द्रे ॥

श्वेतरोहित । पुं॰ सितपुष्पे । सि

ताब्जे । श्वेतरोहिता॰ इ॰ भा॰ प्र॰ शब्दे ॥

श्वेतलोध्र । पुं॰ पट्टिकालोध्रे ॥

श्वेतवचा । स्त्री॰ अतिविषायाम् ॥ वचाप्रभेदे । मेध्यायाम् । हैमवत्याम् । साध्यावच॰ इ॰ भा॰ प्र॰ ॥

श्वेतवल्कल । पुं॰ उदुम्बरवृक्षे ॥ प्लक्षत्वचि ॥

श्वेतवाजी । पुं॰ चन्द्रे । पार्थे । अर्जुने ॥ कर्पूरे । शुक्लाश्वे ॥

श्वेतवासा । पुं॰ शुक्लवस्त्रधारिसंन्यासिनि ॥ इ॰ हलायुध ॥ त्रि॰ परिहितशुक्लवसने ॥

श्वेतवाः । पुं॰ इन्द्रे ॥ श्वेता एनं वहन्ति । असु॰ श्वेतेनेऽवहिता । मन्त्रे श्वेतवइति सिद्धेनिपात्यते॰ श्वेतवहादीनां डस् पदस्य इति॰ सम्पदन्तत्वं तत्र सिद्धेणोपवादेशम् । श्वेतवाः॰ श्वेतवाहौ॰ श्वेतवाहः इत्यादि ॥

श्वेतवाहन । पुं॰ चन्द्रे । अग्निनि ॥ धनञ्जये । अर्जुने ॥ मकरे ॥

श्वेतवाही । पुं॰ अर्जुने । पार्थे ॥

श्वेतशुङ्गा । स्त्री॰ वनतिक्तायाम् । विसर्पिण्याम् । गिरिजायाम् ।

श्वेतबृहती । स्त्री॰ क्षुद्रवार्त्ताक्याम् । श्वेतफलायाम् ॥

श्वेतद्रुम । पुं॰ वरणद्रुमे ॥

श्वेतपुष्पका । स्त्री॰ अपविशिषि ।

सितत्रायमाणायाम् । सितपुष्पायाम् ॥

श्वेतशिग्रु । पुं॰ शुक्लशोभाञ्जने । सुतीक्ष्णे । मधुशिग्रुके ॥

श्वेतशिंशपा । स्त्री॰ शुक्लशिंशपावृक्षे ॥

श्वेतशिम्बिक । पुं॰ निष्पावे । भटवास॰ इ॰ भा॰ प्र॰ ॥

श्वेतशुङ्ग । पुं॰ यवे ॥

श्वेतशूरण । पुं॰ वनशूरणे ॥

श्वेतसर्प । पुं॰ शुक्लवर्णभुजगे ॥ वरुणवृक्षे ॥

श्वेतसर्षप । पुं॰ गौरसर्षपे ॥

श्वेतसार । पुं॰ कदरे । खदिरे ॥

श्वेतसुरसा । स्त्री॰ श्वेतपुष्पशेफालिकायाम् । भूतकेश्याम् ॥ शि भणीरसोऽख्या' । श्वेतासुरसा च ॥ श्वेततुलस्याम् ॥

श्वेतस्यन्दा । स्त्री॰ विष्णुक्रान्ताभेदे ॥

श्वेतहय । पुं॰ उच्चैःश्रवसि । इन्द्राश्वे ॥ अर्जुने । पार्थे ॥ चन्द्रे ॥ शुक्लवर्णाश्वे । कर्के ॥

श्वेतहस्ती । पुं॰ ऐरावते । शुक्लगजे ॥

श्वेता । स्त्री॰ वराटिकायाम् ॥ काष्ठपाटलायाम् ॥ शङ्खिन्याम् ॥ अपराजितायाम् ॥ स्फटिक्याम् ॥ अतिविषायाम् ॥ श्वेतदूर्वायाम् ।

श्वेतकण्टकार्य्याम् । पाषाणभेदायाम् । श्वेतदूर्व्वायाम् । शिलाबल्कलायाम् । अपराजितायाम् । शर्करायाम् । लताविशेषे । कृष्णापर्णिकायाम् । पर्वमूलायाम् । अतिप्रियायाम् । गुणास्तु श्वेतातिमधुराशीतास्वादुर्ज्वरकारिका ॥

श्वेताङ्ग्रि । स्त्री० शुक्लचित्रकायाम् । श्रीभाण्डायाम ॥

श्वेताब्जि । स्त्री० लाघवी(?)शेषे । शनिकायामपिष्टिकायाम् ॥

श्वेतार्क । पु० शुक्लार्कवृक्षे । तपने । शर्करापुष्पे । श्वेतमल्लिकायाम् ॥ अस्यगुणा । श्वेतार्क कटुकस्तिक्तउष्णोमलविशोधन । मूत्रकृच्छ्रमशोकाशिंध्न प्रदोषविनाशनकृत ॥

श्वेतावर । पु० सितावरशाके ॥

श्वेताश्व । पु० अर्ज्जुने ॥ सद्देवपाण्डवे ॥

श्वेताह्वा । स्त्री० सितपाटलायाम् ॥

श्वेतेक्षु । पु० सितेक्षौ । वंशपत्रके । पाण्डुरेक्षौ ॥ अस्यगुणा । श्वेतेक्षु कठिनोरुक्षोगुरुश्चकफमूत्रकृत् । दीपन पित्तदाहघ्नो विपाकेऽल्पाक्षलशीत ॥

श्वेतोदर । पुं० कुवेरे ॥ ट्ट० चि

काण्डशेष ॥

श्रीवसीयसम् । न० कल्याणे । मङ्गले ॥ वसुशब्द प्रशसावाची० ईयसुनन्त । श्रसशब्दउत्तरपदार्थ प्रशसामाश्रोविषयमाह । श्रीवसीयमितिविग्रहे० मयूरव्यसकादित्वात्समास । श्रसीवसीय श्रेयस इत्यच्समासान्त अर्थपर पदश्चायश्च शब्द कामकाच्यपि । अभिधत्तेस्वभावेनतेनेमौमङ्गला र्थकाविपिणनिर्णीयमतद्पि । श्रीवसीयसम्भूयात ॥

षकाराद्यप्रारम्भ

ष । पं० षकारे ॥ काचे ॥ चि० विज्ञे । निपुणे ॥ श्रेष्ठे ॥

षट्क । पु० षमासड्घे ॥ षड्ख्याया स ङ्घासङ्घसङ्ख्याध्ययने छ्वितकन् ॥ षष्ठेनरूपेणगृह्णाती त्यर्थेतु० तावतिथेनगृह्णाती तिकन्नूक्तान्त्य पूरणप्रत्ययस्यचनित्यलुक् । षष्ठेनरूपेणगृह्णाति० षट्कोदेवदत्त । ॥

षट्कट् । न० षडूषणे ॥

षटकर्ण । पु० कर्णवेधकोनयोरपत्ययोर्विद्यमानयोस्तृतीयस्यापत्यस्यसम्भावनायाम ॥

षटकर्म्मा । पु० यागादिभिर्युते ब्राह्मणे ॥ षटकर्माण्यध्ययनादीन्यस्य । तानियथा । इज्याध्ययन

दानानि याजनाध्यापने तथा । प्रतिग्रहश्चेत्युक्तः षट्कर्मा विप्र उच्यते इति ॥ बहुपोष्यवर्गं गृहस्थाश्रमे ॥ ऋताम्रिताभ्यां भैक्ष्यविधाविप्यस्य मौद्रानि षट्कर्माण्यपि ॥ न० ब्राह्मणकर्मधर्माचारे । अध्यापनादिषट्सु कर्मसु ॥ यथा । अध्यापनमध्ययनं यजनं याजनं तथा । दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मन इति ॥ शान्त्यादिषट्सु कर्मसु ॥ तन्त्रे यथा । शान्तिवश्यस्तम्भनानि विद्वेषोच्चाटने तथा । मारणान्तानि शंसन्ति षट्कर्माणि मनीषिण इति ॥ त्रि० षट्कर्मकर्त्तरि ॥

षट्काष्टकम् न० विवाहादिविचारे दोषविशेषे ॥ यथा । यदि कन्याष्टमे भर्त्तुः षष्ठे च कन्यका । षट्काष्टकं विजानीयात् अशुभं तद्द्वयोरपि ॥

षट्कूटा । स्त्री० भैरवीदेवताविशेषः ॥

षट्कोणम् । न० वज्रे ॥ षट्कोणे । लग्नात् षष्ठगृहे ॥

षट्कोष । पुं० न० षड्भ्यः कोषेभ्यः उत्पन्ने वपुषि ॥ यथाह । पितृभ्यामशितादन्नात् षट्कोषं जायते वपुः । स्नायवोऽस्थीनि मज्जा च जायन्ते पितृतस्तथा । त्वङ्मांसशोणितमिति मातृतश्च भवन्ति हि ॥

षट्चक्रम् । न० शरीरस्थपद्माकारष-टप्रकारचक्रे ॥

षट्चरण । पु० भ्रमरे ॥ यूकायाम् ॥

षट्तिली । पु० माघकृष्णैकादश्यामुपवासं कृत्वा द्वादश्यां षट्तिलाचारविशिष्टे ॥ यथा । कृष्णपक्षे माघस्य प्रकारयेत् । एकादश्यां सितपक्षे सोपवासी जितेन्द्रियः ॥ द्वादश्यां षट्तिलाचारं कृत्वा पापात् प्रमुच्यते । तिलस्नायी तिलोद्वर्त्ती तिलहोमी तिलोदकी ॥ तिलप्रदाता भोक्ता च षट्तिलीनावसीदतीति ॥

षट्त्रिंशत् । स्त्री० संख्याविशेषे । छत्तीस० इ० भा० प्र० चि० । तद्युक्ते ॥ यथा षट्त्रिंशदुपचाराः ॥

षट्त्रिंशत्तत्त्वम् । न० शैवशास्त्रप्रसिद्धतत्त्वसमूहे ॥ यथा । प्राणापानसमानाश्चोदानव्यानौ च वायवः । भूतैश्च पञ्चभिः सार्द्धं चतुर्दशभिरिन्द्रियैः । चतुर्विंशतितत्त्वानि सांख्यशास्त्रविदो विदुः । महान् प्रधानञ्च मायाविद्या च पञ्चकृतिपौरुषिका प्राक्शिवतत्त्वानि सह । बिन्दुनादौ शक्तिशिवौ शान्तातीतौ परं ततः ॥ षट्त्रिंशत्तत्त्वमित्युक्तं शैवागमविशारदैरिति महासारः ॥

षट्पद । पुं० भ्रमरे ॥ षट् पदानि यस्य ॥ यूकायाम् ॥ न० माना

वृत्तान्तरे। यथा। षट्कलमादौ तदनु चतुष्कलगण परिमन्तनु ॥ इयेहि कल यगलचतुष्पदमेव स स्तनु॰। छन्द षट्पदनामभवति फणिना यकगोत॰ रुद्रे विरतिमुपैतिन्त्वरतिसुखकरमुपनीतम्। उल्लालयुगलमन्ते भवेद्दष्टाविंशतिकलमिदम्॰ स्पृगुपञ्चदशे विरतिस्थित पठनेप शिखलजनहितम् ॥ तथा। वामकरोदरकलितकमलसोदरकचिवदना॰ गुरुपुरतोपितवेवनामजल्पतिगुरुमदना॰ भवदभिलषणाविशेषरभसपरशीर्षतदिवसा॰ सुप्तचन्द्रभयेनरजनिमधिजीवितमपिसा। निजहृदि विनिहितभवदभिसरणारङ्गतरङ्ग गमनङ्ग गमति॰ भवदीयविलोकनमन्तरानमवीरथसुखमनुभवति।

षट्पद्प्रिय। पु॰ नागकेशरवृक्षे ॥ न॰ रक्तोत्पले ॥

षट्पदा। स्त्री॰ यूकायाम् ॥

षट्पदातिथि। पु॰ आम्रवृक्षे ॥

षट्पदानन्द। पु॰ पुष्पवृक्षविशेषे। किङ्किरातौ। पीतभद्रे ॥

षट्पदानन्दवर्द्धन। पु॰ किङ्किराते। अशोकपादपे।

षटपदी। स्त्री॰ यूकायाम्। कु॰ हे॰ न्द्र॰ ॥

षट्पदेष्ट। पुं॰ नीपे। कदम्बे ॥

षट्प्रज्ञ। पु॰ कामिनो। कामुकि पिङ्ग ॥ धर्मान्यशास्त्रविज्ञे। यथा। धर्मार्थकाममोक्षेषु लोकतत्त्वार्थयोरपि। षट सुप्रज्ञास्ति यस्योच्चै॰ सषट प्रज्ञइतिस्मृत ॥ कृ॰ चि॰ शेष ॥

षड। पु॰ पेयान्तरे। मेदे ॥

षडश। त्रि॰ षष्ठाशे ॥ सङ्ख्याशब्दस्यवृत्तिविषयेपूरणार्थत्वम ॥

षडङ्ग। पु॰ विदे ॥ षट शिक्षादीन्यङ्गान्यस्य। चद्रगोक्षुरके ॥ न॰ शिक्षादिषेदाङ्गेषु ॥ यथा। शिक्षाकल्पोव्याकरण निरुक्त ज्योतिष तथा। छन्दश्चेतिषडङ्गानिवेदानां वैदिकाविदु ॥ छन्द पादौतु वेदस्यहस्तौकल्पस्तु पठ्यते। ज्योतिषामयननेत्र निरुक्त श्रोत्रमुच्यते ॥ शिक्षाघ्राणन्तुवेदस्यमुखव्याकरणंस्मृतम्। तस्मात्साङ्गमधीत्यैवब्रह्मलोकेमहीयते ॥ कृ॰ स्मृति ॥ शरीरस्यषडवयवे। यथा। जङ्घेबाहू शिरोमध्य षडङ्गमिदमुच्यते॰ कृति ॥ हृदादिषु ॥ हृच्छिरश्शिखावर्मकवचनयनचयम्। करतलकरपृष्ठेषषडङ्गन्यासकर्मणि ॥ गव्यविशेषे ॥ यथा ॥ गोमूत्र गोमय क्षीर सर्पिर्दधिचरोचना। षडङ्गमेतन्माङ्गल्यपवित्र सर्वदागवामितिस्मृति ॥

षड्गजित् । पु॰ जनार्दन ॥ त्रि॰ षड्वर्गजेतरि ॥

षड्गवध्रुव । पु॰ । देवदैत्यध्रुवविशेषे ॥ यथा । गुरुत्वगुरुशोणीरमर्कारामधुवन्दने । धूपयेद्गव्यभस्मिश्रेनीचं दैवग्रहेशिक धूत ।

षड्ङ्गवित् । पु॰ शिक्षादिवेदाङ्गज्ञे । पङ्क्तिपावनब्राह्मण । षडङ्गानि शिक्षादीनि वेत्याचष्टे ।

षड्भिज्ञ । पु॰ बुद्धादिमुनि । सर्वज्ञे । बुद्धे ॥ दिव्यचक्षुः श्रोत्र॰ परचित्तज्ञान॰ पूर्वनिवासानुस्मृति॰ आत्मज्ञान॰ वियद्गमन॰ कायव्यूहादिसिद्धिरिति षट् अभिज्ञा यमाजानियत्स । षट्सु॰ दानशीलक्षान्तिवीर्यध्यानप्रज्ञासु॰ अभिज्ञा॰ आद्यज्ञानमस्येति वा ॥

षडशीति । स्त्री॰ अर्कसंक्रान्तिविशेषे ॥ यथा । षडशीतिमर्कधाप्नोत्युक्त कन्याभिधुनि त ॥ षडधिकाऽशीतिसङ्ख्यायाम् ॥

षडशीतिचक्रम् । न॰ मिथुनकन्याधनुर्मीनराशिस्थरवे शुभाऽशुभफलज्ञानार्थं मनुष्याकारनराकारचक्रे ॥ यथा । सुश्वेव का वरेविद्ः पादयुगमेदय इयम् । क्रोडे वाम्नयाविशा. वरिसव्येतरेमिव । इय इय तथानेत्रे मस्तकेऽपितव तथा । इयमे वतथागुह्ये षडशीत्यास्यमेऽस्यति ॥ सुविद्ु खरकरेलाभ पादयोर्भ्रमणङ्करः । कान्ताप्राप्त्यन्न वानेव स्त्रिया तुष्टीयमेनुषाम् सम्मान नैत्रयोश्वैव भपमानश्चमस्तके । गुह्ये चैवभवेन्मृत्यु षडशीतिफलस्मुतिरिति ॥

षडष्टकम् । न॰ षटकाष्टयोगे ॥ सतु वरकन्ययोः स्वस्वराशिप्रेक्षया परस्परषष्ठाष्टमराशिसम्बन्ध । सचमित्रारिभेदेनद्विविध । तत्रमित्रषडष्टक यथा मकारसनेत मिथुन । कन्याकलसौमृगेन्द्रमीनौच । वृषभतुलेचकमेषौकर्कटधनुषौचमित्रविधौ ॥ षडष्टकाविति शेष ॥ अरिषडष्टकमाह । मकर ; करिकुलरिपुप्रास्याञ्चैवसम्मतस्तुलया । शाक्ति घटोद्वचधनुषोश्चिमिथुनैरवे रिविधौ ॥ यदिकन्याष्टमेभर्ता भर्तुं षष्ठकन्यका । षडष्टकविवाहोयात्रवर्ज्यं तत्प्रियद्वेरपि ॥

षडानन । पु॰ कार्त्तिकेये । मत्रा हिनी । स्कन्दे । गुहे ॥ कृत्तिकानामस्निपक्षोनाप्तयानपानाय षट्ङ्काननानियस्य स ॥

षड्पथम् । न॰ । मिश्रितभट्षट्का द्रव्ये । यथा । पञ्चशोल समरिचषड्पथमुदाहृतम् । पञ्चकोलकयुक्तस्तुल्यापञ्चमितिभाव

प्रकाश ॥

षड्गया । स्त्री॰ षड्विधगयायाम् ॥ यथा । गयागजो गयादित्यो गायत्री च गदाधरः । गया गयासुरश्चैव षड्गया मुक्तिदायिकेति वायुपुराणे गयाप्रकृति ॥

षड्गव । न॰ गोषट्कयुक्तहलादौ ॥ यथा । अष्टागवधर्म्यहलं षड्गवं जीवितार्थिनाम् । चतुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनाम् ॥ षण्णां गवां समाहारः । गोरतद्धितलुकीति समासान्तष्टच् ॥

षड्गुणरहित । पु॰ मधुरादिषड्गुणरहिते परमात्मनि ॥

षड्गुणेश । पु॰ षडिन्द्रियनियन्तरि ॥

षड्ग्रन्थ । पु॰ महाकरञ्जपादपे । षट् ग्रन्थयो यस्य । अच्प्रत्यन्ववपूर्वात्सामलोम्न इति योगविभागादच् ॥ षट्ग्रन्थायस्थवा ॥

षड्ग्रन्था । स्त्री॰ वचायाम् ॥ षट् ग्रन्था ग्रन्थयो यस्याः सा ॥ शठ्याम् ॥ शुक्लवचायाम् ॥

षड्ग्रन्थि । पु॰ षट्पर्व्वणि ॥ स्त्री॰ वचायाम् ॥ न॰ पिप्पलीमूले ॥

षड्ग्रन्थिका । स्त्री॰ शठ्याम् । गन्धमूल्याम् ॥ षट् पर्व्वाणि ग्रन्थयो यस्याः ॥ स्वार्थे कन् ॥

षड्ज । पु॰ तन्त्रीसमुत्थिते कण्ठोत्थिते च स्वरविशेषे ॥ षड्भ्यः स्थानेभ्यो जात । पञ्चम्यामिति ड ॥ यथा । नासाकण्ठमुरस्तालुजिह्वादन्तांश्च संस्पृशन् । षड्भ्यः सञ्जायते यस्मात्तस्मात्षड्ज इति स्मृत ॥ मयूरस्वरतुल्यस्वरोऽयम् । यथा । षड्जं रौति मयूरो हि गावो नर्दन्ति चर्षभम् । अजाविरौति गान्धारं क्रौञ्चो नदति मध्यमम् ॥ तानसेनमते सप्तस्वराणामध्ये प्रथमस्वरोऽयम् ॥

षड्धा । अ॰ षट्प्रकारे ॥ सङ्ख्याया विधार्थे धा ॥

षड्विध । त्रि॰ षट्प्रकारे ॥ षट् विधा प्रकारा यस्य ॥

षड्भावविरहित । त्रि॰ अस्तीत्यादिषड्विकाररहिते परमात्मनि ॥ अस्तीत्यादयो यथा । अस्ति जायते वर्द्धते विपरिणमते अपक्षीयते विनश्यतीति ॥

षड्भुज । त्रि॰ षड्हस्तयुक्ते ॥

षड्भुजा । स्त्री॰ चण्डिकायाम् ॥ रुद्रचण्डायाम् ॥ चण्डवत्याम् ॥ न॰ षड्रेखाभिर्येयफललताविशेषे । मधुफलायाम् । इतकर्क्याम् । तिक्तफलायाम् । खरबूजा॰ इ॰ भा॰ प्र॰ ॥ अस्याः फलगुणा यथा । तिक्तत्वात्तदनुमधुरंकिञ्चि

दशनच्छदा जिह्वा निष्कवेतनद्वत्तरा
तर्पयायुं ष्टदायि । शप्य ह्रदयन
विपमनम् ष्भुद्धि विध्रां पयो
न्धः दापहरकफदषड्भुजकोर्यं मा
रीतिराजनिर्घण्ट ॥

षड्रस । पु॰ मधुरादिषट्प्रकार
रसे । यथा । मधुराम्लवणस्तिक्त
कषाय आम्ल कटुस्तथा । मन्नीतिरस
जीवत्वाद्द्राद्य षड्मोरसा ॥ ए
षानामन्नय यथा । मधुरगीण्य
मित्याकुरित्वादीसवलच्यते । ल
वणस्तुपटु प्रोक्तः सैन्धवादौगह
श्यते ॥ तिक्तस्तुपिचुमर्दादौव्यक्त
मस्त्ययतेरसः । कषायस्तुवरस्
ता सपपूगीफलादिषु ॥ कटु
स्तुवारस स्यान्मरिचादौसवे
ष्यते । इतिराजनिर्घण्ट ॥

षड्राधम् । न॰ षड्वे ॥

षड्रेखा । स्त्री॰ षड्भुजायाम् ।
खर्जूरी ॥

षड्लवणम् । न॰ सपञ्चलवण रू
च्यालवणं । रुच्यापितेपञ्चलव
णं ॥

षड्वाच । पु॰ कार्त्तिकेये ॥

षड्वर्ग । पुं॰ कामक्रोधादिषु ॥ यथा
। निग्रहामात्मनः कामक्रोधादिपडिर्वं
मुच्यते । कामक्रोधोलोभमोह
मदमात्सर्याख्य : ॥ षाद्गुण्यस्वा
द्गुणाश्रितायां षड्वर्गम्त्वा । ष

इन्द्रियाणां कथितानां तेषां सममुदो
रितम् ॥ षड्वर्ग । षड्विन्द्रिय
सुखं

षड्वर्ष । त्रि॰ षड्वर्षोभिभूते॰ बाल
के ॥ तद्धितार्थेतिसमास । चित
वतिनित्यमितिघठओस्वधितयोलु
क ॥

षड्वाद । पु॰ भ्रमर ॥

षड्विन्दु । पु॰ हरौ । विष्णौ ॥ की
टविशेषे ॥ शिरोरोगापद्दे॰ पक्वते
लविशेषे ॥ यथा । एरण्डमूल तग
रयताद्या जीवन्तिका सैन्धवराजिनी
च । भृङ्गविड़ङ्गं मधुयष्टिकाच वि
श्वौषधं कृष्णतिलस्यतैलम् ॥ अजा
पयस्तैलविमिश्रितञ्चतुर्गुणे भृङ्ग
रसेविपक्वम् । षड्विन्दवोनासिक
यो : प्रदेया सर्वान्विहन्यु शिर
सो विकारान् ॥ च्युतांश्चकेशान्पु
लितांश्चदन्तान्निर्बन्धमूलान्सुदृढीक
रोति । सुपर्णगृध्रप्रतिमञ्च चक्षु
कुर्यात्तथाङ्गाराभञ्च वक्त्रम् । जीव
न्तिकाञ्चरीतकीचाकारविशेष ।
इतिभावप्रकाश : ॥

षड्विन्ध्या । स्त्री॰ सैन्धिन्याम् ।

षण्ड । पु॰ गोपतौ । वृषभे ॥ समू
हे ॥ पु॰ न॰ पद्मे । पद्मादिस
मूहे । पद्मकुसुमादिसङ्घाते । स
मीति । षण्डानि । अमन्ताङ्क : ।
वाकुलकात्सत्वाभाव : ॥

षण्डाली । स्त्री॰ सरस्याम् । कामुक स्त्रियाम् । तैलमाने । छटाक॰ इ॰ भा॰ प्र॰ । इति हेमचन्द्रो मेदिनिकरश्च ॥

षण्ढ । पु॰ षण्ढशब्दार्थे । शाखलिङ्गस्याभावात् । शमउपशमे । शमे ढः । बाहुलकात् ष । यद्वा । सनति । षमष्टमवैकल्ये । जनिदंष्ट्रा दिनाषमेर्ढः । बाहुलकात् सत्वाभाव ॥ षस्यदर्शने सूर्यदर्शनम्॰ स्पर्शनम्॰ स्पर्शने तु स्नान सूर्यावलोकनस्त्रप्रायश्चित्तम् ॥

षण्मुख । पु॰ कार्त्तिकेये । स्कन्दे । षट मुखान्यस्य ॥

षण्मुखा । स्त्री॰ षट्भुजायाम् । खरबूजा॰ इ॰ भा॰ ॥

षट् । त्रि॰ सङ्ख्यान्तरे । छ छै॰ इ॰ भा॰ । सङ्ख्येये ॥

षष्टि । स्त्री॰ सङ्ख्यान्तरे साठ॰ इ॰ भा॰ । सङ्ख्येये । षट् दशत परिमाणमस्य । प्रकृते षष्भावश्च प्रत्ययोऽपद्‌त्वञ्च॰ पङ्क्तिविंशतित्रिंशत् चत्वारिंशत् पञ्चाशत् षष्टीति निपातनात् ॥

षष्टिक । पु॰ न॰ शीघ्रजी॰ धान्यविशेषे । साठी॰ इ॰ भा॰ प्र॰ । षष्टिकादिधान्यविशेषा षष्टिका षष्टिरात्रेणपच्यन्त इति तृतीयान्तात् कन्॰ रात्रशब्दलोपश्च निपात्यते । धान्यविशेषाय सा तुन मुनेः पु॰ ते पि षष्टिरात्रेणपच्यन्ते ॥ अस्य लक्षण गुणाश्च यथा । गर्भस्था एव ये पाकं यान्ति ते षष्टिका मता ॥ षष्टिक शतपुष्पश्च प्रमोदक मुकुन्दकौ । महाषष्टिकइत्याद्या षष्टिका समुदाहृता ॥ एतेपि व्रीहय शोकाज्ञी हिलक्षणदर्शनात् ॥ षष्टिका मधुरा शीता लघवी बद्धवर्च्चस । वातपित्तप्रशमना शालीनां सदृशा गुणैः । तत्र॰ साठा गुणा । षष्टिकायाम ॥ अपिच । गौरा नील षष्टिकोऽयहि धान्य इ॰ दोरुच्य शीतलो दोषहारी । बल्य पथ्यो दीपनो बीर्यकृच्च इत्येतस्मात् किञ्चिदूनो द्वितीय ॥

षष्टिका । स्त्री॰ साठोतिप्रसिद्धधान्ये ॥ अस्या गुणा । षष्टिका प्रवरा तेषां लघ्वी स्निग्धा त्रिदोषजित् । स्वाद्वी कृष्णोया स्थिरा चबलदा ज्वरहारिणीति ॥ रक्तशालि गुणैस्तुल्यास्तत स्वल्पगुणा परे ॥ तेषां षष्टिकशतपुष्पादीनाम् । परे॰ षष्टिकशतपुष्पादय ॥ शरदि षष्टिकाभि पार्वणश्चित्यमिति वाचस्पतिमिश्रा ॥

षष्टिक्यम् । न॰ षष्टिकधान्योत्पत्त्युचितभूमौ ॥ षष्टिकानाम्भवनं क्षेत्रम् । यवयवकषष्टिकाद्यदिति यत् ॥

षष्टिज । पु॰ षष्टिकधान्ये

षष्टितम । त्रि॰ षष्टेः पूरणे ॥

षष्टिदुर्गा । स्त्री॰ स्कन्दभार्यायाम् ॥ तिथिभेदे ॥

षष्टिधा । अ॰ षष्टिप्रकारे ॥

षष्टिमत्त । पु॰ गजे ॥ षष्टिवर्षप र्यन्तस्य पुंवाङ्गस्थित्या॰षष्टिमत्तो हस्तीतिसारस्वताभिधानम् ॥

षष्टिलता । स्त्री॰ भ्रमरमार्यामि ॥

षष्टिहायन । पु॰ गजे । हस्तिनि ॥ धान्यविशेषे ॥ त्रि॰ षष्टिसङ्ख्यक वत्सरवयोयुक्ते ॥

षष्ठ । त्रि॰ षण्णांपूरणे ॥ तस्यपूर णे डट् । षट्कतिकतिपयचतुरा थुक् ॥

षष्ठान्नकालिक । त्रि॰ तृतीयदिनभो जिनि ॥ न॰ द्विदिनानन्तरभुक्ते ॥ यथा । द्वान्तरेल्यन्तरेभुक्तमाहु षष्ठान्नकालिकम् ॥

षष्ठिका । स्त्री॰ षष्ठ्याम् ॥

षष्ठी स्त्री॰ कात्यायन्याम् । गौर्या म ॥ मातृकाविशेषे ॥ साचप्रकृतेः षष्ठोकला॰स्कन्दभार्याच ॥ यथा । प्रकृतेरितिसम्बन्धे॰प्रधानांशस्वरूपा यादेवसेनाचनारद । मातृकासुप ज्यतमासाषष्ठीचप्रकीर्त्तिता ॥ पु त्रपौत्रादिदात्रीचधात्रीत्रिजगतांस ती । षष्ठांशरूपाप्रकृतेस्तेनषष्ठीप्र कीर्त्तितेतिश्रीदेवीभागवतम् ॥

तिथिविशेषे । गुरुतिथौ ॥ षण्णांपू रणाम डम॰ थीम॰ थाम॰ दुर्गस्वैरी ॥ अथाथमस्वस्योर्थ सदर अपकर्षोपगमाद्गव्हामाप्रवृ त्तिनिमित्तम गोमान धनवानित्या दौनाचप्रवृत्तिनिमित्तम्॰ चपत्याप त्यवत्सम्बन्धादे शब्दप्रवृत्तिनिमि त्तत्वात ॥ पूरणप्रत्ययान्तत्वाटित्वा त ङीप् ॥षष्ठ्यान्तिथावुत्पन्नस्यफलं यथा । विद्वान्वरिष्ठचतुर सुकी र्त्ति॰ प्रसन्नवाक्शुद्धमतीर्थगात्र॰ । सत्यप्रतिष्ठोधनपुत्रयुक्तः षष्ठीप्र सूतोमनुजश्चिरायुरिति ॥

षष्ठीदण्डकपाठ । पुं॰ । ग्रन्थविशेषे ॥ यत्रैकशत षष्ठ्यर्थविज्ञा ॥

षाट्कौशिक । पु॰ स्थूलदेहे ॥ यथा । मज्जास्थिस्नायव शुक्राद्य स्नात्त्वङ्मांसशोणितम् । इतिषा ट्कौशिकानामदेहोभवतिदेहिना म ॥

षाडव । पु॰ गाने । रागस्यजाति विशेषे । सचषट्स्वरमिलितरा गरागिण्यौ । यथा । औडव पञ्चभि प्रोक्त स्वरै षड्भिस्तु षाडव । सम्पूर्ण॰ सप्तभिर्ज्ञेय एव रागस्त्रिधामत ॥ रसविशेषे ॥ सचरसविशेषज्ञः सूदशास्त्रे । यथा । सितामध्वादिमधुरोद्राक्षाद्रा डिमजोरस ॥ विरसश्चेत्युक्तोरा

गः सान्द्रस्निग्धः षाडवः स्मृतः ॥ इति ॥ अपिच । षाडवामधुराम्ला दिरससंयोगपाचितादिति ॥ गुडा म्बु प्रभृतयः षाडवाद्यस्त्वर्थः ॥

षाड्गुण्यः । पुं॰ इन्द्रियषड्वर्गविषये ॥

षाड्गुण्यम् । न॰ राज्ञां व्यवहारोपायेषु षट्सु ॥ यथा सन्धानासनम् ॰ सन्धिं कृत्वाऽवस्थानम् १ यात्रा सम्यानम् २ । विगृह्यासनम् ॰ वैरं कृत्वावस्थानम् ३ । यात्रां सम्परिगृह्यासनम् ॰ यात्रां प्रद र्शनार्थं यानं प्रदर्श्य स्वस्थाने ऽवस्था नम् ४ द्वैधीभाव ॰ उभयत्र स नीकरणम् ५ । अन्येषां संश्रय ॰ दुर्गादिभिः राजसेवाश्रय ६ इति महाभारतेराजधर्मः ॥ सन्धि र्नाविग्रहोयानमासनं द्वैधमाश्रयः त्वमरः ॥ षड्गुणाएव । चतुर्वर्णा दित्वात्स्वार्थे ष्यञ् ॥

षाण्मातुरः । पुं॰ शशिधरे । कार्त्ति केये ॥ षण्णांमातॄणामपत्यम् । मा तुरुत्सङ्ख्यासम्भद्रपूर्वायाइत्यधि ॰ उत्व रपरत्वञ्च ॥

षाष्ठ । त्रि॰ षष्ठे ॥

षिङ्गः । पुं॰ कामकेली । कामुके । नागरे । विटे । सुश्रो॰ इ॰ भा॰ ॥ सेटति॰ सिध्यतीवा । सिटधनादरे । बाहुलकात्॰ सत्वाभावश्च ॥

षु । पुं॰ गर्भविमोचने ॥

षोडन् । त्रि॰ षड्दन्तयुक्ते ॥ षट्द न्ताअस्य । वयसिदन्तस्य तिदत्रादे श । ततः षषउत्व दतदश्रधासूत्त रपदादेष्टुत्वञ्च॰ धासुवेतिवाच्यम ॥

षोडश । त्रि॰ षोडशानाम्पूरणे । तस्यपूरणे डट ॥

षोडश । पु॰ नित्याबहुवचनान्तः । ए काधिकपञ्चदशसङ्ख्यायाम् ॥ ग र्भाधानादिसंस्कारेषु ॥ तेयथा । गर्भाधानं पुंसवनं सीमन्तोन्नयनंतथा । जातकर्माभिधानञ्च निष्क्रम प्रा शनन्तत ॥ चूडोपनयनं वेदव्रता नाञ्चचतुष्टयम् ॥ गोदानं मेखला मोक्षोविवाहः षोडशक्रमात् ॥ ष ट्चदशचषडधिका दशवा । षषउ त्व दतदशधासूत्तरपदादेष्टुत्वञ्च॰ धासुवेतिवाच्यम् ॥ त्रि॰ सङ् ख्येये ॥

षोडशकः । पु॰ षोडशसङ्ख्यापरि मितगणविशेषे ॥ यथा । षोडशक स्तुविकारइति । पञ्चभूतानि॰ ए कादशेन्द्रियाणिचेत्येतानिविकारप दवाच्यानि ॥

षोडशकला । स्त्री॰ चन्द्रमण्डलस्य षोडशधाविभक्तभागेषु ॥ यथा । अमृ तामानदापूषातुष्टिः पुष्टीरतिधृ ति । शशिनीचन्द्रिकाकान्तिर्ज्यो त्स्नाश्री प्रीतिरङ्गदा ॥ पूर्णापू र्णामृताकामदायिन्य शशिन

कागा ॥

षोडशदानम् । न० आद्यादिषोडशप्रकारदेयद्रव्ये । तत्क्रममाह साम्प्रदायिकाः । भूम्यासनजलवस्त्रप्रदीपान्नततः परम् । ताम्बूलच्छत्रगन्धमाल्यफलमतः परम् ॥ शय्यापादुकागावः काञ्चनं रजतन्तथा । दानमेतत्षोडशकं प्रेतमुद्दिश्य दीयते ॥ ततषोडशषोडशकैर्वदानसागरो भवति ॥

षोडशभुजा । स्त्री० षोडशहस्तयुक्तायां दुर्गायां ॥

षोडशमातृका । स्त्री० गौर्यादिषु ॥ यथा । गौरीपद्माशचीमेधासावित्री विजयाजया । देवसेनास्वधास्वाहा शान्तिपुष्टिर्धृतिः क्षमा ॥ आत्मनोदेवताश्चैवतथैवकुलदेवता ॥

षोडशर्त्विक्क्रतु । पु० षोडशर्त्विक्साध्ये ज्योतिष्टोमयागे द्वादशाहसाध्यसत्रयागेच । तदृत्विग्नामानियथा । ब्रह्मा १ ब्राह्मणाच्छंसी २ आग्नीध्र ३ पोता ४ एतेऽथर्ववेदीया ॥ होता ५ मैत्रावरुण ६ अच्छावाक ७ ग्रावस्तोता ८ एतेऋग्वेदिनः ॥ अध्वर्युः ९ प्रतिप्रस्थाता १० नेष्टा ११ उन्नेता १२ एतेयाजुषाः ॥ उद्गाता १३ प्रस्तोता १४ प्रतिहर्त्ता १५ सुब्रह्मण्य १६ एतेसामगाः ॥

ज्योतिष्टोमेद्वादशशतंदक्षिणाविभाग षोडशर्त्विजाम् । तद्विभक्तौभूतिसत्रादौद्वादशाहसाध्ये० शतेनार्द्धिनोदीयन्तेत्यादिदर्शनेननिर्णीयते । तत्रविभागमनुराह । सर्वेषामर्द्धिनोमुख्यास्तदर्द्धेनार्द्धिनोऽपरे । तृतीयिनस्तृतीयांशाश्चतुर्थांशैकपादिनः ॥ दक्षिणागोशतविभागायथोक्तकात्यायनेनापि । अथद्वादशद्वादशाद्येभ्य षट्षट् द्वितीयेभ्यश्चतस्रश्चतस्रस्तृतीयेभ्यस्तिस्रस्तिस्रइतरेभ्य० । इत्यषोडशर्त्विजाञ्चतुरश्चतुरः कृत्वाप्रत्यारे वर्गार्द्धंतमप्रमाणतत्त्वम् ॥

षोडशांशु । पु० शुक्रग्रहे ॥ षोडशअंशवोऽस्य ॥

षोडशाङ्ग । पु० धूपविशेषे । यथा । गुग्गुलुसरलदारुपद्मकमलयसम्भवम् । क्षीविरमगुरुकुष्ठगुडसर्जरसङ्घनम् ॥ हरीतकीनखीलाक्षाजटामांसीशैलजम् । षोडशाङ्गविदुर्धूपं दैवेपित्र्ये चकर्मणि ॥ त्रि० षोडशावयवयुते ॥

षोडशाङ्घ्रि । पु० कर्कटे ॥

षोडशारम् । न० षोडशदलपद्मे ॥

षोडशार्च्चि । पु० शुक्रग्रहे ॥

षोडशावर्त्त । पु० शङ्खे ॥

षोडशिकाम्रम् । न० पलपरिमाणे ॥

षोडशी । पु० यज्ञपात्रविशेषे ॥ स्त्री०

मकपात्रविशेषे ॥ समयाध्युषिते
सूर्ये षोडशिनं स्तोत्रमुपाकरोति ॥
षोडशी । स्त्री॰ दशमहाविद्यान्तर्गत
महाविद्याविशेषे ॥ यथा । काली
तारामहाविद्याषोडशीभुवनेश्वरी ।
भैरवीछिन्नमस्ताचविद्याधूमावती
तथा ॥ बगलासिद्धविद्याचमातङ्गी
कमलात्मिका । एता दशमहाविद्याः
सिद्धविद्याः प्रकीर्त्तिताः ॥ जनवि
मतिपिण्डदानक्रियायाम ॥ षोड
शानाम्पूरणी । डट् । ङीप् ॥
षोढा । अ॰ षड्धा । षट्प्रकारे ॥
षोढाषट्धावाकुरु । सङ्ख्याया वि
धार्थे धा । षषउत्व दढदशधासूत्त
रपदादेष्टुत्वञ्च॰धासुर्वैतिवाच्यम् ।
ष्ठीवनम् ।) न॰ फूत्कृत्यश्लेष्मण
ष्ठेवनम् ।)
प्रक्षेपे ॥ ष्ठिवुनिरसने । ल्युट् ।
ष्ठिवुसिवोर्ल्युटिदीर्घोवेतिवाच्यम् ।
ष्ठ्यूतम् । त्रि॰ ष्ठीवने ॥ ष्ठिवु॰ । क
र्म्मणि क्त । च्छ्वोरित्यूठ् ॥

सकारादिशब्दप्रारम्भः

स । पु॰ शङ्करे ईश्वरे । सर्पे ॥ प
क्षिणि । विष्णौ ॥ सगणे॰ । ऽपु॰ ॥
सय । पु॰ कङ्काले ॥ इ॰ श॰ च॰
का ॥
संयत् । पु॰ स्त्री॰ युद्धे । आयोधने ।
संमतौ ॥ संयतनम्॰ संयमनवा
। यतीप्रयत्ने॰ यमउपरमेवा । स
म्पदादित्वात् क्विप् । गमादीनामि
तिमलोप । तुक् ॥
संयत । त्रि॰ बद्धे । संयम्यतेस्म
। यम॰ । क्त ॥ कृतसंयमे ॥
संयतेन्द्रिय । त्रि॰ वशीकृतेन्द्रिये ॥
संयतानिविषयेभ्योनिवर्त्तितानि॰
इन्द्रियाणियेनस ॥
संयत्त । त्रि॰ उद्युक्ते ॥
संयद्वर । पु॰ नृपे । संयच्छति ।
यम॰ । क्विप्वरच्छत्वरेतिष्वरच् ।
निपातनान्मस्यद ॥
संयन्ता । त्रि॰ संयमनकर्त्तरि । नि
यन्तरि ॥ संयच्छति । यम॰ । स
म्पू॰ तृच् ॥
संयम । पु॰ व्रताद्यङ्गपूर्वदिनकर्त्त
व्याचारे । नियमे । नियमे । यामे
। यमे । संयामे । संयमने ॥ धार
णाध्यानसमाधिरितित्रयमेवात्रविषय
॰ संयमशब्देनोच्यते । त्रयमेकत्र
संयम इति तत्सूत्रं ॥ सर्ववर्णा
नुष्ठेय सकलपुरुषार्थोपयुक्तोयसं
यम । तथाचमनु । इन्द्रियाणां
विचरतां विषयेष्वपहारिषु । संय
मेयत्नमातिष्ठेद्विद्वान्यन्तेव वाजि
नामिति ॥ विद्वान्॰ विषयेषुवर्त्त
मानानामिन्द्रियाणामथित्वादिदो
षान्जानन्निर्थ्य ॥ धर्माधर्माज्ञा
ददीनानुग्रहेनिग्रहेच ॥ संयमनम्
। यम॰ समुपनिविषुच्चेतिपक्षेऽप

॥ सयते ॥

सयमक । त्रि॰ नियन्तरि ॥ संयमिनि ॥

सयमन । पुं॰ यमलोके ॥ न॰ बन्धने ॥ व्रते ॥

सयमनी । स्त्री॰ यमस्य पुर्य्याम् ॥ यथा श्रीमृगेन्द्रसंहितायाम् ॥ मृत्यो सयमनीतुङ्गशोभ्रप्राकारमण्डला । कालपाशमिलव्याघ्रप्रेतमारीनिषेविता ॥ कालपाशादियुक्ता॰ ऽत्युन्नतायसप्राकारसमूहा॰ सयमनी नामदक्षिणस्यां यम्यपुरीत्यर्थः ॥

सयमित । त्रि॰ जातसंयमे ॥ तारकादित्वादितच् ॥ यमिते ॥

सयमी । पु॰ मुनौ ॥ त्रि॰ संयमवति ॥ स्थितप्रज्ञे ॥ या निशा सर्वभूतानां तस्यां जागर्त्ति संयमी ॥ संयमोऽस्यास्ति । इनिः ॥

सयात्रा । स्त्री॰ सम्यग्यात्रायाम् । पोतवणिजां सागरगमने ॥ समुद्रतो नागमने ॥

सयाम । पु॰ संयमे ॥ संयमनम् । यम॰ समुपनिविमुच्चेतिपक्षे घञ् ॥ संयते ॥

सयाव । पुं॰ घृतक्षीरगुडगोधूमचूर्णसिद्धे भोज्यविशेषे ॥ यथा । संयावस्तु घृतक्षीरगुडगोधूमपाककृति ॥ पिष्टकविशेषे । पिराक॰ पिराकी ॰ इ॰ भा॰ प्र॰ ॥ यथा । पर्व्वमात्स्यसमितानिर्म्मिता घृतभर्ज्जिता । कुट्टिता खोलिता : शुभा शर्कराभिर्विमर्द्दिता ॥ तदा चूर्णे क्षिपेदेलालवङ्गमरिचानि च । नालिकेरसकर्पूरं चारबीजान्यनेकशः ॥ घृताक्तसमिता पुष्टरीटिकारचिता ततः । तस्याः तत् पूरणं न्यस्य कुर्य्यान्मुद्रां दृढां सुधीः ॥ सर्पिषि प्रचुरे तान्तु सुपचेत् क्षिप्रपुत्रोज्ज्वल । प्रकारस्य प्रकारीय संयावकृतिकीर्त्तित ॥ मठीनसमोक्षं च । संयावोऽपि गुणैर्ज्ञेयः ॥ लोके॰ गंभाकृतिप्रसिद्धौ यम् ॥ संयवनेमिश्रीक्रियते गुडादिभि । युः॰ । समियुद्दुद्रुबकृतिघञ् ॥

सयुक्त । त्रि॰ संलग्ने । संयोगाश्रये ॥ सम्यक् युक्त ॥

सयुक्तसमवाय । पुं॰ सन्निकर्षे ॥ यथा॰ घटरूपप्रत्यक्षे संयुक्तसमवाय सन्निकर्षः । चक्षुः संयुक्ते घटे रूपस्य समवायात् ॥

सयुक्तसमवेतसमवाय । पुं॰ सन्निकर्षविशेषे ॥ यथा॰ रूपत्वसामान्यप्रत्यक्षे॰ संयुक्तसमवेतसमवायः सन्निकर्षः । चक्षुः संयुक्ते घटे रूपं समवेतम्॰ तत्र रूपत्वस्य समवायात् ॥

संयुग : । पुं॰ युद्धे । चाथोधने । अन्योरणे ॥ सयोजमम् । युजिर्॰ । घञ् । रथयुगीतिनिर्द्देशात्पा

भाव । प्रतिजन्मादिद्युमयुगमब्द पा०८।६१ ॥

संयुक् । त्रि० गुणवनि । द्रव्यन्वितं ... । संयुज्यते । युज० । क्विप् चेति क्विप ।

संयुत । त्रि० । संयुतौ । ... ॥

संयोग । पु० प्रणिधि । ... नवद्रव्यवर्ति नि ॥ संलग्ने । सम्बन्धे ॥ सन्निकर्ष भेद ॥ ... संयोगसन्निकर्षः ॥ सम्बन्धमात्रे ॥ संयुज्यतेऽनेन । युज० । घञ् ॥ ... संयोगो गुणपदार्थः । संयोगस्तु ... सम्बन्धविशेषः । स त्रिविधः यथा । एककर्मजन्यः । यथा श्येनशैलसंयोगः । १ । उभयकर्मजन्यः । यथा मेषद्वयसंयोगः । २ । संयोगजन्यसंयोगः । यथा कपालतरुसंयोगजन्यतरुकुम्भसंयोगः । ३ । कर्मजन्यसंयोगोऽपि द्विविधः । अभिघातः । तस्माच्छब्दो जायते । १ । नोदनं । तस्माच्छब्दो न जायते । २ ॥ अप्राप्तयोस्तु याप्राप्तिः सैव संयोग ईरितः । कीर्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्मजः ॥ तथोभयोः कर्मजन्योऽभवेत्संयोगजोऽपरः । आदिमः श्येनशैलादिसंयोगः परिकीर्तितः । मेषयोः सन्निपातो यः स द्वितीय उदाहृतः । कपालतरुसंयोगात् संयोगस्तरुकुम्भयोः । द्वितीयस्तात्कर्मजोऽपि द्विविधः परिकीर्तितः । अभिघातो नोदनञ्च शब्दहेतुरिहादिमः ॥ शब्दाहेतुर्द्वितीयः स्यादिति भाषापरिच्छेदः ॥ उदयात्पूर्वं दृश्यम् श्लेष ॥ यथा । उदयात्प्राग्दृश्यास्तु ये संयोगदृश्यते । उपरिष्टात्प्रवेशस्तु तस्मात्तापरिवर्जयेत् ॥ सन्निधौ ॥

संयोगपृथक्त्वम् । न० न्यायविशेषः ॥ यथा । एकस्य कर्मणो नित्यत्वकाम्यत्वाभ्यां द्विरूपाङ्गीकारे नित्यसंयोगविरोधः । मैवम् । संयोगपृथक्त्वन्यायात् । स च न्यायः चतुर्थाध्याये उक्तः । यथा । खादिरे पशुं बध्नाति । खादिरं वीर्यकामस्य यूपं कुर्वीतेति श्रूयते । अत्र संशयः । किं काम्यस्य खादिरता नित्ये पि खादिरतेति । तत्र क्रत्वर्थत्वेन नित्यतया नित्यप्रयोगाङ्गतामयुक्ता । यत्तु नित्ये पि खादिरत्वश्रवणं तत्काम्यस्यैवपशुबन्धनार्थ प्रासङ्गिकानुवादमात्रमिति प्राप्ते । राद्धान्तः चतुर्थाध्याये सूत्रम् । एकस्य तूभयत्वे संयोगपृथक्त्वमिति । एकस्य योगः सम्बन्धमा

त्वम् । पृथक्त्वभेदः । एकस्याश्रा
द्रिरस्य क्रत्वर्थत्वपुरुषार्थत्वरूपोभया
त्मकत्वे वाक्यद्वयेन च क्रतुशेषत्वफल
शेषत्वलक्षणसंयोगभेदावगमान्नि
त्यानित्यसंयोगविरोधः । न चा
श्रयस्थानार्थं नित्यवाक्यं सन्निधा
नादेवाश्रयलाभात् । अतउभयार्था
स्वादिरस्तेति । एवं दध्नाजुहोति • इ
न्द्रियकामस्येत्यादावुभयार्थत्वं
। दधित्वस्य द्वेधाश्रवणादितिप्राय
श्चितत्वम् ॥

संयोगित । त्रि॰ जातसंयोगे ॥ तार
संयोगी । त्रि॰ संयोगविशिष्टे ॥
कादित्वादितच् ॥

संयोजनम् । न॰ संयोगे । रतिलक्षे । नि
धुवने । मैथुने ॥ इ॰ हारावली ॥

संयोजित । त्रि॰ पदार्थान्तरेणसंयु
क्तीकृतेपदार्थे । उपाहिते । मेलि
ते ॥ संयोज्यतेस्म युजिर्॰ । ण्य
न्त । क्त ॥

संरब्ध । त्रि॰ संलग्ने । कुपिते ॥

संरम्भः । पु॰ आटोपे ॥ उत्साहे
॥ यथा । कार्यारम्भेषु संरम्भस्थे
यउत्साहउच्यते ॥ कोपे । क्रोधे
॥ यथा । प्रणिपातप्रतीकारः सं
रम्भोहिमहात्मनाम् ॥ संरम्भणम् ।
रभराभस्ये । घञ् । रभेरश्वलुटो
रितिनुम् ॥

संरम्भी । त्रि॰ क्षुभिते । संरम्भयुक्ते ।

संराविः । स्त्री॰ निष्पत्तौ ॥

संराधनम् । न॰ समाध्यादौ । भ
क्तिध्यानप्रणिधानाद्यनुष्ठाने ॥ सं
राध्यतेऽनेन । राध॰ । भावक
रणादौल्युट् ॥

संरावः । पु॰ आरवे । आरावे । शब्दमा
त्रे ॥ संरवणम् । रुशब्दे । उप
सर्गेरुवइतिभावेघञ् ॥

संरावी । त्रि॰ प्रशस्तशब्दविशिष्टे ॥

संरुद्ध । त्रि॰ प्रतिबद्धे ॥ निरा
कृतिव्याप्ते ॥

संरूढ । त्रि॰ प्रौढे ॥ अङ्कुरिते ॥
सम्यग्वृद्धिंगत्यर्थेतिक्त । ढत्वधत्व
ष्टुत्वढलोपदीर्घाः ॥

संरोधः पु॰ क्षेपे । रोधे ॥ सं
रोधनम् । रुधिर् । घञ् ॥

संलग्न । त्रि॰ संयुक्ते ॥ सम्य
क्लग्नः ॥

संलयः । पु॰ निद्रायाम् । शयने ॥
सम्यक्लीयतेऽत्र । लीङ्श्लेषणे ।
एरच् ॥ प्रलये ।

संलापः । पु॰ प्रीत्यामिथोभाषणे
। अन्योन्यप्रीतिभाषणे ॥ संल
पनम् । लप॰ । घञ् ॥ आ
लापएकेनापिक्रियते • संलापस्तुपर
स्परभाषणमेवेतिभेदः ॥ उक्तिप्र
त्युक्तिमद्वाक्यंसंलापइतिकीर्त्यते
॥ कृत्युक्तलक्षणमिथः ॥

संवः । पु॰ शस्त्रे । वर्त्ते । कुक्षि

शि । संवयति । वय० । अच् ॥

संवत् । अ० वर्षे । वत्सरे ॥ संवय ति । वयगतौ । क्विप । यलोप. । तुक ॥

संवत्सर । पुं० वत्सरे । अब्दे । सम्यग्वसन्त्यव्रतवोमासादयस्य । वसनिवासे । सपूर्व्वाच्चिदित्सरप्रत्य य । सस्यार्द्धधातुकाद्रितसङ्कत संवत्सरपरिवत्सरेडावत्सरानुवत्स रोद्वावत्सरेषुप्रथमवत्सरे ॥ ततय दाशुक्लप्रतिपदिसङ्क्रान्तिर्भवति० तदासौरचान्द्रयोर्मासयोर्युगपदुप क्रमोभवति० ससंवत्सर । त त सौरमानेन० वर्षषड्दिना निवर्द्धन्ते० चान्द्रमानेन० क्रम न्तोयिवाद्यदिनव्यवधानादुभयोर पपञ्चाशावेभवति । एवपञ्चवर्षा णिगच्छन्ति । तन्मध्येद्वौमलमासौ भवत : षष्ठ : संवत्सरोभवति । तदेवचान्तरभेदेन० संवत्सरादिप ञ्चकसमामनन्ति ॥ एषामुद्धारस्तु । यथाब्दात्पञ्चभि शेषात्सम्ब त्सरादिषुवत्सरा. । सम्परीदानुपू र्व्वात्तथोद्वापूर्व्वकामता० इति ॥ ज्यौत्स्नाश्रितिविधौ ॥

संवत्सरमुखी । स्त्री० ज्येष्ठशुक्लदश म्याम् । दशहरायाम् ॥ यथा । ज्येष्ठस्यशुक्लदशमीसंवत्सरमुखी स्मृता । तस्यांस्नानप्रकुर्व्वीतदान

ञ्चैवविशेषत । इतिब्रह्मपुराण म् ॥

संवत्सरा । स्त्री० दुर्गायाम् ॥

संवद् । अ० वर्षे ॥ संवदतिभाषा न् । वद० विच ॥

संवदनम् । न० संवादे ॥ समालो चे ॥ वशीकृतौ ॥

संवननम् । न० वशक्रियायाम् । व शीकरणे ॥ सम्पूर्व्ववनुयाचने वशीकरणार्थे । ल्युट ॥

संवर । पु० अनेकात्मवादिनांसम्म पदार्थान्तर्गतपदार्थविशेषे ॥ य था । इन्द्रियसंयमत्वप्रतिष्ठ ध्यान म्० आस्रवनिरोधात्मकत्वात्०स ङ्गोत्थास्रवमितिसंवरस्तुर्य्य० । इङ् इञ् भ्यां० पञ्च० द्रित्यादिना कर्म्मणप ॥

संवरणम् । न० गोपने ॥ सम्यक वरण वेष्टनम ॥ आवरणे ॥

संवर्त्त. । पु० प्राणे ॥ वायौ ॥ संवर्त्तनादर्थात्सङ्ग्रहणात्० स ङ्ग्रसनाद्वाऽग्न्यादीना० वायु. संवर्त्त । संवृङ्क्ते । वृजि० । घञ् । कुत्वम् ॥

संवर्त्तविद्या । स्त्री० वायूपासनवि द्यायाम् ॥ संवर्त्तस्यविद्या ॥

संवर्त्त । पुं० प्रलये ॥ संवर्त्ततेज गत् । वृतु० । हलश्चेतिघञ् ॥ मुनिविशेषे ॥ श्रुत्यादिप्रसिद्धेपर

सर्वेऽपिरवतारे ॥ अपद्रुते । ज
पमाने । योगविशेषे ॥ यथा । स
प्तमीरविवारैश्चप्रतिपद्बुधवासरे ।
सवर्त्तसञ्ज्ञकोयोगोगर्हितः शुभ
कर्मसु । मेघाधिपविशेषे । सवर्त्त
घनवृन्दके ॥
सवर्त्तक । पु॰ कालाग्निरुद्रे ॥ ब
लदेवस्यलाङ्गले ॥ और्व । वाडवा
ग्नौ ॥ त्रि॰ प्रवर्त्तके ॥ संवर्त्तय
ति । इति॰ ण्वुल् ॥
सवर्त्तकी । पुं॰ बलदेवे । भाव्य
ताऽग्नौ ॥ स्त्री॰ त्रि॰ शेष ॥
संवर्त्तवापी । स्त्री॰ तीर्थविशेषे ॥
संवर्त्ति॰ । स्त्री॰ पद्मादिनवपत्रे ।
सवर्त्तिकायाम् । सवर्त्ते । इतु
॰ । यपिपिकृषिवृत्तिविरिच्छिदि
कीर्त्तिभ्यश्चेतीन् ॥
संवर्त्तिका । स्त्री॰ पद्मादीनानवद
ले ॥ पद्मस्यकेसरसमीपस्थदले ॥
सवर्त्तित्वं । स्वार्थेकन् ॥ यथा
स्तु । संवर्त्तिकाभिमातिशालकाया
दालवट्प्रभृत् । मूलक्षृद्रव्या
धिरक्तपित्तविनाशिनी ॥
संवर्द्धकः । पुं॰ सवर्द्धनकारिणि ॥
संवर्द्धनम् । न॰ सम्यग्वृद्धौ । सं
वर्द्धितकोवत । वृधवृद्धौ । अ
नुदात्तेत्वे तियुच् ॥ सन्दीपने ॥
संवर्द्धितः । त्रि॰ पुष्टे । सम्यग्
वृद्धिविशिष्टे ॥

संवलनम् । न॰ मिश्रणे ॥
संवलित । त्रि॰ मिलिते । मिश्रि
ते । पक्षालक्षिते ॥
संवसथ । पु॰ ग्रामे ॥ संवसन्त्यत्र
। वस॰ । उपसर्गेवसश्च्यथच ॥
संवह । पु॰ सप्तवायुमार्गान्तर्गत
स्कन्धायो ॥ मनुष्यपाद्मपरिव
र्त्तिभेदभिन्नाभिरामाया ॥ वा
योश्चतुर्थभेद ॥ यथा । भवनो
नयवायुस्तौम यः पवसाख्य ।
प्रतिपद्यमानाथवायुः संतुर्य सं
वहोगण ॥ ४ ॥
संवाटिका । स्त्री॰ शृङ्गाटके ॥
संवाता । पु॰ संवर्त्तरि ॥ वाते
र्गत्यर्थोच्छत्वप्रत्यय ॥
संवाद । पु॰ परस्परवचनाविरो
धे ॥ चर्चिके । सन्देशवाक्य ।
समाचारे ॥ संवदनम् । वद॰ ।
घञ् ॥
संवादिनी । स्त्री॰ सहयाम ॥ य
था । षड्जसंवादिनीरिव ॥
संवार्य्यः । त्रि॰ संवरणीये ।
संवासः । पुं॰ गृहे ॥ पुरवासि
नांविहारार्थंपुरमध्येबहिर्वाऽसाधा
रणस्थाने । सन्निवेशे । निकर्ष
णे ॥
संवाहकः । पुं॰ अङ्गविमर्द्दके ॥
संवाहनम् । न॰ भारादिवाहने ॥
अङ्गमर्द्दने । पादमर्द्दनादौ ॥ वह

प्रापणे । स्वार्थेऽव्यसमाल्ल्युट् । वाञ्छमाविताद्विति निपातनाद्दीर्घ त्वे वे ॥

संवाचित । त्रि॰ सञ्चारिते ॥

संविग्न । त्रि॰ उद्विग्ने । सम्भ्रान्ते ॥ ओविजी भयचलनयोः . सम्पूर्व. । क्त । ओदितश्चेतिन । श्वीदितइतिनेट् ॥

संवित्ति । स्त्री॰ प्रतिपत्तौ ॥ अनावबोधे ॥ विद्ज्ञाने । स्त्रियांक्तिन् ॥

संवित्॰ द्॰ स्त्री॰ ज्ञाने ॥ सम्भाषायाम् ॥ क्रियाकारे । आजौ । सङ्ग्रामे । नाम्नि ॥ अङ्गीकारे ॥ प्रतिज्ञायाम् ॥ आचारे । तोषणे ॥ सञ्ज्ञे ॥ संकेते ॥ यथा । प्रहर्त्तीपनिहर्त्तीचस विद् ख्यापयेद्गुणे इति । क्रतव्यवस्थायाम ॥ यथा । संविद्व्यतिक्रमइति ॥ मनीषायाम् ॥ संवेदनम्॰ संविदतेऽनयावा । विद्ज्ञाने॰ विद्चेतनादौवा । सम्पदादित्वात्क्विप् ॥

संविदित । त्रि॰ अङ्गीकृते । ज्ञातीकृते । संविद्यतेस्म । विद्ज्ञाने । क्त ॥

संविधा । स्त्री॰ भोग्यवस्तुनि । सामग्र्याम ॥ संविधीयतेऽनया । संविपूर्वात्धाञ्यातश्चोपसर्गइतिक ॥

संविधानम् । न॰ उत्पादने ॥

संविभाग . । पु॰ विभज्यप्रतिपादने ॥

संविद्यतीर्थम । न॰ तीर्थविशेषे ॥

संविषा । स्त्री॰ अतिविषायां ॥

संवीक्षणम । न॰ अन्वेषणे । अपहृतवस्तुनस्तात्पर्येणान्वेषणे । सम्यक्तात्पर्येणविविधप्रकारैरीक्षणम् ॥

संवीत । त्रि॰ रुद्धे । आवृते । वस्त्रादिनावेष्टिते । संवीयतेस्म । व्येञ्संवरणे । क्त ॥

संवीताङ्ग. । त्रि॰ आच्छादितदेहे ॥

संवृत . । त्रि॰ सङ्कुचिते ॥ यथा । नासंवृतमुख . कुर्याद्धास्यञ्जृम्भाम् तथाद्भुतमिति ॥ निगूढे । गुप्ते । संवेष्टिते ॥ सम्पूर्वाद्वृञः क्त . ॥

संवृत्ति । स्त्री॰ वागिन्द्रियप्रयुक्तव्यवहारे ॥ गोपने ॥ संवरणम् । वृञ्॰ क्तिन् ॥

संवृत्त . । त्रि॰ सञ्जाते । सम्यक्प्रवृत्ते ॥ सम्पूर्वाद्वर्तते क्त . ॥ पु॰ वरुणे ॥

संवृत्ति । स्त्री॰ संवरणे ॥ अविद्याविषयेलौकिकेव्यवहारे । स्त्री क्लिवर्णाबुद्धी ॥ अविद्यायाम् ॥ संवियते॰ आच्छाद्यतेतत्त्वमनया । विभ्रमे ॥ संवर्तनम् । वृतु॰

क्तिन् ॥

संवेगः । पुं॰ सम्भ्रमे । हर्षादिना कार्यसत्वरत्वे ॥ अद्भुतदर्शनादि दर्शनात्सत्वरतायाम् ॥ संवेजनम् । चौविको॰ घञ् । सम्यग्वेगे ॥

संवेदः । पुं॰ वेदने । अनुभवे ॥ विद्ज्ञाने । सम्पूर्व॰ । घञ् ॥

संवेदनम् । न॰ संवेदे ॥

संवेद्य । त्रि॰ ज्ञेये ॥

संवेशः । पुं॰ स्वापे । निद्रायाम् ॥ स्त्रीरतिबन्धे ॥ पीठे ॥ संवेशनम् । विश॰ । घञ् ॥

संवेशनम् । न॰ मैथुने ॥ उपभोगस्थाने ॥

संव्यानम् । न॰ उत्तरीयवस्त्रे । अंशुके । वस्त्रे ॥ संवीयतेऽनेन । व्येञ्संवरणे । ल्युट् ॥

संशप्तकः । पुं॰ समयात् सङ्ग्रामादनिवर्त्तिनि ॥ समयात्॰ तुलाचारात्मकपथात्॰ सङ्ग्रामदनिवर्त्तिनोऽपराङ्मुखाः शपथान्कुर्वन्ति॰ ते संशप्तकाः कथ्यते ॥ नारायणबलसेनाविशेषे ॥ शपनम् । शपथाक्रोशे । भावे क्त । संशप्तं शपथं करोति । तत्करोतीति णिच् । ण्वुल्॰ कृन्मा ॥ सम्यक्॰ शप्त सत्यं यस्येति वा ॥

संशमः । पुं॰ विरुद्धज्ञाने ॥ सं

शमनम् । शम॰ भावेघञ् ॥

संशमनम् । न॰ शमने । यथा । न शोधयति यद्दोषान्समान्नोदीरयत्यपि । समीकरोति सद्वृत्तान् तत् संशमनमुच्यते ॥ न शोधयति॰ नो धातुमार्गाभ्यां पातयति । नोदीरयति॰ न वर्द्धयति ॥ इ॰ भा॰ प्र॰ ख ॥

संशयः । पुं॰ सन्देहे । द्वापरे ॥ तस्य लक्षणं यथा । एकस्मिन्धर्मिणि विरुद्धनानाधर्म्मवैशिष्ट्यज्ञानं संशयः इति । यथाऽयं स्थाणुर्वा पुरुषो वेति ॥ विचिकित्सायाम् ॥ योगसाधनीयानित्युभयकोटिस्पृग्विज्ञाने ॥ अतद्रूपप्रतिष्ठत्वेन विपर्ययान्तर्गतोऽपि समुभयकोटिस्पर्शित्वैककोटिस्पर्शित्वरूपावान्तरविशेषविवक्षया विपर्ययात् भेदेन व्यपदेशः ॥ प्रतिबन्धकेः ॥ संशयलक्षणमिति गौतमः । समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः । १ । २३ । संशयकृतिलक्ष्यनिर्देशः विमर्शश्चत्यत्र विशब्दो विरोधार्थः । अतिमाना र्थ एकस्मिन्धर्मिणि वोतिपूर्वोयम् । तेन॰ एकधर्मिणि विरोधेन भावाभावप्रकारकं ज्ञानं संशयः । तत्कारणमुक्तिनविशेषलक्षणान्य

ष• समानेत्यादि । उपपत्त्यज्ञान
म । तथाच• समानस्य विरुद्ध
कोटिद्वयसाधारणधर्मस्य ज्ञानादि
त्यर्थः । तथाचसाधारणधर्मवद्ध
र्मिज्ञानजन्योऽसाधारणधर्मवद्ध
र्मिज्ञानजन्यश्चेत्य र्थः । विप्रति
पत्तिविरुद्धकोटिद्वयोपस्थापक
शब्दस्तस्मादित्यर्थः । यद्यपिशब्द
ज्ञानसंशायकत्वम्• तथापिशब्दात्
कोटिद्वयोपस्थितौमानस संशय
इतिवदन्ति उपलब्धे र्ज्ञानस्य•अनु
पलब्धे र्व्यतिरेकज्ञानस्य याऽव्यवस्था
सद्विषयकत्वानिधारणं प्रामाण्यसं
शयइतिफलितोऽर्थः • ॥ अन्येतु
उपलब्ध्यव्यवस्थाप्रामाण्यसंशय ।
अनुपलब्धिरुपलब्ध्यभावत्वम्• तद
व्यवस्थ तत्संशयइत्याहु । वस्तु
तस्तुप्रामाण्यसंशयस्यसंशयहेतुत्व
म्•किन्तु गृहीताप्रामाण्यकज्ञानस्य
विरोधितयासतिप्रामाण्यसंशयेतज्
ज्ञानस्याविरोधितयासाधारणधर्म
दर्शनादितएवसंशयोत्पत्तिरिति ।
उपलब्ध्यादिकं ताद्वयस्यसंशयो
भवतीत्येतावन्मात्रपरम् । चकारो
रोव्याप्यसंशयस्यव्यापकसंशयहेतु
त्व समुच्चिनोतीतिवदन्ति । विशे
षापेक्ष कोटिस्मरणसापेक्ष । वस्तुत
स्तुसंशयधाराबाहिकत्वस्यादृतयाऽव
। विशेषेति । विशेषविशेषस्य ग्रहस्य•
अपेक्षणेनिवर्तकत्वेन• तथाच• वि
शेषदर्शननिवर्त्यत्वकथनम्चेनवि
शेषादर्शनजन्यत्वं संशयस्येत्युक्तम् ॥
१।२३ ॥ संशयनम् । शीङ्ए
रच् ॥

संशयात्मा । त्रि• इदमेवमथवानैवेति
सर्वत्रसंशयाक्रान्तचित्ते ॥ संशये
• आत्मामनोयस्य ॥ संशया
त्माविनश्यति ।

संशयान । त्रि• संशयापन्ने । संश
ययुक्ते ॥

संशयापन्न । त्रि• संशयिनि ॥

संशयापन्नमानस । त्रि• सन्देहकि
। संशयिते । सांशयिके ॥ संशय
मापन्न मानसं यस्य• यस्मिनविष
ये वा ॥

संशयालु । त्रि• संशयितरि ॥

संशयित । त्रि• सन्देहविषये । वि
चिकित्सिते ॥

संशयिता । त्रि• सन्देहाश्रये । संश
यकर्त्तरि ॥ यथाह । अस्तित्वय
मित्यस्मिन्नर्थेकश्चास्तिसंशय पुं
स । अद्यापिसंशयश्चैतत्संशयिता
थ , सएवभवसित्वम् ॥ ४ ॥

संश्रित । त्रि• सम्यक्सम्पादिते ॥
संश्रितव्रतम् । सम्यक्सम्पादित
मित्यर्थः ॥ व्रतविषयकयत्नवति ॥
संश्रितोव्रात्यः । व्रतविषयकय
त्नविशिष्ट • ॥ सम्यक्शायतेस्म

। शीतनकार्ये । क्त । शाश्वीरन्यतरस्यामित्यत्र· श्यतेरित्वम्· । व्रतेनित्यमिति· नित्यमित्वम् व्यवस्थितविभाषात्वात्· व्रतविषयेश्यतेर्नित्यमित्वम । सुनिश्चिते ॥ सम्यक तनूकृते । सूक्ष्मे ॥

संशितव्रत । त्रि· व्रतयुक्ते ॥ सम्यक शितानितीक्ष्णीकृतानि· अतिदृढानिव्रतानियस्यसतथा । श्यतेरित्व व्रतेनित्यम् ॥

संशुद्ध । त्रि· सम्यक् शुद्धिविशिष्टे ॥

संशुद्धि । स्त्री· सम्मार्जने । शरीरादिमार्जने । शौचे ॥

संशुष्क । त्रि· आतपादिना संशोषितवस्तुनि ॥

संशोक: । पु· शौण्डीर्ये ॥

संशोकज । त्रि· स्वेदजे ॥ शौष्मया जन्यमनेयूकादौ । तेषांस्वाङ्गजौष्मजन्यभावं । यद्वा । शौष्मणात्मिकुत्सितजातीमशकादौ । तेषामुत्पत्तिःऽस्त्रभाव । तथाश्च संशोकजौ नाण्डजोद्भिज्जाभ्यामतिरिच्यते ॥

संशोधनम् । न· संशुद्धौ ॥ स्नानादुर्द्दिन यद्वत्मवोत्पादोषसञ्चयम । संशोधन तदेरकाह शदालोकाल यथा ॥

संशोधित: । त्रि· शुद्धीकृतवस्तुनि ॥

संशत् । न· कुशके । हृद्दजाशि । मायायाम् ॥ सश्चिनोति । चिञ् चयने । संशत्वपद्वहद्दित्यादि : । निपातनात्· सुविकारलोपश्च ॥

संश्यान । त्रि· शीतेनसङ्कुचिते ॥

संश्रय । पु· राज्ञामाश्रयाख्ये गुणे । अरिणापीडयमानस्यबलवदाश्रयणे ॥ आश्रयाम् ॥ नवनेनन्दनो हे शिनश्चैवरयस श्रये· कृतिरामाय णे दर्शनात् ॥ आश्रये ॥ वले ॥

संश्रव । पु· अङ्गीकारे । प्रतिज्ञाने ॥ सम्यक् श्रवोति . · अदोरपित्यप् ॥

संश्रित । त्रि· अनुजीविनि . आश्रिते ॥

संश्रुत । त्रि· अङ्गीकृते ॥ संश्रूयते स्म । श्रुश्रवणे । क्त ॥

संश्लिष्ट । त्रि· आश्लिष्टे । मिलिते ॥

संश्लेष । पु· उपगूहने ॥ संश्लेषणम् । श्लिषआलिङ्गने । घञ् ॥

संसत् । न· संसति । मायायाम् ॥ संसत्वपद्वहद्दितयव· सुभूतिचन्द्र सम्पूर्वाच्छुयते । संसदित्याह । संसत्कुशकोप्येय संसत्तदत्र वर्तसमे । कृतयुगादिशोभव ॥

संसक्त : । त्रि· अन्योन्यश्लिष्टे । अव्यवहिते । संलग्ने ॥ संसज्यतेस्म । षञ्जसङ्गे । क्त . ॥ लोहदावमवै: पाशैर्दृढवद्धोविसृज्यते । स्नोधना

द्विषुसंसक्तौमुच्यतेनवद्रावन ॥

ससक्ति । स्त्री॰ सङ्गेषि ॥

ससत्॰द्र । स्त्री॰ परिषदि । सभायाम् ॥ ससीदन्त्यस्याम् । षद्लविश रणादौ । सम्पदादित्वात्क्विप ॥

ससरणम । न॰ असम्बाधचमूगतौ । रथादीनामसम्बाधगमने ॥ घण्टापथे । नगरस्योपनिर्गमे ॥ ससारे ॥ रणारम्भे ॥ समारम्भे ॥ प्राणिजन्मनि ॥ पुनः पुनर्योनिसम्बन्धे ॥ गतौ ॥ सम्यक्सरत्यनेन॰ सम् यसरन्त्यनेनाचवा । सृगतौ । कारणादौल्युट् । बाहुलकाद्वाल्युट । युव नयुत्त । घस्यलुडपवादत्वात ॥

ससर्ग । पु॰ सङ्गे । सङ्गमे ॥ सम्वायादिसम्बन्धे ॥ ससर्जनम्॰ ससृज्यतेवा । सृज॰ । घञ् ॥

ससर्गाभाव । पु॰ सम्बन्धरहितत्वे ॥ न्यायमतेचभावपदार्थविशेष । सतुभेदभिन्नाभाव । सचत्रिविध । प्रागभाव १ ध्वस २ अत्यन्ताभाव ३ इतिभेदात् । यथा । अभावस्तुद्विधासंसर्गान्योन्याभावभेदतः । प्रागभावस्तथाध्वंसोप्यत्यन्ताभावएवच ॥ एव त्रैविध्यमापन्न ससर्गाभावइष्यते । इ॰ भा॰ प॰ ॥ भेदत्व तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम् । विनाश्यभावत्व प्रागभावत्वम् १ जन्याभावत्वमृध्वंसत्वम् २ नित्यससर्गाभावत्वमृध्वंसत्वम् २ नित्यससर्गाभावत्वमत्यन्ताभावत्वम् ३ । इतिसिद्धान्तमुक्तावली ॥

ससर्गी । त्रि॰ ससर्गविशिष्टे ॥ मन्वर्थोयइनि ॥ सङ्गिनि ॥ सम्पूर्वात्सृजो ॰सम्पृचानुरुधेतिघिनुण् ॥

ससर्प॰ । पु॰ मासविशेषे ॥ यथा । यद्यावत्समासोभवति॰ तदाचयमासस्यपूर्वोत्तरावधिमासोभवत । तत्पूर्वस्मिन्नधिमासे ॥ सचनमसमास । किन्तुशुद्धवतुल्य । उत्तरएवासन्नान्तोमलमास । तथाचकालाविं । एकस्मिन्नपिवर्षे चेद्द्वौमासावधिमासकौ । पूर्वोमास । प्रशस्त.स्यादपरस्तुमलिम्लुचइति ॥ ससर्पश्च ॥

ससर्पणम । न॰ सम्यक्प्रकारेणगमने ॥

ससर्पी । त्रि॰ ससर्पविशिष्टे । सम्यग्गमनशीले ॥

ससार । पु॰ कृषाख्यानसम्भूतवासनायाम् ॥ यथा । ससारइमिथ्याधीप्रभवावासनेति ॥ भवे । स्थाद्दृष्टोपनिबद्धशरीरपरिग्रहे । जन्ममरणलक्षणे । प्रमातृताप्रमुखिकर्तृत्वाद्यनर्थे । अविद्यायाम् । यथोक्त शङ्कराचार्यै । ससार स्वप्रतुल्योहिरागद्वेषादिसङ्कुल । स

कान्तिसत्यवत्सातिप्रबोधेऽसत्यवत्स्ववेदिति ॥ अपिच । अयमविचारितचारुतया संसारो भाति रमणीय । अत्र पुनः परमार्थदृशा न किमपि सारे रमणीयकृतिरिन्द्रियमिम ॥ दु खे ॥ कृच्छ्रे चासेध्यमध्ये नियमिततनुभि स्थीयते गर्भवासे • कान्ताविश्लेषदु खव्यतिकरविषये यौवने चोपभोग । वामाक्षीणामवज्ञाविहसितवसतिर्वृद्धभावोऽप्यसाधु संसारे रे मनुष्या वदत यदि सुखस्वल्पमप्यस्ति किञ्चित् ॥ संसरति कालान्तरम् । सृ • । घञ • ॥ संसरणम् • वा ॥ दु . खमूलमिमं संसार सर्वथाश्रितमदु खित । यागं . कृतोऽयं न ससुखी नापर प्रिये • ॥ प्रभवसर्वदु . खानामालयं सकलापदाम् । आश्रय सर्वपापानां संसारं वर्जयेत् प्रिये ॥ अचञ्च अनर्थोरमखीकृतमवाविषम् । अ ज्ञानखण्डनदेवि संसार सकचेतसाम् ॥ आदिमध्यावसानेषु दु खसर्वमिदं यत । तस्मात् संत्यज्य संसारतत्त्वनिष्ठ सुखीभवेत् ॥ कुलार्णवे १ उल्लास ॥

संसारगुरु . । पु • प्रद्युम्ने । कामदेवे । मनोजन्मनि । रूपास्त्रे । संसारगुरु ॥

संसारबन्धनिर्मुक्ति । स्त्री • नानायोनिसम्बन्धनिवृत्ती ॥ संसार एव बन्ध • तस्य निर्तरां मुक्ति ॥

संसारमार्ग । पु • मिथ्यामार्गे ॥ भगे । योनी ॥

संसारबीजम् । न • कामकर्मप्रवृत्तिकारणे • अज्ञाने ॥

संसारद्रुम । पु • अव्यक्तादिस्थावरान्ते द्रुमसदृशे ॥ यथा । अव्यक्तमूलप्रभवस्तस्यैवानुग्रहोत्थित । बुद्धिस्कन्धमयश्चैव इन्द्रियान्तरकोटर • महाभूतविशेषश्च विशेषप्रतिशाखवान् • सदापर्णी सदापुष्प शुभाशुभफलोदय • आजीव्य सर्वभूतानां ब्रह्मवृक्ष सनातन • इति ॥ अपिच • कर्मबीजा अविद्याकामकर्माङ्कुरो अज्ञानप्रभवो • ऽपरब्रह्मविज्ञानक्रियाशक्तिद्वयात्मकहिरण्यगर्भाङ्कुर • सर्वप्राणिलिङ्गभेदस्कन्ध • तत्तृष्णाजलावसेकोद्भूतदर्पो • बुद्धीन्द्रियविषयप्रवालाङ्कुर • श्रुतिस्मृतिन्यायविद्योपदेशपलाश • यज्ञदानतपआद्यनेकक्रियासुपुष्प सुखदु खवेदनानेकरस • प्राण्युपजीव्यानन्तफलस्तृष्णासलिलावसेकप्ररूढजटीकृतदृढबद्धमूल सत्यनामादिसप्तलोकब्रह्मादिभूतपक्षिकृतनीड • प्राणिसुखदु . खोद्भूतहर्षशोकजातनृत्यगीतवादित्रक्ष्वेलितास्फोटितहसिताकृष्टरुदितहामुञ्चमुञ्चेत्याद्यनेकशब्दकृततुमुलीभूतमहारवो • वेदान्तविहितब्रह्मात्मदर्शनासङ्गशस्त्रकृतो

च्छेदएवसंसारस्यमोनिरूपितोवेदा
न्तेष्वाचार्यैः ॥ तथोक्तंशौक्तं चाभि
श्रे । अमुष्यसंसारतरोरविद्यामूल
स्यचोन्मूलविनाशनाय । विश्वेश्वरा
राधनबीजजाततत्त्वप्रबोधान्नपरोऽ
भ्युपायइति ॥
संसारहृत् । पुं॰ आत्मबोधे ॥
संसारहेतु . । पु॰ आत्मनोऽविद्याया
म् ॥
संसारी । पु॰ संसारविशिष्टप्राणि
नि । भौतारि । संसारोऽस्यास्ति
। इनि ॥ वर्त्तत्वादिधर्मवति ॥
संसिद्धि । स्त्री॰ सम्यक्सिद्धौ
॥ प्रकृतौ ॥ स्वभावे ॥ मदोद्यायां
स्त्रियाम् ॥ मुक्तौ । मोक्षे ॥ देहे
न्द्रियसङ्घातस्याऽशुद्धिक्षयेण स
म्यग्ज्ञानोत्पत्तियोग्यतायाम् । श्र
वणादिसाध्यायाज्ञाननिष्ठायाम् ॥
फले ॥ साङ्ख्ययोगमनुष्ठायपरिसमा
पन संसिद्धिरितियोगिन ॥ सं
सेधनम् । षिधु संराद्धौ । क्तिन् ॥
संसृति । स्त्री॰ संसारे ॥ प्रवाहे ॥
संसारणं । सृ॰ । क्तिन् ॥
संसृष्टः । त्रि॰ संसर्गे ॥ वमनादि
नासंशुद्धे ॥ विभागानन्तरप्रीत्या
पुनः संमीलितधने ॥ यथा । वि
भक्तोयः पुनः पित्राभ्रात्रा चैकत्र
संस्थित . । पितृव्येणाथवाप्रीत्या
सतुसंसृष्टउच्यते॰ इतिवृहस्पतिः .
॥ संसर्जनम । सृज॰ । क्त ॥
संसृष्टि । स्त्री॰ काव्यालङ्कारविशेषे
॥ यथा । सैषासंसृष्टिरेतेषाभेदेन
यदिहस्थितिः । एतेषाशब्दार्थाल
ङ्कारायथासम्भवमन्योन्यनिरपे
क्षतया॰ यदिह॰ शब्दभागएव॰ अ
र्थविषयएव॰ उभयत्रापिवाऽवस्था
न॰ सैकार्थसमवायस्वभावसंसृष्टि
। तत्रशब्दालङ्कारसंसृष्टिर्यथा । व
दनसौरभलोभपरिभ्रमद्भ्रमरसम्भ्रम
सम्भृतशोभया । चलितयाविदधेक
लमेखलाकलकलोऽलकलोलदृशान्य
या । अर्थालङ्कारसंसृष्टिर्यथा । लि
म्पतीवतमोऽङ्गानिवर्षतीवाञ्जनं न
भः । असत्पुरुषसेवेवदृष्टिर्निष्फ
लतांगता ॥ पूर्वत्रपरस्परनिरपेक्षौ
यमकानुप्रासौसंसृष्टिं प्रयोजयतः
। उत्तरत्रतुतथाविधे॰ उपमोत्प्रे
क्षे । शब्दार्थालङ्कारयोः संसृष्टि
र्यथा । सोऽस्त्येष त्र्य गामे जो
एवं सहमहत्तलाश्वम् । तरुणा
या हिमअलुडिप'रस प'तीथिपारे
इसनास्तित्र्यमेयएतास्मरत्ता
वयाम् । तरुणानाहृदयलुठ
नपरिसङ्कामतिनिवारयतीतिसं -
स्कृतम् ॥ हृदयलुठनमितिरूपक
म्॰ आयुष्टंतमितिवत् । पूर्वार्द्धे
त्वनुप्रासः । एवंशब्दार्थालङ्कार
योः संसृष्टिरियम् ॥ अत्रानुप्रा

सोऽरूपकस्यान्योन्यानपेक्षे । स सर्ग स्वतयोरेकवाक्ये छन्दसि वा समवेतत्वात् ॥

संसृष्टौ । त्रि॰ संसृष्टत्वविशिष्टे ॥

संशोधनम् । न॰ सम्यगग्न्यादीनाऽऽपनो । तत्र निषगट्टादिप्रोक्तव्यतिरिक्तानाद्रव्याणाभक्ष्य निषेधति । अग्न्यातआतिगुणरूपविधानकानामग्न्यादिसौवरसपुष्पफलोपधानाम । स शोधनस्, आतसौत्व्ययशोभिवद्वव्ये त्रि. म ग्रय नरयरोविद्धौतनाच ॥

संस्कारः । पुं॰ अनुभवे । मानसकर्मणि । वासनायाम् ॥ प्रतियत्ने । उत्कृष्टगुणाधाने ॥ संस्क्रियते॰ अनेन ॰श्रौतेनस्मार्तेनवाकर्मणापुरुषस्वेतिसंस्कारः । स्वीयस्वीयजातौ सामान्यविशेषविहितवैदिकस्मार्तकर्मानुष्ठानद्वाराऽदृष्टविशेषाधायकाकृतिधावत । तत्रश्वयातदृष्टौ काश्चिनश्रुद्धयादिदिरविमर्शकारः स्वेभ्यो । स्वोते ॥ अथौतश्रौतस्वानिनिभोगस्वे । संस्कारेणविनादेविदेषश्रुद्धिर्नजायते । नासस्कारोभिक्षारोस्याद्वेदेपित्य चक्रम णि ॥ अतोविप्रादिभिर्यौ स्वस्ववर्णोक्तसंस्क्रिया । कार्यत्या सर्वथायत्नैरिह मुक्तिपृभि ॥ तेचद्वशोडशाष्टचत्वारिंशद्भिन्नाः प्रोक्तायथा । औवसेक पुंसवन सीमन्तोन्नयनतथा । जातनामौनिष्क्रमणमन्नाशनमत परम् ॥ चूडोपनयनोद्वाहा संस्कारा कथितादश । शूद्रान्शूद्रभिन्नानामुपनीतनविनश्यति ॥ तेषामवेदसंस्कारादिकातौनादशस्मृतौ ॥ नित्यानिसर्वकार्माणितथानैमित्तिकानिच । काम्यान्यपिवरारोहेकुर्यात्काभवकर्मना ॥ षोडशयथा । गर्भाधान पुंसवन सीमन्तोन्नयनं तत । जातकर्माभिधानञ्चनिष्क्रम प्राशनतथा ॥ चूडोपनयनवेदव्रतानाश्चचतुष्टयम् । गोदान मेस्वमोक्षोविवाह षोडशक्रमात ॥ अष्टचत्वारिंशयथा । गर्भाधानसथापिपुंसवनक सीमन्तजातक्रियानामानामप्रादनचौलकोपनयनश्रौतव्रतान्यथ । चत्वारिस्नपन विवाहकरणपञ्चाभियज्ञ अपि संस्कारसप्तसप्तकृतितिसंस्कारजातव्यमौ । देवताप्रतिष्ठायांषट्संस्कारायथा । जातनामौनिष्क्रमणमन्नप्राशनमेवच । चूडोपनयनश्चेतिषट्संस्कारा' प्रकीर्तिताकृतिमया निर्वापितव्यम् ॥ संस्क्रियतेऽनेन । करणेघञ् । व्युत्पत्ती ॥ न्यायमतेगुणविशेषे ॥ सत्रिविध : वेगाख्यसंस्कार' १ अथ मूर्तपदार्थाश्रयी॰ क्रियेतजन्य ॰ क्रियाकर्मजन्यश्च । स्थितिस्थापकसंस्कारः२

अथ पृथिवीगुण · केषाञ्चिन्मते पृथिव्यादिचतुष्पदार्थानांगुण :· अयमतीन्द्रिय स्पन्दनकारणञ्च । भावनाख्यसंस्कार २ अयमात्मनोऽतीन्द्रियगुण · उपेक्षानात्मकनिश्चयजन्य · अथ स्मरणप्रत्यभिज्ञयो : कारणञ्च । यथाहविश्वनाथतर्कालङ्कार । संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने । मूर्त्तमात्रेतुवेग स्यात्कर्मजोवेगज क्वचित् ॥ स्थितिस्थापकसंस्कार · क्षितौकेचिच्चतुर्ष्वपि । · अतीन्द्रिय सन्निज्ञेय क्वचित्स्पन्देऽपिकारणम ॥ भावनाख्यस्तुसंस्कारोजीववृत्तिरतीन्द्रिय । उपेक्षाऽनात्मकस्तस्यनिश्चय · कारण भवेत् ॥ स्मरणे प्रत्यभिज्ञायामप्यसौकारण भवेदिति ॥ अथ जातकर्मादिक्रियाकलाप समय उक्तकालक्रमेणशरीरसंस्कारार्थं स्त्रीणामपिभवति । तथाचमनु : । अमन्त्रिकातुकार्येयं स्त्रीणामावृदशेषत : । संस्कारार्थं शरीरस्ययथाकाल यथाक्रमम् ॥ वैवाहिकोविधि · स्त्रीणांसंस्कारो वैदिक : स्मृत । पतिसेवागुरौवासोगृहार्थोऽग्निपरिक्रियेति ॥ अस्त्र तु· जातकर्मादिक्रियाकलाप : । गृह्यसूत्रमेवसाय प्रात : समिद्धोमादिरूपोऽग्निपरिचर्य्यं लक्षं . ॥

संस्कारज . । त्रि· संस्कारात्जाते ॥

संस्कारवर्ज्जित । पु· व्रात्ये ॥ त्रि· गर्भाधानादिसंस्कारविधुरे ॥

संस्कारस्कन्ध · । पु· वासनाप्रपञ्चे । रूपविज्ञानवेदनासंज्ञास्कन्धानांवासनायाम् ॥ रागद्वेषाभिनिवेशेषु । रागादय . क्लेशा · उपक्लेशा श्चमदमानादयो· धर्माधर्मौचेतिवा अस्यतिमिश्रा ॥

संस्कारहीन . पुं· व्रात्ये ॥ त्रि· गर्भाधानादिसंस्कारवर्ज्जिते ॥ संस्कारैरुपनयनादिभिर्गर्भाधानादिभिर्वा· हीन ॥

संस्कार्य्य । पु· कर्मविशेष· ब्रीह्यादौ ॥ त्रि· संस्कारार्हे ॥

संस्कृतम् । न· लक्षणोपेते । पाणिन्यादिव्याकरणबोधिते । गीर्वाणवाण्याम् ॥ संस्कृत नामदैवीवागन्वाख्यातामहर्षिभि . ॥ त्रि· कृत्रिमे ॥ शस्ते ॥ भूषिते · संस्क्रियतेस्म । क्त ॥ व्युत्पन्ने · अपनीतमले । शोधिते । कृतसंस्कारे ॥ पक्वे ॥

संस्कृतात्मा · पु· दीक्षयादीक्षिते ॥

संस्कृति . । स्त्री· संस्क्रियायाम् ॥ संस्करणम् । डुकृञ · । क्तिन् ॥

संस्क्रिया । स्त्री· संस्कृतौ · शवदाहादिक्रियायाम् ॥ मलापनयने ॥ संस्कारायकरणम् । डुकृञ् · । कृञ शचेतिश । रिङ् इयङ् ॥ आप्

योविप्रभिन्नयत्नस्तत्रयोसास स्कृगा
म्। शैवेनयत्नं नाकुर्यादेवधर्मं
कलौयुगे।
संस्तर। पुं॰ प्रस्तरे। पल्लवादिरचि
तशय्यायाम। शायरा॰ कू॰ भो॰
प्र॰॥ अध्वरे। यज्ञे॥ संस्तीर्यते
। स्तृञ् आच्छादने। ऋदोरप्॥
संस्तव। पुं॰ परिचये। सङ्गतिस
बने॥ संस्तवनम्। ष्टुञ् स्तुतौ।
ऋदोरप्॥ सम्यक् स्तुतौ॥
संस्तवान। त्रि॰ वाग्मिनि। संस्तौ
ति। ष्टुञ्॰। सम्यानच् सुवङ्
स्थानच्॥
संस्ताव। पु॰ क्रतुषु छन्दोगानां स्तु
तिभूमौ। यज्ञे छन्दोगैः क्रियमा
णायां स्तुतेर्भूमौ। यज्ञे स्तावक
च्छन्दोगानां स्थानभूमौ। समेत्य स्तुवन्त्य
त्र। ष्टुञ्॰। यज्ञे समि स्तुवः इति
अधिकरणे ल्युटोपवादो घञ्॥ संस्त
वन वा॥
संस्तुत। त्रि॰ सम्यक् स्तुतिविषयी
भूते। संस्तूयते स्म। ष्टुञ्॰।
क्त॥ सहत्वेन निरूपिते॥ प
रिचिते॥
संस्त्यानम्। न॰ म हतौ। उपचये॥
संस्त्यायः। पु॰ सन्निवेशे॥ संस्त्या
ने॥ विस्तृतौ॥ सङ्घाते॥ सं
स्त्यानम्। ष्ट्यै स्त्यै शब्दसङ्घात
योः। घञ्। आतोयुक्॥ गृहे॥

यथा। संस्त्यायान् प्रविशेयुरिति॥
संस्थ। पु॰ चरे॥ निजराष्ट्रवासिचरे
॥ क्रतुभेदे॥ सन्तिष्ठतेऽनेन। ष्ठा॰
। अङ्॥ त्रि॰ अवस्थिते॥
संस्था। स्त्री॰ स्थितौ॥ सादृश्ये॥
नाशे॥ न्याय्यपथस्थितौ। मर्यादा
याम्॥ सन्तिष्ठतेऽनया। सम्यगव
स्थानं वा। ष्ठा॰ आतश्चोपसर्गे इत्य
ङ्॥ अवस्थायाम्। समाप्तौ॥
व्यक्तौ॥ प्रलयचतुष्टये। यथा।
नैमित्तिकः प्राकृतिको नित्य आ-
त्यन्तिकोलयः। संस्थेति कवि
भि प्रोक्तश्चतुर्धास्य स्वभावतः इति
पुराणम्॥
संस्थानम्। न॰ आकृतौ॥ मृतौ॥
सन्निवेशे॥ चतुष्पथे॥ संस्थीयते
ऽनेन वा॰ संस्थितिर्वा। ष्ठा॰।
भावाधिकरणादौ ल्युट्। चिह्ने॥
त्रि॰ घिवादौ॥ समीचीनं स्थानम
स्य॥
संस्थापनम्। न॰ स्थिरीकरणे॥
संस्थित। त्रि॰ मृते॥ व्यवस्थिते।
सम्यक् स्थिते। उत्थिते। सन्तिष्ठ
ते स्म। ष्ठा॰ गत्यर्थाकर्मकेति क्तः॥
संस्थिति। स्त्री॰ तत्त्वे। संस्थाने॥
मृत्यौ॥
संस्पर्श। पुं॰ स्पर्शे। त्वगि
न्द्रियग्राह्यगुणविशेषे। यथा। आ
लापाह्लादसंस्पर्शात्॰ निःश्वा

सात्सङ्गमोजनात् । संहमध्यासना ध्यायात्पापसङ्क्रमतेनृणामिति-च्छागलेय ॥ सम्प्रयोगे । सम्बन्धे ॥ संस्पर्शनम् । स्पृशसंस्पर्शने । यकारविकारकोस्प्राश्रामितिघञ् ॥

संस्पर्शज । त्रि॰ विषयेन्द्रियसंबन्धाज्जातेभोगे । येहिसंस्पर्शजा भोगादुःखयोनयएवते । आद्यन्तवन्तः कौन्तेयनतेषुरमतेबुध ॥

संस्पर्शा । स्त्री॰ जलूकायाम् । जनीनामगन्धद्रव्ये । स्पृशति । संस्पृश्यतेवा । स्पृश॰ । पदरुजेति घञ्॰ पचाद्यच्॰ कर्मणिघञ् वा॰ ॥

संस्फाल । पुं॰ मेषे ॥

संस्फुट । त्रि॰ फुल्ले । विकसिते ॥ स्फटति । स्फुटविकसने । इगुपधेतिकः ॥

संस्फेट । पुं॰ युद्धे । रणे ॥ संस्फेटनम् । स्फिटअनादरे । घञ् ॥

संस्फोट । पु॰ युद्धे ॥ संस्फोटनम् । स्फुटिर्॰ । घञ ॥

संस्मरणम् । न॰ संस्कारजन्यज्ञाने । संस्मृतौ

संस्मृतिः । स्त्री॰ संस्मरणे ॥ क्तिन् ॥

संस्वेदजम् । न॰ स्वेदजेयावन्ति वि ॥ तथाहि । उक्तसंस्वेदजानामार्कभूमिच्छत्रशिलीन्ध्रकाः । चितिगोमयकाष्ठपुष्पादिषुतद्भवे सर्वेसस्वेदजाः शीतदोषला पिच्छिलास्तथा । गुरवःक्कचित्तीसारज्वरश्लेष्मामयप्रदाः ॥ श्वेताःशुचिस्थलीकाष्ठवंशगोव्रजसम्भवाः नातिदोषकरास्तेषुः शेषास्तेभ्योविगर्हिताः ॥ त्रि॰ भुवःशरीरस्यघर्मस्वेदाद्दूषणाज्जातेदंशमशकादिरूपेभूतग्रामे ॥

संहत । त्रि॰ संहते । मिलिते दृढे ॥ दृढसन्धौ ॥ संहन्यतेस्म । क्त ॥

संहतजानु । त्रि॰ सञ्ज्ञौ । संहतजानुके ॥

संहतजानुक । त्रि॰ सञ्ज्ञौ ॥ संहतेमिलितेजानुनीयस्यस ॥

संहतल । पुं॰ मिलितपाणिद्वये । प्रतले । सिंहतले । विस्तृताङ्गुल्योर्मिलितयोर्मिदक्षिणयोः पाण्योः ॥ संहतसङ्घट्टलाति । ला॰ । आतोनुपसर्गेकइतिकः ॥

संहति । स्त्री॰ समूहे । वृन्दे । निकुरम्बे । कदम्बे ॥ अल्पानामपिवस्तूनांसंहतिःकार्यसाधिका । तृणैर्गुणत्वमापन्नैर्बध्यन्तेमत्तदन्तिनः ॥ संहतिः श्रेयसीपुंसां स्वकुलैरल्पकैरपि । तुषेणापिप

रित्युक्ता नप्ररोहन्तितद्गुता ॥
घनतायाम् । संहन्यते । हन्तेः
क्तिन् ॥ घाते ॥

संहननम् । न० कलेवरे । गात्रे ।
शरीरे ॥ संहति० संहन्यतेवा
। हन० । कृत्यल्युटइतिल्युट् ॥
यद्वा । संहन्यन्तेऽस्मिन भूतानि
। करणेतिल्युट ॥ दृढाङ्गत्वे ॥

संहननाङ्ग । त्रि० कठिनावयवे ॥
संहन्यतेनिबिडीभवन्ति० अङ्गानि
यस्य ॥

संहर्षः । पुं० वायौ ॥ मु
दि । सुखे ॥ स्पर्धे । धृष्टौ ॥
प्रभञ्जने । पवने ॥ संहर्षणम्
। हृष्टुष्टौ । घञ् ॥

संहारः । पुं० प्रलये ॥ सङ्क्षेपणे
सङ्क्षेपे ॥ नरकविशेषे ॥ हर
णहारे । हृञोभावेघञ् । सम्य
क्हारोऽत्र ॥ यद्वा । संह्रियते
ऽनेन । अध्यायन्यायेतिघञन्त सा
धु ॥ अष्टिताङ्गादिभैरवान्तर्ग
तभैरवविशेषे ॥

संहारमुद्रा । स्त्री० विसर्जनमुद्रा
याम् ॥

संहित । त्रि० सहिते । योजिते
॥ सन्धीयतेस्म । डुधाञ् । क्तः
। दधातेर्हिः ॥ मिलिते ॥

संहितपुष्पिका । स्त्री० मिश्रेया
याम् ॥

संहिता । स्त्री० मन्वादिप्रणीतध
र्मशास्त्रे ॥ पुराणसंहितासु ॥ प
ञ्चसंहितायथा । ब्रह्मणश्चशिवस्या
पिवृक्षाहस्तथैवच । गौतमस्यकु
मारस्यसंहिताः परिकीर्तिताः
॥ चतस्रोयथा । ब्राह्मीभागवतीश
ैवीवैष्णवीचप्रकीर्तिता । चतस्र
संहिता । पुण्याधर्मकामार्थमोक्ष
दा ॥ षट्संहितायथा । आद्या
सनत्कुमारोक्ताद्वितीयासूतसंहि
ता । तृतीयाशाङ्करीविप्राश्चतुर्थी
वैष्णवीमता । तत्परासंहिताब्रा
ह्मीसौराष्ट्यासंहितामतेति ॥ स
धीवर्णानामतिशयितसन्निधौ । व
र्णसंयोगे ॥ वेदैकदेशे ॥ सम्यग्
धीहधाति कर्मणिक्त । दधाते
र्हिः ॥

संहूतिः । स्त्री० बहुभिर्विहिताह्वा
ने ॥ समाह्वानम् । सम्पूर्वात्०
ह्वेञ । क्तिन् । वचिस्वपीति
सम्प्रसारणम् ॥

संहृत । त्रि० कृतसंहारे सङ्क्षि
प्ते ॥

संहृति । स्त्री० संहारे ॥

संहृष्ट । त्रि० प्रहर्षिते ॥

सकटः । पुं० शाखोटवृक्षे ॥

सकटान्न । पुं० दरान्ने ॥ त्रि०
कटान्नसहिते ॥

सकण्टकः । पुं० शैवाले । पूती

कण्टके ॥ त्रि० कण्टकयुक्ते ॥

सकर । त्रि० सहस्ते ॥ राजस्व विशिष्टे ॥ शुण्डयुक्ते ॥ सकिर णे ॥ करिणसहवर्त्तिनि च ॥

सकरुण । त्रि० सदये । करुणा विशिष्टे ॥

सकर्ण । त्रि० श्रवणशीले । श्रुति तत्परे ॥ सावधाने ॥

सकर्म्मक । पु० कर्मयुक्तपचत्यादि धातुषु ॥

सकल । पुं० सगुणशिवे ॥ यथा शारदातिलके । निर्गुण स गुणश्चेति शिवोज्ञेय सनातन । निर्गुण प्रकृतेरन्य सगुण सकल स्मृतइति ॥ कलाप्रकृतिस्तयासहवर्त्तते ॥ त्रि० सम्पूर्णे । सर्वस्मिन् ॥ कलानियुक्ते । कलाभि परिपूर्णे ॥

सकलप्रिय । पु० चणके ॥ त्रि० सर्वषांप्रीतिविषये

सकलाज्ञानम् । न० समष्ट्यज्ञाने ॥

सकषाय । त्रि० सरागे ॥ कषाये णकामक्रोधादिमलेनसहवर्त्तमाने ॥ कषायविशिष्टे । कसैला० इ० भा० प्र० ॥

सकाम । त्रि० कामनाविशिष्टे । कामिनि ॥ पुंसीयाविषयापिवास कामइतिभण्यते । तेनयुक्तोदीन मना सकाम प्रोच्यतेबुधै ॥ सकामाश्चैवनिष्कामा द्विविधाभुवि मानवा । कामिनांफलमित्युक्तं क्षयिष्णुस्वप्नराज्यवत् । निष्कामा णान्तुनिर्वाणपुनरावृत्तिवर्जितम् ॥ सहकामेनवर्त्तते । सहस्यस ॥

सकाश । पु० समीपे ॥ त्रि० काशयुक्ते ॥

सकुरुण्ड । पु० साकुरुण्डवृक्षे ॥

सकुल । त्रि० कुलान्विते ॥

सकुल्य । त्रि० सगोत्रे । सप्तम पुरुषानन्तरद्वयमपुरुषपर्यन्तस्थे ॥ दशाहेनसपिण्डास्तुशुध्यन्तिप्रेतसूतके ॥ त्रिरात्रेणसकुल्यास्तु स्नात्वाशुध्यन्तिगोत्रजा ॥ दायाधिकारिसकुल्यास्तु० पञ्चमपुरुषावधय । यथाहबौधायन । प्रपितामह० पितामह० पिता० स्वय० सोदर्य्यभ्रातर. सवर्णायापुत्र० पौत्र० प्रपौत्रोवाएतानविभक्तदायादान्सपिण्डानाचक्षते । विभक्तदायादान्सकुल्यानाचक्षते सत्स्वङ्गजेषुतद्गामीह्यर्थोभवतीति ॥

सकृत् । अ० सहार्थे ॥ एकवारे ॥ एकवारम् । एकस्यसकृच्चेतिसुच् । सयोगान्तस्येतिसुचोलोप ॥ सकृदंशोनिपततिसकृत्कन्याप्रदीयते । सकृदाहददानीतित्रीण्येतानिसतांसकृत् ॥

सकृत्प्रज । पुं० काके । वायसे ॥

सकृत्प्रजायस्यस ॥ सिंहे ॥

सकृत्फला । स्त्री॰ कदल्याम् ॥ सकृत्फलान्यस्या ॥

सकृद्गर्भ । पु॰ खेसरे । खच्चर॰ इ॰ भा॰ प्र॰ ॥

सकृद्विभात । त्रि॰ एकदैव सकृत्स्था ऽभिव्यक्ते ॥ सदैव विभाति । सदा भारूपे ॥

सकृद्वीर । पु॰ एकवीरवृक्षे ॥

सक्त । त्रि॰ अविरते । सतते ॥ अभिनिवेशिमनस्के । कर्त्तव्येऽभि सन्धि कृत्वा भिसन्धिनापक्वस्य यथ- ऽभिनिविष्टे ॥ सज्यतेस्म । सञ्ज सङ्गे । क्तः ॥

सक्तचेता । त्रि॰ आसक्तचित्ते ॥ यथा । अवध्यवन्धनघोरमस्त्रीकृत महाविषम् । अशक्तखण्डनं देवि स सारं सक्तचेतसाम् ॥

सक्तिः । स्त्री॰ सङ्गे ॥ सञ्जेः क्तिन् ॥

सक्तुः । पुं॰ न॰ भृष्टचूर्णके । भृष्टयवादिचूर्णे । सत्तू॰ इ॰ भा॰ प्र॰ ॥ सच्यते । षच सेवने । सितनिगमिमसिसच्यविधाञ् क्रुशिभ्यस्तुन् ॥ अस्य गुणा यथा । धान्यानिभ्राष्टभृष्टानि यन्त्र पिष्टानि सक्तवः ॥ तत्र यवसक्तवो यथा । यवजाः सक्तवः शीतादी पन लघवः सराः । कफपित्त हरा रूक्षा लेखनाश्च प्रकीर्तिताः ॥ तैः पीता बलदा वृष्या ह्या भेदनास्त था । तर्पणा मधुरा रुच्याः परि णामे बलावहाः ॥ कफपित्तश्रम क्षुत्तृट्व्रणनेत्रामयापहाः । प्रश स्ता घर्मदाहाढ्य व्यायामार्त्तशरीरि णाम् ॥ चणकयवसक्तवस्तु । मि श्रितचणकभृष्टैस्तुर्यांशैर्यवै कृताः । सक्तवः शर्करासर्पिर्यु क्ताः ग्रीष्मे तिपूजिताः ॥ शालिस क्तवो यथा । सक्तवः शालिसम्भू ताः वह्निदा लघवो हिमाः । मधुरा ग्राहिणो रुच्याः पथ्या बलशुक्रदा ॥ भुक्त्वा न रदैश्छित्त्वा न निशायां न वा बहून् । न जलान्तरितान् नहि सक्तून्प्राश्नीयात् ॥ पृथक् पानं पुनर्दानं सामिषं पयसा निशि । दन्तच्छेदनमुष्णञ्च सप्त सक्तुषु वर्जयेत् ॥ अर्थ्याद्युक्ते ॥

सक्तुक । पुं॰ विषप्रभेदे ॥ यद्ग्र न्थि सक्तुकैर्नैव पूर्णमध्यः सस क्तुकः ॥

सक्तुफला । स्त्री॰ शमीवृक्षे ॥ स क्तुवत् फलमस्याः । अजादित्वा त्टाप् ॥

सक्थि । न॰ जान्वूर्ध्वभागे । ऊरौ । सांथल॰ इ॰ भा॰ ॥ सजति॰ स ज्यतेवा । सञ्ज सङ्गे । असिसञ्जिभ्यां क्थिन् ॥

सक्रियम् । न॰ व्यक्ते । परिस्पन्दवति । तथाहि । बुद्ध्यादयउपात्तमुपा त्तदेहत्वजन्ति॰ देहान्तरस्योपादद तद्गतितेषांपरिस्पन्द । शरीरपृथि व्यादीनाञ्चपरिस्पन्द . प्रसिद्धएव ॥ त्रि॰ क्रियासहिते ॥

सक्षण । त्रि॰ कृतावसरे ॥

सचक्रम् । अ॰ चक्रियायायोग्यत्वेचक्र त्वे ॥ चक्रियायासम्पत्ति अव्यय विभक्तीतिसम्पत्तावव्ययीभाव । सम्पत्तिश्चसमस्यमानोत्तरपदस्ययो ग्यप्रवृत्तिनिमित्तम् ॥

सक्षम । त्रि॰ क्षमतायुक्ते ॥ क्षमा विशिष्टे ॥

सक्षार । त्रि॰ लवणयुक्ते ॥

सखा । पुं॰ मित्रे । सुहृदि । वयस्ये । सवयसि । स्निग्धे । अव्हितेप्रति षिद्धवर्जितेचैवप्रवर्त्तनम् । व्यसने चापरित्यागस्त्रिविधसखिलक्षणम् ॥ अपिच । सन्त्यागासहनोबन्धु सदैवानुगत . सुहृत् । एकक्रियोभ वेन्मित्रसमप्राण सखाभवेदिति ॥ समान । ख्यायतेलोके । ख्या प्रकथने । समानेख्य सचोदात्तइ तोण्॰ सवडित्॰ यलोप ; ॰ स मानस्यतूदात्त . सहख्यादेशश्च ॥ स हाये । अमात्यादौ ॥

सखिता ।) स्त्री॰ सख्ये
सखित्वम ।) न॰

सखी । स्त्री॰ आली । वयस्यायाम् ॥ सख्यशिश्वीतिङीष् ॥

सख्यम् । न॰ मैत्र्ये । मित्रतायाम् । साप्तपदीने । सौहार्द्दे ॥ दशावृत्ता ख्यपौरसख्यपञ्चावृत्तंव्यकलाभना म । त्र्यब्दपूर्वंश्रोत्रियाणांसख्यमे कापिस्वयोनिषु ॥ इतिमनु ॥ स ख्युर्भाव कर्म वा । सख्युर्य ॥ सख्येनिषिध्यायथा । कृतवैरेशठेस ख्येकामुकेचगतघृणे ।निर्लज्जेनैव कर्त्तव्यसख्यमतिमतासदेति ॥ हि तायसने ॥

सगद्गद । पुं॰ भयेनहर्षेणचाश्रुपूर्ण नेत्रत्वे । सति॰ कफरुद्धकण्ठन तयायोऽव्यक्तोमन्दस्त सकम्पादिवि कारस्तस्मिन् ॥ त्रि॰ तद्वति ॥

सगन्ध । पुं॰ अश्वके । ज्ञातौ दा याद्ये ॥ त्रि॰ गन्धयुक्ते ॥

सगर । पु॰ अयोध्याधिपतौ॰ बाहु राजपुत्रे॰ सूर्यवंशीयेनृपतिवरे ॥ नामनिरुक्तिन्तु । सपत्न्यातुगरस्तस्य दत्तोगर्भजिघांसया । गरेणसहतेनै वजातस्तत्सगरोऽभवदिति ॥ अर्हद्भेदे ॥ त्रि॰ गरसहिते । स विषे ॥

सगर्भ । पुं॰ सोदरे ॥ समानोगर्भो यस्य स । सगर्भेतिनिर्देशात्समा नस्य स ॥ अभ्यस्तरितसूत्रपठा दियुक्तकुशादौ ॥

सगर्भा । स्त्री॰ गर्भवत्याम् ॥

सगर्भ्य । पुं॰ सहोदरे ॥ समानेन गर्भेण भव । सगर्भसयूथेतियत् । स गर्भेतिनिर्देशात्म ॥ यद्वा । स म्तुल्ये गर्भे कुक्षौभव ॥

सगुण । पु॰ गन्धादिविशिष्टे । वि द्यादियुक्त ॥ यथा सगुणोनिर्गु णोवापिसत्कायोबलवत्तर । तुषेणा पिपरिभ्रष्टस्तण्डुलोनाङ्कुरायते ॥ मायाश्चवत्सुसगुणं सगुणेषु ब्रह्माणि ॥

सगुणा । स्त्री॰ दुर्गायाम ॥ गुणव त्याम ।

सगोत्रम् । न॰ गोत्रे । कुले ॥ पु॰ समानात्सप्तपुरुषे । त्रि॰ अभिन्नगो त्रे । ज्ञातौ ॥ समानगोत्रकुलमस्य ज्योतिर्जनपदेतिसमानस्यस ॥

सग्धि । स्त्री॰ सहभोजने ॥ अदनम् । अद॰ । स्त्रियाक्तिन् । बहुलं छ न्दसीतिघस । घसिभसोर्हलिच्प घ लोप । झलोझलीतिसलोप भष्भस्योर्ढोध । झलांजश्झशीति घस्यग । समानाग्धि । समान स्यच्छन्दसीतिसभाव ॥ सहग्धि र्वा । सहस्य स । सञ्ज्ञायाम् ॥

सङ्कट । त्रि॰ सम्बाधे । सङ्कीर्णे । अल्पावकाशे । वर्त्मादौ ॥ सम्यक्क टति॰ आवृणोति । कटेवर्षावरण यो । पचाद्यच् ॥ यद्वा सम्बाधा

र्थात्सम्शब्दात्तुभार्थे॰ सम्प्रोदश्चेति मटच् । न॰ दुः खे ।

सङ्कटा । स्त्री॰ देवीविशेषे ॥ योगिनी प्रभेदे ॥

सङ्कटाश्व । पु॰ अवतर्ष ॥

सङ्कथनम् । न॰ सम्यग्भाषणे ।

सङ्कथा । स्त्री॰ परस्परभाषणे । सम्भा षणे । मिथ प्रेमगोष्ठ्याम् ॥

सङ्कर । पु॰ सम्मार्जन्यादिक्षिप्तधूल्या दौ । अवकरे । सङ्कारे ॥ सङ्कीर्य ते । कृञ्विक्षेपे इ सायांवा । अप् दोरप् ॥ व्यामिश्रत्वे । मिश्रित त्वे ॥ परस्परात्यन्ताभावसमाना धिकरणयोरैकाधिकरण्ये ॥ यथा मूर्त्तत्वमनसिवर्त्तते॰ भूतत्व ना स्ति । आकाशेभूतत्व वर्त्ततेमूर्त्त त्वनास्ति । पृथिव्यांभूतत्वनास्ति । पृथिव्यांभूतत्व वर्त्तते॰ मूर्त्तत्व ञ्चास्तीतिजातिसाङ्कर्यमिति ॥ सा मान्यजातौ । वर्णसङ्करजातौ ॥ अ लङ्कारविशेषे ॥ यथा । अविश्रान्ति जुषामात्मन्यङ्गाङ्गित्वन्तुसङ्कर । एतएवालङ्कारायवत्रान्यन्यासादि तस्ततन्मभावा परस्परमनुग्राह्या नुग्राहकतांदधति॰ सएषांसङ्कीर्यमा णस्वरूपत्वात्सङ्कर । उदाहरण म्यथा । आर्त्त सीमन्तविक्षे मर कतनिकषैश्चमताटङ्कपत्रेस्तुप्रायाङ्गिम व्यायांभाटिनिर्मविनुक्षीतटियुग्मेष

हीते । शोण बिम्बौष्ठकान्त्यात्वदरि मृगदृशामित्वरीणामरण्ये राजन् गुञ्जाफलानां स्रजइति शवराने वह " र्रन्ति ॥ अनतद्गुणमपेक्ष्य । न्तिमताप्राटुर्भूत तदाश्रयेणचतद्गुण सचेतसाप्रभूतचमत्कृतिनिमित्तमित्यनयोरङ्गाङ्गिभाव : ॥ अस्या न्येभेदा काव्यप्रकाशादिषुद्रष्टव्या ॥

सङ्करी । स्त्री॰ सङ्कायाम् ॥

सङ्करीकरणम् । न॰ नवविधपापान्तर्गतपापविशेषे ॥ यथाहविष्णु । अथपुरुषस्यकामक्रोधलोभाख्यं रिपुत्रय भवति॰ परिग्रहप्रसक्तं नविशेषाद्गृहाश्रमिणः । तेनायमाक्रान्तो ऽतिपातकमहापातकानुपातकोपपातकेषुवर्त्तते॰ जातिभ्रंशकरेषु॰ सङ्करीकरणेषु॰ अपात्रीकरणेषु॰ मलावहेषु॰ प्रकीर्णकेषु॰ । तद्यथा । खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा । सङ्करीकरणं ज्ञेय मीनाहिमहिषस्यचेतिमनु. ॥ गर्दभतुरगोष्ट्रमृगहस्त्यजागमेषमत्स्यसर्पमहिषाणामन्यतमस्य वध . सङ्करीकरणं ज्ञेयमितिकुल्लूकभट्ट ॥

सङ्कर्षक : । त्रि॰ सङ्कर्षणकर्त्तरि ॥

सङ्कर्षण । पु॰ सीरपाणौ । बलभद्रे ॥ सम्यक् कर्षतिशत्रुशरीरमायुधे . । कृषविलेखने । नन्द्यादित्वाल्ल्यु ॥ सम्यक् कृष्यतेवा । कर्मणिल्युट ॥ गर्भस्यसम्यक् कर्षणाद्वा । यथोक्त हरिवंशे । गर्भसङ्कर्षणात्सोकेसोपिसङ्कर्षणः स्मृत इति ॥ अहङ्काराधिष्ठातरि ॥ द्रष्टृदृश्ययो सम्यक् कर्षणमेकीकरणं येन न॰ अन्यवस्थितस्यान्यत्रनयने ॥ आकर्षणे ॥ सम्यक् प्रकारेणाकर्षणम् ॥

सङ्कलनम् । न॰ क्रमादुत्क्रमतोवाऽङ्कयोगे । जोडदेना॰ इ॰ भा॰ प्र॰ कलशब्दसङ्ख्यानयो । सम्पूर्वं । ल्युट ॥

सङ्कलित । त्रि॰ सङ्गृहे । सङ्गृहीते एकत्रीकृते । अङ्कान्तरैणैकीकृताङ्के । जोडदियाअङ्कइतिभाषा ॥ सङ्कल्यतेस्म । कलसङ्ख्याने क्त ॥ पुञ्जीकृतधान्यादौ ॥

सङ्कल्प । पु॰ मानसकर्म्मणि । इदमहङ्कुर्यामितिमनसोव्यापारे । इदङ्करिष्यामीत्यादिलक्षणेऽन्तःकरणपरिणामे ॥ इदनीलमिदपीतमितिविषयविवेचने ॥ इष्टसाधनताज्ञाने । समीचीनत्वेनभावने ॥ अहङ्करोमीतिकर्तृत्वाभिमाने ॥ दृष्टेष्वपिविषयेषु॰ अशोभनत्वादर्शनेनशोभनाध्यासे ॥ अनेनकर्मणेदमिष्टफलं साध्यते॰ इत्येवं विषयायांबुद्धौ ॥ तिथ्याद्युल्लेखपूर्वकानामग्रोचाद्युच्चारणपूर्वकेषाक्यविशेषे ।

काम्यं कर्मविसर्व्वं तत्तु च सङ्कल्पमाचरेत् । विधिवाक्यानुसारेण सम्यक् संयुक्तमपि विद्यागमोक्तं ॥ यथा । स्मृत्वा विष्णुं ततः सद्दिनमासपक्षतिथीश्वतान् । समुच्चरन्निमित्तानि सङ्कल्पं रचयेत् सुधीः ॥ अथ हारीतः । मनसा सङ्कल्पयति वाचाऽभिलपति कर्म्मणा चोपपादयतीति ॥ सङ्कल्पेन विना राजन् यत् किञ्चित् कुरुते नरः । फलञ्चाप्यल्पकं तस्य धर्म्मस्यार्द्धक्षयो भवेत् ॥ सङ्कल्पनम् । क्लृप् सामर्थ्ये । भावे घञ् ॥ इच्छायाम् । कामवृत्तौ ॥ सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसम्भवाः । व्रतानि यमधर्म्माश्च सर्व्वे सङ्कल्पजाः स्मृताः ॥ काम जानामि ते मूलं सङ्कल्पात् किल जायसे । नत्वां सङ्कल्पयिष्यामि समूलो न भविष्यसि ॥

सङ्कल्पजन्मा । पुं । मदने । कामदेवे ॥

सङ्कल्पसम्भवः ।)
सङ्कल्पभूः ।) पुं । कामदेवे ॥
सङ्कल्पयोनिः)

सङ्कसुक । त्रि । अस्थिरे । अलसभावे । दुर्ज्जने ॥ सङ्कसति । कसगतौ । शासिवसेति उकञ् । इत्यमरटीकायां भरतः ॥

सङ्कार । पुं । अग्निचटत्कारे ॥ सम्मार्ज्जन्यवपुञ्जिते । अवकरे । सङ्कीर्य्यते । कृ विक्षेपे इति सायाना । कर्म्मणि घञ् ॥

सङ्कारी । स्त्री । नवदूषितकन्यायाम् । भुक्तकन्यायाम् । इति मेदिनीहेमचन्द्रौ ॥

सङ्काश । पुं । आन्तिके ॥ त्रि । उत्तरपदस्थस्तुल्यार्थे ॥ यथा । पद्मसङ्काश ॥ यथा वा । सम्यक् स्वप्नसङ्काशं यौवनकुसुमोपमम् । तडिच्चपलमायुष्यं कस्य स्यात् जानतो धृतिरिति ॥ सङ्काशते । काशृ दीप्तौ । पचाद्यच् ॥

सङ्किल । पुं । अग्निकुण्टे । दग्धोल्कायाम् ॥

सङ्कीर्ण । पुं । अम्बष्ठादिचण्डालपर्य्यन्तमिश्रितजातौ । तथाह मनुः । चाण्डालात् सङ्कीर्णाश्च स्वपचकरणादयः । शूद्राविशास्तु करणोऽम्बष्ठो वैश्याद्विजन्मनोः । शूद्राक्षत्रिययोरुग्रो मागधः क्षत्रियाविशोः । माहिष्योर्य्यक्षत्रिययोः क्षत्ता शूद्रयोः सुतः ॥ ब्राह्मण्यां क्षत्रियात्सूतः तस्यां वैदेहको विशः । रथकारस्तु माहिष्यात् करण्यां यस्य सम्भवः ॥ चाण्डालस्तु भिषग्ब्राह्मण्यां वृषलात्मजः । इति ॥ मिश्रितरागे ॥ नानाजातीयवर्णे ॥ त्रि । निचिते ॥ अशुद्धे ॥ जनादिभिर्निरवकाशे । स

कुले । आकीर्णे ॥ सङ्कीर्णस्य । कृविक्षेपे । क्त ऋतद्भ्यामिति मत्वम् ॥ सङ्कटे । परस्परविजातीये ॥

सङ्कीर्त्तनम् । न० सम्यगुक्तौ । सम्यक्प्रकारेण देवतादिनामोच्चारणे ॥ यथा । शमायालं जलं वह्नेस्तमसो भास्करोदयः । शान्तिः कलेरघौघस्य नामसङ्कीर्त्तनं हरेरिति ॥ नामसङ्कीर्त्तनं नित्यं क्षुत्प्रस्खलितादिषु । वियोगं शीघ्रमाप्नोति सर्वानर्थनिसंशय । सम्यक्कीर्त्तनम् ॥

सङ्कीर्त्तित । त्रि० सम्यगुच्चरिते ॥

सङ्कुचित । त्रि० सङ्कोचयुक्ते निद्राणे । मीलिते । मुद्रिते ॥ यथा । नरा सङ्कुचित पन्था येन वाली हतो गतः । समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः ॥ सङ्कुचति । कुचसङ्कोचने । कचिवचिकुचिकुटिभ्य । क्तिन् ॥

सङ्कुलम् । न० परस्परपराहतैकवाक्ये । क्लिष्टे । सा तामेवन्ध्येति विरुद्धार्थवचने । यथा । यावज्जीवमहं मौनी ब्रह्मचारी पितामम । माता च मम वन्ध्यासीत् स्मराभो ऽनुपमो भवान् । इति ॥ सङ्कीर्णे । सङ्कुलस्थाने । युद्धपथत्वात् तृण ॥ युद्धे ॥ त्रि० जनादिभिर्निरवकाशे । व्याप्ते । आकीर्णे । सङ्कीर्णे ॥ न स्मात वाचि ॥

सङ्कृति । स्त्री० चतुर्विंशत्यक्षरःपादवृत्तौ ॥

सङ्केत । पु० स्वाभिप्रायव्यञ्जकचेष्टाविशेषे । प्रज्ञप्तौ । परिभाषायाम् । शैल्याम् । समये । आकारे ॥ न्यायमते सङ्केतार्थो यथा । सङ्केतो लक्षणा चार्थे पदवृत्तिः । अस्मात्पदात्प्रतिपाद्योऽर्थ एष पदार्थ इत्यभिधीयते । इदं पदमिममर्थं बोधयत्विति । अस्मात्पदादयमर्थो बोद्धव्य इतीच्छा सङ्केतरूपा वृत्तिः । तत्राधुनिकसङ्केतः परिभाषा । तयार्थबोधकं पदं पारिभाषिकम् । यथा शास्त्रकारादिसङ्केतितनदीवृद्ध्यादिपदम् । ईश्वरसङ्केतः शक्तिः । तयार्थबोधकपदं वाचकम् । यथा गोत्वादिविशिष्टबोधकगवादिपदम् । तदीयोऽर्थो गवादिर्वाच्य एव मुख्यार्थ इत्युच्यते । इति शक्तिवादे गदाधरटीका । सङ्केतनम् । कित निवासे । घञ् ॥

सङ्केतनिकेतनम् । न० प्रियमेलनार्थकथारितस्थे ।

सङ्कोच । पु० मीनविशेषे । वर्म्म ॥ बहुविजयकशाख्याद्दिरूपाश्रिषय

यस्थापने ॥ यथा । सामान्यप्रवृत्तार्थस्य विशेषनिष्ठत्वं सङ्कोचः ॥ न० कुङ्कुमे ॥ सङ्कोचति० सङ्कुच्यते वा । यथा । सङ्कोचयति सङ्कोच्यते वा कुचस्य स्पर्शनं कौटिल्यप्रतिष्टम्भविलेखनेषु । अच्० घञ् वा । सङ्कुचतीति विग्रहेन सम्यङ् । कुचसङ्कोचनकृत्यस्य कुटादित्वेन गुणाभावप्रसङ्गात् ॥

सङ्कोचनी । स्त्री० लज्जालुलतायाम् ।

सङ्कोचपिशुनम् । न० कुङ्कुमे ॥

सङ्क्रन्दन । पुं० इन्द्रे । इन्द्रे ॥ सम्यक् क्रन्दयति । क्रदि आह्वाने रोदने च । ल्यु ॥ न० रोदने ॥

सङ्क्रम । पुं० क्रमणे । जलोपरिगमनार्थं काष्ठपाषाणादिभिर्निर्मिते० मार्गे ॥ सङ्क्रमस्त्रीलिङ्गयामित्यमरः सङ्क्रम यथा । ददासौ तथा स्वर्गसङ्क्रमे निप्रदीयताम् । भानोराश्यन्तरप्रवेशे । सङ्क्रमणे ॥ वुटे सङ्क्रमाणे । य सङ्क्रामे विसङ्क्रम : पुं० न० दुर्गसञ्चरे । दुर्गद्वारे फलकादिभिर्निर्मितसञ्चारमार्गे । सङ्क्रमयम । क्रम० । घञ् । नोदात्तोपदेशस्य मान्तस्यानाचमेरिति न वृद्धिः ।

सङ्क्रमणम् । न० सङ्क्रान्तौ । सम्पूर्वात् क्रमेर्ल्युट् ॥ गमने ॥

सङ्क्रान्त । त्रि० सक्ते ॥ सङ्क्रान्तिविशिष्टे ॥ क्रमागतधनादौ ॥ प्राप्ते ॥ गते ॥

संक्रान्ति । स्त्री० राश्यन्तरसंयोगानुकूलव्यापारे । सूर्यादीनां पूर्वराशितोऽपरराशौ सङ्क्रमणे ॥ तत्संख्या विशेषा यथा । अयने द्वे विषुवे द्वे चतस्रः षडशीतयः । चतस्रो विष्णुपद्यश्च सङ्क्रान्त्यो द्वादश स्मृताः ॥ अपि च । वृषालिघटसिंहेषु विष्णुपद्यश्च सङ्क्रमे । षडशीतिमुखे ज्ञेया मिथुने कन्याझषे धनुषे ॥ विषुवत्सु समाख्याता तुलामेषयोस्तथा । याम्यायनं कर्कटे स्यात् मकरे चोत्तरायणम् । सङ्क्रमणम् । क्रमु० । क्तिन् । अनुनासिकस्येति दीर्घः ॥

सङ्क्राम : । पुं० दुर्गसञ्चरे ॥

सङ्क्रीड : । पुं० आर्द्रीभावे ॥

सङ्क्लेश : । पुं० दुःखे ॥ सङ्क्लेशनम । क्लिशू विबाधायाम् । घञ् ॥

सङ्क्षय : । पुं० प्रलये ॥ नाशे ॥

सङ्क्षिप्त : । त्रि० संहृते । कृतसंक्षेपे । संक्षेपयुक्ते ॥

सङ्क्षुब्ध : । त्रि० आकुले ॥ आकुलीभूते ॥

सङ्क्षेप : । पुं० सङ्क्षये ॥ स्वल्पे ॥ समासे । कौशलभूयसोऽभिधा

णे । सङ्क्षिप्यतेसङ्क्षेपणं वा । क्षिप० । घञ ॥

सङ्क्षेपणम । न० विस्तृतानांसङ्क्षेपणे । समसने सम्पूर्णतृक्षिपे ल्युट् ॥

सङ्क्षेपयोग । पुं ध्यानयोगस्यसूक्ष्मानीयेयोगे ॥ यमाहार्जुनायश्री भगवान् । यथा । स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरेभ्रुवो । प्राणापानौसमौकृत्वानासाभ्यन्तरचारिणौ ॥ यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः । विगतेच्छाभयक्रोधोयःसदामुक्तएवसः ॥

सङ्क्षेप्ता । पुं० हरौ ॥ त्रि० सङ्क्षेपकारके ॥ विस्तृतसूक्ष्मरूपेणसङ्क्षिपति । क्षिपप्रेरणे । तृच ॥

सङ्क्षोभ । पु० सङ्घलने । चाञ्चल्ये ॥

सङ्ख्यम । न० मृधे । आस्कन्दने । युद्धे । सङ्ख्यानम् । चक्षिङ० ख्याप्रकथनेचा । भावेकोवाहुलकात् । त्रि० सङ्ख्येये ॥

सङ्ख्या । स्त्री० विमर्षे । चर्चायाम् । विचारणायाम् । विचारे ॥ सम्यक्विवेकेनात्मकथने । सम्यगात्मबुद्धौ ॥ एकद्व्यादौ ॥ अमरसिंहः । सङ्ख्या सङ्ख्येये ह्यादशस्त्रिषु । विंशत्याद्याःसदैकत्वेसर्वाः सङ्ख्येयसङ्ख्ययोः । सङ्ख्यार्थे द्विबहुत्वेस्तस्तासुचानवतेः स्त्रियः ॥ पङ्क्तेः शतसहस्रादिक्रमाद्दशगुणोत्तरमिति ॥ अस्यार्थः । आदश० दशशब्दमभिव्याप्य । आङ्मर्यादाभिविध्योरित्यव्ययीभावः । नपुंसकादन्यतरस्यामितिपक्षे टच् न । एकादिकानवदशपर्यन्ता० सङ्ख्या सङ्ख्येये० त्रिलिङ्गाः । येनसङ्ख्यासङ्ख्येययोः सामानाधिकरण्यं नश्यति । यथा० एकः पटः० एकाशाटी० एकं वस्त्रम् । द्विशब्दोऽवधारणे० सङ्ख्येयएव० नतुसङ्ख्यायामित्यर्थः । तेन० एकोविप्रइत्यादिभवतिनतुविप्रस्यैकइत्यादि । किन्तु द्व्येकयोर्द्विवचनैकवचनइतिसूत्रे० द्व्येकयोरितिनिर्देशात्सङ्ख्यामात्रेपिसम्भवः । तेनघटाभावेद्वित्वमित्यादिसिद्धिः । वार्त्तिकोपाध्यायसमयुक्तमिति नैयायिकसम्प्रदायः । विंशतिराद्यायासांताः सङ्ख्याः० सङ्ख्येयसङ्ख्ययोर्वर्त्तते० एकवचनान्ताश्च० यथा विंशतिर्गावः० गवांविंशतिः । विंशत्यादीनांयदासङ्ख्यार्थस्तदाद्विवचनबहुवचनेअपिस्तः । यथाद्वे विंशती० गावः० गवां वा तिस्रोविंशतयइति । तासुविंशत्यानवतिमभिव्याप्यस्त्रीलिङ्गाः ।

भिन्नलिङ्गेनापिसमानाधिकरण्ये ऽपि लिङ्गा । यथापि शब्दापुरुषे हातन् । विंशतिः कुण्डानीति । एकादिगुणोत्तरक्रमात् शतसहस्रादिविन्यासः । यथा । एक दशगुणित दशकमुच्यते । दशदशकं शतम् । दशशतानि सहस्रम् । दशसहस्राण्ययुतमित्यादिविन्यासः ॥ यथा लीलावत्याम् ॥ एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः । अर्बुदमब्जं खर्वनिखर्वमहापद्मशङ्कवस्तस्मात् ॥ जलधिश्चान्त्यं मध्यं परार्द्धमितिदशगुणोत्तराः संज्ञाः । सङ्ख्यायाः स्थानानां व्यवहारार्थं कृताः पूर्वैरिति ॥ विष्णुपुराणे श्रीधरस्वामी । स्थानात् स्थानं दशगुणमेकस्माद्गण्यते द्विज । ततोऽष्टादशमे भागे परार्द्धमभिधीयते ॥ परार्द्धद्विगुणं यत्तु प्राकृतः प्रलयः स्मृतः । तदाऽव्यक्ते ऽखिलं व्यक्तं सर्वं लीयते इति ॥ इति ॥ न्यायमते तु । सङ्ख्या गणनाव्यवहारकारणत्वम् । एकत्वमित्यवस्तु नित्यमन्यत्वानित्यम् । द्वित्वादिपरार्द्धपर्यन्तमपेक्षाबुद्धिजन्यम् । एवमपि बुद्धिनाशेनाशा । पर्याप्तसम्बन्धेनानेकाश्रयेति ॥ सङ्ख्याऽऽत्मन् । सङ्ख्याऽयनेऽभ्यासा । चर्चा : खण्डन् । भाषाः ॥

सङ्ख्यात । त्रि । कृतसङ्ख्ये । गणिते । सङ्ख्यायुक्ते । स्त्री । सा । चर्चितदेशीया । ख्याति ॥

सङ्ख्यान । न । सङ्ख्या । यामाः प्रकाशे ॥

सङ्ख्यावान् । पुं । पण्डितः । सुधिः ॥ सङ्ख्याविचारणाऽस्त्यस्य । मतुप् ॥ त्रि । सङ्ख्यायुक्ते ॥

सङ्ख्येय । त्रि । सङ्ख्यातव्ये । गणनीये । गण्ये सङ्ख्यातुं योग्य । ख्या । यत् । ईत् ॥

सङ्ग । पुं । सङ्गमे । मेलने ॥ सङ्गदोषो यथा । मिथ्यादृष्टिसंसर्गो न साधूनां सर्वपि सङ्गता । सङ्गात्पतत्यधोलोकं नाशयत्यखिलं मतिम् ॥ सङ्गः सर्वात्मना त्याज्यः स चेत् त्यक्तुं न शक्यते । स सद्भिः सह कर्तव्यः सतां सङ्गो हि भेषजम् ॥ सत्सङ्गश्च विवेकश्च निर्मलं नयनद्वयम् । यस्य नास्ति नरः सोऽन्धः कथं न स्यादमार्गगः ॥ इति श्रीकुलार्णवतन्त्रम् ॥ संग । सङ्गप्रसूतिसमानः सदा नरः । नासक्तिरिह लोकापरलोकयोरखिलमितिगरुडपुराणम् ॥ विष्णुपुराणमपि यथा । सङ्गः सर्वात्मना त्याज्यः स चेत्त्यक्तुं न शक्यते । स सद्भिः सह कर्तव्यः सतां सङ्गो हि भेषजम् : प्रभवन्तिदोषाः । इति ॥ रागी ॥

फलाभिलाषे । यथा सङ्गे ॥ अत्यन्तसुखहेतुर्वै स्त्रियैव शोभनाध्यासलक्षणे प्रीतिविशेषे ॥ अभिनिवेशे । यथा इदमेव करोमीति कर्त्तृत्वरूपे । कर्त्तृत्वाभिनिवेशे ॥ सञ्जनम् । षञ्ज सङ्गे । घञ् ॥ सङ्गोऽप्रवृत्तिरिति वैद्याः । यथा । वातमूत्रपुरीषाणां सङ्गोध्मानं क्लमो रुजा । जठरे वातजाद्यान्ये रोगाः स्युर्वातनिग्रहात् ॥ रुजा जठरे० इतिमस्यस्य ॥ प्रतिबन्धे ॥

संगणिका । स्त्री० अप्रतिरूपकथायाम् इ० वि० शिवसङ्कीर्णवर्गः ॥

संगतम् । न० सौहृदे ॥ सुखजनकोक्तौ । हृदयङ्गमे युक्तियुक्तवाक्ये । सङ्गतियुक्ते ॥ सम्यग्योगजीफले ॥ त्रि० तद्वति ॥ युक्ते ॥ उपसन्ने ॥ सङ्गच्छतेस्म । गत्यर्थेतिकर्त्तरिक्तः ॥

संगति । स्त्री० सङ्गमे ॥ ज्ञाने ॥ उपोद्घातादिषट्के ॥ यथा । सप्रसङ्ग उपोद्घातो हेतुताऽवसरस्तथा । निर्वाहकैक्यकार्यत्वे षोढासङ्गतिरिष्यते ॥ सम्प्रेषे । सङ्घट्टने ॥ सम्पूर्वाद्गमे क्तिन् ।

संगतिका । स्त्री० वर्णवृत्तान्तरे ॥ यथा । सगणपुर कुरुशोभित जगद्वय गुरुसङ्गतम् । फणिराजवक्त्रनिवेदिताभवतीह सङ्गतिकाहिसा ॥ यथा । अपचेहि किञ्चिदनुत्तरं प्रचरामितिन्नृपसत्वरम् । तनदित्युक्तोसि विलासिनीप्रतिभिन्नगेहनिवासिनी ॥

संगम । पुं० सङ्गे । मेलके ॥ नद्यादिमेलके ॥ स्त्रीपुंसयोर्मैथुनीभावे ॥ यथा । विदग्धस्य विदग्धेन सङ्गमो गुणवान् भवेत् । विदग्धाया इति वा ॥ स च प्रथममध्यमोत्तमभेदात् त्रिविधः । यथा व्यासः । त्रिविध तत्समाख्यातप्रथममध्यमोत्तमम् । अदेशकालभाषाभिर्निर्जनेच परस्त्रियाः ॥ कटाक्षावेक्षण हास्यं प्रथमं साहसं स्मृतम् । १ । प्रेरणं गन्धमाल्यानां धूपभूषणवाससाम् । प्रलोभनञ्चान्नपानैर्मध्यमं साहसं स्मृतम् । २ । सहासनं विविक्तेषु परस्परसमाश्रयः । केशाकेशिग्रहश्चैवमस्यक् सम्यक् स्मृतमिति मितारः ॥ सङ्गमनम् । सम्पूर्वाद्गमेरप् ॥

संगर । पुं० युद्धे । समरे ॥ आपदि ॥ क्रियाकारे ॥ संविदि । विषे ॥ अङ्गीकारे ॥ न० । शम्यांफले । सागर० इ० भा० प्र० ॥ सङ्गरणम् । सङ्गीर्यते वा० अनेन वा । गृ शब्दे । ऋदोरप् । पुंसीतिवोवा । प्रतिज्ञायाम् ॥ यथा । सत्यसङ्गरः ॥

संगरहित । त्रि० निःसङ्गे ॥ अ

इमेवमहायाम्निकाद्भुत्याद्यभिमान रूपोऽहङ्कारापरपर्यायेरावसीगर्व विशेष सग तेनशून्ये । सगेन रहित ॥

सगव । पु॰ पञ्चधाविभक्तदिनस्य द्वितीयांशे । प्रातः कालात परस्मिन् मुहूर्त्तत्रये ॥ यथा । प्रातः कालि मुहूर्त्तांस्त्रीन् सगवस्तावदेवतु । मध्याह्न॰ स्त्रिमुहूर्त्तं स्यादपराह्णस्ततः परम् । सायाह्नस्त्रिमुहूर्त्तं स्यात् श्राद्धं तत्र न कारयेदिति ॥ मत्स्यस्ये ॥

सगर्वचित्त । त्रि॰ गि ' सगे स न्यासिनि ॥ संगेर्वच्छित , । वा च्यवस्तुस्वरूपीने ॥

सगर्वविचित्त । त्रि॰ चेतनाचेतन सर्वविषयभिनाध्यासरहिते ॥

सगी । त्रि॰ सक्ते । सङ्गविशिष्टे ॥ यथा । चाम्त्युतीमे वमगीस्थाना मन्तोक्षितविष्णातमिद मयाद्य । स गोरथासक्तिपरश्चित्त मध्यायतीवे परमार्थसगि ॥

सगीतम् । न॰ तौर्यत्रिकं । प्रेक्षणा र्थं नृत्यगीतवाद्ये । यथा । गीतवा द्यनृत्यत्रयं नाम्न्यं तौर्य्यत्रिकम्‌तत् । सगीत प्रेक्षणार्थेऽस्मिन्‌शास्त्रो क्तोभाव्यधर्मिकीतिहेमचन्द्रः ' ॥ अ पिच । तालवाद्यानुग गीत नटीभि र्यत्प्रगीयते । नृत्यस्यानुगतं च गीत त् सगीतकमुच्यते ॥

संगीतशास्त्रम् न॰ नृत्यगीतवाद्या भिज्ञताग्रन्थे । तत्तु॰ सोमेश्वर भरतहनुमत्कल्लिनाथमतभेदाच्च तुर्विधम् । अधुनातुहनुमन्मत प्र चलितमस्ति । तत्राध्यायाः सप्त । स्वराध्यायोरागाध्यायस्तालाध्या योनृत्याध्यायोभावाध्याय कोका ध्यायोहस्ताध्यायश्चेति ॥ अत्रमुहू र्त्तमात्रकालिदास । हरिर्भवति व्येभगवन् हरिर्भं हरभं भमीभं यम् प्रं हरिर्भं । हरिर्भ्यविस्तारयेन्च सद् क्षिकलारमयेन्नाव्यसङ्गीतशास्त्रम् । इति । वस्तोत्सगवन्य हाचमूर्ति त्यमृत्यातया । पञ्चानां हरिभावा द्विषयविध्यामगोविभि ॥

सगीति ' । स्त्री॰ आलापे ॥ संगी ते ॥

सगीर्ण : । त्रि॰ सविहिते । सश्रुते । अङ्गीकृते । स्वीकृते ॥ सङ्गीर्य ते स्म । गृ निगरणे । क्त ' ॥

सङ्गुम : । पु॰ वृक्षभेदे । त्रि॰ सगो पनाश्रये ॥

संगूढ : । त्रि॰ सङ्कलिते । रेखाद्विना पुञ्जीकृतधान्यादौ । संगुह्यतेस्म । गुह॰ । क्त : ॥

संगृहीत : । त्रि॰ एकत्रीकृते । सङ्क लिते ॥

संगोपनम् । न॰ सम्यग्गोपने ॥

सङ्ग्रहः । पुं॰ समाहृतौ एककर्तृकाणामनेककर्तृकाणां वा एकाभिप्रायाणामाख्यानां सङ्ग्रहणे ॥ इह दुद्रङ्गे ॥ यष्टि ॥ सङ्क्षेपे । विस्तृतार्थानां समासेन निबन्धने ॥ यत्ने । सङ्ग्रहणम् । ग्रहवृदृनिश्चिगमश्चेत्यप् ॥ सङ्क्षेपेण शास्त्रं नानास्थाने विप्रकीर्णार्थमवबुद्ध्यतेऽस्मिन्निति॰ बाहुलकादधिकरणेऽप् वा ॥ परमात्मनि । विष्णौ ॥ सङ्गृह्णाति प्रलये सर्वं जगत् स्वात्मन्युपसंहरतीति सङ्ग्रहः पूर्ववद्भवे पचाद्यच् ॥ यन्त्रविशेषे ॥ इति को य ट । सचराचरलोकसङ्ग्रहो भ्याति कृतौ यन्त्रकृतिप्रसिद्धिरित्यर्थः विवरणम् ॥

सङ्ग्रहणम् । न॰ सङ्ग्रहे तीर्थारण्यादिनिर्जनदेशे परस्त्रियाः सह सम्भाषणादौ ॥ सङ्ग्रहणदण्डे । यथा । परस्त्रियं योऽभिवदेत्तीर्थेऽरण्ये वनेऽपि वा । नदीनां वापि सम्भेदे स सङ्ग्रहणमाप्नुयात् ॥ उपचारक्रिया केलिः स्पर्शो भूषणवाससाम् । सह खट्वासनञ्चैव सर्वं सङ्ग्रहणं स्मृतम् ॥ स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तथा । परस्परस्यानुमते सर्वं सङ्ग्रहणं स्मृतम् ॥ सम्यक् गृह्यते ज्ञायते येन परस्त्रीभोगाभिलाषवृत्तिः॰ सम्पूर्वात्॰ ग्रहेर्ल्युट् ॥

सङ्ग्रहणी । स्त्री॰ ग्रहणीरोगभेदे ॥ यथा । अन्त्यधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मता । अपक्वं धारयत्यन्नं पक्वं सृजति चाप्यधः । तस्याः स्वरूपम् । सुश्रुतेऽपि । षष्ठी पित्तधरा नाम या कला परिकीर्तिता । आमपक्वाशयान्तस्था ग्रहणी साभिधीयते ॥ अस्याः प्रभेदः सङ्ग्रहणी । यथा । द्रवघनसितस्निग्धं सकटीवेदनं शकृत् । आमं बहु सपैच्छिल्यं सशब्दं मन्दवेदनम् ॥ पक्षान्मासाद्दशाहाद्वा नित्यं वाप्यपि मुञ्चति । अन्त्रकूजनमालस्यं दौर्बल्यं सदनं भवेत् ॥ दिवा प्रकोपो भवति रात्रौ शान्तिं च गच्छति । दुर्विज्ञेया दुर्निवारा चिरकालानुबन्धिनी । सा भवेदामवातेन तेन सङ्ग्रहणी मतेति ॥

सङ्ग्रहभोजनम् । न॰ चन्द्रसूर्योपरागकालभोजने ॥

सङ्ग्रामः । पुं॰ युद्धे ॥ सङ्ग्रामयम् । सङ्ग्रामयुद्धे । ग्राम : परच् ॥ सङ्कुसति । ग्रसुघट्ने । ग्रसेराचेतिमनृषा ॥

सङ्ग्रामपटहः । पुं॰ रणतूर्ये ॥ ब्रह्मादिरणवाद्ये ॥

सङ्ग्राहः । पुं॰ फलकमुष्टौ । फलकग्रहणस्थाने ॥ मुष्टिबन्धनक्रियायाम् । मुष्टिबन्धे ॥ यथा । चर्मणश्च सङ्ग्राहः ॥ सङ्ग्रह

...म् । गुल्मभागे । समिम् इतिविगुर्हेघञ् ॥

सङ्घाती । पुं॰ घटजकर्षे ॥

सङ्घ । पुं॰ चये समूहे ॥ सजातीयानां विजातीयानाञ्च जन्तूनां वृन्द । अथ पञ्चादशघोभिक्षुसङ्घो वणिक्सङ्घ ॥ संहन्यते॰ परिच्छिद्यतेऽनेनेति संहननं वा । सङ्घोद्घोगणप्रशंसयोरिति टिलोपोऽप्रत्ययेघत्वञ्च निपात्यते ॥

सङ्घचारी । पुं॰ मत्स्ये ॥ त्रि॰ बहुभि सहगामिनी ॥

सङ्घजीवी । पुं॰ भृतीने ।

सङ्घटनम् । न॰ योजनायाम् ॥

सङ्घट्ट । पुं॰ अन्योन्यविमर्दे । घटने ॥

सङ्घट्टनम् । न॰ सङ्घट्टे ॥ मेलने ॥ घटने ॥

सङ्घट्टना । स्त्री॰ संघट्टने ॥

सङ्घट्टा । स्त्री॰ लतायाम् ॥

सङ्घट्टित । त्रि॰ निर्मिते ॥

सङ्घट्टी । त्रि॰ पक्षभवे । पक्षी॰ ङ॰ पक्षमा॰ ङ॰ भा॰ ॥

सङ्घतिथ : । पुं॰ सङ्घानां पूरणे । बहुपूगगणसङ्घस्येति डटि॰ तिथुगागमविधानात्॰ सङ्ख्या संख्यात्वे पिडट् ॥

संघपुष्पी । स्त्री॰ धातकीपुष्याम् । धातक्याम् ॥

सङ्घर्ष । पुं॰ स्पर्द्धायाम् । पराभिभवेच्छायाम् ॥ सङ्घर्षणे ॥ इतस्ततः सङ्घर्षस्तटस्थपीडाकर । वयावपभक्तलक्षाद्रुमपादभङ्ग॰ । बहुमङ्गष । घञ् ॥ ससर्पे ॥

सङ्घाटिका । स्त्री॰ युग्मे । कुट्टन्याम् ॥ जलकण्टके । घ्राणे ॥

सङ्घात । पुं॰ घाते । संहतौ । सङ्घ । यथा । सङ्घाता स्तम्भसर्वद्भूत्यागमविहाम पद्धे । ॥ अप्रसूतावयवसमूहे ॥ स्थिरावयवत्वे । पञ्चभूतपरिणामे । सेन्द्रियशरीरे । नरकविशेषे ॥ सम्यक्घातोऽत्र॰ सम्यक्घातयन्ते वर्तिता । यद्वा । संहन्यन्तेऽत्र । कर्मणि घञ् । तमस्तोषिचसुखा : । दिवस्त्रीरितिघ : ॥ करणे ॥

संघातपत्रिका । स्त्री॰ शतपुष्पायाम् ॥

संघातवाद । पुं॰ वैशेषिकानां नास्तिकानांवादे ॥ तथथा । परमाणुभिरारभ्य द्व्यणुकादिक्रमेण स्थूलस्थूलतरादिरूपेण जगत्सृष्टिरिति संहतिरूपतया समवायिकारणैः । परमाणूनां सङ्घातेनेदं जगत् उत्पद्यत इति तेषां मतम् । तन्मतेनोपलभ्यते ॥

सङ्कुचित । त्रि॰ सङ्कुचे । सङ्कु

प्यतिस्म । घ्ुषिर्विश्रब्दने । स्त्र कृष्यम्त्वरमङ्गप्राखनामितिपच्चे ष्टट ॥

सङ्घुष्ट । त्रि॰ सङ्घुषिते । सश ब्दिते । सम्यगघोषयाश्रये ॥ स ङ्घुष्यतिस्म । घुषिर्॰ कृष्यमत्वर सङ्घुषास्वनामितिपच्चेष्टडभाव . ॥

सचल । त्रि॰ चचलभिन्ने । चस्थिरे ।

सचि । स्त्री॰ शच्याम् ॥ सर्वेन्द्रि येषुसचति । षचसमवाये । सर्व धातुभ्यइन् ॥

सचिक्कण । त्रि॰ क्लिन्नमेचे ॥

सचिव । पु॰ चमात्ये । मन्त्रिवि शि ॥ कार्यसहाया सचिवाबुद्धि सहायासमन्त्रिण : प्रोक्ताइतिभेद ॥ चथसचिवा : तेचभेदा७८ध्याये ५४८वधिश्लोकेद्रष्टव्या । सहाये । चेटे । सचनम् । सच॰ । सर्वधा भ्यइन् । सचिवाति । वा॰ चा तोनुपसर्गेक ॥

सचिवामय । पु॰ विसर्परोगे ॥

सची । स्त्री॰ इन्द्राण्याम् ॥ कृदिका रादितिङीष ॥

सचीनन्दन । पु॰ जयन्ते ॥ गौडदे शोत्पन्नेकलौवैष्णवविशिष्टधर्मप्रव र्त्तकेचैतन्यदेवे ॥ यथाश्रीमिमुनि व्योमयुगेन्दुगण्ये १४०७ पुण्ये तिथौफाल्गुनपौर्णमास्याम् । श्री शोत्कभाग्योदयपुण्यकीर्त्तिर्देव : सचीनन्दनचाविरासीत्इतिचैत न्यचन्द्रोदयनाटकम् ॥

सचेतन । त्रि॰ सप्राणे ।

सचेता । त्रि॰ चव्याकुलचित्ते ॥ प्र सन्नचित्ते ॥

सचेष्ट त्रि॰ चेष्टयासहवर्त्तमाने ॥

सञ्चारा । स्त्री॰ हरिद्रायाम् ॥

सञ्चित् । न॰ ब्रह्मणि ॥

सञ्चिदानन्दम् । न॰ ब्रह्मणि । नित्यज्ञानसुखस्वरूपे ॥ त्रि॰ सा कारदेवविशेषणे ॥

सञ्चिदानन्दलक्षणम् । त्रि॰ पर मात्मनि ॥ सञ्चिदानन्दे॰ चनृ तजडदुःखप्रतियोगिभिरुच्यते॰ विरुद्धधाशत्यागलक्षणयाभागलक्ष णयाज्ञायते॰ इतिसञ्चिदानन्दल क्षणम् ॥ यद्वा । सन्तीसव्दाख्या यिनीयोचिदानन्दोज्ञानानन्दौतौ लक्षणं स्वरूपमस्य ॥

सच्छाकम् । न॰ चार्द्रके ॥

सजम्बाल । त्रि॰ पङ्किले । पङ्कवि शिष्टे । जम्बालेनपङ्केनसहेति विग्रह ॥

सजाति । पु॰ समानजातिस्त्री पुरुषयो: पुत्रे ॥ यथा । सवर्णेभ्य सवर्णासुजायन्तेहिसजातय । च निन्द्येषुविवाहेषुपुत्रा सन्तान वर्द्धना . ॥ त्रि॰ समानजातौ :

सजातीय : । त्रि॰ समानजातीये ॥

जातीभवोजातीय । समासश्री तियोगविभागात्सादेश. ॥

सज्. । अ॰ सहार्थे ॥

सज् । स्त्री॰ प्रीत्युक्तायाम् सेवायुक्तायाम । जीषणम॰ जुट् । जुषोप्रीतिसेवनयो । भावेक्विप् सहजुषाश्रत्ते॰ यासा॰ सज् । बहुब्रीहौसहस्यसभाव । ससजुषोक । र्वोरितिदीर्घ ॥

सज्ज । वि॰ सन्नद्धं । वर्मिते । बद्धवर्मण्णे ॥ सज्जितश्च । षस्ज गतौ । अच् ॥ सज्जते ॥

सज्जन । प॰ महाकुले । कुलीने । आर्ये ॥ पञ्चाशच्च यथा । मिताचारयाश्चियेकुर्वन्तोविद्वसत्तम । पापाभिलाषरहिता सज्जनास्तेप्रकीर्त्तिताइति । वह्निक्रियायागसारे १६ऽध्याय. ॥ न॰ उपरक्षणे । सैन्यरक्षायनियुक्ताप्रहरिकादौ । गुल्मे । घट्टे । वि॰ कुलीने । सति । सत्त्वा सौजनश्च सज्जनाऽनेन॰ सत्॰ शोभनम् अन्यतेऽनेन । षस्ज गतौ॰ जनोप्रादुर्भावेवा । ल्युट् ॥ महात्मनि ॥

सज्जना । स्त्री॰ घट्टाघाद्यारोपणीभसज्जीकरण । कल्पनायाम् । षस्जगतौ । ण्यन्त । युच् । सज्जनस्य इति युच् । सज्जना॰ तत्त्वण्

त्वेनञ ॥

सज्जा । स्त्री॰ वेशे । सज्जाते । साजना॰ कृ॰ भा॰ प्र॰ ॥

सज्जित । त्रि॰ वर्मीकृते । भूषिते । कृतसज्जे ॥ वर्मिते । सन्नद्धे ॥ षस्ज॰ । क्त. ॥

सञ्च । पु॰ पुस्तकलिखनार्थपत्रचये । सांची॰ कृ॰ भा॰ ॥ यथा । श्रीताडीपत्रजिसञ्चे समेपत्रसुसञ्चिते । विचित्रवर्णविपाङ्गैः पञ्चमैर्वासम्पुटीकृते । रक्तेनापत्रकार्याणि मम धन्यानि लिखितानि च । ब्रह्मसूत्रमुखस्थेनपत्रं विभक्तानि च ॥ यस्तुदानमाप्यसाक्षाञ्चसिंहितासुपसोद्धयेत् । दृढाति च विधियुक्तायस्यारातिपरमाकृतिमिति देवीपुराणे विद्यादानमाहात्म्यनामाऽध्याय ॥

सञ्चत् पु॰ प्रतारके ॥

सञ्चय । पु॰ समूहे । निवहे । सञ्चीयते । चिञ्॰ । एरच् ॥

सञ्चयनम् । न॰ सञ्चये ॥

सञ्चयी । त्रि॰ सञ्चययोगे । सङ्ग्रहपरे ॥ सञ्चयोऽस्यास्ति । इनिः ॥ सञ्चयीभावसीदति ॥

सञ्चरः । पु॰ सेतौ । मार्गे ॥ देहे । सञ्चरत्यनेन । गोचरसञ्चरेति साधुः ।

सञ्चलनम् । न॰ कम्पने ॥

सञ्चाय्य. । पु॰ क्रतौ । यज्ञे ॥ सं

चीयतेऽसौ । सम्प्रवर्त्तिनीति॰ अतीव सुखपाप्यसञ्चाय्यविनियम्यशयेनिधाय्येति ॥

सञ्चार । पु॰ निर्गमे ॥ सञ्चरणम्॰ सञ्चरत्यनेनवा । चरगतौ । घञ् ॥ गमने ॥ यथा । सञ्चारो निगमान्तवीथिषु च्छिन्नः ॥ अन्तरे भवसञ्चारा प्रकाराजनिधार्म्मिकैः इतिच ॥

संचारजीवी । त्रि॰ भ्रमणार्थिनि ॥

संचारिका । स्त्री॰ युगले ॥ कुट्टन्याम् । दूत्याम् ॥ घ्राणे ॥ सञ्चरति॰ सञ्चारयतिवा । चर॰ । ण्वुल् ॥

सञ्चारिणी । स्त्री॰ नेत्रपद्याम् ॥ सञ्चरणशीलायाम ॥

संचारी । पु॰ धूपे ॥ वायौ ॥ भावविशेषे ॥

सञ्चारित । त्रि॰ सञ्चालिते ॥

सञ्चाली । स्त्री॰ गुञ्जायाम ॥ यथा । सञ्चालीप्रोच्यतेगुञ्जासातिशोकपका भवेत् ॥

सञ्चित । त्रि॰ रचिते ॥ सम्भृते । सम्पादिते ॥ भाविदेहारम्भके कर्मविशेषे ॥

सञ्चितकर्म्म । न॰ प्राणीत्पत्तेः प्रागुत्पन्नं॰ अनारब्धफलकं कर्मैव ॥ सञ्चित चतत्कर्मच ॥

सञ्चिता । स्त्री॰ मूषिकपर्ण्याम् । मूषीकपर्ण्याम् ॥

सञ्चिन्तित । त्रि॰ सङ्कल्पितकृते ॥

सञ्चिन्वान । त्रि॰ सञ्चयकारके ॥ सञ्चिन्वानकमेवैनं कामानामवितृप्तकम् । व्याघ्रीवोरणमासाद्यमृत्युरादायगच्छति ॥

सञ्चेय । त्रि॰ सञ्चयनीये । संचितव्ये ॥

सच्छन्न । त्रि॰ आच्छादिते ॥

सञ्ज । पु॰ विधौ । ब्रह्मणि ॥ रुद्रे । शिवे ।

सञ्जनन । त्रि॰ उत्पादके ।

सञ्जय । त्रि॰ राजदेशादिदेशाधीशसम्यक्जेतरि ।

सञ्जवनम् । न॰ अन्योन्याभिमुखशालाचतुष्टयगृहे । चतुःशाले ॥ सञ्जवन्त्यत्र । जुगतौ । अधिकरणे ल्युट ॥

सञ्ज्ञा । स्त्री॰ अर्थायाम् । छायाम् ।

सञ्ज्ञित । त्रि॰ सलग्ने । सञ्ज्ञ्यम्नातृत्ता ॥

सञ्जिहान । त्रि॰ परित्यजति ।

सञ्जीवनम् । न॰ सम्यग्जीवनम्यकारकारिमृतप्राणधारणे ।

सञ्जीवनी । स्त्री॰ मृतजीवपविशेषिधमृतसंजायाम् । हरीतकायाम् यातायोगान्तरे ॥ यथा । उच्चर्यगतमन्त्रौषधीषुमविशुद्ध । सञ्जीवनीसमाख्योयमृतयुरोगाप

हारक ' ।

सज्जम् । न॰ पीतकाष्ठे । त्रि॰ स
न्नाहनुक्ते । सज्जसन्नाहयुक्ते ॥ स
ज्जायति ॥

सज्जनम् । न॰ सारथौ ॥ सारथ
तीयघनियामनेभुज्ञा । सुप्रमिश्रि
तिका । भाविल्यु,ट ॥

सज्जिः । स्त्री॰ सारथौ ॥ विज्ञप्तौ ॥

सज्जा । स्त्री॰ सामनि ॥ ययाप्रत्या
व्यत्तेसाससज्जेतिमङ्ग भव्यम् । प
र्यायमितियावत् । साघसंज्ञिर्न
बोधयति ॥ गायत्र्याम् ॥ चेतना
याम् । बुद्धौ । रश्मिदीधितिः ॥ च
स्तासेरथं स्म ज्ञानायाम् सज्जा
नम । ज्ञापनबोधनी । च तत्रोप
सर्गं वृत्यङ् ॥ सम्यकज्ञायतेइति
कर्मणिघाङ् ॥ सहृते ॥

सज्जास्कन्ध ' । प॰ नामरूपर्ज्ञे । ह
वदृत्तादिनामरूपेश्ये । सविकल्पके
॥ सविकल्पप्रत्यय॰ सज्जास सर्ग
योग्यप्रतिभासः । यथा । डित्थ॰
कुण्डली गौरो॰ ब्राह्मणोगच्छ
तीत्यं ॥ आत्मीयत्वकृतपादस्पर्श
त्वा । सविकल्पत्वाद्भूत्वनेन॰
विज्ञानस्कन्धोनिर्विकल्पकृतिभेद
स्कन्धो ध्यं नितकृतत्वात्पत्तः ।
गौरत्वब्राह्मणत्वादिघञ्चसङ्गप्रत्यय
मुखावलम्बित्य ' । गौरत्वाद्याहि
सम्बादिभिर्घटयस्तु विषयकसविक

ल्पप्रत्ययकृतिहरिकाराः ॥

सञ्ज्ञी । त्रि॰ सज्ञायति ॥ संज्ञया
य प्रतीयतेससञ्ज्ञीतमवामाघ्य-
कृत् । सज्ञाख्याति अर्थाद्
त्वादिभिः ॥

सञ्जु । त्रि॰ सञ्जतजानुके ॥ संग
तेससन्न जानुनीयस्य । प्रसज्ञाग्रौ
जानुनीज्ञु ॥

सञ्ज्वर । प॰ अग्निसन्तापे । सन्तापे
॥ सञ्ज्वरयति । ज्वररोगी । व्यु ता
त्॰ पचाद्यच् ॥

सटम् । न॰ जटिल' मिश्रायाम्-

सटा । स्त्री॰ । जटायाम् ॥
यथा । जटाजूटभ्र टौजूटे कुटज
सुसटसटा । कोटीरजटकस्त श्रि
खायांतितिनामपोतियत्नरत्नावली
॥ सट त । सटघनयमे । पच् ॥
कीमरे ॥

सटाङ्क । पुं॰ सिंहे ॥ अग्नौ ॥ स
टापर्याघट्ट यस्य ' ॥

सटि ।
सटिका । स्त्री॰ } शव्य,मू । गन्धप
सटी ।

लाद्य'म्।वनमाद्या॰ चन्द्रकदिद्य॰
ह्व॰ गौ॰ भा॰ प्र॰ ॥

सठ । पु॰ शठे ॥

सण्डिश ः। पुं॰ सन्दंशे ॥

सण्डीनम् । न॰ खगगतिविशे
षाम् । पक्षिणीइयादीपतनि ॥

सङ्गतं द्वयनम् । डीङ् विहायसा गतौ । नपुंसके भावे क्त । स्वादयश्चोदित इत्यादित्वान्निष्ठानत्वम् ॥ सण्डीनं सम्यक्पतनमिति महाभारतम् ॥

सण्डीनडीनम् । न० खगानांशोभनगमनमार्गे ॥

सण्डीनिडीनम् । न० खगानांशोभने० जङ्गमने ॥

सत् । अ० आदरे ॥ आदरानादरयोः सदसतीति निपातसञ्ज्ञा ॥

सत् । न० सत्ये । सद् स्थायिनि । अनृतशून्यत्वात्तत्र । बाधाभावोपलक्षितस्वरूपसत्तात्मके । सत्स्वभावे वेदान्तसिद्धे परमेश्वरे । कालत्रयाबाध्ये ब्रह्मणि ॥ यद्विषया बुद्धिर्न व्यभिचरति० तत्सदिति भाष्यम् ॥ त्रि० सत्ये । भावत्वाश्रये ॥ साधौ । नित्यानित्यवस्तुविवेकादिसाधनसम्पन्ने मुमुक्षौ । शिष्टे । वेदे स्मृत्यादिविहितशास्त्रानुसारेण वर्त्तमाने । धीरे ॥ मान्ये ॥ प्रशस्ते ॥ धार्मिके ॥ विद्यमाने । अस्तीति विधिमुखेन प्रतीयमाने । यत्सम्बन्धितयाऽयं विद्यते० तत् तत्सदित्युच्यते ॥ व्यक्ते । विधिमुखेन प्रमाणाख्यविषये ॥ कार्मकेणुच्यामनोहरसमर्थे ॥ पृथिव्यां जलम् ॥ सत्कारेसाधुभा

वे च सदित्येतत् प्रयुज्यते । प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥ यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते । कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥ अस्ति । असभुवि । लट् शतृप्रत्ययः । स्त्रीलिङ्गे प । सताशार्लिनि । अस्तिता मार्गवस्तु न ॥ शान्तौ ॥ अस्ति ब्रह्मेतिब्रह्मास्तित्वविदि ॥ आविष्कृतास्तु मिष्टोस्ययमानौयविस्मृत । स्वधर्तिस्मृतद्भृतयेवसमन्वहुधेच्यते ॥

सततम् । अ० सर्वदार्थे निरन्तरे

सततम् । न० अनरते । अश्रान्ते । सन्तते । सन्न्यतिस्म । तनुविस्तारे । क्त । अनुदात्तोपदेशेति नलोप । समो वा हितततयोरिति पक्षे समो मलोप ॥ क्रियान्तरैरव्यवधानमस्यार्थे । क्रियाविशेषणस्य क्लीवत्वम् । द्रव्यविशेषणे तु त्रिलिङ्गम ॥ पुं० विषमज्वरविशेषे ॥ तत्पर्याय यथा । अहोरात्रे सततको द्वौकालावनुवर्तते । टीकाकृ० अन्येद्युष्कस्तु वासवैकालवर्त्तनात् । तस्मिन्नेव अहोरात्रे प्रत्येककालीनप्रकोपकालौ ॥

सततगः । पुं० वायौ ॥ त्रि० सर्वदागमनशीले ॥ सततं गच्छति । गम् + ड ॥

सततविमुक्त । त्रि॰ सर्वदैवमुक्ते॰ मक्तदाचिद्‌पिवद्धे ॥

सततयायी त्रि॰ सदाविनश्वरे ॥

सततोत्थित । त्रि॰ निरन्तरमुद्युक्ते । सततमुत्थित ॥

सतत्त्वम् । न॰ स्वभावे । यथार्थत्वे ॥ त्रि॰ तत्त्वेनसहिते ॥ तत्त्वेनयास्तवरूपेणसहवर्त्तते इति ॥

सतर्क । त्रि॰ सभये तर्कयुक्ते वर्त्तमाने ॥

सती । स्त्री॰ दाक्षायण्याम् । उमायाम् ॥ साध्व्याम् । पतिव्रतायाम् ॥ सावित्र्याम् ॥ विश्वामित्रभार्यायाम् ॥ सौराष्ट्रमृदि ॥ प्रमाणान्तरबोधाविषयायाम ॥ यथा सत्यपक्षे । यथा । सत्यपक्षोसतीसुम्भे । पूजिताच गतोप्रिया । यथाविनाभवेद्‌योशाथ धुतारचित सदा ॥ यथसत्यमस्ति नास्ति॰ तथाविश्वासात्॰ मनुष्य स्येव नकरोति॰ इतिवत्‌सारसि तीभवतीतियुक्तमेव ॥ प्रतिष्ठाच्छन्द प्रभेदे ॥ नागसती ॥ यथा । मुरारेपातवपदम् । ममतिमानन्सती ॥ त्रि॰ एकस्मिन्पत्यौ । असं॰ । मद । असतीरवोप : । उगित्वान्ङीप् ॥

सतीन । पु॰ वशि । कलायी । वासी ॥

सतीनक : । पुं॰ वशी । कलाये । खण्डिके । भटरह॰ भा॰ प्र॰ ॥ कलायस्त्रिपुट प्रोक्त . सतीनावर्त्तु लोमत ' इतिव्याडि : । सतनो वेदन प्रभु । सङ्घायोमितिस मास । कन्दन्तादित्यत्वक ॥ सतीन वादुकरोति । पक्षेस्त्रोपीतिस ॥

सतीर्थ्य । पु॰ परस्परमेकगुरोः शिष्ये । सहाध्यायिनि । समाने तीर्थेगुरौवसति । समानतीर्थेवासीतियत् । तीर्थेये॰ इतिसमानस्य स ॥

सतीन : । पु॰ सतीनि ॥ वशि॰ रु॰ मुद्राकिताचारावली ॥

सतीनक : । पुं॰ सतीनके । भटरह॰ भा॰ प्र॰ कलाये ॥ तिनिश॰ तिलवत्‌कृष्णवर्णविन्दुनसवर्त्तते॰ इतिसतील . । निपातनादिकारस्य दीर्घ . । स्वार्थेक ॥

सतीला । स्त्री॰ कलायविशेषे । त्रिपिण्डकायाम् । त्रिपुटे ॥

सतुषम् । न॰ तुषयुक्तसस्ये । धान्ये ॥ यथा । सस्यवर्गमतंप्राह ' सतुष धान्यमुच्यते धान्यवितुषमित्युक्त स्विन्नमन्नमुदाहृतम् ॥

सतूर्य : । त्रि॰ वादित्रसहिते । तूर्य॰ तूर्यघोषै : सहित ॥

सत्वट् । त्रि॰ सत्यायुक्ते । स्थिते ॥

सत्कदम्ब । पुं॰ शशभुवि । कदम्बे ॥

सत्कर्म्म । न॰ वेदविहितक्रियायाम् ॥ सत्कर्म्मयोग्योनजनोऽस्ति पापाचारपरायणः । यस्मिन्ननु द्रुतं तस्मिन्नेव प्रकाशते ॥ इति विष्णुपुराणम् ॥

सत्काण्डनाड । पु॰ रक्तकाञ्चने ॥

सत्काण्ड । पु॰ चिल्ले ॥

सत्कार । पु॰ अतिथ्ये ॥ साधुरयतपस्वीव आगतस्य च क्रियमाणायासुती ॥ कौमुद्यादिषु ॥ यथा । तस्मादतः सदापूज्या भूषणाच्छादनाशनैः । भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु चेति । एतदनाय ॥ पूजायाम् ॥

सत्कृत । त्रि॰ कृतसत्कारे पूजिते ॥ आदृते ॥

सत्कृति । स्त्री॰ सत्क्रियायाम् । सत्कारे ॥

सत्क्रिया । स्त्री॰ सत्कारे । आदरक्रियायाम् ॥ सदाचारादिक्रियायाम् । सत्क्रियायाम् ॥

सत्तम । त्रि॰ पूज्यतमे । साधीयसि । श्रेष्ठतमे । अतिशोभने । प्रशस्ततमे । अतिशयेन सत् । अतिशयप्रशस्ते । विद्वत्तमे । विदिततमम् ॥

सत्ता । स्त्री॰ सजातीयविजातीयव्यावृत्तगतभेदरहितानुभूतौ ॥ विद्यमानतायाम् ॥ साधुतायाम् ॥ जातिविशेषे । इतिभाषापरिच्छेदः ॥ भावे तल् ॥

सत्तामात्रम् । त्रि॰ केवलपरमार्थस्वरूपे ॥

सत्य । पु॰ श्रीरामे । दशमुखान्तके ॥ विष्णौ ॥ यथा । चैत्रमासिप्यन्तरे च पापासत्ये सहस्रशीर्षणि । सत्यायामभवत्तस्य सत्यरूपीजनार्दनः इतिकौर्म्मे ४८ऽध्यायः ॥ अश्वत्थवृक्षे ॥ नान्दीमुखश्राद्धदेवे ॥ यथा । इष्टिश्राद्धेक्रतुर्दक्षः सत्योनान्दीमुखेवसुः । नैमित्तिकेकालकामौ काम्येचधुरिलोचनाविति ॥ तपोलोकादूर्द्ध्वतनेलोके । सत्यलोके ॥ यथा शब्देन्द्रस्थितायाम् । ततः सर्व्वोपरिस्थानं सत्यलोकः स्वयम्भुवः । कोमातिशयसम्पन्नः कोटयोजनसम्मितः ॥ साविन्नीमूर्त्तिमत्यास्ते यत्रवेदाश्चसानुगाः ॥ ततस्तपोलोकानन्तरम् । सत्यमकालस्थानम् । सत्यमनुविस्वात् । प्रकस्याधिपत्यकृत्स्नशाश्च स्थानम् । इत्यर्थः ॥ न॰ कृतयुगे ॥ शपथे ॥ यथाह श्रीमद्भागवते । सत्ययज्ञोमिसकलप्यस्पृष्ठाश्चीलगुरुद्विजम् । गङ्गातोयदेवमूर्त्तिंकुलशास्त्रकुलांमृतम् । देवीनिर्माल्यमथवाक्रयन्नशपथोभवेत । तथानृतवदन्मर्त्त्य । कल्पान्तनरकव्रजेत् ॥ अपापगमनिकायांश्चापिद्यायाचर्य्यापिवा । तत्कार्य्यसर्व्वांशमनुर्गें स्वीकृत

। तदा नृतप्रवेशश्चोक्तानि तीर्थिश्च समवेत् । इति ॥ अश्वमेधसहस्रस्य सत्यस्य तुला धृतम् । अश्वमेधसहस्राद्धि सत्यमेकं विशिष्यते ॥ अमृतभाषणाद्दूरे वागथ्यापारनिः धि अनर्थामनुशास्त्रयथाभूतार्थवचन । प्रियहितयथार्थभाषणा ॥ अबाधिततात्पर्यविषयेतत्त्वावेदकावेदान्ये प्रमाणे ॥ तदुपजीविनिपुराणादौ ॥ प्रमाणमूलऽबाधितार्थवाक्ये ॥ सिद्धान्ते ॥ भूतपञ्चके ॥ सच्छब्देन पृथ्व्यप्तेजांसि त्यच्छब्देनवाय्वाकाशौ । सच्चत्यच्च अनयोः समाहार ॥ मम हर्षे । परमार्थरूपे । अद्वैतवस्तुनि परमब्रह्मणि ॥ द्वैताद्वैतयोः प्रमाणभूतवेदप्रतिपादितत्वात्कथमसत्यत्वं कथा सत्यत्वमित्याकाङ्क्षायामाहाथ अद्वैते वसत्यं तस्मिन् द्वैतं नसत्यमध्यस्तम् । रजतमिव शुक्तिकायाम् मृगतृष्णायामिवोदकस्फुरणम् । आरोपितमद्विद्याद्वैत वस्त्ववस्तुनिद्वैते । युक्तमेव तद्याख्यात सत्ये अध्यासो भवत्यसत्यानाम ॥ अध्यारोपण सुभवो स्वातिरिक्ताप्राणचिद्भाव । आरोपणं नशून्ये तस्मो द्वैतसत्यतायां

ज्ञा ॥ पञ्चभूतेष्वेतस्मिन्निति प्रमाण मित्याह । प्रत्यक्षाद्यनुगत श्रुत्याप्रतिपादनीयमद्वैतम । द्वैतमप्रतिपाद्यम् तद्भावमिथ्याकल्पितत्वात् ॥ ५४ ॥ इति । भूतपञ्चके । सच्छब्देन पृथिव्यप्तेजांसि । त्यच्छब्देन वाय्वाकाशौ । सच्च त्यच्च सत्यमिति व्याख्यानात् ॥ व्यक्ताव्यक्त मूर्त्तामूर्त्तरूपम् । सत्यमनिमायभवसत्यं तद्वस्तु कथ्यते ॥ त्रि॰ तथ्यवति ॥ अबाध्ये ॥ सत्तत्त्वसाधु तत्साधुर्वर्तते ॥ पारमार्थिके यथा । सत्यज्ञानमनन्तं परमेश्वर । सत्यस्वभूतपञ्चकस्वमनन्तं पारमार्थिकं नाम्ना व्यवहारमाग्रूप ॥

सत्यकाम । पु॰ जाबालर्षौ ॥ ईश्वरे ॥ सत्याच बलवान् कामोयस्य ॥

सत्यगिरा । स्त्री॰ कामरूपदेशप्रसिद्धायांनद्यां ॥

सत्यङ्कार । पु॰ अवश्यमेतत्कर्त्तव्यमितिसत्यङ्करणं । सत्यापने । सत्यङ्करणम् । आदिष अ । कारेसत्यागदस्तेतिमुम । समयकरणे ॥

सत्यङ्कारकृत । त्रि॰ अवश्यमेतत्कर्त्तव्यमितिसत्यङ्कारोयेनकृतस्तस्मिन् । बयाना॰ साङ्ग॰ भा॰ प्र॰ ॥

सत्यतपा । पु॰ मुनिविशेषे ॥

सत्यधृत । पु॰ क्षत्रियविशेषे ॥ त्रि॰ धृतसत्यव्रते ॥ सत्यधारयितरि ॥

सत्यनारायण । पु॰ स्कन्दपुराणप्रसिद्धदेवताविशेषे तन्नामके ॥

सत्यपर । पु॰ परमेश्वरे ॥ सत्यपरः श्रेष्ठसाधनं यस्मिन् सः ॥

सत्यफल । पु॰ बिल्ववृक्षे ॥

सत्यभामा । स्त्री॰ श्रीकृष्णस्याष्टमहिष्यन्तर्गतमहिषीविशेषे । दुर्गानाम ॥

सत्यभारत । पु॰ कृष्णद्वैपायने । वेदव्यासे

सत्यम । अ॰ अङ्गीकारे । प्रश्ने ॥ अभ्युपगमे ॥ प्रतिषेधे ॥ सत्ये ॥

सत्यम्भरा । स्त्री॰ प्रवाहोपलक्षणवत्यां नद्याम् ॥

सत्ययश । पु॰ पौलुषिनामकमुनिविशेषे ॥

सत्ययुगम् । न॰ चतुर्युगान्तर्गतप्रथमयुगे । कृते ॥ यथा । कृतसत्ययुगसंज्ञानायो । द्वापरस्त्रियो । कलिभर्भारकः । कलियुगमितिविख्यातमेव ॥

सत्ययोनि । पु॰ परमेश्वरे ॥ सत्यस्वभूतपञ्चकस्य योनि कारणम् ॥

सत्ययौवन । पु॰ विद्याधरे ॥

सत्यरत । पु॰ सत्यव्रतराजपुत्रे ॥ व्यासे ॥ त्रि॰ सत्यवादिनि । सत्यरत ॥

सत्यलोक । पु॰ सप्तलोकान्तर्गतलोकविशेषे ॥ यथा । षड् गुणितपीलोकात् सत्यलोकः विराजते । अपुनर्मारकाय ब्रह्मलोकः विश्रुत ॥ अनलोकापि वर्षे ब्रह्मगुणे न । द्वादश ब्रह्मलोकस्य । अपुनर्मारका । पुनर्मृत्युशून्या ॥

सत्यवर्म । पु॰ ऋषौ ॥ त्रि॰ सत्यवादिनि ॥

सत्यवान् । पु॰ नृपान्तरे ॥ त्रि॰ सत्यवादिनि ॥ सत्यमस्यास्मिन् मतुप् । मादुपधायाश्चेति मस्य वः ॥

सत्यवती । स्त्री॰ व्यासमातरि । काल्याम् ॥ गन्धवत्याम् ॥ ऋचीकमुनेर्भार्यायाम् ॥ सत्याश्विमिष्टायाम ॥ उगित्वान् ङीप ॥

सत्यवतीसुत । पु॰ व्यासे ॥

सत्यवाक । पु॰ ऋषौ ॥ काके ॥ त्रि॰ सत्यवादिनि ॥ सत्यावागस्य ॥

सत्यवाक्य । पु॰ भगवतीपुराणप्रसिद्धे मुनिविशेषे ॥ त्रि॰ सर्वास्ववस्थासु सत्यवचने ॥ सत्यं वाक्यमस्य ।

सत्यवादी । त्रि॰ यथार्थवक्तरि । सत्योद्ये ॥

सत्यवृत्त । त्रि॰ अकपटचरिते ॥

सत्यव्रत । पु॰ ईश्वरे ॥ सत्यं व्रतं सङ्कल्पोऽस्य ॥ सूर्यवंशीयस्य त्रय्यारुणस्यात्मजे राजर्षिविशेषे । योऽसौ त्रिशङ्कुसञ्ज्ञामवाप ॥ त्रि॰ सत्यसङ्कल्पे ॥

सत्यसङ्कल्प । त्रि॰ अमोघवाञ्छिते । ईश्वरे ॥ सत्याः सङ्कल्पा यस्य

सत्यसङ्गर । पु॰ विश्रिवसि । श्रीदे । कुवेरे ॥ कूटाख्यवर्णितेऽसुरायुधे ॥ त्रि॰ सत्यप्रतिज्ञे ॥

सत्यसन्ध । पु॰ कैकयीतनये । भरते । जनमेजये ॥ त्रि॰ सत्यप्रतिज्ञे ॥ सत्या सन्धा प्रतिज्ञा यस्य ॥

सत्यसन्धा । स्त्री॰ द्रौपद्याम् ॥

सत्या । स्त्री॰ दुर्गायाम् ॥ जनकात्मजायाम् । सीतायाम् ॥ व्यासमातरि । सत्यवत्याम् ॥ सत्यभामायाम् ॥ विनापि प्रत्ययं पूर्वोत्तरपदलोप ॥ सत्यभामेत्यत्र । ...र्नाम्न्यां ॥

सत्याकृति । स्त्री॰ सत्यापने । मयैतदवश्यं कर्तव्यमिति तथ्यकरणे । सत्यक्रिया॰ सा॰ भा॰ प्रसिद्धनिश्चये ॥ सत्यस्य करणं । क्रियान्तिन् । सत्यादृद्धशपथे॰ कृतिडाच् ॥

सत्याग्नि । पु॰ अगस्त्यमुनौ ॥ च- डाकमाग्नौ ॥

सत्यानृतम् । न॰ वाणिज्ये ॥ सत्यसहितमनृतम् । शाकपार्थिवादि ॥

सत्यापनम् । न॰ सत्यङ्कारे । सत्याकृतौ ॥ सत्यस्य करणम् । सत्यापपाशेति णिजापुकौ । भावे ल्युट् ॥

सत्योद्यम् । न॰ सत्यवद्ये । सत्यस्य वदने ॥ वद सुपि क्यप् चेति क्यप् ॥

सत्रम् । न॰ छत्रे । यज्ञे ॥ सदादाने ॥ आच्छादने ॥ अरण्ये ॥ केतवे ॥ यज्ञविशेषे । गवायनादिक्रतुविशेषे ॥ यत्र यजमाना एव समाना ऋत्विगादिरूपेण कर्म्म कुर्वन्ति । तस्मिन् यज्ञे सदस्येषु सततान्नदाने ॥ धने ॥ गृहे ॥ कर्म्मणि ॥ सीदन्त्यत्राऽनेनवा । षट्लृविशरणगत्यवसादनेषु । ष्ट्रन् ॥ ष्टधुमीष्ट्रा दिनामोच ॥ सतः साधून् त्रायतेवा । त्रैङ् पालने । आतोऽनुपसर्गे कः इति क । नपुंसकत्वात् ह्रस्व इति ॥

सत्रम् । अ॰ सहार्थे ॥ सत्रायते । त्रैङ् पालने । अम् । यरो ह्रस्वम् ॥

सत्रशाला । स्त्री॰ प्रतिश्रये । अन्नदानार्थ गृहविशेषे ॥

सत्रा । अ॰ सहार्थे ॥ सत्राकस्वैर्गी ...स्याम् ॥ सत्रायते । त्रैङ् । क्विप् ॥

सत्राजित् । पु॰ कृष्णश्वशुरे ॥

सत्तायतम् । न० बहुयजमानके० वै दिकेकर्म्मणि ॥

सत्ति । पु० गजे । हस्तिनि ॥ चन्द्रे । मेघे ॥ त्रि० अपमीले ॥

सत्रिजातकम् । न० व्यञ्जनविशेषे ॥ यथा । मांस बहुघृतैर्भृष्टं सितकाचो ष्माम्बुनामुक् । जीरकाद्यैः समा युक्तं परिशुष्कं तदुच्यते ॥ तदेवघृ ततक्राद्यं प्रदिग्धं सत्रिजातकम् ॥

सत्त्रो । पु० गृहपतौ । सद्द्वादिद्वा दशाहर्यागकर्त्तरि ॥ नायैव सत्रि यासते० नकाद्यर्थामत्रमपि ॥ ऋत्विजि ॥ सत्त्र० यज्ञतन्त्रमस्यो स्ति । अतइनिठनादितोनि ॥

सत्त्व । पु० न० जन्तौ ॥ न० प्रकृ तेर्गुणविशेषे । प्रीत्यात्मकेसत्त्वगुणे ॥ येतुप्रीतिनैर्दु खाभावादर्तिरि च्यते० एव दु खमपिनप्रीत्यभा वादन्यदितिमन्यन्ते० तान्प्रत्या त्मग्रहणम् । नेतरेतराभावाः सु खादय० अपितुभावा.० आ त्मशब्दस्यभाववचनत्वात्० प्रीति रात्माभावोयेषांतेप्रीत्यात्मान । भावरूपताचैषांगुणानामनुभवसि द्धा० परस्पराभावात्मकत्वे तुपरस्प राश्रयापत्तेरेकस्याप्यसिद्धेरुभया सिद्धिरितभाव. । सत्त्व लघुप्र काशकमिष्ट साङ्ख्याचार्य्यैः । य त्सुखहेतुसत्सुखात्मकसत्त्वम् ॥ चेतोधर्मविशेषे ॥ यस्मिन् सतिन कुतश्चिद्भयमुत्पद्यतेनकस्माच्चाय स्यायाम् विषाद सम्मुपजायते त सत्त्वमितिव्याख्यातार । तथा हि । एकाकिनीवनवासिनिश्चराज लक्ष्मणयनौतिर्यातस्त्वं । सत्त्वोच्छ्रि तेमृगपतौ० राजतिगिर पदैव मग्नि ॥ पिशाचादौ ॥ बले । परा क्रमे । द्रव्ये ॥ स्वभावे ॥ आत्मत्वे ॥ व्यवसायै ॥ असुषु । प्राणेषु । चित्ते ॥ रसे ॥ आयुषि ॥ धने । वित्ते ॥ यथा । अत्युच्छ्रितं खल सत्त्वमत्यत्याज्ञानियच्छितम् । सामा नाधिकरण्य विवेकसिन्निरयो कु तवृत्ति ॥ जीवात्मनि । अस्त क रणे ॥ निर्विकारमनसि ॥ यथा । व्यसनेऽप्यविकारित्वं सदा मत । तत सत्त्वमितिप्रोक्तमि ति । उत्साहशक्तौ ॥ चित्तर्ष्यै । सतोभाव । तत्स्वभावस्त्वतो । सौदृश्यमुन्मुखायाः । सत्त्व० । आत्मत्वोदिक्षत्रप्रकृतिसत्वनृषा ॥

सत्त्वतनु । पु० वासुदेवे ॥

सत्त्वरम् । न० शीघ्रे । अविलम्बिते ॥ त्रि० तद्वति ॥ सत्वरयाचनेति । सञ्चास : ॥ अविलम्बितेक्रिया विशेषणत्वाद्द्रव्येवर्त्तमानंक्लीवम् । द्रव्येतुत्रिलिङ्ग ॥

सत्त्वविशाल । पु० भुव : प्रकृतिस

स्थानभेदो । त्रि॰ सत्त्ववृत्ती । जहैसत्वविशाल ॥ सत्वेनविशाल ॥

सत्त्वसंशुद्धि : । स्त्री॰ अन्त:करणस्य निर्मलतायाम् । अयथादिपरपरोक्षान्त : करणस्यासम्भावनाविपरीतभावनादिमलराहित्ये सम्यक्शुद्धि 'संशुद्धि सत्त्वसंशुद्धि' । तथा सम्यक्ताभगवत्तत्त्वस्फूर्तियोग्यता ॥

सत्त्वसंक्षय । पु॰ चित्तभङ्गे ॥ प्रारब्धकार्यासिद्ध्यादिविषाद सत्त्वसंक्षय . ॥

सत्त्वसमाविष्ट । त्रि॰ सत्त्वेनचमना॰ आत्मविवेकज्ञानेहेतुनाचित्तगतेनातिशयेन॰ सम्यगज्ञानप्रतिबन्धकरजस्तमोमलराहित्येन॰ आसमन्तात्फलाव्यभिचारेण॰ आविष्टेव्याप्ते ॥

सत्त्वसम्पन्न । त्रि॰ सद्भावापन्ने ॥

सत्त्वस्थ . । त्रि॰ सत्त्ववृत्तिप्रधाने ॥ पु॰ विष्णौ ॥ सत्त्व सत्त्वगुण प्रकाशात्मकमधितिष्ठतिपालनोपाधितयाविष्णुरूपेणे तिसत्त्वस्थोविष्णु । यद्वासत्त्वेसुसर्वप्राणिषुजीवरूपेणान्तर्यामिरूपेणचतिष्ठतीतिसत्त्वस्थ ' । हा॰ । सुपिस्थइतिक ॥

सत्पथम् । न॰ सद्वर्त्मकायाम् ॥

सत्पथ . । पु॰ पथिवैदेऽध्वनि ' । सासीपन्थाश्च । सन्नसद्दितितत्पुरुष । समासान्तश्च ॥

सत्पुत्र । पु॰ सद्‌पत्ये ॥ सत्पुत्रपातुजातेनवैशोपिविदितिश्रयौ । पुन्नाम्नोनरकात्त्रात सतेनसुमहात्मना ॥

सत्पुरुष : । पु॰ पूज्यमानपुरुषे ॥

सत्प्रतिपक्ष । पु॰ साधुजनद्तद्व्यवहर्त्ते ॥ सद्व्य ' साधुभ्य प्रतिपक्षोदानग्रहणम् । यथा । सप्तवित्तागमाधर्म्यादायोलाभ क्रियोजय । प्रयोग कर्मयोगश्चसत्प्रतिग्रहएवचेतिमनु ' ॥

सत्प्रतिपक्ष । पु॰ तुल्यव्यक्तौ । प्रतियोगिनि ॥ न्यायमते॰ साध्याभावसाधक हेत्वन्तर यस्यतस्मिन् ॥ यथा । शब्दोनित्य : श्रवणत्वात् शब्दवत् । शब्दोऽनित्य कार्यत्वाद् घटवदिति ॥ यद्वा । हृदोवह्निमान्धूमात्॰ हृदोवह्न्यभाववान्जलवत्त्वादिरिति ॥

सत्फल । पु॰ दाडिमवृक्षे ॥ शोभनफलवतिवृक्षे ॥

सत्सङ्ग । पु॰ साधुसङ्गमे । सधर्मवत्भिर्जनसमागमे । यथोक्त कुलार्णवे । सत्सङ्गश्चविवेकश्चनिर्मल नयनद्वयम् । यस्यनास्तिनर सोन्ध . कथनस्यादमार्गगइति ॥

सत्सार . । पु॰ खादिरे । खदिरसा

रे । वृक्षविशेषे ॥

सदुत्कारम् । न॰ अम्लकृतौ ॥ धुत्कारेण सह वर्त्तमाने ॥

सदशक । पु॰ कर्कटे । कुलीरे । त्रि॰ दशयुक्ते ॥

सदंशवदन । पु॰ कङ्कपक्षिणि । रथालङ्करणे । आमिषप्रिये ॥

सदङ्गनम् । न॰ कुसुमाञ्जने ॥

सदनम् । न॰ वस्म । भवने । गृहे ॥ सीदन्त्यत्र । षद्लृ॰ । अधिकरणे ल्युट् ॥ तेथे । जले ॥ ग्लानौ ॥ यथा । दीर्घश्चासदनकार्य्यं शुचिशुक्लसमाकृतिमिति ॥

सदव्यय । त्रि॰ विनाशापचयोपलक्षितसर्वविकारशून्ये । स चासौ अव्ययश्चेति कर्मधारयः ॥

सदश्व । पु॰ दाम्भाश्वे ॥

सदस् । स्त्री॰ न॰ सभायाम् ॥ सीदन्त्यस्याम् । षद्लृ॰ । असुन् ॥

सदसदात्मकम् । न॰ स्वरूपपररूपाभ्यां निरूपणीये सर्वात्मके जगति । जगद्धि व्यवहारदशायां सत् । परमार्थदर्शनेनासत् । तत्स्वरूपम् । सदसती आत्मा स्वरूपं यस्य तत् ॥

सदसद्ग्रामनिर्वचनीयम् । न॰ अज्ञानसत्त्वोत्कर्षापकर्षे । नेदमसदभिव्यज्ञानस्यासत्त्वे विदात्मनस्तदाभासप्रसङ्गात् । असत्त्वे च वन्ध्यासुतादिवदपरोक्षप्रतिभासानुपपत्तेः । बाध्यप्रतीत्योत्पत्ताने प्रसिद्धत्वाच्च तस्यानिर्वचनीयत्वम् ॥

सदसद्योनि । स्त्री॰ धर्माधर्ममिश्रस्य ब्राह्मणादिमनुष्येषु । तेषु हि राजसमिश्रफलभुक्तत्वात् । सदसती योनि ॥

सदसद्वादी । पु॰ अकलङ्कविजयप्रभृतिषु॰ अर्हत्सु ॥

सदसद्विकारम् । न॰ जगति ॥ सत् आकाशवायुरूपममूर्त्तं भूतद्वयम् । असत् तेजोजलभूमिरूपं मूर्त्तं भूतत्रयम् । तयोर्विकारः तत्परिणामरूपं यत् तत् ॥

सदस्पति । पु॰ सभाधिपतौ ॥ सदसः पति ॥

सदस्य । पु॰ विविदर्षिणि । सभायामन्यूनाधिकविचारके॰ स्वर्त्विग्विशेषे ॥ सदसि माधुः । तत्र साधुरिति यत् ॥ सभ्ये ॥ सदसि यज्ञसभायामृत्विग्भ्योऽन्ये मिलिता ये ब्राह्मणास्ते सदस्याः ॥

सदा । अ॰ सर्वकाले । सर्वदार्थे ॥ सर्वस्मिन् काले सर्वशब्दान्निकि च सर्वस्य सः स्यात् सदा । सर्वस्मिन्नन्यतरस्यादि ॥

सदाकार । पु॰ आत्मनि । अस्तीत्याकारकारणभूतधाकारोऽस्यास ॥

सदागति । पु॰ वाते । वायौ ॥

सदागतिरम्य ॥ नाके ॥ निर्वाणे ॥ सदीश्वरे ॥ सूर्य्ये ॥

च्। टाप् ॥ सेवन्त्याम्॥ शुक्ल
झिण्टयाम ॥ सर्पकङ्काल्याम्॥
राम्नायाम्॥ स्वर्णयूथ्याम्॥ त
रणीपुष्पे ॥ पीतदण्डोत्पलाया
म्॥
सहाचर। पु० पीतझिण्ट्याम्। क
टसारिका० कटसरैय्या० इ०भा०
प्र०। सहचरे॥ सहस्माचरति।
चर०। अच्॥
सहाय। पु० चक्रवाके॥ त्रि० सह
चारिणि। अनुचरे। अभिसरे॥
सहअयते० अयतिवा। अय०। इ
गतौवा। पचाद्यच्॥ राज्ञः सहा
यायथा। सहसायस्तथापुष्टा स्तत
त प्रतिमानिता। राज्ञासहाया
कर्त्तव्याः पृथिवींजेतुमिच्छतेति
मात्स्ये १८८ अध्याय.॥ यथोक्तं
देवीभागवतेव्यासेन। शक्ताऽयेत्थम
तिर्द्दत्ताहरिणाशवचातिनी। प्रविष्टो
यर्थविष्णुः सहाय' प्रत्यपद्यत
॥ यथापद्गिसहायोभूद्वासुदेव क
थञ्चन। समयेसुजन. सर्वः. स्वं
सारेस्मिन्नराधिप.॥ हैवेविमु
खताप्राप्तेनकोप्यस्तिसहायवान्।
पितामातातयाभार्याभ्राताचाथसहो
दर॥ सेवकोवापिमित्र वापुत्रस्त्री
वतथौरस:। प्रतिकूलेगतेदैवेनकोः
प्येतिसहायतामिति॥
सहायता। स्त्री० सहायौघे। सहाया
नासमूह। गजसहायाभ्यामिति
तल्। साहाय्ये॥ सहायस्यकर्म
भावोवा। तल्॥
सहायत्वम्। न० साहाय्ये॥
सहार। पु० आम्रवर्णे। रसाले॥
महाप्रलये॥ इतिवलायुध॥
सहारी। पुं० वर्णवृत्तान्तरे॥ आद्य
न्तकर्णा पञ्चान्तवर्णा। तच्चेक
धारौवाच्य सहारी॥ यथा। क
साद्विकेतुधर्मकेतुम्। वदेन्दुजा
नांभम्० इन्दीवराभम्॥
सहारोग्य।। त्रि० नीरुजि॥
सहित। त्रि० सहिते। सयुक्ते॥
सम्बीयतेस्म। डुधाञ्० क्त.। दधा
तेर्हि०। समीपितततयोर्वाक्षेप
॥ सम्यक्हिते॥ हितेनसहवर्त्त
माने॥
सहिता। त्रि० सोढरि। सहनशीले
॥ सहते। षह०। तृच्। तीषस
हेतिवेट्॥
सहिष्णु.। त्रि० सहने। क्षमरि।

तितिक्षौ क्षमिणि । सहनशी
ल. । यथा । सहते शीतोष्णादी
नि । सह॰ । अलङ्कृञिति॰ इ
ष्णुच् ॥

सहिष्णुता । स्त्री॰ क्षमायाम् ॥

सहुरिः । पु॰ आदित्ये । दिवाक
रे ॥ स्त्री॰ क्षितौ ॥ सहते । स
ह॰ असिसहिभ्यामुरिन् । सहुरि
सहनशीलइतिदिङ्भाष्यम ।

सहृदय । त्रि॰ प्रशस्तचित्ते । हृद्
योक्तौ ॥ सह हृदयेन । तेनसहे
तितुल्ययोगे । प्राशस्त्यमात्रस्तथा
त्वादत्र॰ प्रशस्तपरत्वं हृदयशब्द
स्य ॥

सहृल्लेखम् । न॰ विचिकित्सितान्ने
॥ यथा । विचिकित्सातुहृदये
स्मै यस्मिन्नुपजायते । सहृल्लेखन्तु
विज्ञेयं॰ पुरीषन्तु सभावतइति
प्रायश्चित्तविवेकः ॥

सहोक्तिः । स्त्री॰ अर्थालङ्कारविशेषे
॥ यथा । सासहोक्तिः सहार्थ
स्य बलादेकं द्विवाचकम । एकार्था
भिधायकमपि सहार्थबलादुभय
स्यावगमकं सासहोक्तिः ॥ यथा ।
सह॰ दिअस॰ णिसाहिं॰ दीहरा॰
सासदण्डा॰ सहमणिवलएहिं॰ बा
ष्पधारा॰ गलन्ति । सुहअ॰ तुह॰
विओए॰ वड्ढमाए॰ सीदन्तनु
लदाए॰ दुब्बला॰ जीविदासा ॥
श्वाससङ्घातन्तु । सहदिवसनिशा
भिर्दीर्घा . श्वासदण्डाः॰ सहम
णिवलयैर्बाष्पधारागलन्ति । सुभ
ग॰ तववियोगे॰ तस्याः॰ वर्द्धमान
शोकायाः॰ सह॰ तनुलतायाः॰
दुर्बला॰ जीविताशेति ॥ दीर्घत्वाना
यर्कप्रतीयमानं श्व । श्वासानांघन
प्रचुरतयादण्डत्वेनरूपणम्॰ का
र्श्यान्मणिवलयगलनम् । शोका
यादुर्बलत्वकादाचित्कत्वम् । श्वा
सदण्डादिगतदैर्घ्यस्यादिवसादि
वसनिशादिगतन्तु॰ सहार्थसाम
र्थ्यात्प्रतिपद्यते । अत्रसहोक्तिर
लङ्कारः । अपिच । सहोक्तिः
सहभावश्चेद्भासते जनरञ्जन. ।
दिगन्तमगमत्तस्यकीर्त्तिः प्रत्यर्थि
भि . सहेति ॥ लक्षणान्तरमपि
। सहार्थेनान्वयोयत्रभवेदतिशयो
क्तितः । कल्पितौपम्यपर्यन्तासा
सहोक्तिरिष्यतइति ॥

सहोटजः । पुं॰ मुनीनांपर्णशाला
याम् । पर्णोटजे ॥ यथा । मुनी
नामाश्रितानान्त्र्यापर्णोटजसहोट-
जाविति शब्दरत्नावली ॥

सहोढः । पुं॰ ऊढगर्भाजातपु
त्रविशेषे ॥ यथा । यागर्भिणीसंस्
क्रियते ज्ञाताज्ञातापिवासती । वो
ढुः सगर्भोभवतिसहोढइतिचो
च्यतइतिमनुः ॥ संस्क्रियते॰ प

रिणीयते । अट्टायादेशयम् ॥ स
हिासहेस । सह० । स समप्रसा
रणम् । गुण ॥ त्रि० ऊटेनसह
वर्त्तमाने ॥

सहोत्थ । पु० तृतीयभङ्गी ॥

सहोदर । पु० सहजे । सोदरेभ्रा
तरि ॥ सहउदरेणवर्त्तते । सोप
सर्जनस्य ॥ सह० समानम्० उ
दरयस्येतिवा ॥

सहोर । त्रि० साधुनि ॥ सहते ।
षह० । किशोराद्यश्चेतिओरन् ।

सह्य । पु० मलयाद्रिसमीपवर्त्ति
निशैलविशेषे । न० आरोग्ये ॥
साम्ये । त्रि० सहनीये । सोढ
व्ये । सुमधुरे ॥ सहते० सोढु
मर्होवा । षह० । शकिसहोश्च
तियत् ॥ गोदावरीभीमरथीकृष्णा
वेण्यादिकास्तथा । सह्यपादोद्भवा
नद्यः स्मृता पापभयापहा ॥

सा । स्त्री० लक्ष्म्याम् ॥ दुर्गायाम् ॥

सांयात्रिक । पु० पोतवणिजि । व
हित्रगामिनिवणिग्जने ॥ संयात्रा
द्वीपान्तरगमनायसम्भूययात्रा सा प्र
योजनमस्य । तदस्यप्रयोजनमिति
ठञ् ॥

सांयुगीन । त्रि० रणोत्सुके । युद्ध
कुशले ॥ सयुगेरणे साधुः । प्रति
जनादित्वात् खञ् ॥

सांराविणम् । अ० न० समन्तात्शब्दे
। शब्दकृद्ध्वनौ ॥ सहूतौ ॥

सांवत्सर । पु० गणके ॥ अथजात
मात्रमवराहमिहिर । तत्रसांवत्स
रोऽभिजात प्रियदर्शनो० विनी
तवेश० सत्यवागनसूयक० स
म० सुसंहितोपचितगात्रसन्धिरवि
कलश्चारु० चारुकरचरणनखनयनचिबु
कदशनश्रवणललाटभ्रूत्तमाङ्गोवपु
ष्मान्गम्भीरोदात्तघोष०प्रायश्शरी
राकारानुवर्त्तिनोहियस्यगुणादोषा
श्चभवन्ति ॥ १ ॥ तत्रगुणा शुचि
र्दक्ष प्रगल्भोवाग्मीप्रतिभानवा
न्देशकालवित्सात्त्विकोनपरिषद्भी
रु ; सहाध्यायिभिरनभिभवनीय .
कुशलोऽव्यसनीशान्तिकपौष्टिका-
भिचारस्नानविद्याभिज्ञोविबुधार्च
नव्रतोपवासनिरत ; स्वतन्त्राश्चर्य
प्रादितप्रभावपृष्टाऽभिध्याय्यन्यत्र
दैवात्ययाद्ग्रहगणितसंहिताहोरा
ग्रन्थधर्वेत्ता ॥ २ विशेषायाराज्ञां
सांवत्सरसूत्रंद्रष्टव्य ॥ संवत्सर
वेत्ति । तदधीतेतद्वेदेत्यण् ॥ न०
फले । पर्वणि ॥ सन्धिवेलादिषु०
संवत्सरात्फलपर्वणोरितिगणेविकी
र्णण ॥

सांवत्सरिक । त्रि० संवत्सरसम्बन्धि
नि । कालाट्ञितिग्रविकीव्वर्थे
व्वण ॥ संवत्सरव्याप्यभूते । प्रतिव
र्षकर्त्तव्येश्राद्धादिकर्मणि ॥

सांवर्त्तक । पुं॰ प्रलयाग्नौ ॥ प्रलय कर्त्तरि ॥

सांराहिक । पुं॰ नैयायिके ॥ स्त्री॰ अ॰ धर ॥

सांशयिक । त्रि॰ संशययुक्ते । संशयापन्नमानसे । सन्दिहाने ॥ संशयमापन्न । संशयमापन्नइतिठक् ॥

सांसर्गिक । त्रि॰ संसर्गनिमित्ते ॥

सांसारिक । त्रि॰ संसारसम्बन्धिनि ॥ सांसारिकसुखासक्त ब्रह्मज्ञानी तिवादिनम् । कर्मब्रह्मोभयभ्रष्ट तत्यजेदन्त्यज यथा ॥

सांसिद्धिक । पुं॰ अणूनांगुणविशेषे ॥ यथा । विशिष्टधर्मसंस्कारसमुद्दीपितचेतसाम् । गुण । सांसिद्धिको भातिदेवापायेपिपूर्ववत् ॥ विशिष्टै रिष्टापूर्त्तादिधर्मसंस्कारैराखम्यगुद्दीपितप्ररोचितचेतसायेषांतेषामपरदेव स योगि॰ यावद्देवापायेपिप्रागुक्तो गुण प्रकाशतेससांसिद्धिकोनाम-बोद्धव्य ॥ सम्यक्सिद्धि . संसिद्धि : । तत्रभव : । ठञ् ॥

सांसिद्धिकी । स्त्री॰ प्रकृतौ ॥ यथा योगिनांसिद्धानामणिमाद्यैश्वर्य-प्राप्तिप्रकृति : सांसिद्धिकीत्वा भाविकोसहजाप्रकृताचया । प्रकृति . रीतिविशेषास्वभावंमनकाति वा ॥

सांख्यानिक : । त्रि॰ समीचीनख्यानि व्यवहर्त्तरि ॥ संख्यानेव्यवहरति । कण्ठनाम्नेतिठक् ॥

संहितिक त्रि॰ संहिताभिज्ञे ॥ संहितामधीतेवेदवा । क्रतूक्थादीतिठक् ॥

साकम् । अ॰ सहार्थे ॥ सहवचनम् । अनप्रत्यय ॥ सहार्थेतस : । आभीक्ष्ण्येचानुशया ॥

साकमस्थाप्य । पु॰ यागविशेषे ॥ साकमश्वाप्येनयजेतपशुकाम : ॥

साकल्यम् । न॰ अशेषतायाम् ॥ सकलस्यभाव । ष्यञ् ॥

साकार । त्रि॰ आकारविशिष्टे ॥ यथासाकारमनन्तं विद्धीति । साकारापिनिराकारामायथायद्रूपिणी तिच ॥ अपिच । साकारञ्चनिराकार सगुणंनिर्गुणंप्रभुम् । सर्वाधारञ्च सर्वञ्चस्वेच्छारूपनमाम्यहमि'ति ॥

सकुरुण्ड : । पुं॰ वृक्षविशेषे । यन्त्रिमाली । कर्कुरमाली ॥

साकेतम् । न॰ अयोध्यायाम् ॥

साक्तुक : । पुं॰ यवे ॥ सक्तुसाधु : । गुडादिभ्यष्ठञ् ॥ न॰ सक्तूनां समूहे । अचित्तहस्तिधेनोष्ठक् ॥

साक्षर : । त्रि॰ अक्षरयुक्ते ॥

साक्षात् । अ॰ प्रत्यक्षे ॥ यथासाक्षाद्दृष्टा । सहअक्षैअ॰ सार्थः । तद्भवति । क्विप् ॥ तुल्ये ॥ यथासाक्षा

क्षमौ 'तुल्यार्थैः साक्षाच्छब्दयोगे।
तुल्यार्थैरतुलोपमाभ्यामिति। तृ
तीयाप्रयोगउचित ' । साक्षाल्लक्ष्मी
रित्यादिप्रथमान्तप्रयोगेतु। प्रत्यक्षा
र्थकएवप्रतिभाति । । लक्ष्म्यासा
क्षादिति। लक्ष्म्यातुल्येतिवत्।
लक्ष्मीसाक्षादितिभवतिच

साक्षात्कार । पु। इदानीमित्यमेविध्य
परोक्षज्ञाने ॥ प्रत्यक्षकरणे ॥

साक्षात्करणम् । क्रज्ञोघञ् ।।

साक्षी । त्रि। प्रत्यक्षदर्शी । द्रष्ट
रि । साक्षादिन्द्रियार्थसन्निकर्ष
विनैवेक्षतेपश्यतिप्रकाशयतीति।
निर्विकारि। आत्मनि ।। स्वप्रकाश
ज्ञानमात्रस्वरूपोप्यात्माऽविद्योपहि
त, सन्। साक्षीत्युच्यते । यथा
हुवार्त्तिककारा । नत्तस्याविक्रि
याद्‌' द्योसाक्षिताकारिकारिण
धीविक्रियासहस्राणांसाक्ष्यतोऽहमवि
क्रियइति ।। यथा । नेनस्वरूपबो
धेनपश्यतिसर्वमितिसाक्षी । इति
व्यवधानमन्तरेणस्वाध्यस्तं सर्वं स्वरू
पचैतन्येनपश्यतीत्यर्थः । साक्षाद्
द्रष्टरिसंज्ञायामिति। इनि ॥ शून्य
वादिभिरपिशून्यसिद्धयेसाक्ष्यभ्युपे
यः। किमुवक्तव्यमितरैरित्याह । प्र
त्यक्साक्ष्यतिरेकेणनाभावोपिप्रसि
ध्यति । किमुभावोजगत्यस्मिन्सा
क्षोचानन्यसिद्धिकः। अभावोपि।
शून्यमपीत्यर्थः ॥ पुरेपौरानपश्य
न्नरयुवतिनामाकृतिमयान्सुवेशा
न्स्वर्णालङ्करणकलितांश्चित्रसदृशा
न् । स्वयंसाक्षीद्रष्टेत्यपिचकलयं
स्ते ' सहरमन्मुनिर्व्यामोहं भज
ति गुरुदीक्षाक्षततम ॥ साक्षाद्
द्रष्टरि । सर्वप्राणिनांसाक्षाच्छुभा
शुभद्रष्टरि ॥ चेतनत्वेनाविषय
त्वेनचसाक्षित्वंद्रष्टृत्वञ्च । चेतनो
हिद्रष्टाभवति । यस्मैप्रदर्श्यतेवि
षय, ससाक्षी ॥ तथालोके। अर्थि
प्रत्यर्थिनौ। विवादविषयंसाक्षि
णेदर्शयतः । एवंप्रकृतिरपिस्वच
रितंविषयंपुरुषायदर्शयतीतिपुरु
षः साक्षी । नचाचेतनोवा। वि
षयोवा। शक्योविषयं दर्शयितुमि
ति। चैतन्यादविषयत्वाच्चभवति
साक्षी । अतएवद्रष्टापिभवतीति
सांख्यविद् ॥

साक्ष्यम् । न। साक्षिकर्म्मणि ।। यथा
। समक्षदर्शनात्साक्ष्यंश्रवणाच्चैव
सिध्यतीतिमनु ।।

सांख्यम् । न। सख्ये ।

सागर'। पुं। समुद्रे । अब्धौ । सग
रपुत्रैः खातेजलाश्रये ॥ सगरस्य
रयमं। सगरेणावतारितत्वा
त् । तस्येदमित्यण ॥ चौरादादि
त्वण्, उपमयासागरव्यपदेशइतिवृद्
धा ॥ मृगविशेषे ॥ दशपद्मस

ङ्ख्यायाम् ॥

सागरगा । स्त्री॰ नद्याम् ॥

सागरगामी । त्रि॰ सिन्धुगे । समुद्रयायिनि ॥

सागरगामिनी । स्त्री॰ नद्याम् ॥ सूक्ष्मैलायां ॥

सागरनेमि : ।) पुं॰
सागरमेखला :) स्त्री॰ पृथिव्याम् ॥

सागरोनेमिर्मेखलावायस्या ॥

सागरानूप । पु॰ समुद्रतीरप्रदेशे ॥ सागरस्यानूप : ॥

सागराम्बरा । स्त्री॰ धरायाम् । पृथिव्याम् ॥ सागरोऽम्बरंवसनम् यस्या ॥

सागरालय : पुं॰ अप्पतौ । वरुणे ॥

सागरोत्थम् न॰ समुद्रलवणे । त्रि॰ सिंधुजे ॥

सागुरु : । पुं॰ भिंडपायां ॥

साग्र । त्रि॰ अग्रेणसहिते ॥

साङ्कर्य्यम् । न॰ सङ्करतायाम् ॥ जातिसाङ्कर्यम्॰पङ्क्तिसाङ्कर्यमिति । तत्रपङ्क्तिसाङ्कर्यदोषाय-था । नसंवसेत्पतितैर्नचाण्डालैर्नपुक्कसैः । नमूर्खैर्नावलिप्तैश्चनान्त्यैर्नान्त्यावसायिभिः ॥ एकशय्यासनपङ्क्तिभाण्डपक्वान्नमिश्रणम् । याजनाध्यापनेयोनिस्तथैवसहभो-जनम् ॥ सहाध्यायस्तुदशमः सह-याजनमेवच । एकादशसमुद्दिष्टा-दोषाः साङ्कर्यसंज्ञिताः ॥ समीपेवाप्यवस्थानात्पापंसङ्क्रमतेनृणाम् । तस्मात्सर्वप्रयत्नेनसाङ्कर्यंपरिवर्जयेत् ॥ पङ्क्तिसाङ्कर्यदोषवारणोपायायथा । एकपङ्क्त्युपविष्टायेनस्पृशन्तिपरस्परम् । भस्मनाकृतमर्यादानतेषांसङ्करोभवेत् ॥ अग्निनाभस्मनावैवसलिलेनविशेषतः । द्वारेणस्तम्भमार्गेणपङ्क्तिर्भिद्यतइति कूर्मे १५ अध्याय : ॥

साङ्काश्यम् । न॰ नगरविशेषे ॥ सङ्काशेननिर्वृत्तंनगरम् । सङ्काशादिभ्योण्य :

साङ्कृति : । पुं॰ मुनिविशेषे । वैयाघ्रपद्यगोत्रप्रवरे ।

साङ्ख्य । पु॰ कपिलमुनिकृतदर्शनविद्याविशेषे ॥ सङ्ख्यांप्रकुर्वतेचैवप्रकृतिंचप्रचक्षते । तत्त्वानिचतुर्विंशत्तेनसाङ्ख्याः प्रकीर्तिताः ॥ औपनिषदेपुरुषे ॥ सम्यक्ख्यायते॰ सर्वोपाधिशून्यतया प्रतिपाद्यते॰ परमात्मतत्त्वमनयेति॰ सङ्ख्या॰ उपनिषद्॰ तयैवतात्पर्यपरिसमाप्त्याप्रतिपाद्यतेय . साङ्ख्य ः । सचौपनिषदः पुरुषः ॥ सङ्ख्यासे । सङ्ख्यासम्यगात्मबुद्धिः॰ तांवेत्तीति॰ ज्ञानान्तरङ्गसाधनतयाससाङ्ख्यः॰ सन्न्यासः ॥ न॰ वेदान्तशास्त्रे ॥ निरतिशयपुरुषार्थप्राप्त्यर्थंसर्वा

नर्थविवरणं सङ्ख्यातव्या जीवो ब्रह्म तयोरैक्यं तद्बोधोपयोगिनश्चश्रवणादयः पदार्थाः । ते सङ्ख्यायन्ते व्युत्पाद्यन्तेऽस्मिन् ॥ आत्मज्ञाने ॥ शुद्धात्मतत्त्वविज्ञानं साङ्ख्यमित्यभिधीयते इति व्यासस्मृतिः ॥ ज्ञानशास्त्रे षड्दर्शनान्तर्गतदर्शनविशेषे । कापिले ॥ पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम् । प्रोवाचासुरये साङ्ख्यं तत्त्वग्रामविनिर्णयम् ॥ इति श्रीभागवतम् ॥ साङ्ख्यं सङ्ख्यात्मकत्वाच्च कपिलादिभिरुच्यते । इति मत्स्यपुराणम् ॥ सम्यक् ख्यायते प्रकाश्यते वस्तुतत्त्वमनयेति सङ्ख्या सम्यग्ज्ञानम् । तस्यां प्रकाशमानमात्मतत्त्वं साङ्ख्यमिति श्रीधरस्वामी ॥ अपि चाहुः । साङ्ख्यं कपिलमुनिना संसारविमुक्तिकारणं प्रोक्तम् । एताः सप्ततिरार्याभाष्यं चात्र गौडपादकृतम् ॥ एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ । आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम् । शिष्यपरम्परयागतमीश्वरकृष्णेन चैतदार्याभिः । संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ॥ सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य । आख्यायिकाविरहिताः परवाद-

विवर्जिताश्चापि ॥ इति साङ्ख्यप्रवचनभाष्यम् ॥ अस्याध्ययने प्रारम्भशुभमाह काशीदासो यथा । स्निग्धोऽश्वी युग्मभे सद्भयशालां समारभेत साङ्ख्यशास्त्रादिशास्त्रम् । मृदुक्षिप्रध्रुवभे ध्रुवयुक्ते दिने चैवं तद्बोधसिद्धिं तनोतीति ॥

साङ्ख्यमतम् । न । षष्टितन्त्रादौ ॥ साङ्ख्यानां मतम् ॥ यथा । त्रिगुणं यत्प्रधानं तत्पुरुषार्थेन हेतुना । प्रवर्त्तते वासनात्वक्तृ भि । सच्चेतिकापिलाः ॥ नान्यत्कारणमेवात्मा किन्त्वन्यः सर्वगतः स्वप्रकाशः स्वस्वभोगापवर्गानुगुण्येन हेतुना यत्प्रधानमस्ति तदात्मनैव स्थितमन्तःकरणं तत् सधर्मकं प्रवर्त्तते तदेवस्तुत्यावासनात्वेनोच्यत इति वदन्तीत्यर्थः ॥

साङ्ख्ययोगः । पुं । चिन्तनविशेषे । निदिध्यासनपूर्वभाविनाश्रवणमननरूपेण नित्यानित्यविवेकादिपूर्वकेण इमे गुणत्रयपरिणामा अनात्मनः सर्वे मिथ्याभूताः तत्साक्षीभूतो नित्यो विमुक्तश्चिदाकारः सत्यः समस्तजडसम्बन्धशून्य आत्मा त्वहमेव वेदान्तवाक्यविचारजन्ये चिन्तने ॥

साङ्गः । त्रि । अङ्गसहिते ॥ अङ्गेन अङ्गैर्वा सहितः ॥

साङ्कलिक । त्रि॰ सीवोपु,विविधप रिहासकथादिभि सङ्कल्पाद्व्यथि गि । सङ्गतीभवे ॥

साङ्गम । पु॰ सङ्गमे ॥

साङ्गुष्ठा । स्त्री॰ गुञ्जायाम् ॥

साङ्गोपाङ्ग । त्रि॰ सम्पूर्णे ॥ अङ्गोपाङ्गै सहित ॥

साङ्ग्रहसूत्रिक । त्रि॰ सङ्ग्रहसूत्राभिज्ञे ॥ सङ्ग्रहसूत्रमधीते॰ वेद वा । क्रतूक्थादिसूत्रान्ताट्ठक् ॥

साङ्घिक । त्रि॰ सङ्घाभिज्ञे ॥ उक्थादित्वात् ठक् ॥

साङ्ग्रामिक । त्रि॰ सङ्ग्रामोपयोगिरथादौ ॥ सङ्ग्रामे साधु ॥ गुडादिभ्यष्ठञ् ॥

साङ्कुटिक । त्रि॰ सङ्कुटज्ञे ॥ सङ्कुटं वेद । उक्थादित्वठक् ॥

साङ्ग्रामिक । त्रि॰ मारणकर्मे । अस्मभावात् पाञ्चजन्यजले ॥ सङ्ग्रामे साधु । गुडादिभ्यष्ठञ् ॥

साचि । अ॰ वक्रे । तिरोऽर्थे । तिर्यगर्थे । सचनम् । अवसअथार्थे । इञजादिभ्यः ॥

साचिपाटिका । स्त्री॰ श्वेतपुनर्नवायाम् ॥

साचिव्यम् । न॰ साहाय्ये ॥ सचिवस्य कर्म भावो वा । ष्यञ् ॥

साञ्जन । पु॰ कृकलासे ॥

साटोप । त्रि॰ ससम्भ्रमे ॥

साट्ट । त्रि॰ । साम्रे ॥

सातत्यम् । न॰ अविच्छिन्नतयावर्त्तमाने । सततस्यभाव । ष्यञ् ॥

सातवाहन । पुं॰ शालिवाहननृपे ॥

साति । स्त्री॰ दाने ॥ अवसाने । समापने समनम् ॰ सामञ्च । प्रयादाने॰ पीतकर्म्मविचक्तिन् । ऊतियूतीत्यादिना॰ स्यतेरोत्वाभावो निपात्यते । मनोतिर्वा॰ जनसनखनात्म । सनुताद्वा । क्तिच् क्तौ चेति क्तिच् ॥

सातिसार । त्रि॰ अतिसाररोगयुक्ते । अतिसारविशिष्टे ॥ सह अतिसारेण वर्त्तते ॥

सातीनक । पुं॰ कलाये । सतीनकस्यैव । प्रज्ञाद्यण् ॥

सात्त्र । त्रि॰ छिन्ने ॥

सात्य । त्रि॰ सत्ययोग्ये । सत्ये योग्यमस्य । छन्दादिभ्योऽण् । स्त्रियां॰ तत्स्त्रीत्विषियपीति॰ ङीप्॰ तजसद्धितपर्तिपदीपि॰ सातो॰ । सांचो॰ कु॰ भा॰ ॥

सात्यकि । पु॰ पार्थशिष्ये । युयुधाने ॥

सात्यमत: ।) पुं॰ माठरे व्यास
सात्यमतेय: ।)

शायणे । वेदव्यासे ।

सात्वान् । त्रि॰ उपासके । भगवता ॥ सच्छब्देन॰ सत्वमस्ति अंग

वान् । सत्त्वमाश्रयतयाविद्यतेयस्य । मतुप् । खार्थेऽण् । इद्धि । अर्न्त्वाद्दणोऽग्रणम् । यथा । सूतजानासिभद्रन्तेभगवान्सात्त्वतांपतिरिति ॥ सात्त्वत नामतन्त्रम् । तत्करोतितदाचष्टइतिणिचि कृते । क्विप् चेतिक्विप्प्रत्ययेणेरनिटीतिणिलोपेचकृतेपदं सात्वदिति सात्त्वतांपतिरितिभागभाष्यम ॥ तथाच । सात्वतांसात्वततन्त्रमाचक्षाणानांभक्तानांपति पालकइतिव्याख्येयम् ॥

सात्त्वत । पुं । कामपाले । मधुप्रिये । बलदेवे । रामे । हरौ । हेमशङ्के । श्रीकृष्णे ॥ इत्यादि । उपासके ॥ भगवद्भक्ते ॥ यथोक्तपाद्मे । उत्तरखण्डे । सत्त्वंसतत्त्वं श्रयस त्त्वगुणसेवितश्रेयम । येनानन्यत्वेन मनसासात्वत समुदाहृत ॥ विश्वायकाम्यकर्मादीन्भजेदेकाकिनहरिम् । सत्यसतत्त्वगुणोपेतोभक्त्यातसात्वतंविदु ॥ मुकुन्दपादसेवा यांतन्नामश्रवणेपिच । कीर्त्तनेचरतीभक्तोनाम्न स्यात्सुरार्चा हरे । अन्यनाचनयोभक्तिर्न दास्यसख्यादि । रतिरात्मापर्णेयस्य इढा नत्रश्रसात्वत ॥ इति ८८ अध्याय ॥ सततत्वच्छन्दात्खार्थेण । प्र ख्यातय मिजम्मनि । सुवस्त्रावा

यां ॥ योद्वे ॥ सत्त्वतीपत्यस्मुमान् उत्सादिभ्योऽञ् ॥ पु भूम्नि । देशविशेषे ॥ यथा । यदवस्तुदयोहौ । ग्रु । सात्वता कुकुराध्वनी । इतिविकाण्डशेष ॥ न । पञ्चरात्रतन्त्रे ॥

सात्त्वततन्त्रम् । न । वैष्णवतन्त्रे ॥ पञ्चरात्रागमे ॥ सात्त्वतानाम् भगवदुपासकानांतन्त्रम् ॥

सात्त्वतसंहिता । स्त्री । महापुराणेश्रीभागवते ॥ यस्यां वैश्रूयमाणायांकृष्णेपरमपूरुषे । भक्तिरुत्पद्यतेपुंस शोकमोहभयापहा ॥

सात्त्वती स्त्री । शिशुपालमातरि । कृष्णस्यपितृष्वसरि । सात्त्वतोऽपत्यस्त्री । उत्सादिभ्योञ् । ङीप् ॥ न ब्यहयन्तरे ॥

सात्त्वतीसूनु । पुं । चैद्ये । शिशुपाले ॥

सात्त्विक । पुं । ब्रह्मणि । विधातरि ॥ विविधभावान्तर्गतभावविशेषे ॥ तल्लक्षण यथा । सत्त्वोत्कृष्टमनसियेप्रभवन्तिभावास्तेसात्त्विकाइतिविदुर्मनिपुङ्गवास्ते ॥ ते यथा । स्तम्भ : स्वेदोऽथरोमाञ्चः स्वरभङ्गोथवेपथुः । वैवर्ण्यमश्रुप्रलयइत्यष्टौसात्त्विकागुणा । प्रलयोमूर्छा ॥ मतान्तरे ॥ यथा । चपलताकाशिवर्यवोविधिहसोय

Accession No.......
Shantarakshita Library
Tibetan Institute, Sarnath

कृष्यते । यद्यन्मेवेतिमन समा
भावससात्त्विक ॥ भावप्रभेदे ।
यथा । आयुः सत्त्वबलारोग्यसु
खप्रीतिविवर्द्धनाः । रस्याः स्नि
ग्धाः स्थिरा हृद्या आहाराः सात्त्वि
कप्रियाः ॥ सत्त्वगुणप्राधान्येन
स्थित ॥ भगर्ष० ॥ त्रि० स
त्त्वगुणाढ्ये ॥ सत्त्वेन मानेन वा
निर्वृत्त ॥ तेनानिर्वृत्तमिति ठञ् ॥
सत्त्वभवे । अध्यात्मादित्वा-
ट्ठञ् वा ॥

सात्त्विकधनम् । न० शुद्धधने ॥ य
था । श्रुतशौर्यतपःकन्याशिष्य
याज्यान्वयागतम् । धनं सप्तविधं
शुद्धं मुनिभिः समुदाहृतम् ॥
श्रुतेनाध्ययनेन शौर्येण जयादिना
कन्यागतञ्च कन्यया सह गतं श्वशु
रादिलब्धम् शिष्यगतं गुरुदक्षि
णादिना याज्यागतं आर्त्विज्यलब्ध
म् अन्वयागतं दायादिभ्यो लब्ध
म् शुद्धं सात्त्विकमित्यर्थः ॥

सात्त्विकी । स्त्री० दुर्गायाम् । पूजा
विशेषे ॥ यथा । शारदीया महा
पूजा त्रिविधा परिगीयते । सात्त्वि
की राजसी चैव तामसी चेति तच्छृणु ।
सात्त्विकी जपयज्ञाद्यैर्नैवेद्यैश्च नि
रामिषैः । माहात्म्यं भगवत्याश्च
पुराणादिषु कीर्त्तितम् । पाठस्त
स्य जपः प्रोक्तः पठेद्देवीमनास्तथि

ति ॥ देवीपुराणे ॥

साद । पु० सन्नतायाम् । अवसा
दे ॥ सदनम् । षद्लृ० । घञ् ॥
कार्श्ये । क्षयत्वे ॥ यथा । शरीर
सादादसमग्रभूषणा तिरघु ॥

सादनम् । न० गृहे । सदने । स्वयं
प्रयत्नात् सदिः ल्युट् ॥ मध्यमे ॥

सादनी । स्त्री० कटुकायाम् । रक्ता
ङ्ग्याम् ॥ ङीप् ॥

सादि । पु० सारथौ ॥ शीघ्र । शा
कृषरि । सदति । षद्लृ० । वसि
वपियजिराजिव्रजिसदिहनिवाशि
वादिवारिभ्य इञ् ॥ त्रि० वादि
युते ॥

सादित । त्रि० सन्नते । विध्वस्ती
कृते ॥

सादी । पुं० अश्वारोहे । अश्ववार०
शू० भा० प्र० । मातङ्गारोहे ॥ रथा
रोहे ॥ अवश्य सीदति सादयति
वा । षद्लृ० । आवश्यके णि
नि । यथादिर्वा ॥

सादृश्यम् । न० उपमायाम् । तुल्य
त्वे । सदृशत्वे । तद्भिन्नत्वे स
ति तद्गतभूयोधर्म्मवत्त्वे ॥ यथा
चन्द्रभिन्नत्वे सति चन्द्रगताह्लाद
कत्वादिमत्त्वं मुखे चन्द्रसादृश्यम् । त
स्य त्रिविधाः । तमन्वयानुमा
नतश्चोपनतं निषिध्यते । तथा च
मुकरीतीति यत्काः सादृश्यवाच

श्वा पूतिदमुडी ॥ सहस्रस्वभाव । गुणवचनब्राह्मणादिभ्य ष्यञ् । षित्वान्ङीष् । साहस्री ॥ ष्यञ् । बिल्वकादीकारोपलुक्मि तिथमनसूत्रात् कल्पक ॥

साहान्तः । पु० राद्धान्ते ।

साद्यस्कः । पु० सोमयागविशेषे ॥

साधकः । त्रि० साधनकर्त्तरि । निष्पादके ॥ अपराधानुष्ठातरि ॥ साध्नोति । साधसंसिद्धौ ण्वुल् ॥ पु० पुत्रजीवद्रुमे ॥ वज्रतरोयाम् ॥

साधकतमम् । न० करणे । क्रियासिद्धौ प्रकृष्टोपकारके ॥ कर्त्तरि ॥ त्रि० अतिशयसाधके । अतिशायने तमप् ॥ प्रकृष्टं साधकं साधकतमम् ॥

साधनम् । न० करणकारके ॥ साध्यते कार्यं निष्पाद्यतेऽनेन । साध० ल्युट् ॥ मृतसंस्कारे । सैन्ये ॥ सिद्धौषधौ ॥ गतौ ॥ निर्वर्त्तने । निवृत्तौ ॥ उपाये ॥ साध्यमुद्दिश्य साधनं निरूप्यते ॥ मेढ्रे ॥ दापने ॥ अनुगमे ॥ धने ॥ मारणे । वधे । प्रमाणे ॥ सैन्ये ॥ मोहने ॥ जवे । वेगे ॥ मन्त्रसिद्धिकरणे ॥ सिद्धौ ॥ मोक्षसाधकधर्मविशेषे । साधनचतुष्टये । यथा । नित्यानित्यवस्तुविवेकः १ इहामुत्रार्थफलभोगविरागः २ शमदमादिषट्कसम्पत्तिः ३ मुमुक्षुत्वञ्चेति ४ ॥ साध० । भावकर्मकरणादौ ल्युट् ॥ साधयतिवा । नन्द्यादित्वाल्ल्युः ॥ तत्रसि । यथा । तपोभिः प्राप्यते भोगो नासाध्यं हि तपस्यतः । दुर्गत्वञ्च कीर्त्यते सति साधने अल्पसाधनैरधिकारम्भो न सुकरः ॥

साधननिर्मुक्तः । त्रि० साधनाभ्यासरहिते ॥

साधना । स्त्री० आराधनायाम् ॥

साधनाव्यापकत्वम् । न० साधनवन्निष्ठात्यन्ताभावप्रतियोगितायाम् ॥

साधनीयः । त्रि० साध्ये ॥

साधन्तः । त्रि० भिक्षुके ॥ साध्नोति साध० तृभूवहिवसोभ्यादिना० झच्० षित् ॥

साधयन्ती । स्त्री० मांसिकायाम् ॥

साधर्म्यम् । न० समानधर्मत्वे ॥

साधर्म्यवैधर्म्यसमौ । पुं० न्यायमते जातिविशेषलक्षणे ॥ यथाहगोतमः । साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ ॥ २ ॥ उपसंहारे साध्यस्योपसंहरणे वादिनाकृते तद्धर्मस्य साध्यरूपधर्मस्य यो विपर्ययो व्यतिरेकस्तस्य साधर्म्यवैधर्म्याभ्यां केवलाभ्यां व्याप्त्यनपेक्षाभ्यामुपपादनं ताभ्यां हेतुभ्यां साधर्म्यवैधर्म्यसमावुच्येते । तदयमर्थः ।

साधारणः

वादिना । अन्वयेन व्यतिरेकेण वा साध्ये साधिते प्रतिवादिना साधर्म्यमात्रप्रवृत्तहेतुना तदभावापादनं साधर्म्यसमा । वैधर्म्यमात्रप्रवृत्तहेतुना तदभावापादनं वैधर्म्यसमा । तत्र साधर्म्यसमा यथा । शब्दोऽनित्यः कृतकत्वात् घटवत् व्यतिरेके व्योमवत् इत्युपसंहृते नैतदेवम् यद्यनित्यघटसाधर्म्यादनित्यः आकाशवैधर्म्याद्वाऽनित्यः स्यात् नित्याकाशसाधर्म्यादमूर्त्तत्वान्नित्यः स्यात् विशेषाभावात् । वैधर्म्यसमा यथा । शब्दोऽनित्यः कृतकत्वात् घटवत् आकाशवदिति स्थापनायाम् अनित्यघटवैधर्म्यादमूर्त्तत्वान्नित्यः स्यात् विशेषाभावात् इति । अत्र साधर्म्यस्य मात्र वैधर्म्यस्य मात्र आगमापायिका मिथ्याऽभिमानात् सत्प्रतिपक्षदेशनाभासो वैचित्र्यं जातित्वादेशनाभासोऽतिप्रसङ्गितौ तु अनैकान्तिकपक्षयोः सत्प्रतिपक्षतरम् । एकान्ते साध्यसाधकत्वाभावात् ॥

साधारणा, स्त्री, वस्त्रविशेषः । स तु पीतवर्णः यथा । तेषां वर्णाभिवेष्टं पीतवर्णं वा चन्द्रनीलिनी । निषेधपट्टवासरारामः सर्वसाधारणी प्रिये ॥ ४४ ॥ इति पाद्मोत्तरखण्डे । यथा । नियम्य कुन्तलाग्रं यदा ...

साधारणं, क्लीं, । तस्मिन्देशे दृष्टं तत्तु साधारणं स्मृतम् ॥ साधारणाम्बु मधुरं दीपनं शीतलं लघु । तर्पणं रोचनं तृष्णादाहत्रिदोषशमनं प्रयुतम् ॥ त्रि, समानम् । अनेकसम्बन्धि कस्मिन् । सामान्यम् ॥ अनेकस्वामिकवस्तुनि । यथा । साधारणं समाश्रित्य यत्किञ्चिद्वाहनायुधम् । शौर्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः ॥ सर्वे तत्र इतरसम्बन्धिनि ॥ सर्वसाधारणं मन्ते । वापसवर्णं न ये ऽपि सभाव । आन्वीक्षसाधारणान्यपि तिष्ठयोऽन्ये ॥ साधयत्सिद्धि पारणो भवति यथा ॥ स्त्रियां साधारणी ॥ हेत्वाभासविशेषे ॥ यथा । अनैकान्तिको विरुद्धश्चासिद्धः प्रतिपक्षितः । कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा ॥ आद्यः साधारणस्तु स्यादसाधारणकोऽपरः । तथैवानुपसंहारी त्रिधानैकान्तिको भवेत् ॥ यः सपक्षे विपक्षे च भवेत् साधारणस्तु सः । यस्तूभयस्मादृव्यावृत्तः स त्वसाधारणो मतः ॥ तथैवानुपसंहारी केवलान्वयिपक्षकः ॥

साधारणत्वम्, क्लीं, असाधारणभिन्नत्वम् ॥

साधारणधर्म्मः, पुं, चतुर्वर्ण्य

सर्व्वे । यथा । प्रजनार्थं स्त्रियः सृष्टाः सन्तानार्थंच मानवाः । तस्मात्साधारणोधर्म्मः श्रुतौपत्न्या सहोदितः ॥ अपिच । अहिंसा सत्यमस्तेयं शौचमिन्द्रियसंयमः । एतं सामासिकं धर्म्मं चातुर्व्वर्ण्येऽब्रवीन्मनुः ॥ वामनः ॥ क्षमासत्यदमोदानमसर्व्वेषांधर्मसाधनमिति ॥ आत्मज्ञानतितिक्षाद्यधर्म्मः साधारणोनृपेतिच ॥

साधारणस्त्री० । स्त्री० वेश्यायाम् ॥

साधारणानैकान्तिक । पुं० हेत्वाभासान्तरे । साध्याभाववद्वृत्तौ ॥ यथा पर्व्वतोऽग्निमान् प्रमेयत्वादिति । प्रमेयत्वस्यवह्न्यभाववतिह्रदे विद्यमानत्वात् ॥ साध्यवदन्यवृत्तौ । यथा । शब्दोनित्यः शब्दत्वात् अयंविरुद्धधर्मदोषः । उपधेयसङ्करेऽप्युपाधेरसङ्करात् ॥

साधारणी । स्त्री० सदृशायाम् । समानायाम् ॥ कुञ्चिकायामितिहेमचन्द्रः ॥

साधारण्यम् । न० साम्ये ॥ कुञ्चिकायाम् । इतिहेमचन्द्र ॥

साधारिका । स्त्री० घटिकायाम् । नाडिकायां ॥

साधिका । स्त्री० साधनकर्त्र्याम् ॥ सुषुप्तौ ॥ सुषुप्तुसाधकेतिहेमः ॥

साधित । त्रि० दापिते । धनादिना यत्नेकृते । धनादिप्रदापिते ॥ प्रदापितधने ॥ साध्यतेस्म । साध० । क्त ॥ सिद्ध ॥

साधिमा । पुं० साधुत्वे ॥ साधोर्भावः । इमनिच् ॥

साधिष्ठ । त्रि० अतिशयेनबाढे अतिदृढे । साध्ये ॥ न्याय्ये । शोभनतमे । अयमेषामतिशयेनबाढः । अतिशायनेतमबिष्ठनाविति ष्ठन् । अन्तिकबाढयोर्नेदसाधौ ॥

साधिष्ठान । त्रि० कोषे । अधिष्ठानेन कूटस्थचैतन्येनसहिते ।

साधीयान् । त्रि० अतिबाढे ॥ अतिशोभने । अतिसाधौ ॥ अयमनयोरतिशयितोबाढ साधुर्वा । द्विवचनेतीयसुन् । अन्तिकबाढयोरिति बाढशब्दस्यसाधादेशः । टेरिति साधीष्टिलोपः ॥

साधु । त्रि० उत्तमकुलोत्पन्ने । अस्य पर्यायायथा । महाकुलकुलीनार्य्य सभ्यसज्जनसाधवइति । वार्द्धुषिके ॥ चारौ । शोभने । मनोज्ञे । स्वभावसुन्दरे ॥ प्रवीणे । शौर्ये ॥ स्वधर्म्मवर्त्तिनि ॥ अपकारिष्वप्युपकारशीले ॥ अद्रोहिणि ॥ पुण्यकारिणि । वेदमार्गस्थे ॥ शास्त्रविहितकारिणि ॥ सर्व्वहिते ॥ नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसम्पन्ने मुमुक्षौ ॥ कुलधर्माश्रिते ॥

सर्वपूज्ये । यथा । मार्त्तण्डेवैष्ण वे . शैवे : सौरे गाणपते रपि । को सधर्म्माश्रित : साधु : पूजनीयो ऽतिवत्सल ॥ साध्नोतिपरकार्य्यम्० धर्म्मम्-अर्थम्० कामम्० मोक्षं वा । साध० । कृवापिव्युण् । पुं० व्याकरणेऽप्रतिपादितेशब्देऽपभ्रं- शे ॥ यद्यपिसाधुर्न्नभाषितीति- श्रूयतेतथापिफलमिहैवाख्यं त- स्मिन्नादेशेऽइहविधि ' कल्प्यते० साधूनिवभाषितमापश्यन्त्यानिति । मनोहीन : स्वरतोवर्णतोवेतिद- र्शनात् ॥ मुनौ ॥ जिने ॥

साधुज । वि० उत्तमकुलोद्भवे । साधौ ॥

साधुधी . । स्त्री० वरवत्सशायाम् । श्वश्रूम् ॥ सुन्दरबुद्धौ ॥ वि० तद्वति । साध्वीधीर्यस्या : ॥ धर्म्मं धारयेन्नबुद्धीतिवर्गे ॥

साधुनिन्दित : । त्रि० प्रचार्य्ये । सा धुभिर्निन्दिते । साध्वसम्मतइतियाव त् ॥

साधुपुष्पम् । न० प्रपौण्डरीके । स्थ लपद्मे । साधुवतत्पुष्पञ्च । उत्त मप्रसूने ॥

साधुभाव . । पुं० असाधुत्वमन्छायां साधुत्वे ॥

साधुवाद : । पुं० सतामनुमोदने ॥ साधुवादोपलक्षितइतियथा ॥ सा धोरवादे ॥

साधुवाच । पुं० विनीतार्थे ॥ सा धुवासौवाक्च ॥

साधुवाही । पुं० विनीताश्वे । सुवि निवितुरगे । साधुवहनशील : । वह० । सुपीतिणिनि : ॥ वि० शो भनाश्वयुक्ते ॥

साधुवृक्ष । पुं० कदम्बद्रुमे ॥ वरवृ क्षे ॥ साधुश्चासौवृक्षश्च ॥ मनो ज्ञतरौ ॥

साधुवृत्त . । वि० सुचरिते । साधू नामिवसमानसुवृत्त : आचारसुव र्त्तनम् ॥

साधुवृत्ति । स्त्री० उत्तमजीविकाया म् ॥ सद्व्यवहारे ॥ सुन्दरवर्त्तने ॥ साध्वीचासौवृत्तिश्च ॥ साधवोवृत्ति र्यो ॥ वि० तद्वति ॥ साध्वीवृत्ति र्यस्य ॥

साधुसङ्गम : । पुं० मनोनियमक्री यायविशेषे । यस्तुवैधितमपितत्त्व मसम्यग् व्यतेे० यैवापिस्मरति०त यो : साधुसङ्गमएवोपाय : । साध वोविदुष : पुनर्यौनियन्ति० स्मारय न्तिच ॥

साधुसमागम : । पुं० साधुसङ्गे । यथा । त्यजदुर्ज्जनसंसर्गं भजसाधु समागमम् । कुरुपुण्यमहोरात्रंस्मर नित्यमनित्यतामिति ॥

साधूतम् । न० बहिंसक चासौ ॥ य

प्रशीष्याम् ॥ चातपत्रे ॥ दूष्यम घपाल . । पाठान्तरे॰ साधुतम पि ॥

साध्य : । पुं॰ गणदेवताविशेषे ॥ साध्य सिद्धि । साध॰ । कर्तरि यत्॰ इतिभावेप्यत् । साऽस्य स । अर्श आद्यच् । साध्याद्दश विख्याता . पुराणे पुरातनाः . । तेयथा । मनोमन्ता प्राणश्चनरो यानोऽवस्तथा । नारायणो नरश्चैव सप्तिश्चिन्तथा विभुः ॥ प्रभुश्चाद शैवै तेसाध्या . प्रोक्ता पुरातनैरिति ॥ विष्णुभाषामृतं तैयोगविशेषे ॥ तत्रोत्पन्नफल यथा । असाध्यसा ध्य : शिवसाध्यजात : शूरोतिधी रोविजितारिपक्ष ' । बुद्ध्याशुभा र्थं परिसाधितार्थं . परक्षतार्थं सुतरांविनीत . ॥ शरे । कामे ॥ देवे । सुरे ॥ त्रि॰ साधनीये ॥ क्लौपाय : सुखोपायोदिद्विविध . साध्यउच्यते ॥ साधनाभिमते ॥ साध्यतेऽनेन । अनुपद । यथा । प्रतिज्ञादोषनिर्मुक्तं साध्यंसत्कार णान्वितम् । निश्चित लोकसिद्धश्च पक्ष पक्षविदोविदु . ॥ साध्यंसाध नाभिमत पक्ष विदु : । यथाप्यन्य त्साध्य व्याप्यम्॰ तद्विविशिष्टधर्मी पक्षइतिभेद : । तथाप्यनुमानप्रमा णादिधर्मविशेषविशिष्टपक्षत

यावन्निर्णीतेऽथमण पदे ऽत्रसाध्यत्वात् साध्यपक्षयोरभेदाभिधानमितिध्येय क्षारतत्वम् ॥ व्याप्ये ॥ साध्यते ऽनेनेतिव्युत्पत्त्याप्यर्थे ॥ यथा ॰प र्वतोवह्निमानित्यत्रपर्वत ॥ सा धित योग्ये ॥ यथापर्वतोवह्निमा नित्यत्रवह्नि . साध्य ' ॥ साध्यस्य वस्तुनोऽभावेसाधनं त्विप्रयोजनम् ॥ साध्यतावच्छेदकम् । न॰ अनुमिति विधेयांशेभासमानधर्मे ॥

साध्यव्यापकत्वम् । न॰ साध्यसमा नाधिकरणात्यन्ताभावाप्रतियोगि त्वे ॥

साध्यसम ' । पुं॰ हेत्वाभासान्तरे ॥ यथाहगौतम । साध्याविशिष्टस्य साध्यत्वात्साध्यसम . ॥ ४८ ॥ साध्येनवह्न्यादिना॰ अविशिष्ट॰ तुल्यत्वतथाहि॰ साध्यत्वादिति॰ साधनीयत्वादित्यर्थ । यथाहि॰ साध्य साधनीय॰ तथाहेतुरपिचेत् ॰ साध्यसमइत्युच्यते । अतएवचा सिद्धइत्यव्यवह्रियते । अयञ्चाश्र यासिद्धिस्वरूपासिद्धिव्याप्यत्वासिद्ध धिभेदात्॰ त्रिविध । आश्रयासि द्धिश्च॰ पक्षेपक्षतावच्छेदकाभाव . । यथाकाञ्चनमय ' पर्वतोवह्निमा नित्यादौ । स्वरूपासिद्धि ' ॰ प क्षे हेतुताऽवच्छेदकावच्छिन्नस्याभा व । यथाह्रदोद्रव्यधूमादित्यादौ

। व्याप्यत्वासिद्धिश्च । यद्यपि च
र्व्यतिसामानाधिकरण्याभावः ।
नन्वस्वरूपासिद्धिर्विशुद्धाव्याप्यत्वप्र
तीतिर्नाभवीतस्थत्वमितिसाध्यम्
। हेतुरितिपदद्वयप्रयोगम् । हे
तुपदस्वगमकहेतोर्व्याप्तिविशिष्टपक्ष
धर्मस्यवाचकम् । व्याप्तिविशिष्टप
क्षधर्मत्वं च तदाप्यधीतम् । तथा
च । तत्रापि च्छिद्रसाध्यत्वेनैव
साध्यसमत्वम् । अतएवसाध्यसा
मानाधिकरण्याभाव साधनसाध
नतावच्छेदकाभावव्याप्यत्वासि
द्धिः । यथा । पक्षतावच्छेदकाभा
वपक्षतावच्छेदकवद्वादेरन्यतम
त्वेनाश्रयासिद्धित्वम् । यथाच ।
पक्षेहेत्वभावहेतुमद्वादेरन्यतमत्वे
नस्वरूपासिद्धित्वम् । तथासाध्य
तावच्छेदकाभावादेरन्यतमत्वेन
व्याप्यत्वासिद्धित्वं । विशेषान्य
तमत्वासिद्धिसामान्यधर्मवत्तो
साधनत्वादेरपिव्याप्यत्वासिद्धाव
न्तर्भावं वदन्ति । तेषामयमाशयः ।
व्याप्तिर्हि साध्यसम्बन्धितावच्छेदक
रूपा । गुरुधर्मश्चसाध्यसम्बन्धिताव
च्छेदकोऽतोनोधूमत्वादिः सा
ध्यसम्बन्धितावच्छेदकत्वाश्रया-
सिद्धस्वरूपत्वम् । तथाचसाध्यताव
च्छेदकाभावादिरिव । साधनताव
च्छेदकाव्याप्यतावच्छेदकत्वमपि
भवतिव्याप्यत्वासिद्धिरिति ४८।

साध्यसिद्धिपादः । पुं । व्यवहारस्य
चतुर्थपादे । स च निर्णयपादः ।
यथा । प्रत्यर्थिनोऽग्रतोलेख्यमिति ।
भाषापादः प्रथमः । श्रुतार्थस्योत्त
रं लेख्यमित्युत्तरपादोद्वितीयः ।
ततोऽर्थीलेखयेत्सद्यःकृतिक्रियापाद
स्तृतीयः । तत्सिद्धौसिद्धिमा
प्नोतीतिसाध्यसिद्धिपादश्चतुर्थः ।
यथा । भाषोत्तरक्रियासाध्यसिद्धि
भिः क्रमशस्त्विभिः । चाविभूतश्चतु
र्भवस्तुचतुष्पाद्भिधीयते । इतिमि
ताक्षरा ॥

साध्वसम् । क्ली । भये ॥ साधून्स्यत्य
ति । षस । अजितमुकुट
तत्र । अथ ः ससतात् । तस्मात् ।
साधूनामसः ॥ स्वामी ॥

साध्वी । स्त्री । दुर्गायाम् ॥ मेदाया
म् ॥ पतिव्रतायाम् ॥ तत्रच
मानवारीत : । भार्तार्थसुहिताय
हि प्रोषितेमलिनाकृशा । मृतेम्रि
यतयापत्नीसाध्वीज्ञेयापतिव्रतेति
॥ मनुरपि । पतिंयानाभिचरति
मनोवाग्देहसंयता । साभर्त्तृलो
कानाप्नोतिसद्भिः साध्वीतिचोच्य
ते । इति ॥ वीतोसुवर्च्चलाद्धित
न्नौष ॥ शोभनायाम् ॥

सामन्तः । पुं । तुच्छवाच्ये ॥ भूप
कप्रभेदे ॥ यथा । अष्टादशावरे

पुंसोवशीकरणप्रदोमृत । कश्चकसम्बकिताविसानन्दोवीरवीरसे ॥ वि॰ आह्लादयुक्ते ॥

सानन्दूर । पु॰ तीर्थविशेषे ॥

सानसि । पुं॰ काञ्चने ॥ सनोति षणुदाने । सानसिवर्णसीत्यादिनाअसिप्रत्ययउपधादीर्घश्च ॥ वि॰ सम्भजनीये ॥

सानिका । स्त्री॰ वाद्यविशेषे । सना ड्वै॰ वुतिलोकप्रसिद्धे ॥ वंशी वाद्ये ॥

सानु । पुं॰ न॰ स्त्री । प्रस्थे । पर्वतस्यसमभूभागे ॥ वने ॥ वात्याश्याम ॥ मार्गे ॥ अग्रे ॥ कोविदे ॥ सनोति । षणु॰ । दृसनिजनीतिञुण् ॥ अर्के ॥ पल्लवे ॥

सानुक्रोश । वि॰ सदये ॥

सानुज । पुं॰ तुम्बुरुवृक्षे । तीक्ष्णपत्रे ॥ न॰ प्रपौण्डरीके ॥ वि॰ अनुजेनसहवर्त्तमाने ॥ सानुज रामेर्ऽ ॥

सानुबन्ध । वि॰ सपरिवारे ॥ अविच्छिन्ने । सानुवृत्ते ॥

सानुमान् । पुं॰ पर्वते ॥ सानवोविद्यन्तेऽस्य । मतुप् ॥

सानेयिका । स्त्री॰ सानेय्याम् ॥

सानेयी । स्त्री॰ वंश्याम् ॥ इ॰ श॰ र॰ मी॰ ॥

सान्तपनम् । न॰ कृच्छ्रसान्तपनाभिधव्रतविशेषे ॥ यथा । गोमूत्रगोमयक्षीरदधिसर्पिः कुशोदकम् । एकरात्रोपवासश्चकृच्छ्रं सान्तपनंस्मृतम् ॥ गोमूत्रादिषड्द्रव्याण्येकोकृत्यकस्मिन्नहनिभक्षयेत् । नान्यत्किञ्चिद्दद्यात् । अपरदिनेचोपवासइत्येतत्सान्तपनकृच्छ्रं स्मृतमित्यर्थः ॥ सन्तपति । तप॰ । ल्यु । तस्येदम्कर्म । अण् ॥

सान्तर । वि॰ विरले ॥ अन्तरेणसहित ॥

सान्त्व । न॰ अत्यर्थमधुरेवाक्ये । कर्णमनःप्रीतिजनके ॥ सामनि । प्रियशब्दार्थप्रदानसम्बन्धादिभिः क्रोधोपशमने । द्रव्यदानाभितुष्ट्यमाभैरित्यादिसमाधानोक्तौ ॥ सान्त्वयति । सान्त्वसामप्रयोगे । चुरादिरदन्त । एरच् । घञ्वा ॥ दाक्षिण्ये ॥

सान्त्वनम । न॰ प्रणये ॥ सामोवादे । सान्त्व॰ । ल्युट् ॥

सान्त्वना । स्त्री॰ प्रणये ॥ प्रणय सान्त्वनानमेतिशोधान्तरम् ॥ सामनि

सान्त्वनावाद । पुं॰ प्रियवचने ।

सान्दीपनि । पुं॰ मुनिविशेषे ॥ यस्मादिविद्याभिज्ञ॰ अवन्तिपुरवासिनिकाश्येरामकृष्णयोर्गुरौ । सन्दीपनस्यापत्यम् । अतइञ् ॥

सान्दृष्टिकम् । पुं॰ व्यापारानन्तरं

जायमाने॰सद्यः फले। सन्दृष्टौप्रत्यक्षेभवम्। अध्यात्मादित्वाट्ठञ्॥ समानदृष्टिविषये॥

सान्द्रम्। न॰ वने॥ त्रि॰ घने। निविडे॥ मृदौ॥ सद्ग॰ चन्द्रते। च दिक्ष्मने। बाहुलकाद्रक्॥

सान्द्रपुष्पः। पुं॰ बिभीतकवृक्षे।

सान्द्रस्निग्धः। त्रि॰ घनस्निग्धे। मेदुरे॥

सान्धिकः। पुं॰ शौण्डिके। त्रि॰ सन्धिकारिणि॥

सान्धिवेलम्। न॰ संधिवेलायाम्भवे॥ सन्धिवेलाद्यृतुनक्षत्रेभ्योण्॥

सान्ध्यः। पुं॰ स्वप्ने॥ सन्धिभवे॥ सन्ध्यावाश्रयः। सन्धिवेलादित्वादण्॥

सान्ध्यकुसुमा। स्त्री॰ त्रिसन्धिपुष्पवृक्षे॥

सान्नयिकः। त्रि॰ शैथानांरक्षसन्नाहप्रवर्तके॥ सन्नहनंप्रयोजनमस्य। तदस्यप्रयोजनमितिठञ्॥

सान्नाय्यम्। न॰ हुतद्रव्ये। हविर्विशेषे॥ सम्यङ्नीयतेहोमार्थमग्निंप्रति। णीञ्। पाय्यसान्नाय्येतिन्यायादिवत् समेर्दीर्घत्वंनिपात्यते॥

सान्निध्यम्। न॰ नैकट्ये॥ निकटे॥ सन्निधिरेव। चतुर्वर्णादित्वात् स्वार्थेष्यञ्॥

सान्निपातिकः। त्रि॰ सन्निपातजरोगे। सन्निपातप्रभवमनङ्गीपनवा। सन्निपाताद्भवतिठञ्॥

साभ्यासिकः। पुं॰ भिषजि। पाराशरिणि॥

सान्वयः। त्रि॰ सम्बन्धिनि॥ कुलस्थिते॥ पुत्रपौत्रादिस्थिते॥ यथा। येनमयोक्तंहितंवेदमन्यत्कुरुतेत्रमम्। सकोवक्ष्येवशुद्धत्वमाशुगच्छतिसान्वयः॥

सापत्नः। पुं॰ सपत्नीतनये। सपत्न्याअपत्यम्। शिवादिभ्योण्। ततःसपत्नीतिपाठेपिविहितविधिष्टपरिभाषया॰ सपत्नीशब्दादपिसामान्यविधानाठकाविषयेऽपितिबोध्यम्॥ वैरियनये॥ तस्यापत्यमित्यण्॰ शिवादित्वात्॥

सापत्नेयः। त्रि॰ सपत्न्यास्तनये॥ सपत्न्याअपत्यम्॥ स्त्रीभ्योढक्।

सापत्नी। स्त्री॰ सपत्न्याढुहितरि॥

सापत्नपा। स्त्री॰ लज्जायाम्॥

सापराधः। त्रि॰ कृतापराधे॥

सापिण्डः। पुं॰ सपिण्डे॥ प्रज्ञादिभ्यश्चेतिस्वार्थेऽण्॥

सापिण्ड्यम्। न॰ सपिण्डतायाम्॥

साप्तपदीनम्। सख्ये। मित्रत्वे॥ सप्तभिः पदैरवाप्यते। साप्तपदीनंसख्यमितिसाधु॥

साफल्यम्। न॰ सफलतायाम्॥

सामान्यापत्तिः। स्त्री॰ साम्यप्राप्तौ॥

सामक । पु॰ तक्रुशाणे ॥ साम अभिज्ञे ॥ सामअधीते॰ वेदशा। क्रमादिभ्योवुन् । न॰ मूलद्रव्ये ॥

सामग । त्रि॰ ब्राह्मणविशेषे । छान्दोगे ॥ सामगायति । गै शब्दे । गापोष्टगितिटक् । टिड्डाणञ् । तेनस्त्रियांसामगी ॥

सामगर्भ । पु॰ विष्णौ ॥

सामग्री । स्त्री॰ कारणसमूहे । यथा । सामग्रीचेत्फलविरहोव्याप्तिरेवेति तत्त्वमू॰ पदाङ्कदूत ॥ द्रव्ये ॥

सामग्र्यम् । न॰ समुदायत्वे ॥

सामज । पु॰ गजे ॥ कुञ्जरे ॥ त्रि॰ सामोत्थे । सामार्थे ॥

सामञ्जस्यम् । न॰ औचित्ये । युक्तियुक्ते ॥

साम । न॰ सहस्रशाखिपितृदेवताकेवेदविशेषे ॥ गीतिविशिष्टायामृचि ॥ ऋच्यध्यूढ सामोच्यते ॥ वाक्यविशेषस्यार्थागीतौ ॥ सामपदन्तुगीतिमात्रस्यैवाभिधायकमित्यन्यत् । चतुर्णांवेदानांमध्येगानमाधुर्येणातिरमणीयत्वादृग्णांविभूति सामेत्युच्यते । राज्ञांशत्रुवशीकरणायोपायविशेषे । सान्त्वे । प्रियवादार्थप्रदानसम्बन्धादिभिः शत्रोः क्रोधोपशमने ॥ यथा । परस्परोपकाराणादर्शनं गुणकीर्त्तनम् । सम्बन्धसमाख्यानमायत्या . सम्प्रकाशनम् ॥ वाचापेशलयासाधुतवाहमितिचार्पणम् इतिसामविधानज्ञैः सामपञ्चविधं स्मृतम् ॥ स्यतिपाप॰दोषं वाऽनेनवा । षोअन्तकर्म्मणि । सातिभ्यामनिन्मनिणाविति मनिन् ॥ सामनम् । सामसान्त्वप्रयोगे । बाहुलकात् कनिन्वा ॥ त्रि॰ शोभने । धनवति ॥

सामन । पुं॰ सामवति ॥ सामास्यास्ति । पामादित्वन्न ॥

सामनी । स्त्री॰ पशुबन्धनरज्जौ ॥

सामन्त । पु॰ प्रतिवासिनि । सलग्नोन्तएकदेशोऽस्य । प्रादिभ्योधातुजस्येतिसमास॰ । समन्तायाः स्वदेशाव्यवहितभूमेरयम् । तस्येदमित्यण् ॥ माण्डलिके ॥ चतुर्दिक्षु ॥ त्रि॰ सहाये ॥

सामन्य: । पु॰ सामविदि ॥ सामसुसाधु॰ प्रवीणो॰ योग्योवा । तत्रसाधुरितियत् । येचाभावकर्म्मणोरितिप्रकृतिभाव ॥

सामयिक । त्रि॰ समयोचिते । समयेकार्यकर्त्तरि ॥ समय प्राप्तो ऽस्य । समयस्तदस्यप्राप्तमितिठञ् ॥ विनयादित्वात्स्वार्थेठग्वा । समयोत्थे ॥

सामयोनि । पुं॰ ब्रह्मणि । द्रुहिणे । कुञ्जरे । गजे । त्रि॰ सा

गीत्य ॥
सामरस्यम् । न० ऐकरस्ये ॥
सामर्थ्यम् । न० शक्तातायाम् ॥ य
र्थो ॥ विशेष्यविशेषणभावावगाह्य
पस्थितिजनकत्वरूपे एकार्थीभावे
॥ परस्पराकाङ्क्षाकूपायाव्यपेक्षा
याम् ॥
सामर्प । त्रि० सर्पिषि ॥
सामवायिक । पु० अमात्य । म
न्त्रिणि ॥ त्रि० समवायसम्बन्धि
नि ॥ समवायीत्यर्थे । साम्हिके
॥ समवायं समवैति । समवाया
न्समवैतीति ठक् । कृत्समवपूर्वश्च
योर्थे प्रविश्य एकदेशीभवनम् ।
तत्रगुणभूतप्रवेशप्रति० प्रकृत्यर्थ
स्यकर्मताविवक्षा । विशिष्यानुरो
धेनतु० सीक्षिसमसीप्रायेणप्रयुज्य
ते । कुरुषु संसमवेताइतियथा ॥
सामवित् पुं० उद्गातरि । सामा
निवेत्ति । विद० । क्विप् ॥
सामवेद । पु० चतुर्णामिधिवेदविशेषे ॥
सामाजिक । पु० सभासदि । स
भास्तारे ॥ समाजसमवैति । स
मवायान्समवैतीति ठक् ॥ समा
जं रक्षतिवा । रक्षतीति ठक् ॥
सामाधिपति । पु० भीमपत्नी ॥
सामानाधिकरण्यम् । न० पदयो ।
सम्बन्धविशेषे । पदयोरेकार्थनिष्ठ
त्वे । अथसम्बन्धौविभक्तिनि
मित्तानांशब्दानामेकस्मिन्नर्थे तात्प
र्यसम्बन्ध । यथा नीलघटइति
वाक्ये तत्कालविशिष्टघटत्वावच्
छेदकत्व० एततकालविशिष्टे
घटत्वावच्छेदकरूप० एकस्मि
न्विषये तात्पर्यसम्बन्ध ॥ यथा
तमाचार्यं । प्रवृत्तिनिमित्तभेदानां
भिन्नवृत्तिनाम् । सामानाधि
करण्यम्भवतीत्यर्थं घटाभावादि
कानि ॥ एकविभक्तिकानांपदान
विशेषणविशेष्यभावेनैकार्थनिष्ठत्वे ।
तच्चमुख्यगौणभेदेनद्विविध यथा ।
सामानाधिकरण्योक्तिर्द्वैक्ये मुख्य
तांव्रजेत् । क्वचिदमुख्य गौणमि
थ्यादीतद्विवरणात् ॥ अन्यश्चान्य
थसम्पत्त्यानुक्तिप्रकृतिवृत्त्या ।
सामानाधिकरण्यवद्गौण सिद्ध ० पु
रुषमिति ॥ समानमधिकरणमनयो
स्तयोर्भाव ॥ एकाश्रयत्वे ॥ अ
न्यदुच्छूनमत्सरमन्यच्चात्मनियमिन
तम् । सामानाधिकरण्यद्विविकल्पे
सिद्धयो : कुत ॥
सामान्य : पुं० पक्षिभेदे । वर्णे स
ङ्करे । यथोत्तमवाणिनां । च
त्वार कथितावर्णाश्रमावपितु
ष्टी । आचारादिविवर्णानामाश्र
माणांपृथक्पृथक । क्षत्रादीनामि
कानिगुणानां पञ्चप्रकीर्तिता : ।

ब्राह्मण क्षत्रियवैश्य शूद्र सामान्यएवचेति ॥

सामान्यम् । न । जातिः ॥ तद्द्विविधम् । यथा । सामान्यं द्विविधं प्रोक्तम् परञ्चापरमेव च । द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते । परभिन्ना च या जातिः सैवापरतयोच्यते । व्यापकत्वात् परापि स्याद्व्याप्यत्वादपरापि च । द्रव्यत्वादिकजातिस्तु परापरतयोच्यते । इति भाषापरिच्छेदः ॥ तल्लक्षणं यथा । नित्यत्वे सत्यनेकसमवेतत्वमिति । अनेकसमवेतत्वं संयोगादीनामप्यस्ति अत उक्तम् नित्यत्वे सतीति । समवेतत्वं गगनपरिमाणादीनामप्यस्ति अत उक्तमनेकेति । नित्यत्वे सत्यनेकवृत्तिः सामान्यमुपेक्ष्य समवेतत्वमुक्तम् । एकव्यक्तिवृत्तिस्तु न जातिः । अत उक्तम् । व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः । रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः ॥ एकव्यक्तिमात्रवृत्तित्वादाकाशत्वं न जातिः । तुल्यवृत्तिकत्वाद्घटत्वकलसत्वं न जातिद्वयम् । सङ्कीर्णत्वाद्भूतत्वमूर्त्तत्वं न जातिः । अनवस्थाभयात् सामान्यत्वं न जातिः । विशेषत्वं व्यावृत्तस्वभावस्य रूपहानिः स्यादतो विशेषत्वं न जातिः । समवायसम्बन्धा-

भावात् समवायत्वं न जातिः । द्रव्यादित्रिकवृत्तिरिति । परत्वमधिकदेशवृत्तित्वम् । अपरत्वमल्पदेशवृत्तित्वम् । सकलजात्यपेक्षयाऽधिकदेशवृत्तित्वात् सत्तायाः परत्वम् । एतद्बोधनाय द्रव्यादीति । तदपेक्षया चान्यासां जातीनामपरत्वम् । परभिन्ना सत्ताभिन्ना । व्यापकत्वात् परापि द्रव्यत्वादपरापि च । पृथिवीत्वाद्यपेक्षया व्यापकत्वात् अधिकदेशवृत्तित्वात् द्रव्यत्वं परत्वम् । सत्तापेक्षयाऽल्पदेशवृत्तित्वात् द्रव्यत्वमपरत्वञ्च । तथा च धर्मद्वयसमावेशादुभयमविरुद्धम् । इति मुक्तावली ॥ नित्यमेकमनेकानुगतं सामान्यम् । तच्च द्रव्यगुणकर्मवर्त्ति । इति तर्कसङ्ग्रहः ॥ सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता । इति लक्षिते काव्यालङ्कारविशेषे ॥ यथा । प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया । ऐकात्म्यं बध्यते योगात् तत् सामान्यमिति स्मृतम् । अतादृशमपि तादृशतया विवक्षितुं यदप्रस्तुतार्थेन सम्पृक्तमपरित्यक्तनिजगुणमेव तदेकात्मतया निबध्यते तत् समानगुणनिबन्धनात् सामान्यम् । उदाहरणम् । मलयजरसविलिप्ततनवो नवहारलताविभूषिताः सितत

रद्नतपश्चक्षतरक्तकचीरुचिरामलां
शुका । धनमत्तचिततधान्निधन
त्ययतिधरामविभाव्यतावृता ' प्रि
यवसति प्रयाति सुखमेवनिरस्तभ
यीऽभिसारिका ॥ अत्रप्रस्तुतत्
न्ययोरन्यूनानतिरिक्ततयानिबद्ध
धवलत्वमेकात्मतायैतु । अतएव
पृथग्भावेनानयोरुपलक्षणम् ॥
यथावा । वेषत्वचातुल्यरूपांबध्
नांकर्णावतीगणाङ्गताःगताम्नि । भ
या' सर्वैव यद्विमापतिव्यमकोबिद्
विध्यस्ववमम्यकानि ॥ अत्रनिमित्ता
न्तरजनितापिनामात्वप्रतीतिः प्रथ
मप्रतिपन्न मभेदंमभ्युदसितुमुत्सहते
प्रतीतत्वात्तत्वप्रतीतिबाधायोगात्

सामान्य न । त्रि॰ साधारणे । अवि
शेषे । तुल्यतायाम् ॥ अनेकसम्ब
न्धे वस्तुनि ॥ उत्सर्गे ॥

सामान्यच्छलम् । न॰ छलभेदे ॥
सम्भवतोऽर्थस्यातिसामान्ययोगाद
सम्भूतार्थकल्पनासामान्यच्छलम्
॥ ५३ ॥ सामान्यविशिष्टसम्भवद
र्थाभिप्रायेणोक्तस्य॰अतिसामान्य-
योगादसम्भवदर्थकल्पनया॰दू
षणाभिधान सामान्यच्छलम् । य
थाब्राह्मणोऽयं विद्याचरणसम्पन्न-
स्तु इति॰ब्राह्मणत्वं नविद्याचरणसम्प
द॑साधयतीतिकस्यचित्तया॰पेरा
षद्ति कुतोब्राह्मणात्य॑ न॰विद्या
चरणसम्पत॰व्रात्ये व्यभिचारा-
त् । ५३ ॥

सामान्यतोदृष्टम् । न॰ अदृष्टलक्ष
णसामान्यविषयीतोऽनुमाने ॥

सामान्यलक्षणा । स्त्री॰ अलौकिक॰
सन्निकर्षविशेषे ॥ सतु॰ प॰ग्रह
णापकसामान्यज्ञानम् । यथा
एक घटदर्शनेसकलघटज्ञानभव-
तिकृतघटत्वादिज्ञानम् । तत्
प्रमाणयथा । अलौकिक॰सन्नि
कर्षस्त्रिविध॰ परिकीर्त्तितः । ।
सामान्यलक्षणाज्ञानलक्षणायोगज
सथा ॥ आसत्तिराश्रयाणान्तुसा
मान्यज्ञानमिष्यते । तदिन्द्रियज
तद्धर्मबोधसामग्रापेक्षते ॥ इति
भा॰ ॥

सामान्यविधिः । पुं॰ अनारभ्यवि
धौ । यथा । नहिंस्यात्सर्वाभू
तानीति ॥

सामान्यशासनम् । न॰ सामान्या
धिकारे । राजकीयविशेष ॥

सामान्या । स्त्री॰ नायिकाभेदे वा
रान्तरे ॥ कचितवितिविरावरणे
ष्वभिमतफलदामविककसामान्या ॥

सामान्याभिनयः । पुं॰ वागङ्गसत्त्व
जोऽभिनये ॥ यथा । सामान्या
भिनयोनामज्ञेयोवागङ्गसत्त्वज इ
ति ॥

सामासिकः । पुं॰ साङ्गर्येविधि ॥

समासमम् इ ॥

सामि । अ० अर्द्धे ॥ निन्दायाम ॥ सामयति । आमसान्त्वप्रयोगे । अदन्त ॥

सामिधेनी । स्त्री० धाय्यायाम् । अग्निज्वालनार्थमृचि । ऋक्सामिधेनीधाय्याचयास्यादग्निसमिन्धने ॥ समिधामाधानी । समिधामाधानेषिग्यण । षित्वान्ङीष् । यथाऽऽलङ्गतिलोप ॥ समिन्धि ॥

सामिधेनः । पु० मन्त्रविशेषे ॥ समिधामाधान । समिधामाधानेषिण्यण् ॥

सामीची । स्त्री० वन्दनायाम् ।

सामीप्यम् । न० सान्निध्ये । देशकालाभ्यामासन्नतायाम् प्रत्यासत्तौ । अव्यवहितत्वे ॥ समीपमेव । चतुर्वर्णादित्वात्० ष्यञ् ॥

सामुद्रम् । न० देहलक्षणे ॥ लवणविशेषे । कडके । वशिरे ॥ अस्यगुणा यथा । सामुद्रं मधुरपाकेसतिक्तं मधुरगुरु । नात्युष्णं दीपनभेदिसक्षारमविदाहिच ॥ श्लेष्मलवातनुत्तिक्तमरूक्षं नातिशीतलम् ॥ समुद्रोद्भवे सामुद्रमुदकं क्षारं सर्वदोषप्रकोपणम् ॥ समुद्रफेने ॥ धाराजलप्रभेदे ॥ तत्सञ्चारलक्षणं यथाऽऽहहरिवंशे ... पयम् । विस्रगन्धदोषव्रतीक्ष्णं सर्वकर्मसुगर्हितम् ॥ सामुद्रमक्षाश्विने मासिशुद्धमगाङ्गवद्दाहृदिशेत् । यतोऽगस्त्यस्यदिव्यर्षे रुदय तत्सकलजलम् ॥ निर्मलं निर्विषं स्वादुशुक्लं स्वादुदोषनम ॥ ततसामुद्रजलम । आह च । फूत्कारविषवातेन नागानांव्योमचारिणाम् । वर्षासुसविषं तोयं दिव्यमप्याश्विनं विना ॥ त्रि० समुद्रोत्पन्नवस्तुनि ॥ समुद्रेभवम् । तत्रभवइत्यण् ॥

सामुद्रकम् । न० समुद्रलवणे ॥ समुद्रोत्थलवणे ॥ तीर्थविशेषे ॥ त्रि० । स्त्रीपुंसयोश्चिह्नवेत्तरि ॥

सामुद्रिक । त्रि० स्त्रीपुंसयोश्चिह्नज्ञे ॥ वेत्ताखीपुंसयोश्चिह्नं सामुद्रिकउदाहृतइतिहारावली ॥ समुद्रसम्बन्धिनि ॥ समुद्रचारिणि ॥

सामूहिक । त्रि० सामवायिके ॥ समूहसमवैति । समवायान्समवैतीतिठक् ॥

साम्पराय । पु० परलोके ॥ परलोकसाधने । सम्पराय ' परलोक० तत्प्राप्तिप्रयोजनेशास्त्रीयेसाधनविशेषे ॥

साम्परायिकम् । न० युद्धे । समीके । समरे ॥ त्रि० पारलौकिके ॥ यथा । प्रभुः प्रथमकल्पस्ययोऽनुकल्पेनवर्त्तते । नसाम्परायिकं तस्य दुर्मतेर्विद्यतेफलम् ॥ पारलौकि

कीसाधने । सम्प्रदायनम् । अथवा
तौङ्गतौवा । घञ् । ततोविनया
दित्वात् स्वार्थे ठक् ॥ सम्प्रदायाव
प्रभवति । सन्तापादित्वादञ् ॥
सम्प्रदायार्हे । सम्प्रदायमर्हति ।
तदर्हतीतिठञ् ॥
साम्प्रतम् । अ० अधुनार्थे । इदानी
म् ॥ उचितार्थे ॥ सम्प्रतनम् ।
तनुविस्तारे । डम् । पृषोदरादि
त्वात् समोदीर्घः ॥ यथा । सम्०प्र
ति० एतयोः समाः स्युः ।
तस्मात्० प्रत्याख्य । गर्वपाठा
न्मान्तत्वम् ॥
साम्प्रतिकम् । त्रि० सते ॥ न्याय्ये ॥
सम्प्रतिशब्दाद्विनयादित्वात् स्वार्थे
ठक् ॥
साम्बम् । न० उपपुराणविशेषे ॥
साम्बरम् । न० शङ्खचर्णे ॥
साम्बरी । स्त्री० मायायाम् ॥ शाम्ब
रीत स्वरीमाया० मायाग्निदृगपीन
टे० इ० शब्दरत्नावली ॥
साम्भवी । स्त्री० रक्तलोध्रे ॥
साम्मातुरः । पु० भाद्रमातुरे । स
तीतनये ॥ सम्मातुरपत्यम् । मा
तुरुत्सङ्ख्यासम्भद्रपूर्वायाः ॥
साम्मुख्यम् । न० सायाज्याभिमुख्या
भिधौ । साम्मुख्यमसायाज्ञ
ऽपिमोहयतीयदीतिस्क०न्दोक्तः
॥ सम्मुखत्वे ॥

साम्यम् । न० तुल्यत्वे । समताया
म् । आगाढाज्जाज्ञियोगत्वाभृ
न्नाभ्यप्रतियत्नाथ । परस्परानतो
विप्रोष्यानात् साम्यमुपगच्छति ॥ नि
र्विशेष । सर्वभूतेष विषमसमेष्व
पि सर्वमानश्चायथ समभावे ॥
समाङ्गावेष्ययञ् ॥
साम्राज्यम् । न० सार्वभौमेपदे । इ
मण्डलाधिपत्ये ॥ यथा । इन्द्रा
धिपत्यराज्य ॥ [० साम्राज्यदायक
पश्चि । पलानर्घदण्डी ।निमन्त्रासा
म्राज्यमम्युतसूतिवरदाः स्वे हितो
य : पटल ॥ सम्राजोभाव ।
ष्यञ् ॥
साम्राविकद्र्मम् । न० जलादिनाम
क्रिगन्धद्रव्ये । गन्धाख्य ॥ इ०
रा० नि० स्य: ॥
साम्राणिजम् । न० अश्वपादवर्णे ।
सायसन्ध्या । स्त्री० पित्रप्रसाम् ॥
सायङ्कोपाठदेवतायाम् ॥
सायम् । अ० दिनावसाने । दिनान्ते ॥
सामम् । पा० अन् । युगागम ॥
सायः । पुं० बाणे । शरे । वा
णे ॥ दिनान्ते । दिवावसाने ॥ स्य
ति० समापयति दिनम् । षो०
अन्तकर्मणि : ॥ घञ् वा । आतो
युक् ॥
सायकः । पुं० शरे । खड्गे ॥ स्य
ति । षो० । ण्वुल् । युक् ॥

सायकपुङ्खा । स्त्री० शरपुङ्खायाम् ॥
सायङ्काल । पुं० सायाह्ने ॥
सायम् । अ० निशामुखे । दिनान्ते ॥
सानम् । धा० । षम् । युगा गम ॥
सायम्प्रातिक । त्रि० सायम्प्रातर्भवे ॥ कालाट्ठञ् ॥
सायन्तन । त्रि० सायङ्कालसम्बन्धिनि ॥
सायाह्न । पुं० दिवावसाने । दिनान्ते । पञ्चधाविभक्तस्याह्नः पञ्चमे भागे ॥ यथा । सायाह्नस्त्रिमुहूर्त्तं स्यात् श्राद्धं तत्र न कारयेत । राक्षसी नामसावेलागर्हितासर्वकर्म्मसु ॥ अह्न सायम् । सङ्ख्याविसाये तिज्ञापकात समास । सायशोऽह्न मशावकृतिभाष्याद्वासाधु ॥
सायिका । स्त्री० क्रमस्थितौ ।
सायुज्यम । न० सयुगभावे । एकदेहदेहित्वैक्ये ॥ सयुजोभाव । ब्राह्मणादित्वात् ष्यञ् ॥
सायोक्षर । पुं० विक्राणे ।
सार । पुं० बले ॥ स्थिरांशे ॥ यथा । वेदान्यनेकशास्त्राणि स्वल्पायुर्विघ्नकोटयः । तस्मात् सारं विजानीयात् क्षीरं हंसइवाम्बुमध्यात् ॥ मज्जनि । मज्जायाम् ॥ वज्जारे । दीर्घे । कूलिधरणी ॥ दाडिमे ॥ वायौ ॥ वायके ॥ नवनीते ॥ द्रव्ये । काव्यालङ्कारविशेषे ॥ यथा । उत्तरोत्तरमुत्कर्षोभवेत् सार परावधि ॥ पर पर्य्यन्तभागोऽवधिर्यस्य धाराधिरोहितया तथैवोत्कर्षस्य विश्रान्ते । उदाहरणम् । राज्ये सारं वसुधा० वसुधायाम पुरम् ० पुरे सौधम् । सौधेतल्पं तल्पे वराङ्गनाऽनङ्गसर्वस्वम् । न० जले । धने ॥ न्याय्ये । नवनीते ॥ विपिने । लोहसारे । यथा । व ... नासश्विखराकारास्वङ्गान्यस्त्रे नशे ... थिते । लोहयुग्मं च सूक्ष्माणितत्सारमभिधीयते ॥ लोह सारात्रय ... न्याद्भूयो मतिसारकम । अर्शसर्वाङ्गज वात शूलस्वपरिणामजम् ॥ छर्द्दिं स्वपीनसपित्तश्वासशोषान्यपो हति त्रि० वरे । श्रेष्ठ ॥ यथा । असारेखलुसंसारेसारमेतच्चतुष्टयम् । काश्यावास • सतांसङ्गो गङ्गाम्भ शिवपूजनम ॥ इति ॥ विरम्भितन्सरतिकालान्तरम । स्रु० । स्थिरे ० कृतिघञ् ॥ सार, शबलपीतयोरितिविशु ॥
सारक । पु ० तरलप्रतिविते । जयपाले । त्रि० विरेचके ॥ सरति । स्रु० । ण्वुल् ॥
सारखदिर । पु० दुर्खदिरे । धवलेतरी ॥
सारगन्ध । पुं० चन्दने ॥

सारग्राही । त्रि॰ सारग्रहणकर्त्तरि ॥
सारघम् । न॰ मधुनि ॥ सरघाभि
कृतम् । स च्छायामित्यण् ॥
सारङ्ग । पुं॰ एणे । हरिणे ॥ चा
तके ॥ मतङ्गजे ॥ विहगान्तरे ॥
चञ्चरीके ॥ छत्रे ॥ राजहंसे ॥ चि
त्रमृगे ॥ वाद्यभेदे ॥ चञ्चुके ॥ चि
त्रवर्णे । नानावर्णे । मयूरे ॥ का
मदेवे ॥ धनुषि ॥ केशे ॥ स्वर्णे ॥
आभरणे ॥ पद्मे ॥ शङ्खे ॥ चन्द
ने ॥ कर्पूरे ॥ पुष्पे ॥ कोकिले ॥
मेघे भूमौ ॥ रात्रौ ॥ दीप्तौ ॥
सिंहे ॥ न॰ सारङ्गचर्म्मणि ॥ य
था । सारङ्ग जाङ्गलविगध मधुरम
धुष्यद्धिमितिराजनिघण्टः ॥ वर्ण
वृत्तान्तरे । कर्णध्वज ओष्ठलाम
रदेहिविक्क सताम सदासन्निधीय
हि । सर्पाधिराजाधिराजसदाहस
मूरीश्वरीतीश्वसारङ्गमेतद्धि ॥ यथा
। सत्यापिनैवाक्षमौल क्रतङ्कर्म
यातननु काषिलभ्यनवेयमः ।
किन्दारदेशात्मजस्वर्णहन्देनचेतो
रतिविन्दसिचेत्मुकुन्देन ॥ त्रि॰
चित्रवर्णवति । शबले ॥ भगवद्भक्ते
॥ यथा । श्रियोनिवासोयस्योर॰ ॰
पानपात्र मुखंदृशाम् । बाहवो लो
कपालानां सारङ्गाणांपदाम्बुज
मिति ॥ सरति । सृ॰ । सृङ्गोर्बृ
विलेखष्ठच् ॥ सारं गच्छतिवा ।
गम् सृ॰ । खच् ॥ सारमङ्गंयस्य ।
शकन्ध्वादि ॥ सहारङ्गेणवा । सा
रङ्गायतिवा । गैशब्दे । गापो
ष्टक् ॥
सारङ्गिक । पुं॰ शाकुनिके । सा
रङ्गान् हन्ति । पक्षिमत्स्यमृगान्ह
न्तीतिठक् ॥
सारङ्गिका । स्त्री॰ वर्णवृत्तान्तरे ॥
द्विजवरकार्णौसगण विरचयसाध
रणम् । जगदभिरामं हितयाभव
तिहिसारङ्गिकया ॥ यथा । प्रण
मतराधारमण मगन्नृपबाधाहमनम्
। असुरमहापाहरणं यदुकुलचूडा
भरणम् ॥
सारङ्गी । स्त्री॰ वर्णवृत्तान्तरे । यथा
मादौकृत्वा कर्णौ॰ दत्त्वाहारं तारङ्ग
म॰ विद्युन्मालापादं दत्त्वाद्गन्तेषा
चंवृत्तम् । नागाधीशेनाक्तं तत्सा
रङ्गीख्याख्यातं सहितकुलादीनाम
न्तिप्राय . सर्वेषांगाभाषि ॥ यथा
। वृन्दारण्ये गोधुक्पूर्णे गोपायन्त
गो वृन्द॰ वाले सा कावाकौदा
शीलवन्दे गोविन्दम् । आभीरीणा
मौपन्यस्थ्याकाहास : कर्णेनाङ्क
वीकुञ्जसन्नद्धगिराचाहद्वाद्यन्त
म् ॥ अवतायाम् ॥ अन्यतीक्ते
त्यितिकीप् ॥
सारकम् । न॰ नवनीते ॥
सारण । पुं॰ अतीसाररोगे ॥ रा

षणमन्वि,ष्वि । इयवाम्बरदूते ॥ षामातके । भद्रवलायाम् ॥ न० गन्धभेदे ॥ मलनिर्गमने ॥

सारणि । स्त्री० क्षुद्रनद्याम् ॥ प्रसारण्याम् ॥

सारिणी । स्त्री० प्रसारण्याम् ॥ सूक्ष्मनद्याम् ॥

सारण्ड । पुं० सर्पाण्डे ॥

सारत । पु० मुनौ ॥ त्रि० ऋते नसहवर्त्तमाने ॥

सारतरु । पुं० कदलीवृक्षे ॥ वृ० ध० ध्वज ॥

सारत । अ० बलवदर्थे ॥ पक्ष्म्यास्तसिल ॥

सारथि । पु० सूते । नियन्तरि ॥ तस्य लक्षणं यथा । निमित्तशकुनज्ञानी हयशिक्षाविशारद । हयायुर्वेदतत्त्वज्ञो भूविभागविशेषवित् ॥ स्वामिभक्तो महोत्साहः सर्वेषाञ्च प्रियंवद । शूरश्च कृतविद्यश्च सारथि परिकीर्त्तितश्चिति ॥ सरत्यश्वान् । उ० । पन्तर्भावितण्यर्थः । प्रत्ये र्णित्वाद्यिन् ॥

सारथ्यम् । न० सारथेः कर्म्म ष्य० भावेच । पुरोहितादित्वात्यक् ॥

सारद । त्रि० सारदातरि ॥

सारद्रुम । पुं० खदिरे ॥

सारपाद । पु० धामनिवृक्षे ॥

सारभृत् । त्रि० सारग्राहिणि ॥

सारमिति । स्त्री० वेदे । स्मृतौ । सारस्य यथार्थस्य मिति ॥

सारमूषिका । स्त्री० देवदाल्याम् ॥

सारमेय । पु० कुक्कुरे । सरमाया अपत्यम् । स्त्रीभ्योढक् ॥

सारमेयादन । पुं० नरकविशेषे ॥

सारमेयी । स्त्री० शुन्याम् ॥ ढगन्तात् ङीप ॥

सारलोहम् । न० लोहसारे ॥ कृतिभूरिप्रयोग ॥

सारव । त्रि० सरयूजातवस्तुनि ॥ सरय्वां भव । तत्र भव इत्यण् । दाण्डिनायनेतियलोप ॥ स्त्रियां टिड्ढेति ङीपि० सारवी ॥

सारवान् । त्रि० ससारे ॥

सारवती । स्त्री० छन्दोभेदे ॥ यथा । चेद्गणश्चितयक्रमत० स्याद्गुरुरन्तगतोचमत । नौयशवसन्तपप्रथिता० सारवतीकविभि० कथिता ॥ सारविशिष्टार्या ॥

सारस । पु० स्वनामख्यप्रसिद्धपक्षिविशेषे । पुष्कराख्ये ॥ पक्षश्चकुनयथा । दृष्टार्थसिद्धिं सकलामुद्विग्न स्यात्सारसदर्शनविलोकनेन । शुक्लाश्चपूर्वेणिनदनगर्जत्सिद्ध्यभीष्टंसरसपवयस्मात् । वामेनयोषित्कुललाभकारीशब्दस्तथाग्रेन्प्रतीर्थलब्ध्यै । यसा सारसाभ्यां युगपद्विरावः कृतोपि

रैवतकमतीत्य पिबामि ॥ इत्येवंविधव्य कथितार्थकारी॰ कौटिल्ययस्याप्य यमेवम् ॥ इति रसमञ्जरी ॥ छन्दो ॥ इति । न॰ सरसीरुहे । पद्मे । भीमपानीयविशेषे ॥ यथा नद्याः पौष्करे भ्रमरीयवसन्त्य तिष्ठति । तत्सरोजसम्भूतं तद्भ सारसमृतम् ॥ सारसस्तिलवस्य तथा ममधरलघु । रोप मतु वरकृष्ण वर्ण्यम् समर्पितम् ॥ त्रि॰ सरोजाते ॥ सरसिभवः । यण् ॥

सारसनम् । न॰ तनुत्राणोरस्के । काञ्चीकट्यादौ । यथा । काञ्चीकाञ्चीराचा पोक्षौ॰ यत् कक्ष्येसकञ्चुकाः । अथ सा तत्सारसनमधिकाङ्गेऽधनी पटानिष्पतः ॥ कक्ष्याम् । मेखलायाम् । कटिभूषणे । स्त्री कञ्चावबन्धने । सरसं तनोति स ननष चससमस्ती । सारसनेनाभ्यवयवेनेवा सारस नीतिवा । त्वचा हि कामं च श्री पल्लविरचनामच । यथा । सारसन मगती॰ दीप्यतेऽनेन । चरणतटी पृथ्वादानिषु । चरणे तिष्ठ्य टच । अ सत्यादि ॥

सारसिका । स्त्री॰ सारस्याम् ॥ सूर्या ॥

सारसी । स्त्री॰ सारसयोषायाम् । सारस स्त्रियाम् ॥

सारस्वत । पु॰ देशविशेषे ॥ विल्व दण्डे ॥ कल्पविशेषे ॥ यथा । सारस्वतकल्पप्रमथ्येष्वष्टमं राम-रा । तन्त्राणि चैतेषां गायन्तमुच्यते ॥ इति मात्स्ये ५०६ अध्याय ॥ सरस्वतीनदीपुण्यमुनिविशेषे ॥ इति च कश्चित् । सारस्वतदेशाः प्रसिद्धाः ॥ सर्वपदविधानोक्तेषु प्रसिद्धः । यथा । सारस्वता काव्य कुशलः इति ॥ न॰ मलौषधौ । त्रि॰ सरस्वतीतीरवासिनि । सरस्वती-तीरसम्बन्धिनि । सारस्वतदेशसम् बन्धिनि ॥

सारस्वता । पु॰ भूमि॰देशविशेषे । विकर्षिणीषु । यथा । कश्मीराणा म पुनः सारस्वतास्तु विकर्षि-काकृतिमिवन्द्रः ॥

सारस्वतकल्प । पुं॰ ब्राह्मणनामाद्य कालस्योपेन च चतुर्दशसप्ताह प्रकरणे ॥

सारस्वतव्रत । पुं॰ न॰ मत्स्यपुराणो क्तव्रतविशेषे ॥

सारस्वती । स्त्री॰ वृत्तिविशेषे । वाष्पि का । पठन्ति । वार्तिकारपद वत् प्रयुज्यमानविस्तीर्णसारस्वतीमि ति निवर्तयितुं इतिप्रायविस्तीर्णमाभाष्य व्याकरणमितमताभाष्यम्

सारा । स्त्री॰ स्नुहीप्रभेदे ॥ दूर्वाया म कृष्णत्रिवृतायाम् ॥

सारार्थः । त्रि॰ निष्कृष्टार्थे ॥

सारालः । पु॰ तिले ॥

सारिः । पु॰ स्त्री॰ पाशके ॥

सारिका । स्त्री॰ शारिकाख्यखगे । पीतपादायाम् । गोराटिकायाम् ॥ सरति । सृ॰ । ण्वुल् । प्रत्यय स्थात् इत्वम् ॥ हवान्तरः ।

... स्त्री॰ त्रिपिलाम्ब जपायाम् ॥ ... पीतिकायाम् ॥ ... ताम् ॥ प्रसारण्याम् ॥ रक्तपुनर्नवायाम् ॥ मरुदेव्याम् ॥ इति रा जनिघण्टुः ॥

सारी । त्रि॰ बलयुक्ते । सवले ॥

सारिष्ठः । त्रि॰ अतिशयेनसारे ॥

सारी । स्त्री॰ सप्तलायाम् ॥

सारु । न॰ वर्षवृक्षप्रभेदे ॥ शारदाख्य ... सारु ॥ यथा । नन्दनन्दनम् भजामि ॥

सारुण । त्रि॰ अरुणवर्णयुक्ते ॥

सारुणा । स्त्री॰ जपायाम् ॥

सारूप्यम् । न॰ सरूपतायाम् ॥

सारोष्ट्र । पु॰ देशभेदे ॥ सारचष्टोय स्मिन् ॥

सारोष्ट्रिका । पुं॰ विषविशेषे ॥ सारोष्ट्रे देशेभव । अध्यात्मादित्वाट्ठञ् ॥

सार्ग्गल । त्रि॰ सप्रतिबन्धे ।

सार्थः । पुं॰ जन्तुसङ्घे ॥ वणिक्समूहे ॥ समूहमात्रे ॥ ... त्रिक ... नानासङ्घाते ॥ त्रि॰ ... ॥ सफले । अ॰ ... धियसहिते ॥ सरति • ... ... । सृ॰ । सर्त्त्यर्थि ... तिथन् ॥ अर्थेनसहवर्त्तमानोवा ॥ बाधोष्विवसनमो ... प्रवर्त्तिवा । सार्थी । ... तदीयेषु ... ... दिषु ॥

सार्थकः । त्रि॰ सप्रयोजने ॥ अर्थेनसहवर्त्तमा ... ः । स्वार्थेकः ।

सार्थवाहः । पुं॰ वणिजि ॥ सार्थं वहति । वह॰ । कर्म्मण्यण् ॥

सार्थिम । त्रि॰ सार्थेस्थिते । सार्थो तिष्ठति ॥

सार्द्र । त्रि॰ आर्द्रे ॥ पर्यायास्तु । आर्द्र सार्द्र क्लिन्न तिमित स्तिमित समुन्नसुत्तमेति ॥ सहआर्द्रत्वगुणे नेतितथा ॥

सार्द्ध । त्रि॰ अर्द्धसहिते ॥ अर्द्धेनसहवर्त्तमान ॥

सार्द्धम् । अ॰ साकमर्थे । सहम् । समम् । सहार्थे ॥ अट्यति । अटधु ... । बाहुलकात्कम् । सहस्र वर्त्तते ॥

साप्प । पुं॰ अश्लेषानक्षत्रे ॥ सर्पोदेवताऽस्य । सास्यदेवतेत्यण् ॥

साप्पराज्ञी । स्त्री॰ सर्पराजकवासुकी पत्न्याम् ॥

सार्पिष । त्रि॰ सर्पिः संस्कृ
ते । सर्पिषा संस्कृते । अण् ॥
सार्पिष्क: । त्रि॰ घृतसंस्कृते । स
र्पिषा संस्कृत: । तेन संस्कृतमित्यठक् ॥
सार्पिष्कन्दाधिकसर्पिर्दधिश्यास
स्कृत क्रमादिति हेमचन्द्र: ॥
सार्व॰ । पु॰ अर्हति । जिने ॥ त्रि॰
सर्वहिते । सर्वस्मै हित: । सर्व
पुरुषाभ्यां णढञाविति ण ॥
सार्वजनिक: । त्रि॰ सर्वजनीने ॥
सर्वजन: । पूर्वकालैकेति समा
स: । सर्वजनाय हित: । सर्वजना
ट्ठञ् खञौ तिठञ् ॥
सार्वभौम: । पु॰ सर्वपृथ्वीपतौ ।
चक्रवर्त्तिनि । कान्यकुब्जदेशे ।
उत्तरदिग्गजे ॥ सर्वस्यां भूमौ
विदित: । तत्र विदित इत्यण् । अ
नुशतिकादित्वादुभयपदवृद्धि: ॥
सर्वभूमेरीश्वरो वा । तस्येश्वर इत्य
ण् ॥ सर्वभूमिनिमित्तसंयोगोत्
पातौ वा । सर्वभूमिपृथिवीभ्याम
णञौ इत्यण् ॥
सार्वजनीन: । त्रि॰ सर्वजनसाधौ
॥ खञ् ॥
सार्वलौकिक: । त्रि॰ सर्वलोकवि
दिते ॥ सर्वलोकविदित । लोक
सर्वलोकाट्ठञ् । अनुशतिकादि ॥
सार्षपम् । न॰ सर्षपतैले ॥ गुणा
यथा । कटुकं सार्षपं सार्षपं रक्तम्

रसमलकृद्गुरु । अन्नपानविदाहि
स्याद्रुष्णं कुष्ठ विदोषकृत् ॥ सर्वार
सर्व तीक्ष्णं स्वादुपाकिपुमिन्द्रियम
॥ सर्षपतैले ॥ दीपनं सार्षपं तै
लं कटु पाकरसलघु । लेखनं स्पर्श
वीर्योष्णं तीक्ष्णं पित्तास्रदूषकम् ॥
कफमेदोनिलार्शोघ्नं शिर:कर्णाम
यापहम् । कण्डूकोठकृमिश्वित्रकु
ष्ठदुष्टकृमिघ्नकृत् ॥ तद्वद्राजिकयोस्तै
लं विशेषान्मूत्रकृच्छ्रकृत् ॥ राजि
कयो: । कृष्णराजिकारक्तराजि
कयो: ॥
साह्निता । स्त्री॰ समानहीनत्वे । स
मानतायां ॥
साल: । पु॰ वृक्षमात्रे ॥ प्राकारे ॥
सर्ज्जपादपे । तत्पर्याय: । शू॰ भा॰
प्र॰ ॥ मत्स्यादौ । नगराजौ । कल्क
विशेषे ॥ न॰ भूतले ॥
सालग्राम: । पु॰ शालग्रामे ॥
सालन: ।) पु॰ धूनके । सर्ज्ज
सालनिर्यास: ।) रसे ॥
सालपर्णी । स्त्री॰ शालपर्ण्याम् ।
विदारिगन्धायाम् ॥ शू॰ म॰ र॰
स्त्री ॥ साला: पर्णमस्या: । साल
स्येव पर्णमस्या इति वा । पा
कादित्वान्ङीष् ॥
सालपुष्पम् । न॰ स्थलपद्मे ॥
सालरस: । पु॰ रसे । धूनके ॥

सालवेष्ट । पुं॰ धूनके ॥
सालशृङ्गम् । न॰ प्राचीराग्रे ॥
साल्सार । पुं॰ तरौ । हिङ्गुनि ॥
सालिका स्त्री॰ शारिकायाम् ॥ पल॰ । खुल् । ह्रस्वम् ॥
सालोक्यम् । न॰ एकलोकवासे । सलोकतायाम् ॥
साल्विक । पुं॰ पक्षिविशेषे । गृध्रसौ । खुद्रचूडे ॥
साल्व । पुं॰ देशविशेषे ॥ तद्देशस्थे ॰ पुंभूम्नि॰ कारकुक्षीयेषु ॥ साल्वासुकारकुक्षीयामरवस्तुदश्रीरकाः ॥ इति हेमचन्द्रः ॥ पुं॰ नृपतिविशेषे ॥ न॰ मूलविशेषे ॥ साल्वमूलम् । पुष्पमूलेषु बहुलमित्यपोलुक् ॥ इतिप्रामाण्यात्साल्वशब्दस्य बहुलेपि विल्वादित्वन्नचादित्वाद्योऽण्यम् ॥ त्रि॰ साल्वदेशजे । साल्वेषुभवः । कच्छादिभ्यश्चण् ॥ यथा॰ साल्व पद तिव्रजति ॥
साल्वक । त्रि॰ साल्वदेशजेब्राह्मणादौ ॥ गवि ॥ यवाग्वाम् ॥ साल्वेषुजात । अपदातौसाल्वादिति॰ गोयवाग्वोरेवेतिवुञ् ॥
साल्वती । स्त्री॰ नाम्नद्याम् ॥
साल्वहा । पुं॰ श्रीकृष्णे ॥
साल्वेय । पुं॰ नृपान्तरे ॥ तस्यापत्ये ॥ साल्वेयस्यापत्य॰ राजा । साल्वेयगान्धारिभ्याञ्चेत्यञ् ॥
सावधान । त्रि॰ समाहितान्तःकरणे ॥ अवधानेनसहवर्त्तमान ॥ सचेतने ॥
सावन । पुं॰ यज्ञकर्मान्ते । यजमाने ॥ प्रचेतसि । वरुणे ॥ दिवसविशेषे । यथा । स्वरमरीच्युदयद्वयअन्तर यद्दिवमावनस वदिनस्फुटम् ॥ अपिच । अहोरात्रेणचैकेन सावनोदिवस.स्मृत । इति । त्रिं॰ अहिनात्मकेमासि ॥ त्रिंशतासौदिवसैः सावनः परिकीर्त्तित ॥ न॰ सवनसम्बन्धिदिने । सोमयागेसवनत्रयस्याहोरात्रसाध्यत्वात् तत्सम्बन्धिदिन सावनमितिमाधवाचार्य्यः ॥
सावयवम् । न॰ व्यक्तौ ॥ अवयवनमवयवोमिथः संश्लेषः मिश्रणं संयोगइतियावत् । अप्राप्तिपूर्विका प्राप्तिः संयोग तेनसहवर्त्ततइतिसावयवम् । तथाहि॰ पृथिव्यादय । परस्परं संयुज्यन्ते॰ एवमन्येपि । नतुप्रधानस्य बुद्ध्यादिभिः संयोगस्तादात्म्यात् । नापिसत्त्वरजस्तमसाम्परस्परं संयोगोऽप्राप्तेरभावात् ॥ त्रि॰ अवयवविशिष्टे ॥
साबर । पुं॰ मृगविशेषे ॥ न॰ तन्मांसे ॥ यथा । मांससावरसम्भूतं पाचितंबहुधाघृते । वेसवारोपवा

क्षीर्यां द्विकुसेक्ष्वसमुद्भूते ॥ बलपुष्टिकारं रुच्यं विष्टम्भि गुरु पाचनम् । सावर्णं लघु शीतं सुस्वादु कफपित्तनुत् ॥ रसे पाके च मधुरं रक्तपित्तनिवारणम् तद्भुक्त्वा शर्करां भूयो भक्षणाय प्रकल्पते ॥ भावप्रकाशेऽपि । सावर्णं लघु स्निग्धं शीतलं गुरु कषायमुक्तम् । रसे पाके च मधुरं कफदं रक्तपित्तहृत् ॥ चि० चन्द्रोदयसाहते ॥

सावर्णः । पुं० अष्टममनौ ॥ यथा देवीभागवते । छायासंज्ञासुतो योऽसौ द्वितीयः कथितो मनुः । पूर्वजस्य सवर्णोऽसौ सावर्णस्तेन कथ्यते ॥

सावर्णिः । पुं० सूर्यतनये । अष्टममनौ ॥ अष्टमेऽन्तरमायाति सावर्णिर्भविता मनुः ॥ सवर्णाया अपत्यम् । अतइञ् । इत्यधिकारे । बाह्वादिभ्यश्चेति । इञ् ॥ यथा । पञ्चमे वैवस्वतमनौ सम नामवति सावर्णिः । यथा विष्णुपुराणे । छायासंज्ञासुतो योऽसौ द्वितीयः कथितो मनुः । पूर्वजस्य सवर्णोऽसौ सावर्णिस्तेन कथ्यते इति ॥ शीरवित्रेषे ॥ यथा । बोध्यसावर्णिर्मेधातिथिर्वसुर्ज्योतिष्मान् भागविः अगस्त्यः प्रवराः इत्युक्तम् ॥

सावर्णिकः । पुं० मन्वन्तरान्तरे ।

सावर्णैः कः प्रकाशीयत्वेन ॥ अष्टममनौ । सावर्णिकोनाममनुर्भवान् भुवि भविष्यतीत्युक्तम् ॥

सावित्रः । पुं० शङ्करे ॥ वसौ ॥ ब्राह्मणे ॥ सूर्ये ॥ गर्भे ॥ न० यज्ञोपवीते ॥ सवितुरयम् । तस्येदमित्यण् ॥

सावित्री । स्त्री० सत्यवतो मद्रराजपत्न्याम् । मद्रदेशीयाश्वपतिराजकन्यायाम् ॥ ब्रह्मपत्न्याम् । सवितुः पुत्र्याम् पत्न्याम् जातायाम् । उमायाम् ॥ तन्नामकारणं यथा । विद्भिरर्चिता देवी वेदयागेषु पूजिता । आमायुखरूपा तु सावित्रीति गता स्मृतेति वैवपुराणे ४४ ऽध्यायः ॥ गायत्र्याम् ॥ सर्वेलोकप्रसवनात् सवितासस्तूयते । यतस्तद्देवता देवी सावित्रीत्युच्यते ततः ॥ वेदप्रसवनाच्चापि सावित्री प्रोच्यते बुधैरिति वह्निपुराणे ब्राह्मणप्रशंसानामाध्यायः ॥ सन्ध्यायामन्यच्चसमर्थश्च वृक्षसावित्रीजपः सायंप्रातर्भिर्दिरूपयाखलोयज्ञियाश्चलता । विश्वतोवनाम. सावित्रीचैव्योपिसत्यमेव गुणिजिन्हां गच्छतितस्मात्त्वचं वै सावित्रीजपस्तस्याः स्वलक्षीतसवितुरियम् । अण् । ङीप् । पुण्यदीपप्रसिद्धायांनद्याम् ॥

सावित्रीव्रतम् । न॰ ज्येष्ठकृष्णचतुर्द्दश्याम् स्त्रीकर्त्तव्ये नियमविशेषे । वटसावित्री॰ इ॰ भाषाप्रसिद्धे ॥

सावित्रीसूत्रम् । न॰ यज्ञोपवीते ॥

साशङ्क । त्रि॰ सभये ॥

साशूक । पु॰ कम्बले । इ॰ हारावली ॥

सास्रधी । स्त्री॰ श्वश्र्वाम् इ॰ त्रि॰ शेष॰ ॥

सास । पुं॰ चापविशेषे ॥ असिना धनुषा सह वर्त्तते । तेन सहेति बहुव्रीहिः ॥

सासि । त्रि॰ सखड्गे ॥ सहासिना वर्त्तते । तेन सहेति तुल्ययोगइति बहुव्रीहिः ॥

सासुसू । पु॰ सवाणे ॥ असुसूभिर्वाणैः सहेति ॥

साश्रुतकर्णन् । न॰ कांस्ये ॥ इ॰ त्रि॰ श ॥

सास्ना । स्त्री॰ गलकम्बले । गवाङ्गलस्थितेकम्बलाकृतिमांसे ॥ सस्ति । षसस्वप्ने । रास्नासास्नेति साधु ॥

साहङ्कार । त्रि॰ गर्वयुक्ते ॥

साहचर्य्यम् । न॰ साहित्ये । एकक्रियान्वयित्वे । सामानाधिकरण्ये एकाधिकरणवर्त्तित्वे ॥ सहचरस्य भाव । ष्यञ् ॥

साहस । पु॰ अग्निविशेषे ॥ यथा । प्रायश्चित्ते विधुश्चैवपाकयज्ञे तु साहसः । लक्षहोमे तु वह्निः स्यात् कोटिहोमे हुताशनः ॥ इति तिथ्यादितत्त्वम् ॥ दमे । दण्डविशेषे ॥ सत्रिविधोयथा । प्रथमः साहसः स्मृतः । मध्यमः पञ्चविज्ञेयः सहस्रन्त्वेव चोत्तमः ॥ लोभात् सहस्रं दण्ड्यस्तु मोहात् पूर्वन्तु साहसम् । भयाद्द्वौ मध्यमौ दण्ड्यौ मैत्र्यात् पूर्वं चतुर्गुणमिति मिताक्षरा साक्षिप्रकरणे ८ ऽध्याय॰ ॥ न॰ बलात्कारकृतकार्य्ये । बलात् समक्षं क्रियमाणे पारुष्यादौ ॥ तथाचनारदः । सहसा क्रियते कर्म यत्किञ्चिद्बलदर्पितैः । तत्साहसमिति प्रोक्तं सहो बलमिहोच्यते ॥ मनुष्यमारणं स्तेयं परदाराभिमर्षणम् । पारुष्यमनृतञ्चेति साहसं पञ्चधा स्मृतमिति ॥ दुष्कृतकर्म्मणि ॥ अविमृष्यकृतौ । पश्चाद्दोषमनालोच्यकरणे ॥ इ॰ मे ॥ औवाकपेलितकर्म्मणि । सहसिबलेभवम् । तत्रभव इत्यण् ॥ धार्ष्ट्ये

साहसाङ्क । पु॰ विक्रमादित्यभूपतौ ॥ साहसिके ॥

साहसिकः । पु॰ चौरे । अविचार्य्यकारिणि ॥ बलेनपरदारधनादिग्रहणकारिणि ॥ अपराधाचमान कार्य्ये । यथाहमनुः । ऐन्द्रस्थान

अभिप्रेप्सुर्यं यथायमव्ययम । मो
पितं तवणमपि राजा साहसिकनर
म् ॥ वाग्दुष्टात्तस्कराच्चैव दण्ड
नैवाच्च हिंसत । साहसस्य नर
कर्त्ता विज्ञेय : पापकृत्तम ॥ सा
हसे वर्त्तमानन्तु यो मर्षयति पार्थिव
। स विनाशं व्रजत्याशु विद्वेषं चाधि
गच्छति ॥ न मित्रकारणाद्राजा विपु
लाद्वा धनागमात् । समुत्सृजेत्सा
हसिकान् सर्वभूतभयावहानिति
॥ सहसावर्त्तिनवर्त्तिनि । कोपवस
हिक्रमसाधनं तद्वर्त्तितक्त् ॥
साहसिक्यम् । न० सहसाप्रवर्त्तने ॥
साहसिकस्य कर्म्म । ब्राह्मणादित्वा
त् ष्यञ् ॥
साहसी । त्रि० साहसान्विते ॥
साहस्र: । पुं० सहस्रस्य व्याकरणा
दिसैन्यपति ॥ सहस्रसंख्यस्य ।
अण् वैत्यण् ॥ न० सहस्रसंख्ये
सहस्रायामम् ॥ । भिक्षादिभ्योऽ
ण् ॥ सहस्रमात्रे ॥ स्वार्थेऽण् ।
यथा । हरिस्साहस्रमसवर्णमा
धावपदयोर्यदेकोमतस्मिन्नसुद
र्शनं वक्ष्मण्मिति ॥ त्रि० सहस्र
गुणाधिके ॥ यथा । विधियज्ञाज्ज
पयज्ञो विशिष्टोदशभिर्गुणै । उपां
शु : स्यात्शतगुण : साहस्रोमान
सस्मृत इति ॥ सहस्रं यजतीति ।
शतमानविंशतिकसहस्रसमाद्-

ण् " सहस्रसम्बन्धिनि ॥
साहस्रकम् । न० तीर्थविशेषे ॥
साहस्रवम् । न० तीर्थविशेषे ॥
साहाय्यकम् न० साहाय्ये ॥ सहा
यस्य कर्म्म भावो वा । सहायाद्वेतिवु
ञ् । योपधाद्गुरूपोत्तमाद्वुञि
ति वा ॥
साहाय्यम् । न० सहायतायाम् ॥
सहायस्य कर्म्मभावो वा । ब्राह्मणा
दित्वात् ष्यञ् ॥ साहाय्य वरयामा
सितियथा ॥
साहित्यम् न० मेलने ॥ सहितस्य
भाव : । ष्यञ् ॥ तल्लक्षणं यथा ।
परस्परसापेक्षाणां तुल्यरूपाणां युग
पदेकक्रियान्वयित्वं साहित्यमिति
श्राद्धविवेक : ॥ एकक्रियान्वयित्व
मा ॥ मनुष्यकृतग्रन्थमिमावादि
पन्थे । काव्ये ॥
साह्वम् । न० साहाय्ये ॥ सहस्व :
सहावनाची । राक्षसानविधेसाह्व
लङ्कायामप्रथमं विद्रुतरामायण-
कमात् ॥ सहितत्वे । मेलने ॥
साह्वय : । पुं० समाह्वये ॥
सिंह । पुं० मृगेन्द्रे । पञ्चास्ये ।
कण्ठीरवे ॥ महासिंहे ॥ हिनस्ति
। हिंसेर्हिंसायाम् । पचाद्यच्
। पृषोदरादि : ॥ सिंह : प्र
सुप्तानां पाणिसृष्टं मेमाह । स्वा
धसीष्यमृगीमनुष्याकपाला मत्क्षिप्त

चलघुभर्गकर्भेन्द्रे । कर्म-
पालनमुखविसर्पैः पुण्डरीकमु-
खैहितिलखानाम् ॥ इति ॥ पं-
चमराशौ ॥ तल्लग्नोत्पन्नफलमाह
सिंहलग्ने समुत्पन्नो भोगी शत्रु-
विमर्द्दनः । स्वल्पोदरोऽल्पपुत्रश्च
शूरः स्यात् गजविक्रमः ॥ उत्तरस्य
मूत श्रेष्ठे । रत्नाभाष्ठे ।
पर्वतात्मजा ॥ सिद्धं ति । विचक्ष
रणे । सिचि . स छायाहनुमीक
स ।

सिंहकेलि । पु० पूर्व्वजिने । मञ्जुघोषे ॥

सिंहकेशर । पु० बकुले ॥ सिंहसटायाम् ॥

सिंहतल । पु० संहतले । सव्यदक्षिणयोः पाण्योर्मिलितयोर्विस्तृताङ्गुल्योः । प्रतले ॥ सिंहस्येव तलमस्य ॥

सिंहतुण्ड । पुं० सीहुण्डे । स्नुहाम् ॥

सिंहद्वार न० प्रवेशद्वारे प्रवेशनी । सिंहपौल० इ०भा०प्र० ॥ द्वाराये स्तम्भापरि चिते । तोरणे ॥

सिंहध्वनि । पु० सिंहशब्दे ॥

सिंहनाद । पु० युद्धे सैन्यानां योऽहङ्कारः स सिंहनादः । चूडायाम् ॥ सिंहवन्नादनम् । पाइ० । घञ् ॥ सिंहनादो भटानां च सिंहवन्नादनं स्मृतम् ॥ गजयूथदर्शनात्० तद्वाय० यथा सिंहस्य नादस्तथा० परबलभङ्गाय० होत्साहविहबयैच्चयोराव ससिंहनाद ॥ कलहंसाख्यछन्दोभेदे गुणगृत्नौ ॥

सिंहनादिका । स्त्री० दुरालभायाम् ॥

सिंहपर्णी । स्त्री० वासके ॥

सिंहपुच्छ । पु० वासके ॥

सिंहपुच्छिका । स्त्री० चित्रपर्णिकायाम् । चाकुलिया० इ० गौ० भा० ॥

सिंहपुच्छी । स्त्री० पृश्निपर्ण्याम् ॥ सिंहपुच्छाकारपुष्पत्वात् । उपमानात्पच्च पुच्छाच्चेति ङीष् ॥ माषपर्ण्याम् ॥ वासके ॥

सिंहपुष्पी । स्त्री० पृश्निपर्ण्याम् ॥

सिंहमुखी । स्त्री० वासके ॥

सिंहयाना स्त्री० दुर्गायाम् ॥

सिंहरथा । स्त्री० दुर्गायाम् ॥

सिंहल । पु० जम्बुद्वीपस्थोपद्वीपस्य प्रभेदे । सिलोन० इ० गौ० दे प्र० । देशविशेषे । यथा । दक्षिणोऽवन्तिमाहेन्द्रमलयाख्यमूकका चित्रकूटमहाराष्ट्राख्यौ सिंहलकोङ्कणा इति ॥ देशान्तरेपि च । मरुदेशात्पूर्वभागे कामाद्रेर्दक्षिणे शिवे । सिंहलाख्यो महादेश . सर्वदेशोत्तमोत्तम इति ॥ न० पित्तले ॥ रङ्गे

रवे ॥ ह्रादयौनौ० कु० भा० ॥

सिंहलस्था । स्त्री० सैंहल्याम् ॥ वि० सिंहलदेशवासिनि ॥

सिंहलास्थान । पु० तालसदृश वृक्षविशेषे । प्रोन्नफले ॥

सिंहलील । पु० रतिबन्धविशेषे ॥ यथा । लिङ्गोपरिस्थितानारीभूमौदत्त्वापदद्वयम् हृदयेदत्तहस्ता च सिंहलील प्रकीर्त्तित ॥ लिङ्गोपरिस्थितानारीकान्तोरस्थपदद्वया । हृदयेदत्तहस्ताच सिंहलीलो व्यसावपि ॥

सिंहवाहिनी । स्त्री० दुर्गायाम् ॥ यथा । सिंहमारुह्यकन्यान्ते निहतीमहिषीयथा । महिषघ्नीततोदेवीकन्यायांसिंहवाहिनी ॥

सिंहविक्रान्त । पु० अश्वे ॥ वि० सिंहतुल्यविक्रमवति ॥

सिंहविन्ना । स्त्री० माषपर्ण्याम् ॥

सिंहविक्रीडितम् । न० मात्रावृत्ताभेदे ॥ शृणु सिंहविक्रीडितमुत्सवकरवरयमकमनोहरचरणधरम् । चरणे यतिमानसमभिकलितविलसदवतु [illegible] नगणललितम् ॥ यथा । दिवसाद्यवसादितितिमिरवनवनजावलिशोभनिसर्गधनम् । धनदेन्द्रकृतान्तपाश्रितमितम्मितभृद्वनतलनमदिवसकृतम् ॥ सिंहावलोकिते ॥

सिंहसंहनन । वि० वराङ्गरूपेपीते ॥ सिंहसंहनन सन्ध्याशौण्डिसर्वाङ्गसुन्दर ॥ सिंहवत्संहननंदेहो ऽस्य ॥ रूढिशब्दोयम् ॥ न० सिंहस्यसम्यग्वधे ॥

सिंहसिन । पु० कृताङ्गतृपितरि ॥

सिंहा । स्त्री० धमन्याम् ॥ नाड्याम् ॥

सिंहाणम् । न० मण्डूरे । लोहमले ॥ सिंहमानयति । अन० । कर्म्मण्यण् । पृषोदरादि० ॥

सिंहाधिप । पु० सूर्य्ये ॥

सिंहानम् । न० मण्डूरे ॥ सिंहवद्दनमिति । अन० अच् ॥

सिंहासनम् । न० हैममयेराजासने ॥ सिंहवदासने ॥ सिंहाकारमासनम् । सिंहरूपासनम्वा ॥ परासनस्थो ये राजाये राजाधिराजन . सपरैर्न्यतैसि हैरिवमत्तौगजाधिप . ॥ पु० रतिबन्धभेदे । यथा । स्वजङ्घाद्वयबाहूचकृत्वावैयोपदद्वयम् । तन्नौधृत्वारमेत्कामीबन्ध सिंहासनोमत ॥

सिंहास्य । पु० वासके ॥ सिंहस्याऽस्यमिव । सिंहास्यसदृशपुष्पत्वात् ॥ वि० सिंहसमानमुखे ॥

सिंहिका । स्त्री० राहुमातरि ॥ कश्यपस्यगृहिण्योतुसिंहिकाराहुमातृ तनयावजीजनत् । पूर्वजोहरिनिकृत्तकन्धरोदैवतैरवजोनिपातित

सिंहिकात्मजः ।) पुं॰ राहौवि
सिंहिकासूनुः ।)

धुन्तुदे ॥ वास्तुपुरुषे ॥

सिंहनी । स्त्री॰ मात्रावृत्तान्तरे ॥ यद्गाथातुर्यपदं विरतिमाचषा थिनीभवति । फणिपतिपिङ्गलभ णितं तद्विपरीतं तु सिंहनीवृत्तम् । यथा । पर्यासा जलधारा विरमति मचपन्तीचनेजलधारा । जगमु प्रसादमाशास्तदपि नमेभवति जीवि ताशा ॥

सिंही । स्त्री॰ कण्टकार्याम् । वा र्त्ताकौ ॥ वासके ॥ राहुमातरि ॥ हिनस्ति । हिंसो॰ पचाद्यच् । पृषोदरादि । गौरादि ॥ सुवर्णवर्णवराटके ॥ मुद्गपर्ण्या म् ॥

सिंहीलता । स्त्री॰ वृहत्याम ॥

सिंहोन्नता । स्त्री॰ शक्वरीछन्दोभे दे १४ । वसन्ततिलके ॥

सिकता । स्त्री॰ सिकतिले॰ देशे ॥ सिकतास्त्यस्य । देशेलुबिलचौचे ति॰ सिकताशर्कराभ्यांचेतिविहि तस्याणोलुप् ॥ वृत्ति ॥

सिकताः । स्त्री॰ भूम्नि ॥ वालुका याम् ॥ सिच्यते । सिच्क्षरणे । बाहुलकादतच् । पृषोदरादि ॥

सिकतामयम् । न॰ वालुकामयदेशे । सैकते ॥ सिकतानांविकारः । मयड्वैतयोर्भाषायामभक्ष्याच्छादन योरितिमयट् ॥

सिकतावान् । त्रि॰ वालुकाबहुलेदेशे सैकते ॥ अल्पप्रायमृदधिकेदेशे ॥ सिकतास्त्यस्य । मतुप् ॥

सिकतिलः । त्रि॰ सिकतावति ॥ सिकताऽस्त्यस्य । देशेलुबिलचौ चेति॰ इलच् ॥

सिक्तः । त्रि॰ अभिषिक्ते ॥ कृतसेच ने । सेकाश्रये ॥ सिचि क्त ॥ एकेमुनिं कुम्भकुशाग्रहस्ताआम्र स्यमूलेसलिलंददान । आम्रश्चसि क्तः पितरश्चतृप्ताएकाक्रियाद्व्य र्थकरीप्रसिद्धा ॥

सिक्थः । पु॰ भक्तपुलाके । ग्रासे ॥ न॰ मधूच्छिष्टे । मेण॰ सिधा॰ हू॰ भा॰ प्र॰ मोम॰ इतिच । नी ल्याम् ॥ सिच्यते । सिच्यतेवा । षिच॰ । पातृतुदिवचिरिचिसिचि भ्यस्थक् ॥

सिक्थकम् । न॰ सिक्थे ॥ स्वार्थेकः ॥

सिक्थवर्त्तिका । स्त्री॰ मधूच्छिष्टव र्त्तिकायाम् । सिक्थदीपे । सिक्थ स्यवर्त्तिका ॥

सिङ्घाणम् । न॰ सिङ्घाणे ॥

सिचा । स्त्री॰ वस्त्रे ॥

सिचयः । पु॰ वस्त्रे ॥ जीर्णवस्त्रे ॥

सिध्मन् । त्रि॰ क्लपयति ॥ षिचेः मदप्रत्यय ॥

सिञ्जिता । स्त्री॰ पिप्पल्याम् ॥

सित । पु॰ शुक्लवर्णे ॥ अवदाते । गौरवर्णे । वाणे । शरे ॥ न॰ चन्दने ॥ रूप्ये ॥ मूलके ॥ त्रि॰ समाप्ते । अवसिते ॥ शुक्लवर्णविशिष्टे । धवले ॥ बद्धे । बधा॰ द्र॰ भा॰ ॥ ज्ञाते । सीयतेस्म । षिञ् बन्धने । क्त । अतिसम । षो॰ क्त । द्यतिस्यतीतीत्त्व वा ॥ सिनोतिस्म । अच्छिद्यते स्म क्त ॥ समाप्तौ ॥

सितकण्टा ।) स्त्री॰ श्वेतकण्टकार्याम् ॥
सितकण्टारिका)

सितकण्ठ । पुं॰ दात्यूहपक्षिणि ॥

सितकरः । पु॰ चन्द्रे । कर्पूरे ॥

सितकर्णी । स्त्री॰ वासके ॥

सितकुञ्जरः । पुं॰ इन्द्रे ॥ इन्द्रगजे ॥

सितगङ्गा । स्त्री॰ कामरूपप्रसिद्धनदीविशेषे । स्वर्णधाम् ॥ द्र॰ कालिकापुराणम् ॥

सितगुञ्जा । स्त्री॰ श्वेतगुञ्जायाम् । काकपीलौ ॥

सितचिह्न । पुं॰ वालुकागण्ड॰मत्स्ये ॥

सितच्छत्रम् । न॰ नृपच्छत्रे ॥

सितच्छत्रा । स्त्री॰ शतपुष्पायाम् ॥ सित वद्धवलशुभ्र वाञ्छमस्या ॥

सितच्छवित । वि॰ श्वेतच्छवयुक्ते ॥

सितच्छद । पु॰ हंसे ॥ श्वेतच्छद विशिष्टे ॥ वि॰सिता : शुभ्रा. छदायस्य ॥

सितच्छदा । स्त्री॰ श्वेतदूर्वायाम् ॥

सिततुरग । पु॰ अर्जुनाख्यपाण्डवे ॥

सितदर्भ । पुं॰ श्वेतकुशे ॥

सितद्वीप्य । पु॰ श्वेतजीरके ॥

सितधातु । पु॰ कठिन्याम् ॥

सितपक्ष । पु॰ हंसे । शुक्लपक्षे ॥ वि॰तद्वति ॥

सितपर्णी । स्त्री॰ अर्कपुष्पिकायाम् ॥

सितपाटलिका । स्त्री॰ काष्ठपाटलायाम् ॥

सितपुङ्खा । स्त्री॰ श्वेतशरपुङ्खायाम् ॥

सितपुष्पः । पु॰ तगरवृक्षे ॥ श्वेतरोहिते ॥ काशे ॥ न॰कैवर्तीमुस्तके ॥

सितपुष्पा । स्त्री॰ मल्लिकायाम् ॥

सितपुष्पी । स्त्री॰ श्वेतापराजितायाम् ॥ नागदन्त्याम् ॥

सितमरिचम् । न॰ शिग्रुबीजे ॥ शुभ्रमरिचे ॥

सितमाष । पुं॰ राजमाषे ॥

सितरञ्जनः । पु॰ पीतवर्णे ॥

सितरश्मिः । पु॰ चन्द्रे ॥

सितवर्णाभू । पुं॰ पुनर्नवायाम् ॥

सितवाजी । पुं॰ अर्जुने ॥
सितशिंशपा । स्त्री॰ श्वेतशिंशपायाम् ॥
सितशिम्बिक : पु॰ गोधूमे ॥
सितशूरण । पु॰ वनशौखे ॥
सितसर्षप । पु॰ रक्षोघ्ने । सिद्धार्थे ॥
सितसायका । स्त्री॰ श्वेतशरपुङ्खायाम् ॥
सितसार । पुं॰ शालिञ्चशाके ॥
सितसारक । पु॰ तिन्दुके ॥ शालिञ्चे ॥
सितसिंही । स्त्री॰ श्वेतकण्टकार्याम् ॥
सितसिन्धु । स्त्री॰ गङ्गायाम् ॥
सिता । स्त्री॰ शर्करायाम् ॥ सिनोति । षिञ बन्धने । अञ्जिष्ठ्विभ्य क्त । टाप् । शुभ्रवर्णत्वाद्वा ॥ खण्डन्तुसिकताकार शुभ्रेत शर्करा सिता । सितासुमधुराकच्यावात पित्तास्रदाहहृत् ॥ मूर्च्छाछर्दिज्वरा नृडन्तिसुशीताशुक्रकारिणी ॥ मल्लाम ॥ बेलज्याम ॥ जपायाम् ॥ गिरिकर्णतापराजितायाम ॥ वाकुच्याम् ॥ त्रायमाणायाम् ॥ मद्ये ॥ पिङ्गायाम् ॥ विदार्याम् ॥ सितकण्टकार्याम् ॥ श्वेतदूर्वायाम ॥ चन्द्रिकायाम् ॥ कुटुम्बिन्याम् ॥ गङ्गायाम् ॥

सितांशु । पु॰ चन्द्रे ॥ कर्पूरे ॥
सितांशुतैलम् । न॰ कर्पूरतैले ॥
सिताखण्ड । पु॰ मधुशर्करायाम् ॥
सिताङ्क । पु॰ वालुकागडमत्स्ये ॥
सिताङ्ग । पुं॰ श्वेतरोहिते ॥
सिताजाजी । स्त्री॰ श्वेतजीरके ।
सिताद्रि । पु॰ गुडे ॥ सितायाआद्रि ॥
सितानन । पुं॰ गरुडे ॥
सितापाङ्ग । पु॰ मयूरे ॥
सिताब्जम् । न॰ श्वेतकमले ॥
सिताभ । पु॰ कर्पूरे ॥
सिताभ पु॰ हिमवालुकायाम् । कर्पूरे ॥ सित श्वेत्य॰ बन्धन वा॰ चन्द्र वा॰ अभ्नति । अभगतौ । कर्मण्यण् ॥ शुक्लत्वात् । सिताभमिवबा ॥
सिताभ्रकम् । न॰ कर्पूरे ॥
सिताम्बर । पु॰ श्वेतवस्त्रपरिहितव्रतिनि ॥ त्रि॰ शुक्लवस्त्रवति ॥
सिताम्भोजम् । न॰ शुक्लपद्मे । पुण्डरीके ॥ सित शुक्लञ्चतदम्भोजञ्च ॥
सितार्जक । पु॰ श्वेततुलस्याम् कुठेरके ॥
सितालता । स्त्री॰ श्वेतदूर्वायाम् ॥
सिताख्र्क । पु॰ श्वेतमन्दारे ॥

सिताभिकण्टभी । स्त्री॰ श्वेतकिणही वृक्षे ॥

सिताम्बर । पुं॰ सुधीपधके । श्रीवारके । सितिचाराङ्कतिख्यातेशाखि । सुनिपर्वे ॥

सितावरी । स्त्री॰ बाकुच्याम् ॥

सितासित । पु॰ बलभद्रे । हलायुधे ॥

सिताह्वय । पुं॰ श्वेतशिग्रौ ॥ श्वेतरोहिते ॥

सितेक्षु । पु॰ श्वेतेक्षौ ॥

सितेतर: । पुं॰ कृष्णशालौ ॥ कुलत्थे ॥ कृष्णे । त्रि॰ कृष्णवर्णवति ॥

सितेतरगति । पु॰ वह्नौ ॥

सितोद । पुं॰ सरोविशेषे ॥ विपुलाख्यस्याद्रेर्मूर्ध्नि वैभ्राजाख्यवनततसितोदकनामसर॰ यदर्कक्रान्तिभिरब्जैर्मण्डितसुरैरासेव्यते । तदुक्तम् । वैभ्राजंवैपुलेमूर्ध्निसितोदश्चकदोत्तम । देवैर्निषेव्यतेऽब्जैः कमलैरमृतप्रभैरिति ॥ सितमुदकमयस्य । उत्तरपदस्येत्युदकस्योदादेश ॥

सितोदक । पु॰ सितोदे ॥ स्वार्थे क ॥

सितोदर: । पु॰ कुबेरे ॥

सितोपल । पु॰ स्फटिके ॥ खटिकाधातौ ॥ सिताश्मनि । स्त्री॰ सीता॰ कु॰ भाषाप्रसिद्धा ॥

सितोपला । स्त्री॰ शर्करायाम् ॥ शर्कराविकारभेदे । मिश्रीतिलोकविश्रुते ॥ सितोपलासरालघ्वी-वातपित्तहरीहिमा । यथायथाऽस्यनैर्मल्यंमधुरत्वंतथातथा ॥ स्नेहलाघवशैत्यानिसरत्वञ्चतथातथा ॥

सिद्ध. । पु॰ व्यासादौ ॥ देवयोनिविशेषे । अणिमादिगुणोपेतेविश्वावसुप्रभृतौ ॥ विष्कम्भादियोगान्तरगतयोगविशेषे ॥ तत्रजातस्फलयथा । जितेन्द्रिय. सर्वकला निधानोगौरोतिशूरोमधुरोविनीत । सत्योपपन्नः क्षतभूरिभोगोयस्यप्रसूतौकिलसिद्धयोग । इति ॥ गुडे असेधीत् । इति सिद्ध. षिधुहिंसासराध्यो. । गत्यर्थाकर्मकेतिकर्तरिक्त. । सिध्यतिस्मेतिवा । अर्शआद्यच् ॥ कृष्णधत्तूरे ॥ व्यवहारे ॥ रे । शब्द शृणोमीत्यादिव्यवहारेषप्रसिद्धे । न॰ सैन्धवलवणे ॥ त्रि॰ योगिनि ॥ जन्मनैवविनाप्रयत्नंधर्मज्ञानवैराग्यैश्वर्यातिशयप्राप्ते ॥ पूर्णमनोरथे ॥ अधिगतपरमार्थे । पुत्रभृत्यादिभि सहाये । सम्पन्ने ॥ प्रसिद्धे । नित्ये । यथासिद्धाद्यौ॰ सौद्धापृथिवी॰ सिद्धमाकाशमिति

॥ कार्य्यं च्यवि पपत्ते । तद्यथा सिद्धौदनः सिद्धः सूपः सिद्धा यवागूरिति ॥ मुक्ते ॥ निष्पन्ने । पक्वे ॥ सिध्यति स्म । सिध् संराद्धौ । क्तः । सिद्धिसाधनाप्रयोगः ॥ सर्वभूतादौ निग्राधिष्ठाने परमेश्वरे ॥ उत्पत्त्या लब्धात्मकस्य घटादेः सिद्धमित्युच्यते । परमात्मा तु सर्वदालब्धसत्ताकः सर्वोत्पादकप्रमाणाभावादिति नित्यनिष्पन्नरूपत्वान्नित्यसिद्ध उच्यते ॥ सिद्धिर्मोक्षज्ञानवास्तदुभयमीश्वरस्य तत् सिद्ध इत्यनन्याधीनसिद्धत्वात् सिद्धो वा ॥ सिद्धिविशिष्टे ॥

सिद्धक । पु० शालवृक्षे ॥ सिन्धुवारे ॥

सिद्धकामेश्वरी । स्त्री० कामाख्यायाः पञ्चमूर्त्यन्तर्गतप्रथममूर्त्तौ ॥

सिद्धक्षेत्र । पुं० क्षेत्रदेशान्तर्गतदेशविशेषे ॥

सिद्धगङ्गा । स्त्री० मन्दाकिन्याम् ॥

सिद्धजलम् । न० काञ्जिके । पक्वतोये ॥

सिद्धदेवः । पुं० शिवे ॥

सिद्धधातु । पु० पारदे ॥

सिद्धपीठ । पु० सिद्धस्थाने ॥ यथा । आमोलकवत् निषदेशेन च कोटिसंख्यया । महाविद्याप कोटि सिद्धपीठ प्रकीर्त्तितम् इति ॥

सिद्धपुरम् । न० भूगोलपादौ देशविशेषे । तच्चोत्तरकुरुवर्षे न्निरक्षदेशस्थिते ॥ यथा । लङ्कामध्ये यमकोटिरस्याः प्राक् पश्चिमे रोमकपत्तनञ्च । अधस्तात् सिद्धपुरं सुमेरुः सौम्येऽथ याम्ये वडवानलश्च ॥ कुवृत्तपादान्तरितानि ताभ्यो नानि षट् गोलविदो वदन्ति ॥

सिद्धपुरी । स्त्री० सिद्धपुरे ॥

सिद्धपुष्प । पु० करवीरवृक्षे ॥

सिद्धप्रयोजन । पु० गौरसर्षपे ॥ त्रि० लब्धकार्ये ॥ सिद्धं प्रयोजनं येन । यस्य वा ॥

सिद्धमन्त्र । पु० सिद्धिप्रदमन्त्रे ॥

सिद्धमोदक । पु० तवराजीक्षुखण्डे ॥

सिद्धयोगिनी । स्त्री० योगिनीविशेषे ॥

सिद्धरस । पु० पारदे । रसे । त्रि० व्यालिप्रभृतिषु । सिद्धधातोरस्य । सिद्धौ रसो येषाम् ॥

सिद्धविद्या । स्त्री० दुर्गायाम् ॥ महाविद्यायां ॥

सिद्धसङ्घ । पु० कपिलादिसिद्धानां समूहे ॥

सिद्धसलिलम् । न० काञ्जिके ॥

सिद्धसाधनः । पु० गौरसर्षपे । न० सिद्धस्य वस्तुनः साधने । सा

सिद्धान्त ।

ध्यवस्थानिश्चयेसर्वेप्यनुमाने ॥

सिद्धसिन्धु । स्त्री॰ स्वर्गङ्गायाम् । गङ्गायाम् । आकाशगङ्गायाम् ॥ सिद्ध नांसिन्धु ॥

सिद्धसेन । पु॰ कार्त्तिकेये ॥

सिद्धसेवित । पु॰ भैरवे ॥ त्रि॰ कपिलादिसिद्धोपासिते ॥

सिद्धा । स्त्री॰ ऋद्ध्याख्यौषधौ ॥ सिद्धिरस्त्यस्याम् । अर्शआद्यच् टाप ॥ योगिनीविशेषे ॥

सिद्धान्तः । पु॰ वक्तृतात्पर्यविषयार्थधारणे ॥ पूर्वपक्ष निरस्यसिद्धपक्षस्थापने । वादिप्रतिवादिभ्यां निर्णीतेऽर्थे ॥ सिद्धान्त लक्षयति गौतमोयथा । तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तइति ॥ अस्यार्थः । तन्त्रं शास्त्रं तदेवाधिकरणमापकतयाश्रयः तादृशोयोऽभ्युपगमः तस्यसमीचीनतयाऽसंशयरूपतयास्थितिः तयाचशास्त्रितार्थनिश्चयः सिद्धान्तः । अत्र चाभ्युपगम्यमानोऽर्थः सिद्धान्तइति भाष्यम् । अभ्युपगमः सिद्धान्तइति वार्त्तिकटीका । नचात्रविरोधशङ्कनीयः । आचार्यैः परिहृतत्वात् । तथाचविस्तृतौनिबन्धः । अर्थाभ्युपगमयोर्गुणप्रधानभावस्यविवक्षातन्त्रत्वात् अर्थोभ्युपगमोऽभ्युपगम्यमानोवाऽर्थः सिद्धान्त इति सूत्रभाष्यवार्त्तिकटीकासुनविरोध । अतएवभाष्यानुसारात्सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगम सिद्धान्तान्तरम् । सिद्धान्तइति सूत्रार्थइतितुनयुक्तम् अपिमसूत्रानुत्थानापत्तेः । तंचसिद्धान्तत्वेनद्वयमनुगम्यतन्त्राधिकरणाभ्युपगमान्यतमसिद्धान्तइतिकश्चित् ॥ २६ ॥ सिद्धान्तं विभजते । सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थितीनामर्थान्तरभावात् ॥ २७ ॥ सचतुर्विधइतिशेष । सर्वतन्त्रादिसंस्थितीनामर्थान्तरभावात् भेदादित्यर्थः ॥ २७ ॥ राद्धान्ते ॥ सिद्धोऽन्तोनिश्चयोयस्मिन् ॥ अस्यविधज्योतिषान्येषु । ब्रह्मसूर्यसोमबृहस्पतिगर्गनारदपराशरपुलस्त्यवशिष्ठसिद्धान्तेषु ॥

सिद्धान्ताचारः । पु॰ वामाचारादुत्तमआचारविशेषे ॥ यथा । आत्मानंदेवतामत्वायजेद्देवींसमाहितः । सदाशुद्धं सदाशान्तं सिद्धान्ताचारउच्यते ॥ इत्याचारभेदतन्त्रम् ॥

सिद्धान्ती । पुं॰ मीमांसके ॥ सिद्धान्तोविद्यतेऽस्य ॥ इनि ॥

सिद्धापगा । स्त्री॰ स्वर्णद्याम् । गङ्गायाम् ॥

सिद्धायिका । स्त्री॰ जिनशासनदेव

तारविशेषे ॥

सिद्धार्थः । पुं० विष्णौ ॥ सिद्धो निर्वृत्तो निष्पन्नः काम्यमानोऽर्थोऽस्य । आप्तकाममत्वादिति ॥ स्कन्दे । सितसर्षपे ॥ शाक्यसिंहे । शौद्धोदनौ ॥ वृत्तार्हत्पितरि ॥ जिनमन्दिरस्थचैत्यवृक्षे ॥ सिद्धार्थोऽस्यादस्य ॥ वत्सरविशेषे । तत्फलं यथा । तोयपूर्णा स्मृता मेघा बहुसस्या च मेदिनी । नितरां पार्थिवा देवि सिद्धार्थे वत्सरानने ॥ ५३ ॥ त्रि० प्रसिद्धार्थे ॥

सिद्धार्था । स्त्री० वृत्तार्हन्मातरि ॥

सिद्धासनम् । न० ब्रह्मणि ॥ सिद्धं यत्सर्वभूतादिविश्वाधिष्ठानमव्ययम् । यस्मिन्सिद्धाः समाविष्टास्तद्वै सिद्धासनं विदुः ॥ सिद्धस्य तदासनञ्च । सिद्धानामासनं वा । कर्मधारयतत्पुरुषाभ्याम् । ब्रह्मवैवर्त्ते ॥ योगिनामासनविशेषे ॥ यथा । योनिस्थानकमङ्घ्रिमूलघटितं कृत्वा दृढं विन्यसेन्मेढ्रे पादमथैकमेव हृदये कृत्वा समं विग्रहम् । स्थाणुः संयमितेन्द्रियोऽचलदृशा पश्यन्भ्रुवोरन्तरे तिष्ठेदेतदतो योगिसुखदं सिद्धासनं प्रोच्यते ॥ इति ॥ योनिस्थानकमिति ॥ एकपादमूलाल्लिङ्गमूले द्वितीयपादमूलस्थापना धृत्यर्थः ॥

सिद्धिः । स्त्री० निष्पत्तौ ॥ पादुकायाम् ॥ अन्तर्धाने ॥ वृद्धौ ॥ ऋद्धिनामौषधौ ॥ दुर्गायाम् ॥ सम्पत्तौ ॥ योगे ॥ साङ्ख्यानामष्टविधसिद्धौ । यथा । ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः । दानञ्च सिद्धयोऽष्टौ । विहन्यमानस्तु खलु विघ्नात्तद्विघाताश्च यद्गति । इमा मुख्यास्तिस्रः सिद्धयः । तदुपायतया चेतरा गौण्यः । पञ्च सिद्धयः । तास्वपि हेतुहेतुमत्तया व्यवस्थिताः । तत्राध्ययनलक्षणा सिद्धिर्हेतुरेव । मुख्यास्तु हेतुमत्य एव । मध्यमास्तु हेतुहेतुमत्यः ॥ पुष्पगन्धादिविषयानुविधायिनी सिद्धिरस्या । पुं आत्मनि० प्रकृतावव्यक्ते० आदियादात् व्यक्ते चयानुविविज्ञानसामिद्धिरिष्यते ॥ यातायोगान्तरे ॥ यथा वर्गोत्तमगते लग्ने शुभे वाथ बलान्विते । सिद्धिस्त्रीमह्ये योगे या यिनां सिद्धिदायकः । इति ॥ राज्ञां षड्विधसाध्यासु पुरुषार्थलाभादिकासु० प्रभुसिद्धिमन्त्रसिद्ध्युत्साहसिद्धिषु ॥ सहायाः साधनोपाया विभागो देशकालयोः । विनिपातप्रतीकारः सिद्धिः पञ्चाङ्गमिष्यते ॥ तथाच । कर्मणामारम्भोपायः । पुरुषद्रव्यसम्पत् । देशकालविभागः । विनिपातप्र

तीकारः । कार्य्यसिद्धिर्भवतीति मोतिशास्त्रविदः ॥ मोक्षे ॥ सत्त्वशुद्धिद्वारा ब्रह्मात्मत्वे ॥ ब्रह्मभावलक्षणायाम् । पुरुषार्थप्राप्तियोग्यताह्रूपायामन्तःकरणशुद्धौ । ज्ञाननिष्ठालक्षणायाम् ॥ सिद्ध्यति । षिधु संराद्धौ । क्तिच । यद्वा । कारणे क्तिन् ॥

सिद्धिद । पु॰ प्रत्यगभिन्नब्रह्मापरोक्षज्ञानद्वारा स्वरूपावस्थानलक्षणमुक्तिप्रदे श्रीगुरौ ॥ परमेश्वरे ॥ सिद्धिम् फलं कर्तृभ्यः स्वाधिकारानुरूपतो ददातीति । डुदाञ् । आतोऽनुपसर्गे कः ॥ भैरवे ॥ त्रि॰ सिद्धिदातरि ॥

सिद्धियोग । पुं॰ शुभयोगविशेषे ॥ यथा । शुक्रे नन्दा बुधे भद्रा शनौ रिक्ता कुजे जया । गुरौ पूर्णा च संयुक्ता सिद्धियोगः प्रकीर्त्तितः ॥

सिद्धियोगिनी । स्त्री॰ योगिनीविशेषे कल्किपुराणोक्ता सुदर्शनस्य पत्नी ...

सिद्धिस्थानम् । न॰ पुण्यस्थानविशेषे ॥

सिद्धेश । पु॰ कपिलमुनौ । सदाशिवे ॥ सिद्धानामीशः ॥

सिद्धेश्वर । पु॰ शिवे ॥

सिद्धेश्वरी । स्त्री॰ देवीविशेषे

सिद्धौघ । पु॰ गुरुक्रमविशेषे ॥

सिध्मम् । न॰ किलासरोगे । सिध्मा॰ । पु॰ न॰ किलासरोगे ॥ सिध्मा किलासं त्वक्पुष्पं सिध्ममिति हेमचन्द्रः । किलासं सिध्मकुष्ठमरः ॥

सिध्मल । त्रि॰ किलासिनि ॥ सिध्ममस्यास्ति । सिध्मादिभ्यश्चेति लच् ॥

सिध्मला । स्त्री॰ मत्स्यविकृतौ । मत्स्यचूर्णे ॥

सिध्मवान् । त्रि॰ किलासे ॥ सिध्ममस्यास्य । मतुप् ॥

सिध्य । पु॰ पुष्यनक्षत्रे ॥ सिध्यन्त्यस्मिन् कार्य्याणि । षिधु॰ । पुष्यसिध्यौ नक्षत्रे इति क्यपि निपातितः ॥

सिध्र । पु॰ वृक्षे ॥ साधौ ॥ सिध्यति । षिधु॰ । स्फायितञ्चीतिरक् ॥

सिध्रका । स्त्री॰ सौधकृतिभाषाप्रसिद्धवृक्षे । सेधति॰ सिध्यति वा । षिधु॰ । वहुलमन्यत्रापीति॰ स्फायितञ्चीति वा रक् । ततः स्वार्थे कन् । क्षिपकादित्वादित्त्वाभावः ॥

सिध्रकारण्यम् । न॰ देवोद्याने ।

सिध्रकावणम् । न॰ सिध्रकारण्ये ॥ सिध्रकाणां वनम् । वनम् पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्य इति णत्वम् ॥

सिन । पु॰ ग्रासे । पिण्डीकृत्य भोज्यवस्तुनि ... सिनोति बध्नाति ... तथा च सिनोतेर्ग्रासकर्मकर्त्तृकस्य ...

संकाशेतिनिष्ठातश्च ॥ कार्ष्णे ॥ सिनोति । षिञ् । ऊण् षिञि तिनक् ॥ त्रि॰ शुक्लगुणविशिष्टे । सिनी । स्त्री॰ शुक्लगुणवत्याम् । श्वेतासितासिनीश्येनीतिव्याडिः ॥

सिनीवाली । स्त्री॰ दृष्टेन्दुकलामायाम् ॥ चतुर्दशीयोगाद्दृष्टचन्द्रा सती॰ अमा॰ सिनी॰ वालीपदवाच्या भवति । एनविष्णुनासञ्च संबेलालक्ष्मी । तद्योगात्सिनी चन्द्रकला । श्रीह्यादित्वादिनि । सिनीं वलति । वल॰ । कर्मण्यण् । ङीप् ॥ दुर्गायाम् । हृ॰ मे॰ नी॰ ॥

सिन्दुकः । पु॰ । सिन्दुवारे ॥ स्यन्दते । स्यन्दूप्रस्रवणे । स्यन्दे॰ सम्प्रसारणञ्चेत्युः । बाहुलकाद्धो न । स्वार्थसञ्ज्ञायां वा कन् ॥ श्वेतनीलपुष्पभेदात् सिन्धुको द्विविधो मतः ।

सिन्दुवारः । पुं॰ निर्गुण्ड्याम् । सिन्दुके । स्यौंडी॰ सम्हालू॰ वहणा॰ इ॰ भा॰ प्र॰ ॥ सिसिन्दा॰ इनछर॰ इ॰ गौ॰ दे॰ भा॰ ॥ सिन्दून् वृणोति॰ वारयति वा । वृञ् वरणे वृञ् आदरणे वा । कर्मण्यण् ।

सिन्दूरः । पुं॰ वृक्षविशेषे ॥ न॰ रक्तवर्णचूर्णविशेषे । नागसम्भवे । सीमन्तके ॥ तत्पर्यायाम्यायु धातुविशेषेऽतिशयोक्ताः काशीखण्डे । हरिद्रां कुङ्कुमञ्चैव सिन्दूरं कज्जलं तथा । कार्पासकञ्च ताम्बूलं माङ्गल्याभरणं शुभम् ॥ केशसंस्कारकबरीकरकर्णविभूषणम् । भर्तुरायुष्यमिच्छन्ती दूषयेन्न पतिव्रतेति ॥ अस्य पर्यायाद्येयथा । सिन्दूरं रक्तरेणुश्च नागगर्भञ्च सीसजम् । सीसोपधातुः सिन्दूरगुणास्तत्सीसवन्मतम् ॥ संयोगजप्रभावेण तस्याप्यन्ये गुणाः स्मृताः ॥ सिन्दूरमुष्णं वीसर्पकुष्ठकण्डूविषापहम् ॥ भग्नसन्धानजननं व्रणशोधनरोपणम् ॥ अस्य शोधनं यथा । दुग्धाम्लयोगतस्तस्य विशुद्धिर्गदिता बुधैरिति ॥ स्यन्दते । स्यन्दू॰ । स्यन्देः सम्प्रसारणञ्चेत्यूरन् ॥

सिन्दूरकारणम् । न॰ सीसके ॥

सिन्दूरतिलकः । पु॰ मतङ्गजे । हस्तिनि ॥

सिन्दूरतिलका । स्त्री॰ सधवायां नार्य्याम् ॥

सिन्दूरपुष्पी । स्त्री॰ सिन्दूरीतिख्याते पुष्पवृक्षविशेषे । वृषपुष्प्याम् । वा रक्तच्छदायाम् ॥ अस्या गुणाः । कटुत्वम्॰ तिक्तत्वम्॰ कषायत्वम्॰ श्लेष्मवातशिरोऽर्त्तिभूतनाशित्वम्॰ चाण्डीप्रियत्वञ्चेति ॥ सिन्दूरवत् पुष्पाण्यस्याः । पाककर्णेतिङीष् ।

सिन्दूररस । पुं० रससिन्दूराभिधौषधे ।

सिन्दूरित । त्रि० सिन्दूरयुक्ते ॥ सिन्दूरयच्छब्दात् तत्करोतीतिण्यन्तात्कर्म्मणि क्त । ग्राविष्टवल्लिङ्गता तु० विमलतालु स्त्र्क् ॥

सिन्दूरी । स्त्री० रोचन्याम् ॥ रक्तचेलिकायाम् ॥ धातक्याम् ॥ सिन्दूरी विषपित्तास्रकण्ठावाश्लिष्टरोहिता ॥

सिन्धु । पुं० अब्धौ । समुद्रे ॥ स्यन्दते० आपोऽत्र । स्यन्द् । स्यन्देः सम्प्रसारणं धश्च । ॥ वमथौ ॥ राजेयभरतार्यावर्त्तदेशविशेषे ॥ काश्मीरदेशप्रसिद्धे नदविशेषे ॥ गजमदे ॥ सिन्धुवारवृक्षे ॥ रागविशेषे ॥ श्वेतटङ्कणे ॥

सिन्धु । स्त्री० नद्याम् । सरिति ॥ नदीविशेषे ॥ तज्जलगुणा यथा । अत्र्योर्विपाशायुता सिन्धुनद्या सुशीतं लघु स्वादु सर्वामयघ्नम् । जलं निर्म्मलं दीपनं पाचनञ्च प्रदत्ते बलं बुद्धिमेधायुतञ्च ॥

सिन्धुक । पुं० सिन्दुवारे । निर्गुण्ड्याम् ॥ सिन्धुशब्दात् स्वार्थे संज्ञायां वा कन् । गुणा यथा । सिन्धुक स्मृतिदस्तिक्तः कषायः कटुकोऽलघुः । केश्योऽनेत्रहितो हन्ति शूल शोथाममारुतान् ॥ क्रिमिकुष्ठारु विश्लेष्मश्वासश्लीपदविषान् ॥ सिन्धुवारश्च तद्गुणस्तत्र सुरसपत्रु ॥ त्रि० सिन्धुजाते ॥ सिन्धुपत्रा राम्नायाम् ॥

सिन्धुकफ । पु० समुद्रफेने ॥

सिन्धुप्रभव । पु० तीर्थविशेषे ॥

सिन्धुरस । न० श्वेतटङ्कणे ॥

सिन्धुखिल । पु० सिन्धुदेशे ॥

सिन्धुजम । न० सैन्धवलवणे ॥ सिन्धुजातम् ॥ सप्तम्यां जनेर्डः ॥ त्रि० समुद्रजाते ॥

सिन्धुजन्मा । पुं० चन्द्रे ॥ न० सैन्धवलवणे ॥

सिन्धुजा । स्त्री० लक्ष्म्याम् ॥

सिन्धुडा । स्त्री० मालवरागभार्य्यायाम् ॥

सिन्धुनन्दन । चन्द्रे ॥

सिन्धुपुत्र । पुं० चन्द्रे ॥ मर्कटेन्दौ ॥

सिन्धुपुष्प । पु० शङ्खे ॥

सिन्धुमन्थजम् । न० सैन्धवलवणे ॥

सिन्धुर । पु० हस्तिनि ॥

सिन्धुरद्वेषी । पुं० सिंहे ॥

सिन्धुरवदन । पु० श्रीगणेशे ॥

सिन्धुराज । पुं० समुद्रे ॥

सिन्धुलवणम् । न० सैन्धवे ॥

सिन्धुवार । पु० उत्तमाङ्गे ॥ सिन्धुवारे । निर्गुण्ड्याम् ॥ सिन्धुवारोऽश्मरी शूलक्रमकुष्ठक्षयापहः ॥ सिन्धुवारोऽति० वारयतिवा । इत्

चाण्डालनिशा। कर्मण्यच् ॥

सिन्धुवारक। पु॰ सिन्धुवारे॥

सिन्धुवारित। पुं॰ सिन्धुवारे॥ त्रि॰ समुद्रेणवारिते॥

सिन्धुवेषण। पु॰ गम्भार्याम्॥

सिन्धुसङ्गम। पं॰ समेदे। सिन्ध्वोः सङ्गमोमेल॥

सिन्धूत्तमम्। न॰ तीर्थभेदे॥

सिन्धूद्भवम्। न॰ सैन्धवलवणे॥ सिन्धुरुद्भवोऽस्य॥

सिन्धूपलम्। न॰ सैन्धवलवणे॥

सिप्र। पु॰ चन्द्रे। हिमांशौ॥ निदाघसलिले। स्वेदे॥ न॰ सरोविशेषे॥ यथोक्तं कालिकापुराणे। ततोहिमवतः प्रस्थे प्रतीच्यन्तु पुरस्य च। सिप्रनामसरः पूर्वं ददर्श दृषिर्ध्वजः इति॥

सिप्रा। स्त्री॰ नद्यन्तरे॥ सिप्राख्यात्सरसोयस्मान्निर्गतासामहानदी। अत सिप्रेतितन्नाम पुरैवब्रह्मणोकृतमिति कालिकापुराणम्॥ साचोज्जयिनीदेशेवर्त्तते। तस्या श्चोत्पत्तिः कालिकापुराणे २३ अध्यायेद्रष्टव्या॥

सिम। त्रि॰ समस्मिन्। सर्वशब्दार्थे॥ सिनोति। षिञ्॰। बाहि सिञ्चिभ्य? किदितिमन्॥

सिम्बा। स्त्री॰ शम्बाम्। शिम्बायाम्। वीजगुप्तायाम्। सौर॰ दू॰ भा॰ प्र॰॥ फली॰ षू॰ प्र॰ च॥ समति। षमवैक्लव्ये। उलकादय श्चेतिसाधु॥

सिम्बि। स्त्री॰ शिम्बाम्। सिम्बायाम्। नखनामगन्धद्रव्ये॥

सिम्बी। स्त्री॰ शिम्बायाम्॥

सिर। पुं॰ पिप्पलीमूले॥

सिरा। स्त्री॰ नाड्याम्। अम्बुवाहिन्यांनाड्याम्। सौर॰ दू॰ भा॰ प्र॰ सिनोति। षिञ्॰। बहुलमन्यत्रापीतिरक्॥

सिराल। पु॰ सिरासन्तते॥

सिरिण्टिका। स्त्री॰ चुद्रक्षुद्रविम्बा क्षयक्षपे। दुराधर्षायाम्॥

सिलक। पु॰ मलाद्वीपस्थ॰ ष्ट षिविशेषे॥

सिल्हकी। स्त्री॰ शल्लकीवृक्षे॥

सिषाधयिषा। स्त्री॰ साधनेच्छायाम्॥ यथा। सिषाधयिषयाशून्यासिद्धिर्यत्रनविद्यते। सपक्षस्तत्रहसिद्धत्सनादनुमितिर्भवेत्॥

सिषिचा। स्त्री॰सेक्तुमिच्छायाम्॥

सिसृक्षन्। त्रि॰ स्रष्टुमिच्छति॥

सिहुण्ड। पु॰ स्नुहीवृक्षे॥ सोऽतिहुण्डते। हुडिवरणे। पचाद्यच॥ सिहतुण्डस्याचमपभ्रंश इतिस्वामी॰ पृषोदरादि॥ अस्यगुणायथा। सिहुण्डोरेचनस्तीक्ष्णोदीपनः कटुकोगुरुः। शूलामाष्ठी

लिङ्गाध्मानकफगुल्मोदरानिलान् उन्मादमोहकुष्ठार्शः शोथमेदोश्मपाण्डुताः । व्रणशोथज्वरघ्नोऽथविषदूषीविषं हरेत् ॥ उष्णवीर्यस्तु तीक्ष्णो रस्निग्धश्च कटुकस्तथा । गुल्मनाशकृच्छिनाश्चापि तथैवोदररोगिणाम् । हितमेतद्विरेकार्थे येचान्ये दोषरोगिणः ॥

सिहुण्डदलम् । न० स्नुहीपत्रे ॥ तच्छाकगुणा यथा । सिहुण्डस्य दलं तीक्ष्णं दीपनं रोचनं हरेत् । आध्मानाष्ठीलिकागुल्मशूलशोथोदराणि च ॥

सिह्लः । पुं० तुरुष्के । पिण्डके । यावने । लोबान० इ० भा० प्र० ॥ स्निह्यति । स्निहप्रीतौ । अस्नभिर्वितयर्थं । बाहुलकात् । पृषोदरादि० ॥

सिह्लकः । पुं० सिह्ले । नागौरीगन्द० इ० भा० लोबान० इ० यवनभाषाप्रसिद्धे ॥ सिह्लकः कटुकः स्वादुः स्निग्धोष्णः शुक्रकान्तिकृत् । वृष्यः कण्डूस्वेदकुष्ठज्वरदाहग्रहापहः ॥

सिह्लकी । स्त्री० सल्लक्याम् ॥ सिह्ले ॥

सिह्लभूमिका । स्त्री० शल्लक्याम् ॥

सिह्लसारः । पुं० तुरुष्के । धूम्रवर्णे । पीतसारे ॥

सीकरः । पुं० शीकरे ॥ धनपालादिमतेदन्त्यादिः ॥

सीता । स्त्री० लाङ्गलपद्धतौ । हलरेखायाम् ॥ जनकनन्दिन्याम् । मैथिल्याम् । वैदेह्याम् ॥ सीता लाङ्गलपद्धतिः । तदुत्पन्नत्वात् सीतेति निर्दिश्यते ॥ यथा । अथ मे कृषतः क्षेत्रं लाङ्गलादुत्थिता ततः । क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुतेति रामायणे ६६ सर्गः ॥ स्वर्गगङ्गायाम् ॥ यथा । पूर्वस्माच्छैलात् सीतातु शैलं यात्यन्तरिक्षगा । ततश्च पूर्ववर्षं यद्भद्राश्वेनैति सार्णवम् ॥ सातु भद्राश्ववर्षगङ्गा । यथोक्तं श्रीभागवते । सीतातु ब्रह्मसदनात् केशवाचलादिगिरिशिखरेभ्योऽधोऽधः प्रस्रवन्ती गन्धमादनमूर्द्धसु पतित्वान्तरेण भद्राश्ववर्षं प्राच्यां दिशि क्षारसमुद्रमभिप्रविशतीति ॥ श्रियि ॥ दुर्गायाम् । सस्याधिदेवतायाम् ॥ मदिरायाम् । गङ्गास्रोतसि । काञ्चनमालायाम् ॥ सीयते । षिञ्० । क्त । पृषोदरादि० ॥

सीताद्रव्यम् । न० काषकुद्दालादौ ॥

सीतापतिः ।)
सीतायाः पतिः ।) पुं० रामचन्द्रे । दाशरथौ ॥

सीत्कारः । पुं० मनुष्याणां सुखानुरागजशब्दे ॥ यथा । शक्तोगन्धानु

रागीत्य' प्रयादः सीत्कृत नृथामितिहेमचन्द्रः ॥ दन्तनिष्पीडनार्थो । सीदितिशब्दे ॥

सीत्कृतम । न० सीत्कारेसुरतध्वनौ ॥

सीत्यम् । न० धान्ये ॥ त्रि० हल्ये । हलेनकृष्टेक्षेत्रे ॥ सीतयासमित० सङ्गत० निर्भोगतादिरक्षितबक्तत० समीकृतमितियावत् । नौयवेऽधर्मेतियत् ॥

सीदमान' । त्रि० अवसीदति ॥

सीद्यम् । न० आलस्ये ॥

सीधु । पु० शीधुशब्दार्थे ॥

सीधुगन्ध । पुं० बकुले ॥

सीधुपुष्प । पुं० कदम्बे ॥ बकुले ॥

सीधुपुष्पी स्त्री० धातक्याम् ॥

सीधुरस । पु० आम्रवृक्षे ॥

सीधुसंज्ञः । पु० बकुलद्रुमे ॥

सीप' । पु० तपं आयश्चं ताम्रादिनिर्मितेजलपात्रे । अर्घा० कोषा० इ० भा० प्र० ॥

सीभ् । अ० सर्वतोभवे ॥

सीमा । स्त्री० आघाटे । मर्यादायाम् । सीमायाम् । ग्रामादीनामवधारितान्तभागे । सीम० इ० भा० प्र० ॥ स्थितौ ॥ क्षेत्रे । अण्डकोषे ॥ सीयते । षिञ० । नामन्सीमन्नित्यादिनानिपातित । मनन्तित्वात् ङीप् । सीमानौ० सीमानः ० इत्यादि ॥

सीमन्त । पु० सीमन्तोन्नयनसंस्कारे ॥ पु० न० केशवेशे । केशरचनाभेदे ॥ केशेषुवर्त्मनि । मूर्द्धजमध्यपद्धतौ ॥ सीमन्तमभिराशीर्वाकेशमध्येतुपद्धतिरितिवैजयन्ती । सीमोऽन्त । शकन्ध्वादि ।

सीमन्तक । पु० नरकावासे । यथा । सप्तपञ्चैवनरकावासा । सीमन्तकादयः० हेमचन्द्रः ॥ न० सिन्दूरे ॥

सीमन्तित । त्रि० सीमन्तितोकृते ॥ सीमन्तशब्दात्मकत्वात् । तत्करोतीतिण्यन्तात् कर्मणिक्तः । आविष्टतयाषे० विभ्रमतोलुक ॥

सीमन्तिनी । स्त्री० नार्याम् ॥ सीमन्तोऽस्त्यस्या । अतइनि । नान्तत्वात् ङीप् ॥

सीमन्तोन्नयनम् । न० गर्भाधानात्० षष्ठेऽष्टमेवामासिकर्तव्ये० संस्कारविशेषे ॥ यथा । मासिषष्ठेऽष्टमेवापिक्त्वेपुंसवनादिके । दिनेशुभेनिमित्तेकुर्यात्सीमन्तोन्नयनक्रियां ॥

सीमा । स्त्री० अघाटे । मर्यादायाम । सीमनि । ग्रामादीनामवधारितभागे । सीम० इ० भा० प्र० ॥ स्थितौ ॥ क्षेत्रे । अण्डकोषे ॥ सिनोति० सीयतेवा । षिञ० । नामन्सीमन्नित्यादिनानिपातित ।

मनङ्गतिनङीप । छाबुभाभ्यामिति पक्षे डाप् । सीमे॰ सीमा॰ ॰ इ त्यादिविध्यम् ॥ वेलायाम् ॥

सीमाविवाद । पु॰ ग्रामादीनांसी माविषय केकलहे ॥ सीमाविषयको विवाद सीमाविवाद । सीमा चतुर्विधा । जनपदसीमा॰ ग्राम सीमा॰ क्षेत्रसीमा॰ गृहसीमेति भेदात् ॥

सीमिक । पु॰ वृक्षविशेषे ॥ वा ल्मीके ॥ सूक्ष्मजन्तुजातौ । इस पक्षविभागकृतिकोटे ॥ स्यमति । स्यमुशब्दे । स्यमे सम्प्रसारणञ्चे तिकिकन् ॥

सीर । पु॰ अर्के । सूर्ये । हले । लाङ्गले ॥ सिनोति॰ सीयतेवा । षिञ् । शुसिचिमीनांदीर्घश्चे ति॰ क्रन्॰ दीर्घत्वञ्च ॥

सीरक । पु॰ शिशुमारे ॥ अर्के ॥ हले ॥

सीरध्वज । पु॰ चन्द्रवंशीयनृपवि शेषे ॥

सीरपाणि । पु॰ बलभद्रे । कालि न्दीभेदने ॥ सीरोलाङ्गलपाणा वस्य ॥

सीराङ्गम् । न॰ फालाधारे ॥

सीरी । पु॰ बलदेवे ॥

सीलभ्य । पु॰ मत्स्यविशेषे । सि लिन्दा॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ ॥ तद्गुणायथा । सीलभ्य श्लेष्म कोष्ण्यो विपाकेमधुरोगुरु । वा तपित्तहरोहृद्यआमवातकरश्च ॥

सीवनम् । न॰ सेवने । स्यूतौ । तु न्नवायकर्मणि । सीवना॰ इ॰ भा॰ ॥ षिवुतन्तुसन्ताने । ल्युट् पृषोदरादित्वाद्दीर्घः ॥ षिवुसि व्योल्युटिवादीर्घइतिवामो ॥

सीवनी । स्त्री॰ लिङ्गमध्यस्थ सूत्रे । लिङ्गाधोदृश्यमानसूत्राकारचर्मणि ॥

सीसम् । न॰ सीसके । धातुविशेषे । ना गे । सीसा॰ इ॰ भा॰ प्र॰ भा तौ ॥ सिनोति । षिञ्॰ । क्विप् । अनित्यत्वात्तुक । इ ष्यति । षिञ्॰ । भातोनुपेतिक । षिञ्॰ तत्॰ ईसस्य॰ सीसम् ॥ अस्यगुणा यथा सीसरङ्गगुणाज्ञेयविशेषान्मो हनाशनम् ॥ नागस्तुनागशततुल्य बलंददातिव्याधिविनाशयतिजीव नमातनोति । वह्निं प्रदीपयतिका मवलंकरोतिमृत्युञ्चनाशयतिसन्त तसेवित स ॥ पाकेनहीनौकि लवगनागौकुष्ठानिगुल्मांश्चतथाति कष्टान् । पाण्डुप्रमेहानिलमन्दशो थभगन्दरादीन्कुरुत: प्रभुक्तौ ॥ अतःशोधनमारणविधिर्यथा । त स्मात्रैकादीरुचगत्रैवनिदर्शि ता । शोधनवापितस्तेय॰ भि षग्भिर्वादितपुरा । तास्मूलरस

म्यिष्टशिलालिप्तोत्पुन पुन । द्यांच शश्च . पुटैर्नागोशिमिस्रत्व भस्मजायते ॥ शिलामन ' शिला । अन्यच्च । चश्वत्थचिञ्चात्वक्चूर्णं चतुर्थांशेनन ' क्षिपेत् । नत्याच शिद्र्बौलागैमौक्ष्टर्थ्याप्रचालित ॥ यामैकैनभवेद्भस्मतत्तुल्याश्चान्म न ' शिला । काञ्जिकेनदृयपिष्ट्वा पचेद्दृढपुटेनच ॥ खाङ्गमौतपुन पिष्ट्वाशिलयाकाञ्जिकेनच । पुन पचेच्छरावाभ्यामेवषष्टिपु- टैस्त्रि ' ॥ अपिच । तैलेतक्रे गवां मूत्रे काञ्जिकेचकुलत्थके । चि धाविधाविशुद्धि ' स्यात्खर्परादीनां समासत ॥ मारणम्पुन । कुडवनागपत्राणाकुनब्या स्यात्प लाईकम । तण्डुलीयरसैर्यामयाम बासारसैस्तथा । सम्मर्द्यचक्रिया ङ्कत्वा वर्मैसशोष्यतम्पुन ' । सरा वसम्पुटेकृत्वापचेद्वन्योपलैर्भिषक ॥ एवसप्तपुटैर्नागोभस्मीभवतिनि श्चितम् । चिशुद्धोयभुवन्याातप्रमे हानखिलानपीतिवैद्यदर्पण ' ॥

सौसकम् । न० सौसे ॥ स्वार्थेक ॥

सौसपत्रकम् । न० सौसके ॥

सौंडुगड ! । पुं० सुप्राम् । सिडुगड़े ॥ सौतिडुगडते । डुडिमर्षे । पचाद्यच् ॥ सिन्दुगडशाप्रभं शो भमितिशामौ । पृषोद्दरादि ॥

सु । अ० पूजायाम् ॥ भृशार्थे ॥ नि भरे । अतिमात्रे ॥ अनुमतौ ॥ कृच्छ्रे ॥ समृद्धौ । अनायासे ॥ सूयते० सवतिवा । सुगतौ । क्वि पि० तुगभाव ० ह्रस्व ॥

सुकण्टका । स्त्री घृतकुमार्य्याम् ॥

सुकाण्ड । पुं० काण्डोरी ॥

सुकथा । स्त्री० नैमिषारण्याधिष्ठात्री देवतायां ॥

सुकन्द । करेरुणि ॥ धरणीकन्दे ॥

सुकन्दक । पु० पलाण्डौ ॥ शोभ नमतीवशा० कन्दयति० भक्षकस्य जातिभ्र शकरत्वात् । कद्दिरोदने । अच । स्वार्थेकन । खलवा ॥ धरणीकन्दे ॥ वाराहीकन्दे ॥

सुकन्दी । पु० सूरणे ॥

सुकम् । अ० अतिशये ॥

सुकर ' । वि० सुखकरे । सुखेनक र्तुं शक्ये । सुसाध्ये ॥ ईषद्‌दु , सु ष्विति० भावे० कर्मणिवा० खल् कृञ्ार्थेखल ॥ अल्पसाधनैरधिका र्थ्योनसुकर ' ॥

सुकरा । स्त्री० सुशीलायाङ्गवि । अच गडाम् ॥ सुसुखङ्करोति । अ च ॥ सुक्रियतेवा । ईषद्दुसुष्वि तिखल ॥

सुकर्ण ! पुं० हस्तिकर्णे ॥ वि० शोभनकर्णवति ॥

सुकर्णक । पुं० हस्तिकन्दे ॥ वि०

सुन्दरकार्य्यंवति ॥

सुकर्णिका । स्त्री॰ मूषीकर्ण्याम् ॥

सुकर्णी । स्त्री॰ इन्द्रवारुण्याम् ॥

सुकर्म्मा । पु॰ विष्कम्भाद्यन्तर्गतयोगविशेषे ॥ तज्जातफलं यथा । परोपकारीकुशलः कलासुवर्णयुक्तो नितरां यशस्वी । प्रसूतिकालेयदिचेत्सुकर्म्मानर सुकर्मभवतिप्रसिद्धः । देशानामिल्पिनि । विश्वकर्म्मणि ॥ त्रि॰ सत्क्रिये । शोभनकर्म्मकारणशीले ॥

सुकल । त्रि॰ दातभोक्तरिमानवे । यएकएव्ददाति॰ भुङ्क्तेचतस्य । दाताभोक्ता॰ इ॰ भा॰ प्र॰ ॥ सुकल्पते । कलशब्दसङ्ख्यानयोः । ईषद्दुःखुच्वतिखल् ॥ शोभनाकलायस्येतिवा ॥

सुकल्प । त्रि॰ अतिनिपुणे ॥

सुकाण्ड । पुं॰ कारवेल्ले ॥ त्रि॰ शोभनकाण्डवति॰ वृक्षादौ ॥

सुकाण्डी । स्त्री॰ काण्डीरे । काण्डवेल्लइति॰ गौ॰ भा॰ प्र॰ लतायाम् ॥

सुकाण्डी । पु॰ भ्रमरे ॥

सुकामा । स्त्री॰ त्रायमाणायाम । बलेति॰ बहुलेति॰ गौ॰ भा॰ प्र॰ ।

सुकाली । पु॰ वशिष्ठात्मजेषु॰ शूद्रार्च्चपितृषु ॥

सुकालुका । स्त्री॰ डोडीक्षुपे ॥ इ॰ रा॰ ट ॥

सुकाष्ठकम् । न॰ देवकाष्ठे ॥

सुकाष्ठा ।
सुकाष्ठिका । स्त्री॰ कटव्याम् ॥ काष्ठकदल्याम् ॥ इ॰ रा॰ ट ।

सुकुन्दन । पु॰ बर्व्वरे ॥

सुकुमार । पु॰ पुण्ड्रेक्षौ । वनचम्पके ॥ चवे ॥ श्यामाके ॥ त्रि॰ कोमले । मृदौ ॥ सुष्ठुकुमारयति । कुमारक्रीडायाम् । चुराद्यदन्त॰ । पुंसीतिघः । एरज्वो ॥ यद्वा । सुकाम्यते । कमे . णिङ्चोपधाया ह्रस्वारन् ॥

सुकुमारक । पुं॰ शालौ ॥ सुन्दरबालके ॥ न॰ तमालपत्रे ॥

सुकुमारतर . । त्रि॰ अतिपेलवे ॥

सुकुमारतरा । स्त्री॰ अतिपेलवायाम् । प्रकृतौ ॥ यथोक्तं । प्रकृतेः सुकुमारतरं नकिञ्चिदस्तीतिमेमतिर्भवति । यादृष्टास्मीतिपुनर्नदर्शनमुपैतिपुरुषस्येति ॥

सुकुमारा । स्त्री॰ कदल्याम् ॥ मालत्याम् ॥ नवमालिकायाम् ॥ लताम्याम् ॥ पृक्कायाम् ॥ त्रिसन्धिपुष्पे ॥

सुकुमारी । स्त्री॰ नवमालिकायाम् ॥

सुकृत् । त्रि॰ पुण्याढ्ये ॥ धार्म्मिके ॥ सुष्ठुकृतवान् । डुकृञ् । सुकर्म्मपापेतिक्विप् । तुक् ।

सुकृतम् । न० शुभे । स्वर्गादिप्राप्तौ । पुण्ये ॥ त्रि० सुविहिते । सुविधाने ॥ सुष्ठु कृतम् । प्रादिसमासः ॥ सुष्ठु क्रियतस्मेति वा । क्त ॥

सुकृति । स्त्री० सत्कर्मणि ॥ शोभनाकृति ॥

सुकृती । त्रि० पुण्यवति । धन्ये ॥ सुकृतमस्यास्ति । अतइनि ॥

सुकेतुसुता । स्त्री० ताडकायाम् ॥

सुकेशर । पु० बीजपूरे ॥

सुकेशी । स्त्री० अप्सरोविशेषे ॥ त्रि० शोभनकेशयुक्ते ॥

सुकोमल । त्रि० अतिमृदुले ॥ अतिमनोज्ञे ॥

सुकोमला । स्त्री० सिन्दूरीतिप्रसिद्धे पुष्पे ॥

सुकोली । स्त्री० क्षीरकाकोल्याम् ॥

सुकोश) सुकोशक) पु० कोषाम्रे । क्षुद्राम्रे ॥

सुखसुप । पु० खट्वाङ्गे ॥ इति० हे०चन्द्रः ॥

सुखम् । न० आत्मवृत्तिगुणविशेषे ॥ सुदि । प्रीतौ ॥ हर्षे । आह्लादे । आनन्दे । शर्मणि । सर्वेषामनुकूलवेदनीये ॥ स्वर्गे । नाके । त्रि० वृद्धिनामौषधे ॥ जले ॥ न्यायमते० धर्मजन्ये जगत ऽकाम्ये ॥ यथ सुखन्तु जगतामेवकाम्यं धर्मेण जन्यते । अधर्मजन्यं दुःखं स्यात्प्रतिकूलं सचेतसाम् ॥ तत्र मनीषिणामन्यस्य यथा । मनोयात्यसुखं दुःखमिच्छाद्वेषौ मतिः कृतिरिति भा० प० ॥ सुखं चतुर्विंशतिगुणान्तर्गतगुणविशेषः । तत्तु नित्यं जन्यञ्च । नित्यं परमात्मनो विशेषगुणान्तर्वर्त्ति । जन्यसुखं जीवात्मनो विशेषगुणान्तर्वर्त्ति । तच्च शुभादृष्टजन्यम् । धनमित्रलाभारोग्यमिष्टान्नपानपुरीषोत्सर्गपुत्रादिजन्मतत्पाण्डित्यकान्तासम्भोगादिजन्यञ्च । तच्चाहितस्यापि स्वसौतरोत्पन्नानुभवनाश्रयत्वात् । सुखाद्युपरागेणैवात्मनो मानसबोधः । सुखं तदुपायश्चेष्टः । बालस्य स्तन्यपानप्रवृत्तौ सुखसाधनत्वज्ञानं हेतुः तच्च सुखस्यैवेष्टत्वम् । दुःखजनकागमनादिप्रवृत्तौ सुखोपायेऽधन तदेवेष्ट० तत्साधनत्वज्ञानमेव हेतुः । यागादिप्रवृत्तावपि पारलौकिकसुखसाधनत्वज्ञानञ्च कारणम् । सुखोपायस्वर्गादिरूपेष्टसाधनत्वज्ञानमधिकारणम् । सुखस्य कालावच्छेदत्वं शरीरावच्छेदत्वञ्च सुखतोऽव्याप्यवृत्तित्वम् । शरीरैकदेशावच्छेदेन दुःखसम्भवेऽप्यन्यदेशावच्छेदेन सुखसम्भवात् । एकदेशावच्छेदेन जीवस्य दुःखसम्भवेऽपि

त्रणान्तराबच्छेदेनसुखसम्भवाच्च०
तत्तु विस्फोटकवतोमिष्टान्नभोजना
दौद्रष्टव्यमितितात्किंका ॥ * । सुख
रूपेब्रह्मणि ॥ आत्मानन्दलक्षणआन
न्दे ॥ सर्व्वतोनिवृत्तिकेनचित्तेनलय
विक्षेपविलक्षणे । विक्षेपेवृत्तिसत्त्वा
त्‌० लयेचमनसोपिस्वरूपेणाऽसत्त्वा
त्‌ ० सर्व्ववृत्तिशून्येनसूक्ष्मेणमनसो
सुखानुभवेसमाधौ ॥ धर्म्मासाधार
णकारणकेऽनुकूलवेदनीये । निरु
पाधीच्छाविषयीभूतधर्म्मासाधारण
कारणिकायांचित्तवृत्तौ । परमा
त्मसुखव्यञ्जिकायाम् । मोक्षानन्दे ॥
भोजनानन्तराह्लादे ॥ तृप्तौ ॥ त
च्चसात्त्विकादिभेदात्‌त्रिविधम् ।
यथा । अभ्यासाद्रमतेयत्रदुःखा
न्तञ्चनिगच्छति एतद्विवर्णीति ।
यत्तदग्रे विषमिवपरिणामेऽमृतोप
मम् । तत्सुखंसात्त्विकम्प्रोक्त
मात्मबुद्धिप्रसादजम् ॥ विषयेन्द्रि
यसंयोगाद्यत्तदग्रेऽमृतोपमम् ॥
परिणामेविषमिवतत्सुखंराजस
स्मृतम् ॥ यदग्रेचानुबन्धेचसुख
मोहनमात्मन । निद्रालस्यप्रमा
दोत्थं तत्तामसमुदाहृतम् ॥ आ
त्मगुणे ॥ आत्मतत्त्वरूपे ॥ शो
भनानिपरिपुष्टानि० खानीन्द्रिया
णियेनतत् ॥ यद्वा । सुखयति ।
सुखदुःखतत्क्रियायाम् । चुरा

दि० । पचाद्यच् ॥ त्रि० अभेदेन०
सुखविशिष्टे ॥ यथा । त्रिषुद्रव्ये
पापपुण्यसुखादिचेत्यमरः । पापपु
ण्यशब्दौसुखादयश्चशब्दान्ताःगुणेय
थोक्तलिङ्गा उपचारात्तद्वतिद्रव्येवि
शेष्यंवर्त्तमानावाच्यलिङ्गा ।यथा।
पापात्कृतुमतीकन्यापापिराजाप्यर
का । पापव्याघ्रकुलेहस्तपापीविप्रस्त्र
सेवकः ॥ पुण्यतीर्थनदीपुण्याश्र
मःपुण्यएवच सुखाभूतिःसुखि
वासः सुखकामोकुलमतम् ॥
सुखसंज्ञे ॥ धर्म्मेशे ॥ सुखवृ
त्तौ ॥ सुखदुःखसाधनानामस्थि
रत्वसुखस्यमनोविलासमात्ररूपत्व
ञ्चोक्तं विष्णुपुराणे । यथा । वस्त्वे
कमेवदुःखायसुखायेर्ष्योद्भवायच ।
कोपायचयतस्तस्माद्वस्तुवस्त्वात्मकङ्
कुतः ॥ तदेवप्रीतयेभूत्वापुनर्दुः
खायजायते । तदेवकोपायततः प्र
सादायचजायते ॥ तस्माद्दुःखात्म
कंनास्तिनचकिञ्चित्सुखात्मकम्
। मनसः परिणामोयंसुखदुः
खोपलक्षणः ॥ इति २ अंशे ६ ऽध्यायः
॥ सर्व्वकामविहीनेऽतः सुखसर्व्वव्य
वस्थितमित्यन्यच ॥ दुःखञ्च
सुखप्राप्त्या नबद्नतिसुखिनोतिदेवी
भागवतम् ॥ सर्व्वंपरवशं दुःखं स
र्व्वमात्मवशंसुखम् । एतद्विद्यात्
समासेनलक्षणंसुखदुःखयोः ॥

सुखकर । त्रि॰ सुकरे ॥

सुखकरी स्त्री॰ लताविशेषे । जीवन्त्याम् ॥ सुखकर्थाम् ।

सुखङ्घुण । पु॰ शिवखट्वाङ्गे ॥ स्त्रि॰ शेष ॥

सुखचर । त्रि॰ सुखगामिनि ॥

सुखचार । पुं॰ उत्कृष्टाश्वे ॥

सुखजात । त्रि॰ जातसुखे ॥

सुखद । पुं॰ परमात्मनि । विष्णौ ॥ सद्वृत्तानां सुखमेव ददाति । डुदाञ्॰ । असद्वृत्तानां सुखं द्यति॰ खण्डयतीति वा । दो॰ । आतूर्तक । त्रि॰ सुखप्रदे । न॰ विष्णोः स्थाने ॥

सुखदा । स्त्री॰ गङ्गायाम् ॥ सद्यः पातकसंहन्त्री सद्यो दुःखविनाशिनी । सुखदा मोक्षदा गङ्गा गङ्गैव परमा गतिः ॥ काशीखण्डे ॥ सुखदत्वात् ॥ स्वर्वेश्यायाम् ॥

सुखदोह्या । स्त्री॰ सुखसन्दोह्यायां गवि ॥ सुखेन दुह्यते । दुह॰ । ऋहलोर्ण्यत् ॥

सुखमोदा । स्त्री॰ शल्लकीवृक्षे ॥

सुखरात्रि । सुखरात्रिका । स्त्री॰ दीपान्वितामावास्यायाम् ॥ यथा । तुलाराशिगते भानावमावास्यां नराधिप । स्नात्वा देवान् पितॄन् भक्त्या सम्पूज्याथ प्रणम्य च ॥ कृत्वा तु पार्वणश्राद्धं दधिक्षीरगुडादिभिः । ततोऽपराह्णसमये घोषयेन्नगरे नृप ॥ लक्ष्मीः सम्पूज्यतां लोका उल्काभिश्चाभिचेष्टताम् ॥ * ॥ दर्शश्चैष प्रदोषव्यापिनी ग्राह्य । तुलास्थे सहस्रांशौ प्रदोषे भूतदर्शयोः । उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनम् ॥ उभयत्र प्रदोषप्राप्तौ परदिनएव । दण्डैकरजनीयोगे दर्शः स्यात्तु परेऽहनि । तदा विहाय पूर्वेद्युः परेऽह्नि सुखरात्रिका । उभयत्र प्रदोषव्याप्त्यभावे प॰ उल्कादान परदिने॰ पूर्वोक्तपार्वणानुरोधात् । भूतदर्शप्रकुर्वन्ति उल्काग्रहमचेतसः । निराशाः पितरो यान्ति शापं दत्त्वा सुदारुणम् ॥ अत्रैव लक्ष्मी पूर्वाह्णेरात्रौ पूज्या । अमावास्या यदा रात्रौ दिवाभागे चतुर्दशी । पूजनीया तदा लक्ष्मीर्विज्ञेया सुखरात्रिका ॥ उल्काग्रहणादिपत्नकृत्यत्वात्प्राचीनावीतिना दक्षिणामुखेन कर्त्तव्यम् ॥ तथा च मनुः । प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा । पित्र्यमानिधनात्कार्य्यं विधिवद्दर्भपाणिनेति ॥ उल्काग्रहणमन्त्रो यथा । शस्त्राशस्त्रहतानाञ्च भूतानां भूतदर्शयोः । उज्ज्वलज्योतिषा देहं दहेयं व्योमवह्निनेति । दानमन्त्रो यथा । अग्निदग्धाश्च ये जीवा

शैव्यदग्धा कुसिमम । उज्ज्वल ज्योतिषादग्धास्त्रिग्रान्तुरमाकृति मिति । विसर्ज्जनमन्त्रोयथा । यम लोकपरित्यज्यत्रागतायैमद्वालये । उज्ज्वलज्योतिषावर्त्मप्रपश्यन्तोव्र जन्तुते ॥ इति ॥

सुखलुब्ध । पु॰ देहिनि ॥ यथा । मासलुब्धोयथ मत्स्योलोहशङ्कुनप श्यति । सुखलुब्धस्तथादेहीयमबा धानपश्यतीतिकुलार्णवतन्त्रम् ॥

सुखवर्च्चक । पु॰ सर्ज्जिकाक्षारे । सुख वर्चयति । वर्च्चदीप्तौ । क्वुन् ॥

सुखवर्च्चा । पु॰ सर्ज्जिकाक्षारे ॥ सुखेनवर्च्चयेन ॥

सुखवास । पु॰ तरमु॰ इ॰ प्र॰ फ लविशेषे ॥

सुखवासन । पु॰ सुखवासनगन्ध द्रव्ये । यथा । सुखवासकरोगन्ध स्य मेदोमुखवासन । सुखवास नस्त्रोवैशुभशासनइत्यपीतिशब्द रत्नावली ॥

सुखसंवित्ति । स्त्री॰ सुखानुभवे ।

सुखसन्दोह्या स्त्री॰ सन्न्याम् । सु प्रतायाम सुखेनसन्दुह्यते । दु ह॰ । ऋदुपधाच्चेत्यत् ।

सुखा । स्त्री॰ प्रचेतस पुर्याम् ॥ अभेदेनसुखरूपाम् । शोभनेन्द्र याम् ॥

सुखाधार । पु॰ स्वर्गे ॥ त्रि॰ सुख स्याधारे ॥

सुखायत । पु॰ उत्कृष्टाश्वे । सु शिक्षितेश्वे ॥ यथा । सुखयत शुभमुख सुखचार: सुखायनइ तिशब्दमाला ॥

सुखायन । पु॰ उत्कृष्टघोटके ॥ सुखेनअयनगमनयेन ॥

सुखालुका । स्त्री॰ बहुरसलायाम् । जीवन्त्याम् ॥

सुखावती । स्त्री॰ बुद्धभूमौ ॥

सुखावतीश्वर । पुं॰ बुद्धभेदे ॥

सुखावह । पु॰ भर्त्तरि ॥ त्रि॰ सुखदातरि ॥

सुखाश । पु॰ वरुणे । प्रचेतसि ॥ सुखभोजने ॥ तरम्बुजि । अस्य म र्य्यायथा । आश्चैवालखिवफल सुखाशोराजतेमिष । शतापन सनाटामौसेदुरितिचित्राबुडशेष ।

सुखासनम् । न॰ नरवाह्ययानविशे षे । खासा॰ इ॰ भा॰ प्र॰ ॥ सुखेनआसनयस्मिन् ॥

सुखित । त्रि॰ सुखरूपताइते ॥ सु खसञ्जातमस्य । इतच् ॥

सुखी । त्रि॰ सर्व्वथानीरोगे ॥ निरा यासस्थिते ॥ तृप्ते । जिते ॥ सु खमस्त्यस्य । सुखादिभ्यश्चेति॰ इ नि । ॥ दु. खमूलमिदसार समसासिसदु'खित । तस्मात्या ग कुर्वीतयेनससुखीनापरप्रिये ।

द्भुरिश्चीकुलार्णवतन्त्रम्॥ ब्रह्मादिस्थावरान्तं मायया कल्पितं जगत्। सत्यमेकं परं ब्रह्म विदित्वैवं सुखी भवेदिति महानिर्वाणतन्त्रम्। विदित्वा गुरोर्मुखादध्यात्मविद्यावणादिभि॥

सुखोत्सवः। पुं० भर्त्तरि। पत्यौ॥ सुखस्य उत्सवोऽस्मिन्॥

सुखोदकम्। न० सुखोष्णे। सुखजनकोष्णजले॥

सुखोज्झितः। पुं० सन्न्यासिनि॥

सुखोष्णम्। न० सुखोदके॥

सुगः। पुं० गन्धर्वे॥ सुष्ठु गायति। गै० क॥ न० विष्ठायाम्॥ त्रि० सुगमे॥ सुखेन गच्छत्यत्र। उपपद० रणे० सुदुरोरधिकरणइतिगमेर्डः॥

सुगतः। पुं० सर्व्वज्ञे। क्षणिकज्ञानात्मवादिनि। बुद्धे। शोभनं गतं ज्ञानमस्येति सुगतः। सुष्ठु अपुनरावृत्त्येगतइतिवा॥ सुखेन संसाराद् गतो वा॥

सुगतिः। पुं० अतीतकल्पीयार्हद्भेदे॥ स्त्री० शोभनगतौ॥ पुण्यात्मनां शरीरान्तप्राप्यस्थाने॥ यथा। सुवृत्तशीलसम्पन्नः प्रसन्नात्मात्मविद्बुधः। प्राप्येहलोके सम्मानं सुगतिं प्रेत्य गच्छतीति॥

सुगन्धः। पुं० कर्पूरादिगणे॥ यथा। कर्पूरो मृगनाभिश्च कस्तूरीच तिकास्तथा। गन्धमामरिचीयं च श्रीखण्डं पीतचन्दनम्॥ कालीयकं रक्तकाष्ठं पतङ्गमगुरुद्वयम्। देवदारुश्च सरलस्तगरं पद्मकं पुरः। सर्ज्जनिर्यासकोशालकुन्दुरुश्च शिलारसः। सिह्लकश्च लवङ्गश्च जातीपत्रं फलं तथा॥ एलाद्वयं दारुचीनी त्वक्पत्रं नागकेशरम्। बालुकशीरचामांसीकुङ्कुमं रोचनानखम्॥ सुगन्धीरच बाल जटामांसी मुरा चन्द्रन। शठी कर्च्चूरपत्राङ्गीसुगन्धोऽयं गणो मतः॥ रक्तशिग्रौ॥ चणके॥ गन्धके॥ भूतृणे॥ न० क्षुद्रजीरके। गन्धतृणे॥ श्वेतचन्दने॥ नीलोत्पले॥ ग्रन्थिपर्णे॥ कृष्णजीरके॥ कत्तृणे॥ पुं० तीक्ष्णगन्धे। रक्ततुलस्याम्॥ त्रि० समवायातिरिक्तसम्बन्धेन सद्गन्धविशिष्टे॥

सुगन्धकः। पुं० गन्धके॥ रक्ततुलस्याम्॥ कर्कोटी० इ० भा० प्र० शाके॥ तस्य पर्य्याया यथा। कर्कोटकः किलाद्वेषाश्चित्तपत्रः सुगन्धकः तस्मचन्द्रः। कर्करी इ० गौ० दे० शा०॥ शालीविशेषे।

सुगन्धतैलनिर्यासम्। न० गन्धद्रव्यविशेषे। जवादिनि। मृगदर्पे। कस्तूर्य्याम्॥

सुगन्धपत्रा।)
सुगन्धपत्रिका।) स्त्री० रुद्रजटा

थाम् ॥

सुगन्धमूत्रम् । न० गन्धटर्वे ॥

सुगन्धमूला । स्त्री० रास्नायाम् ॥ स्थलपद्मिन्याम् सुगन्धीमूलेय स्या . ॥

सुगन्धा । स्त्री० रास्नायाम् ॥ शोभनो गन्ध । कुगतीतिमन्मस । सुगन्धोस्यास्या । अश्वगन्धा ॥ शल्याम् ॥ गङ्गोत्थ्याम् , वन्ध्याया कीटध्याम् । नाम ।रामाख्याम तुलस्याम् ॥ मधुकर्कटिकायाम् ॥ मतपुष्पायाम् ॥ स्वर्णयूथ्याम् ॥ रुद्रजटायाम् ॥ चनमल्लि ॥ सलाक्याम् ॥ माधव्याम् ॥ तीर्थ शिशि ॥

सुगन्धमलकम् । न० सर्वौषधिभि शुष्कमलकत्वच्ये गे । यथा । सर्वौषधिसमायुक्ता शुष्कास्त्वामलकत्वच । यद्यात्तदाय थीग 'स्यात् सुगन्धामलकाभिध ॥ इतिराज निघंट ॥

सुगन्धि । पु० शोभनगन्धे । सुरभौ । प्राज्ञतर्पणे । दृष्टगन्धे ॥ तुम्बुरवृक्षे । तीक्ष्णमूर्त्ते । परमात्मनि ॥ इतिमोषमटोकायांनीलक्ष्ठ ॥ सहकारे । न० एलवालुनि । ऐलेये ॥ कुस्तुम्बुरौ । धान्याके ॥ मुस्तके ॥ कशेरुणि ॥ गन्धतृणे ॥ पिप्पलीमूले । त्रि० सुगन्धयुक्ते । शोभनोगन्धोऽस्य । गन्धस्येदुत्पूतिसुसुरभिभ्यइतीत्वम् ॥ गन्धस्येत्वेतदेकान्तग्रहणं नाद्रियन्ते केचन । यथा । कालकूथत कटभुवंड्करिणोमदेनस्थानं । सुगन्धिमनुतोमनतानगश्ये ति माघे० सुगन्धिशोभनगन्धमित्य र्थात् ॥

सुगन्धिका । पुं० सिह्लके । तुरुष्के महाशाली ॥ गन्धके ॥ न० कह्लारे ॥ पुष्करमूले ॥ गौरसुवर्णे । वारुणी । पत्रशाकविशेषे ॥ सुवर्णे ॥ उशीरे ॥

सुगन्धिकुसुम । न० सुगन्धिपुष्पे पु० पीतकरवीरे ॥ शोभनगन्धवन्तिपुष्पाण्यस्य ॥

सुगन्धिकुसुमा । स्त्री० पृक्कायाम ॥

सुगन्धिता । स्त्री० सौरभ्ये ॥ शोभनोगन्धोयस्य० तस्यभाव: । तल् । टाप् ॥

सुगन्धितैलम् । न० । सुगन्धितैले । तैलकार्दिपाणीये ॥

सुगन्धिफला । स्त्री० जातीफले न० पूगफलेनचस युक्ते लवङ्गकलिकाफले ॥

सुगन्धिनी । स्त्री० आरामशीतलायाम् ॥

सुगन्धिमूलम् । न० उशीरे ॥

सुगन्धिमूषिका । स्त्री० छुछुन्दर्याम् ॥

सुगम : । त्रि० सुखेनगमनीयेसुखावाप्तौ ॥ सुखेनगम्यतेप्राप्यते । गमल० । दुःसहदुःख्यैतिखल् । यथासुगम . पन्था : ॥

सुगरम् । न० रक्तमणे । हिङ्गुले ॥

सुगहन : । त्रि० नितिनेडि ॥

सुगहनावृत्ति . । स्त्री० कुम्भायाम् । यज्ञस्थाने० अस्पृश्यादिदृष्टवेनत्रा रणायनितिडिवेष्टने ॥ सुगहनानि वन्यामावृत्ति . ॥

सुगृह । पु० चञ्चुसूचीखगे । शीततुखे । यथा० द्र० भो० प्र० ॥ न० शोभनालये ॥ त्रि० शोभनगृहवति ॥

सुगृहीत . । त्रि० सुन्दररूपेणकृतग्रहणे ॥

सुगृहीतनामा । पुं० शुभकाम्ययाप्रात स्मर्त्तव्ये युधिष्ठिरादौ ॥

सुग्रन्थि । पु० ग्रन्थपर्णप्रभेदे । चोरकौ ॥ शोभना ग्रन्थिर्यस्मिन ॥

सुग्रीव ' । पुं० कपिपुङ्गवे । सूर्यपुत्रे । किष्किन्धाधिपे । श्रीरामभिते ॥ विष्णोरश्वभेदे ॥ देवीरतिशुम्भनिशुम्भाभ्यांप्रेषितेदूतविशेषे ॥ इन्द्रे ॥ शिवे ॥ इन्द्रे ॥ राजहंसे ॥ असुरविशेषे ॥ पर्वतविशेषे ॥ अस्त्रविशेषे ॥ नागप्रभेदे ॥ त्रि० शोभनग्रीवायुक्ते ॥

सुग्रीवी । स्त्री० कश्यपपत्नीविशेषे ॥

सुग्रीवेश : । पुं० श्रीरामचन्द्रे ॥

सुघोष । पुं० विष्णौ । नारायणे ॥ शोभनोघोष ' शब्दोवेदात्मकोयस्य ॥ नकुलाख्यपाण्डवस्यशङ्खे ॥

सुचक्षु । पुं० उदुम्बरे ॥ न० शोभनेनेत्रे ॥ वेदान्तजन्यज्ञाने ॥ यथा । एवंविधत्वासकलात्मनामपिस्वात्मानमात्मात्मतयाविचक्षते । गुर्वर्कलब्धोपनिषत्सुचक्षुषायेतेतरन्तीवभवानृताम्बुधिम् ॥ त्रि० उत्कृष्टाक्षे ॥ आत्मविदि ॥ शोभनेचक्षुषीयस्य . ॥ सुष्ठुशोभनस्तत्त्वचक्षुरस्य ॥

सुचक्षु । पु० महाचक्षुष्मति ॥

सुचतुर . । त्रि० शोभनानिचत्वारि यस्य० तस्मिन् ॥ अचतुरविचतुरेत्यादिनासाधु : ॥

सुचरित्र । त्रि० सुशीले ॥ शोभनचरित्रमस्य ॥

सुचरित्रा । स्त्री० साध्व्याम् ॥ शोभनचरित्रमस्या ॥

सुचर्मा । पुं० भूर्जवृक्षे त्रि० सुचर्मवति ॥ शोभनचर्मास्य ॥

सुचारु । त्रि० मनोहरे ॥

सुचित्रम् । न० शोभनचित्रे ॥

सुचित्रक । पु० मत्स्यरङ्कविहङ्गमे ॥ चित्रसर्पे । मातुलाहौ ॥ त्रि० सुन्दरचित्रयुक्ते ॥

सुचित्रबीजा । स्त्री० विडङ्गे ॥

सुचिका । स्त्री० चिचिंटायाम् ॥

सुचिरायुः । पु० सुरे । देवे ॥ मार्कण्डेयादौ ॥ शोभनचिरायुर्यस्य ॥

सुचुक्रिका । स्त्री० तिन्तिडयाम् ॥

सुचुटी । स्त्री० सन्दंशिकायाम् ॥ शिलासन्दंशिकाख्यार्थेमेदिनिकार ॥

सुचेलम । न० शोभनवस्त्रे ॥ शोभनं चेलम् ॥ त्रि० शोभनवस्त्रवति ॥

सुचेलकः । पु० तद्गर्भे । पटे ॥ सुचेलमेव । स्वार्थेकन् ॥ त्रि०त इति ॥

सुच्छत्री । स्त्री० शतद्रुसरिति ॥ श०र०ली० ॥

सुजनः । पुं० कृपालौ ॥ सदाचारे । साधौ । सज्जने ॥ यथा । दुर्जनस्य हि सङ्गेन सुजनोऽपि विनश्यति । प्रसन्नसलिलमप्याशु कर्दमैः कलुषीकृतम् ॥

सुजनता । स्त्री० सौजन्ये ॥

सुजलम् । न० कमले ॥ शोभनेजलेस्ति । त्रि० शोभनजलयुक्ते ॥

सुजल्पः । पु० वाक्यविशेषे ॥ यथा । यत्रार्जवात् सगाम्भीर्यं सदैन्यसहचापलम् । सोत्कण्ठश्च हरिस्पृष्टः स सुजल्पो निगद्यते ॥ उज्ज्वलनीलमणिः ॥

सुजातः । त्रि० सुन्दरे

सुजाता । स्त्री० सौराष्ट्रमृत्तिकायाम् । तुवर्याम् ॥

सुजिह्वः । पु० हव्यवाहने ॥

सुजीवन्ती । स्त्री० स्वर्णजीवन्त्याम् ॥

सुज्ञः । त्रि० विज्ञे ॥ सुशोभनं जानाति । ज्ञाऽवबोधने । आतश्चोपसर्गे इतिकः ॥

सुज्ञेयः । त्रि० सुखविज्ञेये ॥ सुखेन ज्ञातुं योग्यः । ज्ञा० । अचोयत् । ईद्यति ॥

सुडीनम् । न० पक्षिणां सुकुमारपाते ॥

सुतः । पुं० आत्मजे । तनये । पुत्रे ॥ मातृपितृस्वभावस्तु स्वभावैः सुत कल्पेभवत । यथोक्तं वह्निपुराणे । शीलं सम्यजनैः पुत्रो मातुस्तातस्य गोसुता । यथा शीला भवेन्माता तथा शीलो भवेत्सुत । । यद्वार्जाविभवे भूमिस्तद्वत्सलिलं भवेत् । मातृशीलवशेनैव पितृशीलगुणेन च । विभिन्नास्तु प्रजाः सर्वा भवन्ति भवशीलिनामिति । सूयते स्म । सूतिवा । षुञ् अभिषवे । षुप्रसवैश्वर्ययोः । क्तः । वृत्ते । पार्थिवे ॥

सुतजीवकः । पु० पुत्रजीवे ॥

सुतनुः । स्त्री० नार्याम् । त्रि० सुकृशे ॥ स्वङ्गे ॥

सुतपादिका । स्त्री० हंसपद्याम् । गोधापद्याम् ॥

सुतपाः । पुं० सूर्ये ॥ मुनिविशेषे

॥ सुमौ ॥ नरनारायणऋषिभगवति बदरिकाश्रमेसुशोभनं मनसस्तेन्द्रियाणाञ्चकायारूपंतपोऽस्येतिसुतपाःनरनारायण ॥
सुतराम् । अ० अत्यन्ते । अतिशये ॥ अवधारितार्थप्रतिपादके ॥ यथा । न्यग्रुहिवमरावुशेदृश्येनापि स्नुतैरपि । ददातिमोक्षंसुतराकिम्पुनदर्शनाज्जनाद्दिति ॥ द्विवचनविभज्येत्यादिना० सुशब्दात्तरप् । किमेत्तिङ्व्ययेत्यादिनामुप्रत्यय । तद्धितश्चासर्वविभक्तिरित्यव्ययसंज्ञा ॥
सुतश्रेणी । स्त्री० देवदालीलतायाम् ॥
सुतर्दन । पु० ताम्रचूडे । कोकिले ॥
सुतल । पु० अट्टालिकाबन्धे ॥ नागलोकप्रभेदे ॥
सुतशङ्करा । स्त्री० सप्तपुत्रप्रसवा ॥
सुतश्रेणी । स्त्री० मूषिकपर्ण्याम् ॥ सुतानाश्रेणिरस्या ॥ पुत्रश्रेण्ट ॥
सुता । स्त्री० स्वपत्ये । कन्यायाम् ॥ दुहितभार्या ॥
सुतात्मज । पु० पौत्रे ॥ दौहित्रे ॥ सुतस्यसुतायाश्चात्मज ॥
सुतात्मजा । स्त्री० पौत्र्याम् ॥ दौहित्र्याम् ॥ सुतस्यसुतायाश्चात्मजा ॥
सुतारम् । न० द्वितीयायामृचव्दाख्या याम्सिद्धौ ॥
सुतारका । स्त्री० बुद्धधर्माशासनदेवीविशेषे ॥
सुतिक्त । पु० भूनिम्बे । किराततिक्ते ॥ पर्पटे । पित्तपापडा० इ० भा० प्र० ॥
सुतिक्तक । पु० पारिभद्रे । भूनिम्बे ॥
सुतिक्ता । स्त्री० कोशातक्याम् । भूदुग्धफलिकायाम् ॥
सुतिक्तिका । स्त्री० कोशातक्याम् ।
सुती । त्रि० पुत्रवति ॥
सुतीक्ष्ण । पु० शिग्रौ ॥ श्वेतशोभाञ्जने ॥ रामायणप्रसिद्धेमुनिविशेषे ॥ नाम्नासुतीक्ष्णश्चरितेनदान्त ॥ त्रि० अतिशयेनखरे ॥
सुतीर्थकम् । न० । तीर्थविशेषे ॥
सुतुङ्ग । पु० नारिकेलवृक्षे ॥ ग्रहाणामुच्चांशविशेषे । अत्युन्नतुङ्गे ॥ त्रि० अतिशयोच्चे ॥
सुतुण्ड । पु० कुन्दरे । उखरवेले । मृगवल्लभेतृणविशेषे ॥
सुतेजन । पु० धन्वने । धन्वनवृक्षे ॥
सुतेजा । पु० सुतेजस्त्वगुणविशिष्टदशुतौसे ॥ स्वर्गे ॥ प्राकल्पार्विशेषे स्त्री० आदित्यभक्तायाम् ॥ त्रि० तेजसान्विते ॥
सुवेला । स्त्री० महाज्योतिष्मत्याम् ।

सुत्या । स्त्री० अभिषवे । सोमलताकण्डने ॥ अभिषवदिने ॥ सवनम्० सूयतेसोमोऽस्मिन्०अस्यां वा । षुञ् अभिषवे । संज्ञायां समजेति क्यप् ॥

सुत्रामा । पु० गोत्रभिदि । इन्द्रे ॥ सुष्ठु त्रायते० पालयति । त्रैङ् पालने । आतोमनिन्० सर्वधातुभ्योमनिन् वा ॥

सुत्वा । पु० अभिषवस्नाने । यज्ञाङ्गस्नानकर्त्तरि ॥ सुतवान् । षुञ्० । सुयजोर्ङ्वनिप् । तुक् ॥

सुत्वरी । स्त्री० मातरि ॥ ङ्वनिबन्तात्० वनोरचेति ङीब्रौ ॥

सुदग्धा । स्त्री० दग्धाख्यतृणे । सुदग्धिकायाम् ॥ मेरुजम्बुद्रुमे ॥

सुदग्धिका । स्त्री० कुरुह० कु० गो० दे० भा० प्र० ख्याते । दग्धरुहायाम् । भस्मरोहायाम् ॥

सुदण्ड । पु० वेत्रे ॥

सुदण्डिका । स्त्री० गोरच्याम् ॥

सुदन् । त्रि० शोभनदन्तविशिष्टे ॥ शोभनादन्तायस्य । वयसिदन्तस्य दतृ । नुम् ॥

सुदर्भा । स्त्री० तृणविशेषे । इक्षुदर्भायाम् ॥

सुदर्शन । पुं० । हरेश्चक्रे ॥ तल्लक्षणं यथा । द्वादशारन्तुषट्कोणं वलयत्रयसंयुतम् । चक्रस्या त्दृच्चिधावर्त्तं च खञ्जरीटे स्यात् तद्भुति । जिनानां बलदेवे ॥ इक्ष्वाकुनृपतरि ॥ शोभनदर्शनमस्य । भक्तौ : सुखिनइष्यतेवा । भाषायां शासियुधिदृशिधृषिमृषिभ्यो युच् ॥ गन्धर्वे ॥ जम्बूद्वीपे ॥ सुदर्शनाकारत्वात् ॥ मेरौ ॥ ध शि ॥ राजभेदे ॥ न० शक्रनगरे ॥ मधुगमने ॥ त्रि० सुदृश्ये ॥

सुदर्शनचूर्णम् । न० भावप्रकाशोक्तज्वररोगस्यौषधविशेषे ॥

सुदर्शनद्वीप । पुं० न० जम्बुद्वीपे ॥

सुदर्शना । स्त्री० आज्ञायाम् ॥ ओषधिप्रभेदे । सोमवल्लयाम् । इ षपर्ण्याम् । सुदर्शनगुलञ्चक्र० प्रगुलञ्च० कु० गौ० दे० भा० प्र० ॥ सुदर्शनास्वादुरुष्णाकफशोफाष्मवातजित् ॥ मेरुजम्बाम् ॥ सुरोविशेषे ॥

सुदर्शनी । स्त्री० अमरावत्याम् ॥

सुदल । पुं० चीरमोरटे ॥

सुदला । स्त्री० तरुण्याम् । गम्भार्याम् । सेवन्त्याम् । शालपर्ण्याम् ॥

सुदान्त । पुं० शाक्यमुनिशिष्यविशेषे, त्रि० तपःसहे ॥

सुदामा । पुं० वारिधरे । मेघे ॥ पर्वतविशेषे ॥ गोपविशेषे समुद्रे ॥ श्वेतद्वीपे । ऐरावते ॥ श्रीकृष्ण

मिर्ब्राह्मणविशेषे । वि० सुदात रि ॥ सुष्ठुददाति । ड्दाञ्० । आतोमनिन् ॥

सुदामा । स्त्री० नदीविशेषे । टाप् ॥

सुदाय । पु० हरणे । अत्यादान काले० व्रतभिक्षादौवदीयमानद्र व्ये। सुष्ठुदीयते । डुदाञ० । घ ञ् । युगागम ॥

सुदारु । पु० पारिपात्रकेपर्व्वते ॥ सुदारुःपारिपात्रकइतिहेमचन्द्रः ॥ न० शोभनदारुणि ॥

सुदि । अ० शुक्लपक्षे ॥

सुदिनम । न० शुभदिवसे ॥ वि० प्रशस्ते ॥ यथा । सुदिनासुसभा सुकार्य्यमेतत्प्रविचिन्त्योतविशेषत. स्वयमितिप्रयोग ॥

सुदीर्घ । वि० अतिविस्तारे ॥

सुदीर्घघर्म्मा । स्त्री० चसनपर्य्यांम् ॥

सुदीर्घफलिका । स्त्री० वार्त्ताकुविशे षे । सिङ्गावैंगन० इतिगौ० दे० भा० प्र० ॥

सुदीर्घा । स्त्री० चीनाकर्क्कट्याम् ।

सुदुर्दर्श । वि० अत्यन्त द्रष्टुमशक्ये ॥ सर्व्वथादर्शनायोग्ये परमात्मनि ॥ तस्यादृष्टरूपत्वात् ॥

सुदुर्लभ । वि० अतिदुष्प्राप्ये । दु खिनापिलब्धुमशक्ये ॥ यथा । बहूनांजन्मनामन्ते ज्ञानवान्माप्र पद्यते । वासुदेव . सर्व्वमितिसम हात्मासुदुर्लभइति ॥ सुष्ठुतिमा त्र दुर्लभः ॥

सुदुश्चर । वि० अतिशयदु खिना चरणीये ॥

सुदुष्कर । वि० सर्व्वथाकर्त्तुमशक्ये ॥ अत्यन्तकष्टकरे ॥

सुदुस्तर । वि० अतिदु खिनतर णीये ॥

सुदूर । वि० दवीयसि । दविष्ठे । अतिदूरे ॥ यथा । सुदूरमपिगन्त व्यं यत्रमहेश्वरोजन ॥

सुदूरपराहत । वि० अतिदूरनिरा कृते ॥

सुदृढम् । न० अतिदृढे । गाढे ॥ वि० तद्वति ॥

सुदृढत्वक् । स्त्री० काश्मर्य्याम् ॥

सुदृक् । वि० शोभननेत्रयुक्ते ॥

सुदृश्य । वि० सुन्दराकृतौ ॥

सुदेवी । स्त्री० नाभेर्भार्य्यायाम् । मेरु जय्याम् ॥

सुदेश । पु० मत्स्यदेशे । उत्तमदेशे ।

सुद्युम्न । पुं० वैवस्वतमनो पुत्रे ॥ त्रि० बहुधने । अतिबलशालिनि ॥

सुधन्वा । पु० विश्वकर्म्मणि । त्वष्ट रि । नृपविशेषे ॥ त्रि० धन्व नि । प्रौढधानुष्के ॥ शोभन ध नुर्यस्य । धनुषश्छन्दसि ॥

सुधन्वाचार्य्य । पु० व्रात्याद्वैश्या त्सवर्णायांजाते० जातिविशेषे ।

कारके । यथा। इमनु । वैद्यानु जायते ब्राह्मणात्सुधन्वाचार्य एव च । कारुषश्च विजन्मा च मैत्रः सात्वत एव च इति ॥

सुधर्म । पुं० जिनगणाधिपविशेषे ॥

सुधर्म्मा । त्रि० धर्मशालिनि ॥ कुटुम्बिनि ॥

सुधर्म्मा । स्त्री० देवसभायाम् । शोभनो धर्म्मो यस्याम् । धर्मादनिच् केवलात् । डाबुभाभ्यामिति पक्षे टाप् । अनो बहुब्रीहेरिति ङीप् न । सुधर्म• सुधर्म्माणावित्यादि । डाप पक्षे । सुधर्म्मा• सुधर्म्मे इत्यादि ॥

सुधा । स्त्री० पीयूषे । अमृते । मद्ये । सुरायाम् ॥ सुक्तिनद्यौ यते । घेटपाने । आतश्चोपसर्गे इति कर्म्मण्यङ् । लेपने । सुरायाम् । मूर्व्वाम् ॥ सुधाम् ॥ गङ्गेष्टकायाम् ॥ गङ्गायाम् ॥ आसनपर्ण्याम् ॥ विद्युति ॥ गुडूच्याम ॥ जले ॥ तोये ॥ रसे ॥ धात्र्याम् ॥ आमलक्याम् ॥ पुष्परसे । मधुनि ॥ हरीतक्याम् ॥ सुष्ठु दधाति पुष्णाति । डुधाञ् । क्विप् ॥

सुधांशु । पुं० कुन्दे । चन्द्रे ॥

सुधांशुताक्षमवीयबस . ॥

सुधांशुतैलम् । न० कर्पूरतैले । सुधांशुरत्नम् । न० मौक्तिके ॥ इन्द्रज्ञानि ॥

सुधाकर । पु० चन्द्रे ।

सुधाधार । पु० सौधमूर्ध्नि । चूना० इ० भा० प्र० ॥ सुधाचारी ऽस्मत्सङ्घाग्र शालीक्तौ विहार च ॥

सुधाङ्ग । पु० चन्द्रमसि ॥

सुधाजीवी । पु० पलगण्डे । लेपके । राज० इ० भा० ॥ सुधया लेपनेन जीवति• तच्छील णिनि. ॥

सुधाधार । पुं० चन्द्र । इन्दौ । अमृतपात्रे ॥ सुधायाः आधार ॥

सुधानिधि । पु० चन्द्रे ।

सुधाभुक । पु० गीर्वाणे । देवे ॥ सुधांभुङ्क्ते । भुज० । क्विप ॥

सुधामय । पु० सौधे । राजसदने । त्रि० अमृतात्मके ॥

सुधामोदक . । पु० यवासशर्करायाम् ॥

सुधामोदकज । पु० तवराजोखण्डे ॥

सुधावर्षी । पु० विधातरि । विश्वसृजि । बुद्धभेदे ।

सुधावास । पु० चन्द्रे ॥ न० त्रपुषि ॥

सुधास्रवा । स्त्री० त्रपुष्याम् ॥

सुधासंयोग. । पुं० अमृतसिद्धियोगे । यथा । इरावध्यांज्ये•

जवं निजवं निजवं ऽक्रमाद॰ दा
समारे । सुमेरुम् । भवेदस्यधि
पृष्ठसुधियं॰ कश्चित्तु मनीषेत
देव सुधासम्भयोग ॥
सुधासिन्धु । पु॰ अमृतार्णवे ॥
सुधासूति । पुं॰ चन्द्रे ॥ यथा ।
प्रदीपज्वालाभिर्दिवसकरनीराजन
विधि . • सुधासूतेश्चन्द्रोपलजल
लवैरर्घ्यघटना । स्वकीयैरम्भोभि
सलिलनिधिसौहित्यकरणं॰ त्वदी
याभिर्वाग्भिस्तवजननिवाचांस्तुति
रियमिति ॥ मखे । यज्ञे ॥ पद्मे ॥
सुधास्रवा । स्त्री॰ अधोजिह्विकाया
म् । गलशुण्डिकायाम् । घण्टि
कायाम् ॥ रुदन्त्याम् ॥ रुद
न्तीवृक्षे ॥
सुधाहर ।) पु॰ गरुडे ॥ देवे ।
सुधाहृत् ।)
सुधिति । पुं॰ स्त्री॰ स्वधितौ । प
रशौ ॥
सुधी । पु॰ विदुषि । सति । कोा
विदे । पण्डिते । न्यायगृहीतयो
स्तार्थवाक्ये ॥ सुष्ठु ध्यायति । ध्यै
॰ । ध्यायते , क्विपिसम्प्रसारणम
॥ स्त्री॰ सुन्दरबुद्धौ ॥ सुष्ठुधी
त्रि॰ शोभनबुद्धियुक्ते ॥
सुधूप , । पु॰ सरलद्रवे ॥
सुधूम्य । पु॰ स्वादुनामगन्धद्रव्ये ॥
सुधोद्भव . । पु॰ धन्वन्तरौ । दिवो

द्भवे ॥
सुधोद्भवा । स्त्री॰ हरीतक्याम् ॥
सुनन्द । पु॰ श्रीकृष्णस्यपार्षदविशेषे ॥
द्वादशविधराजगृहान्तर्गतगृहवि
शेषे ॥ सचदैर्घ्येराज्ञ स्सहस्तमाने
नैकपञ्चाशद्धस्त परिणाहश्चत्वारि
शद्धस्तश ॥ यथा । यद्दैर्घ्योच्यते
मान तस्मतेनैवकल्पना । राज्ञ
स्सहस्तमेकन्तु दीर्घं सर्वत्र निर्मिते
त् ॥ आयामेन सुनन्द . स्याद्राज
हस्तैश्चपञ्चभि . । परिणाहेश्चतुर्भि
श्चराजहस्तै प्रतिष्ठित . ॥ यस्या
धिदेवताभौमीरक्तलोमावसुन्धराम्
द्वारादिर्विप्रतिष्ठाकरत्नचित्राङ्गता
मिच ॥ रत्नपट्टाङ्कलोगेन्द्र सकला
र्थप्रसाधक . । अवश्यस्त्वामणीपा
ल सुचिरपातिमेदिनीमितियु
क्तिकल्पतरु ॥ दैर्घ्यं ५१ प्रस्थे
४० ॥ न॰ कलभन्मुसवि ॥
सुनन्दा । स्त्री॰ रोचनायाम् ॥ उ
मायाम् ॥ पद्मनायाम् ॥ जनन्या
म् ॥ उमासखीभेदे ॥ चक्रपर्वतीय
नदे । हृषीरमूल॰ कृ॰ गो॰ दे॰
भा॰ प्र॰ ॥
सुनन्दिनी । स्त्री॰ मञ्जुभाषिणीछ
न्दसि ॥
सुनयन पु॰ मृगे॥ त्रि॰शोभननेत्र
युक्ते ॥ शोभनेनयनेयस्य . ॥
सुनयना । स्त्री॰ नार्याम् ॥

सुरेन्द्राधिप : । पुं॰ शगर्व । ऽऽ ॥

सुनाहत । पुं॰ कर्पूरके ॥ द्र॰ म॰ पञ्जिका ॥

सुनाम . । पुं॰ मैनाकाचले ॥

सुनामद्वादशी । स्त्री॰ द्वादशमासी यद्वादशीकर्त्तव्यव्रतविशेषे ॥

सुनार : । पुं॰ शुनीस्तन्ये ॥ सर्पाण्डे ॥ चटके । कलविङ्के ॥

सुनाल । पुं॰ उशीरे ॥ लामज्जके ॥

सुनालक । पुं॰ वकद्रुमे ॥ त्रि॰ सुन्दरनालयुक्ते ॥

सुनासिका । स्त्री॰ काकनासायाम् ॥ शोभननासायाम् ॥ त्रि॰ तद्युक्ते ॥

सुनासीर । पुं॰ इन्द्रे ॥ नासते । वासयत्ये । बाहुलकादीरन् । सुष्ठुनासीरसेनामुखम्॰ नासीरायसेनयावायस्य स : ॥

सुनिर्यासा । स्त्री॰ जिङ्गिन्याम् ॥

सुनिश्चित । पुं॰ बुद्धविशेषे ॥

सुनिषण्णम् । न॰ सुनिषण्णकशाके । अस्यश्रीवारकसदृशेः चौपतियाः॰ द्र॰ प्र॰ जलप्रभवशाके । चतुष्पत्याम् । यस्यगुणायथा । वाकुद्दीसदृश पत्रैश्चतुर्दलजातीरित । शाकोजलान्वितदेशेचतुष्पत्रीति चोच्यते ॥ सुनिषण्णोहिमोयाही मोहदोषचयापह । अविदाहील घु . स्वादु कषायोरुक्षदीपन ॥ वृष्योरुच्योज्वरश्वासमेहकुष्ठभ्रम प्रणुत् ॥ सितावरशाके । श्रीवारके ॥ त्रि॰ सूपविष्टे ॥

सुनिषण्णकम् । न॰ शाकविशेषे । वितुन्ने । सुनिषण्णे ॥

सुनीति । स्त्री॰ ध्रुवमातरि । शोभननये ॥ त्रि॰ शोभननीतियुक्ते ॥

सुनीथ । त्रि॰ धर्मशीलके ॥ नीतिमति ॥ पुं॰ वटौ ॥ ब्राह्मणे । सुष्ठुनयति । णीञ्॰ । हनिकुषिनीरमिकाशिभ्यःक्थन् ॥

सुनीथा । स्त्री॰ मृत्योः कन्यायाम् । वेणस्यमातरि ।

सुनील । पुं॰ नीलरत्ने । दाडिमे ॥ सुन्दरनीलवर्णे ॥ न॰ लामज्जके ॥

सुनीलक । पुं॰ नीलरत्ने ॥ नीलासने ॥ दाडिमे । नीलभृङ्गराजे ॥ न॰ चीरवाङ्गे ॥

सुनीला । स्त्री॰ तृणविशेषे । अतसिकायाम् । गोदुग्धायाम् । अतस्याम् । विष्णुक्रान्तायाम् । अरलीतृणे ॥

सुनीलिका । स्त्री॰ सुनीलायाम् ॥

सुनेपाली । स्त्री॰ विलङ्कर्ज्जूरिकाभेदे । तद्गुणायथा । सुनेपाली सुस्वदुलावणिकोनफलाचसा । सुनेपालीभवाभान्तिदाहमूर्च्छापित्तहृत् । सुनेमालीतिकेचित् ॥

सुन्द । पु॰ रामायणप्रसिद्धवानरविशेषे । राक्षसविशेषे ॥ असुराकृतिपरमेश्वरे । सुष्ठु उनत्ति । आर्द्रीकरोति । उन्दी॰ । पचाद्यच् । शकन्ध्वादि ॥

सुन्दर । पु॰ कामदेवे । सुन्दरी॰ इति॰ गौ॰ दे॰ भा॰ प्र॰ वृक्षे ॥ त्रि॰ रुचिरे । चारुणि । शोभने । मञ्जुले ॥ सद्रूपवति । इत्यादरैः । अमरद्विरूपप । पृषोदरादि ॥ यथा । सुष्ठु नन्ति॰ चित्तं द्रवीकरोति । उन्दी क्लेदने । बाहुलकात् र । शकन्ध्वादि ॥

सुन्दरिका । स्त्री॰ तीर्थविशेषे ॥

सुन्दरी । स्त्री॰ रूपलावण्यसम्पन्नायां नार्याम् ॥ द्रुमान्तरे । त्रिपुरसुन्दर्यां देव्याम् । योगिनीविशेषे ॥ हरिद्रायाम् ॥ काञ्जिकायां स ॥ छन्दोविशेषे । चयुगौ च दृढोऽजगौ युगौ सभराल्गौ यदि सुन्दरी तदा । यथा । यदवीचदवैच्यमाभिनीप रित कश्चमयेन चक्षुषा । अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम् । पर्श्वसान्तरेपि । कुसुमगन्धरसैरभिभूषिता चरणसङ्गम पुरमण्डिता । करमुखाञ्चलसदृलयान्विताकुर्णितकाञ्चनचेतसि सुन्दरि । यथा । नसुलभा शरदिन्दुमुखी प्रिया मनसि कामदिचेष्टि

तस्मोहनम । मालाश्मा ह्वचारिणि मालती रविमल प्रसरैश्च तत्र सर ॥ सुन्दरशब्दः गौरादित्वान्ङीष् । पार्वत्याम् ॥

सुन्वन । त्रि॰ ऐ मधाभिज्ञनि । सोमाभिषवकर्तरि ॥ सुनोतेरौट मतादेश ।

सुपक्ष । पु॰ सुगन्धद्रव्ये ॥ त्रि॰ शोभनपरिपक्वे । परिपक्वे ॥

सुपकाक । पु॰ सहकारात्रे ॥

सुपत्र । पु॰ पक्षिराजसुतौ ॥ आदित्यपत्रे । न॰ तेजपत्रे । पत्रके ।

सुपत्रक । पु॰ शिग्रौ ॥

सुपत्रा । स्त्री॰ पालङ्क्याम् ॥ शतावर्याम् । शम्याम् ॥ रुद्रजटायाम् । शालपर्ण्याम् ॥

सुपत्रिका । स्त्री॰ जतुकायाम् ॥

सुपथ । पु॰ । शोभनमार्गे । सत्पथे ॥ यथा । सत्पथस्तु निन्द्या असुपन्था सुपथो पचि तमन्दराक्षौ ॥

सुपन्था । पु॰ अर्चितेऽध्वनि । सत्पथे । अतिपथि ॥ सु पूजायाम् । कुगतादितत्पुरुषः । नपूजनादिति समासान्तनिषेध । शोभनसमासान्त निर्देशात् । पथः संज्ञा व्ययादेरिति नक्लीबत्वम् ॥

सुपथ्य । त्रि॰ अपीडाकारिभोजनादौ ॥

सुपथ्या । स्त्री० श्वेतचिल्ल्याम् ॥

सुपद्म । पुं० व्याकरणविशेषे ॥ पुं० न० शोभनारविन्दे ॥

सुपद्मा । स्त्री० वचायाम् ॥

सुपर्ण । पुं० पन्नगाशने । गरुडे ॥ सुपर्णमयत्वात् शोभनेपर्णे यस्य स । स्वर्णचूडे । चाषे ॥ कृतमालके । राजवृक्षे ॥ सुष्ठु पर्णान्यस्य ॥ भगवति वासुदेवे ॥ शोभनानि पर्णानि छन्दांसि संसारतरुच्छिन्नोऽस्य मन्त्रोपस्थेऽद्रिविशेषे ॥ श्येनप्रभेदे । वेगवानस्य निग्रह सुपर्णइतिव्याख्यातारः ॥ सप्तपर्णे ॥

सुपर्णक । पुं० आरग्वधे सप्तच्छन्दवृक्षे ॥ गरुडे ॥

सुपर्णकेतु । पुं० विष्णौ ॥

सुपर्णा । स्त्री० कमलिन्याम् ॥ विनतायाम् ॥

सुपर्णाख्य । पुं० नागकेशरे । तीर्थविशेषे । यथा । उत्पलावतीसुपर्णाख्ये । इति ॥

सुपर्णिका । स्त्री० स्वर्णजीवन्त्याम् ॥ पलाश्याम् ॥ वाकुच्याम् ॥ रेणुकायाम् ॥ शालपर्ण्याम् ॥

सुपर्णी । स्त्री० कमलिन्याम् ॥ विनतायाम् ॥

सुपर्णीतनय । पुं० गरुडे । तार्क्ष्ये ।

सुपर्व्वा । पुं० सुमनसि । देवे । सुरे ॥ सुष्ठु पर्व्व अमावास्यादिचरितम् अङ्गुल्यादिग्रन्थि उत्सवो वा यस्य ॥ शरे ॥ वंशे ॥ पर्व्वणि ॥ धूमे ॥

सुपर्व्वा । स्त्री० श्वेतदूर्व्वायाम् ॥

सुपर्व्वाङ्गना । स्त्री० देवललनायाम् । यथा । सुपर्व्वाङ्गनागानगम्भीरतानलग्नत्स्वक्कावीयाविपक्षौरवेण । क्वणत्किङ्किणीनादपूर्णं नतूर्णं सुविनाव्यसम्पूर्णघूर्णाकुलोऽहि ॥

सुपाकिनी । स्त्री० गन्धपत्रायाम् ॥

सुपाक्यम् । न० विड्लवणे ॥

सुपात्रम् । न० दानयोग्यव्यक्तौ शोभनभाजने ॥ त्रि० उत्तमपात्रयुक्ते ।

सुपान । त्रि० पानयोग्ये ॥ सुखेन पीयते । पा० । कर्म्मणि ल्युट ॥

सुपार्श्व । पुं० प्लक्षवृक्षे ॥ वृत्तार्हद्भेदे । सम्प्रति पुं० पर्व्वतविशेषे । पञ्चाशत्सहस्रयोजनोच्छ्राये० मेरुपश्चिमे सौम्यदिशि० तस्य दक्ष्यार्थस्थितः विष्कम्भशैले ॥ तच्च सहस्रयोजनोन्नतिमान् यत्रोपपादपोऽस्ति ॥

सुपार्श्वक । पुं० गर्दभाण्डे । कन्दराले । कपीतने । प्लक्षे । पीलवः० पीलखय० निर्गुण्डी० गौण्डी० इ० प्र० प्लक्षे । शोभनम् पार्श्वमस्य ॥ भाण्डविशेषे ।

सुपिङ्गला । स्त्री॰ जीवन्त्याम ॥ ज्योतिष्मत्या ॥

सुपीतम । न॰ गर्ज्जरे ॥

सुपुट । पु॰ कोलकन्दे ॥ विष्णुकन्दे ॥

सुपुत्रिका । स्त्री॰ जताविशेषे । जतुकायाम् । जतुकायाम् । तिर्यक्फलायाम् ॥

सुपुष्करा । स्त्री॰ स्थलपद्मिन्याम् ।

सुपुष्प । पु॰ राजतरुण्याम् ॥ हरिद्रौ । शिरीषे ॥ रक्तपुष्पके । पारिजातमन्दारे॰ हृ॰ गौ॰ दे॰भा॰ प्र॰ ॥ न॰ लवङ्गे ॥ प्रपौण्डरीके ॥ तूले । तूदे । पोश्चंदिप्पलाभिधे ॥ क्षीराराजसि ॥ आदुल्ये ॥

सुपुष्पिका । स्त्री॰ पाटलायाम् ॥ जीर्णदारुणि ॥

सुपुष्पी । स्त्री॰ श्वेतापराजितायाम ॥ कदल्याम्॰ ॥ जीर्णफलञ्याम् । जीर्णदारुणि ॥ द्रोणपुष्प्याम् ॥ मिश्रेयायाम् ॥ शतपुष्प्याम ॥

सुपूर । पु॰ बीजपूरे ॥

सुपूरक । पु॰ बकपुष्पवृक्षे ॥

सुपूर्व्वप्रवेश: । पु॰ यात्रानिवृत्त्यनन्तरङ्गृहप्रवेशे ॥ यात्रावसानेतु सपूर्व्वसञ्ज्ञ ॥

सुपेशल । वि॰ अतिरम्ये । सुन्दरे ॥

सुपेशा । वि॰ सुकुमारे । कोमले ॥ सुरूपे ॥

सुप्तम् । न॰ साधिकायाम् । सुप्तौ ॥ वि॰ निद्रिते । निद्राण । शयितेसुप्ता॰ द्र॰ भा॰ ॥ चक्रवेष्टनेविधिनिषेधौयथा । क्षुधितस्तुषित कामोविद्यार्थीकृषिकारकः । भाण्डारीचप्रवासीचसप्तसुप्तान् प्रबोधयेत् ॥ अहिकाश्ममरौसर्पौ राजाबैबालकस्तथा । परश्वापिच मूर्खश्चसप्तसुप्तान्नबोधयेत्इति ॥ स्वापितेश्च । निष्पन्दे । ञ । सम्प्रसारणम ॥

सुप्तघातक । वि॰ हिंस्रे । हिंस्रे ॥ हृ॰ वि॰ ष॰ ॥

सुप्तजन । पु॰ अर्द्धरात्रे ॥ निद्रितेजने ॥

सुप्तज्ञानम् । न॰ सुप्तविज्ञाने । स्वप्ने ॥

सुप्ति । स्त्री॰ स्पर्शाज्ञतारुजि ॥ विश्रम्भे ॥ शयने । निद्रायाम । स्वापे विज्ञानविरतौ ॥ अवस्थेविष्यसुप्तयथा । आहारादिविभेदेन॰ सात्त्विकीराजसीतथा । तामसीतिविधासुप्ति . सापराम्यते विधा ॥ सुखमस्वापसमवाचहु ' खमस्वापसमयतु । याटमूढोहम

स्वापसमित्युक्तिः सार्वलौकिकोक्ति
भिन्नप्रायो । किञ्च सुप्तसुप्ति
नजागरितानाम् सुप्ते स्वप्नजागरौ ॥
सुप्तोत्थित । त्रि॰ सुप्तोत्थितादुत्थि
ते । आदौ सुप्त पश्चादुत्थित ॥
सुप्रज्ञ । पु॰ सत्यज्ञानवति ॥ त्रि
स्वमस्तिचप्रज्ञामेधयो ॥
सुप्रतिभा । स्त्री॰ मदिरायाम् ॥ प्र
शस्तमतायाम । ज्ञानोत्कर्षे ॥
सुप्रतिष्ठा । स्त्री॰ शोभनप्रतिष्ठाया
म् ॥ पञ्चाक्षरायाम्जातौ ॥ सा च
था । पङ्क्तिप्रियायाश्च ॥
सुप्रतिष्ठित । पु॰ उदुम्बरे ॥ त्रि॰
शोभनप्रतिष्ठायुक्ते ॥ सुस्थिरे ॥
यथास्थिते ॥
सुप्रतीक । पु॰ ईशानदिग्गजे ॥
शिवे ॥ कामदेवे ॥ शोभनाङ्गे ॥
त्रि॰ साधौ ॥ शोभनाङ्गविशिष्टे
शोभना प्रतीका अवयवा यस्य
॥ यथा । सुप्रपञ्चादिष्वोऽस्मीका
दित्व तकीकत् । कुपस्तुटच ॥
सुप्रभ । पु॰ जिनविशेषे । शु
क्रश्वे ॥ त्रि॰ सुन्दरप्रभायुक्ते ॥
सुप्रभा । स्त्री॰ वाकुच्याम् ॥ अग्नि
जिह्वाविशेषे ॥ सुप्रभापद्मरागा
भा वा कृष्णादिशिसस्थितेति तन्त्रसा
र ॥ शोभनदीप्तौ ॥
सुप्रभातम् । न॰ शुभसूचकप्रात
काले ॥

सुप्रभाता । स्त्री॰ शोभनप्रभातयुक्त
रात्रौ ॥ नदीविशेषे इति ॥
सुप्रयुक्त । त्रि॰ शोभनप्रयोगविशि
ष्टे ॥
सुप्रयुक्तशर । पु॰ अलक्ष्ये ॥
सुप्रयोगविशिख । पु॰ नलक्षणे ।
सुशिक्षितबाणमोक्षे । कव्यकसु
तथराभ्यासे ॥ शोभनप्रयोगेऽस्य
सुप्रयोग । सुप्रयोगो विशिखोऽस्य ।
सुप्रलम्भ । त्रि॰ सुखलभ्ये ॥
सुप्रलाप । पु॰ सुवचने । सुष्ठुक्तौ ॥
सुष्ठु प्रकृष्टः लपनम् । घञ् ॥
सुप्रसन्न । पु॰ कुबेरे ॥ कृष्णार्जके
॥ त्रि॰ सुप्रसादयुक्ते ॥
सुप्रसन्नक । पु॰ कृष्णार्जके ॥
सुप्रसरा । स्त्री॰ प्रसारण्याम् । गन्धा
लिकायाम् लतायाम् ॥
सुप्रसाद । पु॰ शिवे ॥ विष्णौ ॥
शोभनप्रसादोऽस्य ॥ अनुचरवर्ता
शिशुपालादीनामपि मोक्षप्रदात्
त्वात ॥ सुप्रसन्नतायाम् ॥ त्रि॰
प्रसन्नमुखे ॥
सुप्रात । पु॰ सुप्रभाते । शोभ
नप्रातरस्य । सुप्रातसुश्वेत्यादि
ना॰ बहुव्रीहावच् प्रत्ययान्तो निपा
तितः ॥
सुप्रिया । स्त्री॰ सुभगायाम् । भ
र्त्तुः प्रियायाम् । सुन्दरायाम् ॥
मघाकृत्तम् परिच्यज्य यदा लिखितु

भवेत् । तथाऽर्द्धवान्यका चेौढा सुभगा सुप्रिया भवेत् इति भागवत ॥
सुफल । पु॰ दाडिमे । वदरे । मुद्गे । कर्णिकारे । राजतरौ । आरग्वध विशेषे । छोटसोनालु॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ ॥ कपित्थे ॥ सत्फले ॥ चि॰ शोभनफलवति । सुष्टु शोभनानि फलान्यस्य ॥
सुफला । स्त्री॰ कूष्माण्डामोषधौ ॥ इन्द्रवारुण्याम् ॥ कश्मर्याम । कदल्याम ॥ कपिलद्राक्षायाम् ॥
सुफेनम । न॰ समुद्रफेने ॥
सुबन्ध । पुं॰ तिले ॥
सुबलपुत्री । स्त्री॰ गान्धार्याम् ॥
सुबहुली । स्त्री॰ पुत्रदात्र्याम् ॥
सुबल्ली । स्त्री॰ वाकुच्याम । सोमराज्याम् ॥ शोभनावल्लिरस्याः ॥ कटुव्याम् ॥
सुब्रह्मण्य । पु॰ ऋत्विग्विशेषे ॥ गुहे ॥ किरातादिदेशप्रसिद्धे सर्पाधिष्ठितविशेषे॰ तदर्थ्ये सर्पराजे च ॥
सुब्रह्मण्या । स्त्री॰ निगदविशेषे ॥
सुब्रह्मवासुदेव । पु॰ ब्रह्मरूपवसुदेवसुते ।
सुभग । पुं॰ चम्पके ॥ अशोके ॥ रक्ताम्लाने । टङ्कणे ॥ चि॰ हृष्टे ॥ सुन्दरे॰ चतुर्थे ॥ शोभनम्॰ भगं शौर्यं च ॥
सुभगा । स्त्री॰ दुर्गायाम् ॥ पतिप्रियायाम् । सुप्रियायाम ॥ शालिपर्ण्याम ॥ कस्तूरिकायाम् ॥ हरिद्रायाम ॥ सुवर्णकदल्याम । कम्बुकाकादल्याम् । चम्पाकिला॰ इ॰ भा॰ प्र॰ ॥ नीलदूर्वायाम ॥ प्रियङ्गौ । कन्यायाम् ॥ तुलस्याम ॥ कैवर्त्तिकायाम ॥ शोभनम् ॰ भगं शौर्यं यस्याः ॥
सुभगासुत । पु॰ सौभागिनेये ॥ सुभगाया सुत ॥
सुभङ्ग । पु॰ नारिकेलवृक्षे ॥
सुभद्र । पु॰ विष्णौ । रागमेदे ॥ चि॰ सुमङ्गलयुक्ते ॥
सुभद्रक । पु॰ देवरथे । विल्ववृक्षे ॥
सुभद्रा । स्त्री॰ श्रीकृष्णभगिन्याम् ॥ घृतमण्डयाम् ॥ श्यामालतायाम् ॥ काश्मर्याम् । गम्भारीयाम् ॥
सुभद्राणी । स्त्री॰ त्रायमाणायाम । वड़ुला इ॰ गौ॰ दे॰ भा॰ प्र॰ ॥
सुभद्रिका । स्त्री॰ दुर्गायाम् ॥
सुभद्रेश । पु॰ अर्जुने ॥
सुभानु । पु॰ वत्सरविशेषे ॥ तत्फलं यथा । सुभिक्षं क्षेममारोग्यं विग्रहश्च निरुपद्रवम् । व्यवहारी भवेद्दृष्ट सुभानौ देवपूजिते ॥ १७॥
सुभाषित । पु॰ बुधे ॥ न॰ सुवचने ॥ हितोपदेशवचने ॥ यथा स्वर्गापवर्गसिद्ध्यर्थं भाषितं यत् सु

शोभनम् । वाक्यमुनिवरै र्मतै
स्वहस्तेय सुभाषितमिति
सुभिच्च । चि० सुलभभैचद्रव्ये ॥
सुलभभैचयुक्तकालादौ ॥
सुभिचा । स्त्री० धातकुप्याम् ॥ शो
भनायाम् ॥ भिचायाम् ॥ चि०
लब्धान्ने ॥ सुष्ठु भिच्यते० । भिच
याच्चादौ । घञ् ॥
सुभीरव । पु० पलाशवृचे ॥
सुभू । चि० सुजन्मनि ॥
सुभूता स्त्री० चैलोक्यात्मन. कौ
शन्योद्दगभागे ॥ भूतिमद्भिरोश्च
रकुवेरादिभिरधिष्ठितत्वात् ॥
सुभूतिक । पु० बिल्ववृचे ॥
सुभूम । पु० कार्त्तवीर्ये ॥
सुभृशम् । च० वाढमित्यर्थे ॥
सुभ्राता । चि० स्निग्धे भ्रातरि । शो
भन स्निग्धो भ्राता यस्य । नद्य
तश्चेति कप नुनभवन्ति । वन्दिते
भ्रातुरितिनिषेधात् ॥
सुभ्रू । स्त्री० योषिति ॥ चि० शो
भनभ्रूविशिष्टे ॥
सुमम् । न० पुष्पे ॥
सुमङ्गलम् । न० पुष्पादिद्रव्ये ॥ चि०
सदाचारे ॥ अतिशयचेमवति ॥
सुमङ्गला । स्त्री० वायसोल्याम् । च
न्द्रमातरि ॥
सुमत : । चि० अनुमते । सुन्दरज्ञा
नविषये ॥

सुमति । पु० भरतात्मजे ॥ कुत्राइ
शिशिवे । भूताद्दशिशिवे ॥ स्त्री० शो
भनमतौ विष्णुयशस पत्न्या
म् । कल्किमातरि ॥ चि० सुबुद्धौ ।
निपुणे ।
सुमदन । पुं० च म्नवृचे ॥
सुमदात्मजा । स्त्री० स्वर्गनिन्दाया
म् । अप्सरसि ॥
सुमधुर : । पु० जीवशाके ॥ न०
अत्यर्थमधुरवाक्ये । सान्त्वे ॥
वि० अतिशयमधुररसयुक्ते ॥
सुमन. । पुं० गोधूमे ॥ सुष्ठु मन्य
ते । मनज्ञाने , अच् । धत्तूरे ।
वि० मनोहरे
सुमन पत्रिका । स्त्री० जातीपत्न्याम्
जाविवो० कृ० भा० प्र० ।
सुमन . फलम् । न० जातीफले ।
पु० कपित्थवृचे
सुमना । पु० देवे । सुरे । धी
रे । पण्डिते ॥ शोभन मनोय
स्य । पूतीकरञ्जे । महा
करञ्जे ॥ निम्बे ॥ गोधूमे ॥
देवेप्रावेषाबभूमि ॥ वि० प्रस
न्नमनसि ॥
सुमना । स्त्री० सुमनस स्त्री० भूमि०
पुष्पे । सुमना पुष्पमालत्यो ।
स्त्रियांमितिमेदिन्यादेरेकत्वम् । वै
ज्य.न्तमायांसुमनाइत्यकारान्तौयेस्थि
यो च ॥ स्त्रिय । सुमनस :

पुष्पम् प्रसूनं कुसुमं सुमनसित्यमरो क्तेः । भूम्नि स्त्रियां सुमनसः इति वलेशो यास्त्वबहुत्वमपि ॥ सुष्ठु मन्यते आभि । मन० । असुन् ॥ यद्वा । शोभनं मनोऽस्याम् ॥ मतप व्याम ॥

सुमन । न० पुष्पे ॥ पुष्पं सुमनं कुसुममिति नाममाला । अप्रत्यय्ये येष्वर्थे सुमनसोति प्रयोगश्चाक्लीवत्वेऽनुकूल । क्लीवत्वं छान्दसमित्युक्ते ॥

सुमना । स्त्री० मालत्याम् । जातीपुष्पवृक्षे । चर्म्मलोतिभाषाप्रसिद्धे सुमनायावपचाणीति सुश्रुतेदर्शनाद्बावत्वापि ॥

सुमनोरज । न० परागे ॥ सुमनसां रज ॥

सुमन्तु । पु० मुनिविशेषे । अथर्वाङ्गिरसां धारके व्यासशिष्ये ॥

सुमन्त । पु० कल्किदेवस्य ज्येष्ठभ्रातरि ॥ यथा कल्के र्ज्येष्ठास्त्रय शूरा कविप्राज्ञसुमन्तका । तातमातृप्रियकरा गुरुविप्रप्रतिष्ठिता इति कल्किपु० २८०अ ॥ दशरथभूपते सारथौ ॥

सुमन्त्रा । स्त्री० दुर्गायाम् ॥

सुमर्षण । त्रि० सुसहे ॥ सुखेन मृष्यते । मृष० । भाषायाम्शासियुधीत्यादिना खलर्थे युच ॥

सुमालतिका । स्त्री० वर्णवृत्तविशेषे ॥ यदाजगणाद्विभवेद्मलघु । मणीविततोतिसुमालतिकेति ॥ यथा । मनोजशरेणविषज्ञतरेण । अवादिनतेनभवद्दयितेन ॥

सुमित्र । पु० ईश्वरे ॥ सुष्ठुमित्र जीवपक्षिण सखा ॥ दशार्हनृपितरि । दुश्चाकुवंशीयवृहद्लान्वयेसुरथराजपुत्रे ॥ न० हिते ॥

सुमित्रभू । पु० जिनचक्रवर्त्तिविशेषे । सगरे ॥

सुमित्रा । स्त्री० लक्ष्मणशत्रुघ्नयोर्जनन्याम । दशरथराजपत्न्याम् । लक्ष्मणप्रसाम ॥

सुमित्रानन्दवर्द्धन । पु० लक्ष्मणे ॥ सुमित्राया आनन्द वर्द्धयति । नन्द्यादित्वाल्ल्यु ॥

सुमुख । पु० गरुडात्मजे ॥ नागविशेषे ॥ शाकभेदे ॥ पण्डिते ॥ हेरम्बे ॥ वनवर्व्वरिकायाम् ॥ वर्व्वरे सितार्जके ॥ प्राग्दक्षिणपश्चिमद्वारगृहे ॥ भगवति वासुदेवे ॥ शोभनमुखमस्य ॥ न० नखक्षतविशेषे ॥ उत्तमास्ये ॥ त्रि० पण्डिते । मनोज्ञे । सुन्दरे ॥ सुन्दराननविशिष्टे । सुन्दरवदने ॥

सुमुखा । स्त्री० तार्क्ष्यवध्वाम् ॥

सुमुखी । स्त्री० देव्यन्तरे ॥ तार्क्ष्यवध्वाम् । त्रिष्टुपछन्दो ११ भेदे ॥

नजजलगैर्गदितासुमुखो । यथा
। तरणिसुतातटकुञ्जगृहेश्दनविधु
स्मितदीधितिभि । तिमिरसुदस्य
मुखंसुमुखीहरिमश्लिक्यचुचुम्बचि
रम् ॥ सुन्दरवदनायाम् ॥ स्वाङ्गा
च्चोपसर्जनाद्सयोगोपधादितिङी
ष ।

सुमुष्टि । पु॰ विषमुष्टिचुपे । डी
ण्डिकायाम् ॥

सुमूल । पु॰ श्वेतशोभाञ्जने ॥

सुमूलकम् । न॰ गर्जरे ॥

सुमूला । स्त्री॰ शालपर्ण्याम् ॥ पृ
श्निपर्ण्यां ॥

सुमेखल । पु॰ मुञ्जे ॥ त्रि॰ शो
भनमेखलायुक्ते ॥

सुमेधा । स्त्री॰ ज्योतिष्मत्याम् ।
त्रि॰ सुबुद्धौ । विदुषि । शोभना
मेधाप्रज्ञायस्यस । नित्यमसिच्
प्रजामेधयोरित्यसिचसमासान्त ॥

सुमेरु । पु॰ पर्वतविशेषे । मेरौ ।
हेमाद्रौ । रत्नसानौ । सुरालये ।
मिनोतिक्षिपति॰ उच्चत्वाज्ज्यो-
तींषि । डुमिञ्प्रक्षेपणे । मि
पीभ्यांरु । सुमेरुरित्युपसर्गान्त
रनिवृत्त्यर्थम् ॥

सुम्नम् । न॰ सुखे ।

सुम्पसुराठ । पु॰ कर्पूरके ॥

सुम्भ । पु॰ देशविशेषे ॥ असुरभेदे ।

सुम्यम । न॰ रक्तौ । सुपूजितमौ
थते । मीङ गच्छाम । एरच् । बा
हुलकादात्व ॥ सुमेपुष्पेसाधुर्वा ।
ततसाधुरितियत् ॥

सुयन्त्रित । त्रि॰ शास्त्रीयनियमिते
विप्रादौ ॥

सुयामुन । पु॰ वत्सराजे । प्रासादे ॥
अद्रिविशेषे ॥ अच्युते । श्रीकृष्णे
॥ शोभनायमुनासम्बन्धिन परि
वेष्टारोऽस्य ॥ यामुना परिवेष्टा
र पञ्चासनादय शोभनायस्ये
तिवा ॥

सुयोजित । त्रि॰ नियुक्त ॥

सुयोधन । पु॰ दुर्योधने ॥ सुखेन
युध्यतेससुयोधन । भाषायांशा
सियुधिदृशिधृषिम्यीयुच् ॥

सुर । पु॰ अमरे । निर्जरे । देवे
। सुरति । षुरप्रसवैश्वर्ययो । तु
दादि । इगुपधेतिक ॥ यद्वा ।
क्षीरसमुद्रोत्थासुरा॰ साप्रस्ति॰
अर्शआद्यर्थे॰ अर्शआद्यच् ॥ सुरा
परिग्रहात्सुर । तथाचार्षरामा
यणे । वरुणस्यनतः कन्यावारुणी
रघुनन्दन । उत्पपातरसात्त
स्मान्मार्गमाणापरिग्रहम् ॥ २६ ॥
दिते पुत्रानतारामजगृहुर्वरुणा
त्मजाम् । अदितेस्तुसुताप्रीतास्ता
मगृह्णन्तवैसुरा ॥ २७ ॥ सुरा
परिग्रहाद्देवा । सुराइत्यभिविश्रु
ता । अपरिग्रहणात्तस्यादैतेया

स्यासुरास्तथैव्याघ्रेरामायणेचादि
काण्डेऽमृतेत्यस्मिनाम्नित्रट्च
त्वारिंशद्ध्यायेप्रोक्ता ॥ शोभन
राजते। राजृ दीप्तौ। अन्येभ्योपी
तिड । यद्वा। सुनोति। षुञ्०
। सुष्ठधाञ्खश्च कन ॥
सुरक । पु० ऋषिविशेषे ॥ सुराचार्यो
ऽपि । सुराणाञ्चायतिकन ।
सुरकौन्द्रदर्पापहा। स्त्री० गङ्गाया
म् ॥ यथा। भगीरथप्रथासुरासुरक
ौन्द्रदर्पापहामहेशमुकुटप्रभागिरि
शिर पताकासिता । सुरासुरनरो
रगैरजभवाच्युतै सस्तुताविमु
क्तिफलदायिनीभगवतिस्वयराजते
॥ इतिकल्किपुराणे ३४ ऽध्या
य ॥
सुरकारु । पु० विश्वकर्मणि ॥
सुरकृता । स्त्री० गुडूच्याम् ॥
सुरक्त । पु० रक्तचन्दने । त्रि० मधु
रकण्ठे ॥ अत्यन्तानुरक्ते । शोभ
नरागयुक्ते ।
सुरक्तक । पु० कोशाम्रे ॥ स्वर्णगै
रिके ।
सुरगण । पु० इन्द्रादिदेवगणे ॥
सुरगण्ड । पु० रोगविशेषे । वर
गण्डे ॥
सुरगुरु । पु० बृहस्पतौ ॥
सुरग्रामणी । पु० इन्द्रे ॥
सुरङ्ग । पु० नागरङ्गे ॥ भूमौगुप्त
मार्गात्मकेगर्तविशेषे ॥ न० पत्त
ङ्गे । वकम्० इ० भाषा० प्र० ।
छिङ्गुलि ॥
सुरङ्गकृत । पु० खनकाइतिख्याता
सप्रथितेभूमौगुप्तमार्गकर्त्तरि ॥
सुरङ्गदम् । न० पतङ्गे ॥
सुरङ्गधातु । पु० गैरिके ॥
सुरङ्गयुक् । पु० सुरङ्गयापहर्त्तरि ।
कुलभित्ति ॥
सुरङ्गा । स्त्री० लताविशेषे । कैवर्त्ति
कायाम् । दृशारुहायाम् ॥ तिर्य्य
गभूखाते । सन्धौ । सीध० इ०
सुरङ्ग० इतिचभाषाप्रसिद्धे ॥ सुवङ्गुर
ज्यतेऽत्राम्रजसा। रञ्जरागे । इल
र्थेतिघञ् । चङ्गिरितिकुत्स्न ॥
सुरङ्गिका । स्त्री० मूर्वायां ॥
सुरङ्गी । स्त्री० काकनासायाम् ॥ र
क्तशोभाञ्जने० इतिरत्नमाला ॥
सुरज फल । पु० पनसवृक्षे ॥
सुरजनी । स्त्री० रात्रौ ॥
सुरज्येष्ठ । पु० ब्रह्मणि ॥ सुरा
णाम्सुरेषुवाज्येष्ठ ॥
सुरञ्जन । पु० गोपद्रुले । गुवाक
वृक्षे ॥
सुरतम । न० निधुवने । मैथुने ॥
सुरत द्विविधम० बाह्यमाभ्यन्तर
ञ्च । तत्रबाह्यप्रेक्षणभाषणाश्लेष
णचुम्बनाद्यनेकविधम् । आभ्यन्त
रञ्चासनादिभेदेनापि ॥ त्रि० दया

युक्तौ । धर्मिरतौ ॥
सुरतकल्पक पु॰ रतक्रीडे ॥ ॥
सुरतताली । स्त्री॰ दूत्याम् ॥ शिर, स्त्रजि ॥
सुरतरङ्गिणी । स्त्री॰ गङ्गायाम् ॥ यथा । भागताबतजरैर्दम्भिमानीसि व्यमासुरतरङ्गिण्यौसदा । क्षमा वर्ता निगुणान् कलयन्तीजौवनेषुस घवन्मनुरागम ॥
सुरतरु । पु॰ देवतरौ । अश्वत्थ द्रुमे ॥
सुरता । स्त्री॰ देवत्वे ॥ देवतायाम ॥ पूर्वंभावितत्त् । श्रपरञ्चदेवा तिलिरि॰ देवमन्दीर्थंपर ॥ यथा । सुराणामम् । गजसहाया भ्यासे तिवापि॰ चकाराद्न्यथा पितत् ॥
सुरतोलक । पु॰ कौस्तुभमणौ ॥ त्रि॰ देवप्रीतिकारके ॥
सुरथ । खारोचिषिऽमरे चैत्र वसमु त्रविन्दर्पतिवरे ॥ सचचन्द्रवंशीय । यथोक्तब्रह्मवैवर्ते । श्रीनारायण उवाच । चविवब्रह्मणा पुत्रस्य पुत्रोनिशाकर । सचकृत्वाराजसू य विजराजोबभूवच । गुरुपत्न्या स्तारायातश्भूबुध सुत । बुध पुत्रश्चैत्र चात्मुद्रःसुरथसङ्गति ॥
सुरदारु । न॰ देवदारुणि ।
सुरदीर्घिका । स्त्री॰ मन्दाकिन्याम् विश्वङ्गायाम । सुराणांदीर्घिका ० वापीव ॥
सुरदुन्दुभि । स्त्री॰ तुलस्याम् ॥ पु॰ रा॰ बट ॥
सुरद्रुम । पु॰ मन्दारादिदेवतरौ ॥ सुराणाद्रुम ॥ देवनलै ॥
सुरद्विट । पु॰ असुरे । पूर्वदेवे ॥ सुरान्द्वेष्टि । द्विषअप्रीतौ । स त्सूद्विषद्रुहदुहेत्यादिना क्विप् ॥
सुरधनु । न॰ इन्द्रायुधे । शक्रधनु षि ।
सुरधूप । पु॰ धूनके ॥
सुरनदी । स्त्री॰ गङ्गायाम् ॥
सुरनन्दा ।) सुरनन्दिका ।) स्त्री॰ नदीविशेषे ॥
सुरनायक । पु॰ इन्द्रे ॥
सुरनाल । पु॰ देवनाले । नलि तृणे ।
सुरनिम्नगा । स्त्री॰ गङ्गायाम् ॥ सुराणांनिम्नगा । सुभ्रादि ॥
सुरनिर्गन्धम् । न॰ पत्रके ॥
सुरपति । पु॰ इन्द्रे । बलारातौ सुराणापति ॥ आदिगुरुविकवि • ऽ । • ॥ प्रथम वस्त्वचतुर्थप्रभे दे॰ ऽ । ऽ • ॥
सुरपत्तनम् । न॰ स्वर्गे ॥
सुरपथम् । न॰ व्योम्नि ॥
सुरपर्णम् । न॰ देवपर्णे ॥
सुरपर्णिक । पु॰ सुरपुन्नागे ॥

सुरपर्णिका । स्त्री॰ पुन्नागे ॥

सुरपर्णी । स्त्री॰ पलाश्याम् ।

सुरपादप । पु॰ कल्पवृक्षे ॥

सुरपुन्नाग । पु॰ पुन्नागभेदे । न॰ मेरौ ।

सुरपुरी । स्त्री॰ अमरावत्याम् ॥

सुरप्रिय । पु॰ अगस्त्यवृक्षे ॥

सुरप्रिया । स्त्री॰ जात्याम् ॥ स्वर्णरम्भायाम् ॥

सुरभि । पु॰ चम्पके ॥ वसन्ते ॥ जातीफले ॥ सुगन्धौ ॥ चैत्रमासे ॥ कणगुग्गुलौ ॥ धूनके ॥ कदम्बवृक्षे ॥ बकुलद्रुमे ॥ गन्धतृणे ॥ शमीवृक्षे ॥ न॰ स्वर्णे ॥ गन्धोपले । गन्धपाषाणे ॥ साधुगन्धे ॥ सुन्दरे ॥ स्त्री॰ शल्लक्यामोषधौ । गजभक्षायाम् ॥ मातृभिदि ॥ सुरायाम् ॥ गवि । रुद्रजटायाम् ॥ नवमालिकायाम् । मल्ल्याम् ॥ जात्याम् । अपितराचश्याम् । तुलस्याम् ॥ बर्बरीतुलस्याम् ॥ छायायाम् । मेदिन्याम् ॥ सुरायाम् । गवांमातरि ॥ यथा । गवामधिष्ठातृदेवीगवामाद्यागवांप्रसूः । गवां प्रधाना सुरभि गोलोकेसा समुद्भवा ॥ त्रि॰ सुगन्धौ ॥ कान्ते । शोभने ॥ विख्याते ॥ सचिवे ॥ धीरे ॥ सुष्ठु रभते॰ रभ्यतेवा॰ सुष्ठु रभस्य रभसयुक्ताभवन्त्यनया । रभ राभस्ये । सर्वधातुभ्य इन् । आगमानित्यत्वान्नुम् ॥

सुरभिका । स्त्री॰ स्वर्णकदल्याम् ॥

सुरभिगन्धा । स्त्री॰ मालत्याम् । चवेली॰ इ॰ भा॰ प्र॰

सुरभिगन्धि । त्रि॰ शोभनगन्धविशिष्टे । सुरभिर्गन्धोयस्य । गन्धस्येदुत पूतिसुसुरभिभ्य ॥

सुरभित । त्रि॰ वासिते ॥

सुरभित्रिफला । स्त्री॰ सुगन्धित्रिफलायाम् ॥

सुरभित्वक् । स्त्री॰ वृहदेलायाम् ॥

सुरभिदारु । पु॰ सरलवृक्षे ।

सुरभिपत्रा । स्त्री॰ जम्ब्याम् ॥ राजजम्बूवृक्षे ॥

सुरभिवल्कलम् । न॰ गुडत्वचि ॥

सुरभिस्रवा । स्त्री॰ शल्लक्याम् ॥

सुरभी । स्त्री॰ आमोदमाने ॥ सुरभौ । गवाप्रसवा ॥

सुरभीरसा । स्त्री॰ शल्लकीवृक्षे ॥

सुरभूरुह । पु॰ देवदारुणि ॥ कल्पवृक्षादौ ॥

सुरमृत्तिका । स्त्री॰ तुवर्याम् । काक्ष्याम् । सौराष्ट्रमृत्तिकायाम् । फटकरी॰ इ॰ भा॰ ॥

सुरमेदा । स्त्री॰ महामेदायाम् ॥

सुरराज । पु॰ इन्द्रे ॥ सुराणांराजा । टच् ॥

सुरर्षि । पु॰ नारदादौ ॥ नारदा

श्वा सुरर्षयस्तत्वत ' । सुरायतेन्न आदिपुनत्वाह्निलयस्य ॥ अष्टौसमासीया ॥ ब्रह्मर्षिदेवर्षिराजर्षिमहर्षिपरमर्षिकाण्डर्षिश्रुतर्षिभेदात् सप्तप्रकाराश्चषय । तथनारदादा ' सुरर्षय ॥

सुरलता । स्त्री॰ महाज्योतिष्मत्याम्

सुरला । स्त्री॰ पुरन्दरायाम् । गङ्गायाम् ॥

सुरलोक । पु॰ द्यवि । दिवि । स्वर्गे ॥ सुराणालोक ॥

सुरवर्त्म । न॰ खे । आकाशे ॥ सुरावर्त्म । सुरानभूमिस्पृशोऽम्बरी वगास्तेन ॥

सुरवल्लभा । स्त्री॰ श्वेतदूर्वायाम् ।

सुरवल्ली । स्त्री॰ तुलस्याम् ॥

सुरवैरी ।) पु॰ असुरे । दानवे ॥
सुरशत्रु ।)

सुरशाखी । पु॰ कल्पवृक्षे ॥

सुरश्रेष्ठ । पु॰ ब्रह्मर्षि ॥

सुरश्रेष्ठा । स्त्री॰ ब्राह्म्याम् ॥

सुरस । पु॰ मोचरसे ॥ सिन्धुवारे ॥ न॰ पर्णासे ॥ बोले ॥ त्वचे ॥ दालचीनीतिभा॰ प्र॰ वल्कले ॥ गन्धतृणे ॥ त्रि॰ स्वादौ ॥ शोभनोरसोऽस्य ॥

सुरसख । पु॰ इन्द्रसचिवे ॥ गन्धर्वे ॥

सुरसद्म । न॰ स्वर्गे ॥

सुरसम्भवा । स्त्री॰ आदित्यभक्तायाम् ॥

सुरसरित् । स्त्री॰ गङ्गायाम् ॥

सुरसर्षप । पु॰ देवसर्षपे ॥

सुरसा । स्त्री॰ रास्नायाम् ॥ नागमातरि ॥ तुलसीद्वैधायाम् । वर्वरीतुलस्याम् ॥ तुलस्याम् । पर्णासे ॥ सुरसाबोतुपर्णासि । इति शब्दरत्नावली ॥ पर्णासितुनपुंसकमितिमुद्राङ्कितामेदिनी । पर्णासिपुनपुंसकमितिहस्तायरामेदिनी । सुरसस्तुत्रिषु स्वादौपर्णासिननपुंसकमितिचकश्चाञ्चिन्मेदिन्यांपाठ : पर्णासिसुरसास्त्रियामितितुवहव ॥ ब्राह्म्याम ॥ महाशतावर्याम् ॥ कपित्थपर्ण्याम् ॥ मिश्रेयायाम् ॥ काश्मीरप्रसिद्धायांगन्धफलायामितिभावप्रकाश ॥ भारतवर्षस्थनदीप्रभेदे ॥ धृतिछन्द १९ प्रभेदे ॥ भौमीयोगौरुरश्चेत् खरमुनिकरणैराइसुरसाम् । यथा । कामक्रीडासतृष्णोमधुसमयसमारम्भसात्कालिन्दीकूलकुञ्जे विहरणकुतुकाकृष्टहृदय ' । गोविन्दोवल्लवीनामधररसमुधाम प्राप्य सुरसांशङ्के पीयूषपानप्रचयकृतसुख व्यस्मरद्‌सौ ॥ शोभनोरसोयस्या ॥

सुरसाष्ट : । पु॰ इष्टगणविशेषे ॥

यथा । निर्गुण्डीतुलसीब्राह्मीब्रह्मलोकटकारिका । पुनर्नवेतिमुनिभिः सुरसाष्ट प्रकीर्त्तिताः ॥

सुरसिन्धुः । स्त्री॰ गङ्गायाम् ॥

सुरसुन्दरी । स्त्री॰ देवाङ्गनायाम् । दुर्गायाम् । योगिनीविशेषे ॥

सुरा । स्त्री॰ चषके । सुरापानपात्रे मदके । अनुतर्षे ॥ अवभोज । यत्पानपात्रं भूपानां तज्ज्ञेयं चषकं बुधैः । काञ्चनं राजतं वास्फाटिकं वाथ मैवच ॥ इत मूरादिकोण चतुर्णां पृथ्वीशभुजाम् । इत्यन्यसम्मतं तेषां निर्णयं पाठ सम्मत ॥ सुसुष्ठितस्मितरत्नैश्चतुर्वर्णसमन्वितम् । मौक्तिकाद्यपात्रं वा सर्वेषाम् प्रयुज्यते ॥ काष्ठजधातुज शैलजाङ्गालादिभिः शोभुजाम् । यदन्यत्तीयपानादिपात्रं पृथ्वीभुजां भवेत् ॥ एवं तथापि नियमः इति भोजस्य निश्चय इति ॥ मद्ये ॥ तत्पर्य्यायः यथा । सुराहलिप्रिया हाला परिस्रुत्वरुणात्मजा । गन्धोत्तमा प्रसन्नेरा कादम्बर्य्यः परिस्रुता । मदिरा च मद्यमद्य इति ॥ सुष्ठु राति याम् । रा दाने । सु॰ अतोऽवरायन्त्यनयावा । रै शब्दे । आतश्चोपसर्गे इत्यङ् ॥ शोभनरागमनया वा । राजृ दीप्तौ । अन्येभ्योऽपीति ड ॥ गौडी पैष्टी तथा माध्वी त्रिविधा चोत्तमा सुरा । सैव नानाविधा प्रोक्ता तालखर्ज्जूरसम्भवा ॥ तथा देशविभेदेन नानाद्रव्यविभेदतः । बहुधेय समाख्याता प्रशस्ता देवतार्च्चने ॥ येन केन समुत्पन्ना येन केनाहृतापि वा । नाव जातिविभेदोऽस्ति शोधिता सर्वसिद्धिदा इति मत्स्यनिर्वाणतन्त्रम् ॥ अन्यथापि परिपक्कान्नसन्धानसमुत्पन्ना सुरामतेति ॥ अपिच । गौडी पैष्टी तथा माध्वी फलोत्था च सुरा स्मृतेति ॥ शालिषष्टिकपिष्टादिकृतमद्य सुरा स्मृता । सुरा गुर्व्वी बलस्तन्यपुष्टिमेद कफप्रदा ॥ ग्राहिणी शोथगुल्मार्शो ग्रहणीमूत्रकृच्छ्रनुत् ॥ सुराशब्दः पैष्टीमात्रे मुख्यो गौड्यादिमदिरासु गौण्या अपि सुराशब्दप्रयोगोपपत्तेः । अतएव भविष्यपुराणे सुरा च पैष्टी मुख्योक्ता न तस्यास्त्वितरे समे इति ॥ सा च दिव्या प्रसन्ना कृतसुरादिभेदात् बहुविधा भवति । समुद्रमथनोत्पन्ना दिव्येति परिकीर्त्तिता । कतक्षरामायणे । मर्क्करासवमाध्वीका पुष्पासवफलासवा । आसवर्णै विविधैर्हृष्टास्ते पृथक्पृथगिति ॥ तस्याः पाने प्रायश्चित्तं यथा । ब्रह्मघ्नसुरापस्तेयी गुरुतल्पग ॥ ते तु दृष्ट्वा विशुद्ध्यन्ते तत्संयोगीच

पञ्चम ॥ ततो धेनुशतं दद्याद्ब्राह्म
णानाञ्च भोजनम् । इति गारुडे
२२६ अध्याय ॥ तत्प्रायश्चित्ता
पि यथा । सुरापानं द्विजो नाम प्राप
यित्वा सप्तमासाय श्चैव मद्यातिघोर-
म् । इष्टकाचन्द्रापि तथा विरूपं पीत
तथा सुरया मोहितेन ॥ समन्युरुत्थाय
महानुभावस्तदोशना विप्रहितं चिकी
र्षुः । काव्यः स्वयमेवाक्यमिदं जगाद सु
रापानं प्रति वै जातशङ्कः ॥ यो ब्रा
ह्मणोऽद्यप्रभृतीह कश्चिन्मोहात् सुरां
पास्यति मन्दबुद्धिः । अपेतधर्मा ब्रह्म
हा चैव स स्यादस्मिंल्लोके गर्हितः
स्यात् परे च ॥ मया चेमां विप्रधर्मोक्ति
सीमां मर्यादां वै स्थापितां सर्वलोके
सन्तो विप्राः शुश्रुवांसो गुरूणां देवा
दैत्याश्चोपशृण्वन्तु सर्वे ॥ इति मा
त्स्ये २५ अध्याय ॥ ब्राह्मणक्षत्रिय
विशां त्रिविधसुरापानप्रायश्चित्तादि
यथा । सुरां पीत्वा द्विजो मोहादग्नि
वर्णां सुरां पिबेत् । तया स काये नि
र्दग्धे मुच्यते किल्विषात्ततः ॥ गो
मूत्रमग्निवर्णं वा पिबेदुदकमेव वा ।
पयो घृतं वा मरणाद्गोशकृद्रसमेव वा
॥ कणान्वा भक्षयेदब्दं पिण्याकं वा
सकृन्निशि । सुरापानापनुत्त्यर्थं वा
लवासा जटी ध्वजी ॥ सुरा वै मलम
न्नानां पाप्मा च मलमुच्यते । त
स्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पि

बेत् ॥ गौडी पैष्टी च माध्वी च विज्ञे
या त्रिविधा सुरा । यथैवैका तथा स
र्वा न पातव्या द्विजोत्तमैः ॥ यक्ष
रक्षःपिशाचान्नं मद्यं मांसं सुरास
वम् । तद्ब्राह्मणेन नात्तव्यं देवानाम
श्नता हविः ॥ अमेध्ये वा पतेन्मत्तो
वैदिकं वाप्युदाहरेत् । अकार्यम
न्यत् कुर्याद्वा ब्राह्मणो मदमोहितः
॥ यस्य कायगतं ब्रह्म मद्येनाप्लाव्य
ते सकृत् । तस्य व्यपैति ब्राह्मण्यं
शूद्रत्वञ्च स गच्छति ॥ एषा विचित्रा
भिहिता सुरापानस्य निष्कृतिः इति
मानवे ११ अध्याय ॥ अथ ईश्वर
कुलार्णवे । पीयमद्यं पलं खाद्यं
समालोक्य प्रियामुखम् । इत्थं वा
चरणं जप्य परप्राप्यं परम्पदम् ॥
गुरुकारुण्यसुलभं मोहखण्डकुलदर्शन
म् । त्वमता एव जानान्तनेतरे भुक्ति
मुक्तिदम् ॥ गुरूपदेशरहिता मद्या
न्तु बलेन च । मोहयन्ति जनान्
कांश्चित् स्वयम्पूर्वं विमोहिताः ॥
दुराचाररताः केचिद्वञ्चयन्ति हि
पामराः । यथाभूतो भवेत् स्वामी से
वकाः स्युस्तथाविधाः ॥ बहवः
कौलिकं धर्मं मिथ्याज्ञानविडम्बकाः
। स्वबुद्ध्या कल्पयन्तीत्थं पारम्पर्य
विवर्जिताः ॥ मद्यपानेन मनुजा
यदि सिद्धिं लभन्ति चेत् । मद्यपान
रताः सर्वे सिद्धिं यान्तु इमौ हिताम् ॥

मांसभक्षणमात्रेण यदि पुण्या गतिर्भवेत् । लोके मांसाशिनः सर्वे पुण्यभाजो भवन्ति च ॥ स्त्रीसम्भोगेन देवेशि यदि मोक्षं व्रजन्ति चेत् । सर्वेऽपि जन्तवो लोके मुक्ताः स्युः स्त्रीनिषेवणात् ॥ कुलमार्गो महादेवि न मया निन्दितः क्वचित् । आचाररहिता येऽत्र निन्दितास्ते न चेतरे ॥ अन्यथा कौलिको धर्म्मो ह्याचारः कथितो मया । विचरन्त्यन्यथा देवि मूढाः पण्डितमानिनः ॥ कृपाणधारागमनाद्व्याघ्रकण्ठावलम्बनात् । भुजङ्गधारणान्नूनमशक्यं कुलवर्त्तनम् ॥ यथापानन्तु देवेशि सुरापानं तदुच्यते । तन्महापातकं ज्ञेयं वेदादिषु निरूपितम् ॥ अनाघ्रेयमनालोक्यमस्पृश्यञ्चाप्यपेयकम् । मद्यं मांसं पशूनान्तु कौलिकानां महत्फलम् ॥ अमेध्यानि द्विजातीनां मद्यान्येकादशैव तु । द्वादशं तु सुरामद्यं सर्वेषामधमं स्मृतम् ॥ सुरा वै मलमन्नानां पाप्मा च मलमुच्यते । तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ॥ सुरादर्शनमात्रेण कुर्यात् सूर्यावलोकनम् । तत्समाघ्राय मात्रेण प्राणायामत्रयं चरेत् ॥ आजानुज्ञां भवित्वा न मौन्यश्चुपवसेदह । ऊर्द्ध्वं नाभेस्त्रिरात्रन्तु मद्यस्पर्शने विधिः ॥ सुरापाणे कामकृते ज्वलन्तीं तां विनिक्षिपेत् । मुखे तया विनिर्दग्धो मृतः शुद्धिमवाप्नुयात् ॥ मद्यस्पर्शादिदोषस्य प्रायश्चित्तमितीरितम् । अविधानेन यो हन्यादात्मार्थं प्राणिनं प्रिये ॥ निवसेन्नरके घोरे दिनानि पशुरोमभिः सम्मितानि दुराचारस्तिर्य्यग्योनिषु जायते ॥ अनुमन्ता विशसिता निहन्ता क्रयविक्रयी । संस्कर्त्ता चोपहर्त्ता च खादिता चाष्टघातकाः ॥ धनेन क्रयिको हन्ति खादिता चोपभोगतः । घातको वधबन्धाभ्यामित्येष त्रिविधो वधः ॥ मांसस्य दर्शनं कृत्वा सुरादर्शनवच्चरेत् । तस्मादविधिना मद्यं मांसं सेवेत न क्वचित् ॥ विधिवत्सेवितं देवि तत्सर्वं सम्प्रसीदति । नाशयत्यविधानेन सर्वमेतद्वरानने ॥ इदं श्राव्यविधानेन गच्छेदये क्षकादाघम । विधिमार्गविजृम्भित्वा पापैर्लिप्यते ॥ बहुनाऽत्र किमुक्तेन सारमेकं शृणु प्रिये । जीवन्मुक्तिसुखोपायः कुलशास्त्रेषु गोपितः ॥ जन्मतुष्टो फल देवि जनकामैवसौरभम् । कुलज्ञोऽप्युद्भवितृणाञ्च जनस्तस्मादनुत्तम ॥ कुलशास्त्राणि सर्वाणि मयैवोक्तानि पार्वति । प्रमाणानि न सन्देहो न हन्तव्यानि हेतुभिः ॥ देवताभ्यः पितृभ्यश्च मधु मांसं निवेदयेत्ताय ते । खा

द्दिद्ययामद्दिद्वया । क्षीरं सर्पिर्मधू दकम् ॥ हिरण्यपात्रं सा हीति । वप्र क्तं पुरुषं पशुम् । सद्योदीक्षयती त्याद्या प्रमाणस्तुतय प्रिये ॥ इति श्रीकुलार्णवे द्वितीयोल्लासः ॥ श्रीमहानिर्वाणतन्त्रे पिशीसदाशिव वाक्यथा । सुराद्रवमयी तारा जीव निस्तारकारिणी । जननी भोगमो क्षाणां नाशिनी विपदारुजाम् ॥ दा हिनी पापसङ्घानां पावनी जगतां प्रिये । सर्वसिद्धिप्रदा ज्ञानबुद्धिवि द्याविवर्द्धिनी ॥ मुक्तैर्मुमुक्षुभिः सिद्धैः साधकैः क्षितिपालकैः । सेव्यते सर्वदा देवैरात्माभीष्टसि द्धये ॥ सम्यग्विधिविधानेन सुस माहितचेतसा । पिबन्ति मदिरां मर्त्या अमर्त्या एव ते क्षितौ ॥ प्रत्येक तत्त्वस्वीकारादिधिना शास्त्रवर्त्मन ः । मज्ञानेप स्तत्त्वनांसेवनात् किंफलम्भवेत् ॥ ध्रुयस्त्वेतरुणी देवी निपीता विधिवर्ज्जिता । नृणां विना शयेत् सर्वं बुद्धिमायुर्यशोधनम् । अ त्यन्तपानान्मद्यस्य चतुर्वर्गप्रसाधिनी । बुद्धिर्विनश्यति प्रायो । लोकानाम सचेतसाम् ॥ विभ्रान्तबुद्धेर्मनुजा न्कार्याकार्यमजानतः । स्वाऽनि ष्टपरानिष्ट जायतेऽस्मात् पदे पदे ॥ अतो नृपो वा चक्रेशो मद्यं मादक वस्तु । अत्यासक्तजनान् बाध्यन

दण्डेन शोधयेत् ॥ सुराभेदा ह्यसि भेदान् न्यूनेनाप्यधिकेन वा । देश कालविभेदेन बुद्धिभ्रंशो भवेन्नृणाम् ॥ अतएव सुरापाणादतिपानं न स च्यते । स्वल्पपानाच्च पाणिपदुद्गमृभि रतिपानं विवारयेत् ॥ नेन्द्रियाणि वशे यस्य मदविह्वलचेतसः । देवता गुरुमर्यादालङ्घिनो भयरूपिण. ॥ निखिलानर्थयोग्यस्य पापिनः शि वघातिनः । दद्यात् जिह्वारदर्थ्या स्ताडयेत्तस्य पार्थिवः ॥ विचलत् पादवाक्पाणि भ्रान्तमुन्मत्तमुद्धत म् । तमुप यातयेद्राजा द्रविणस्या हरेत्ततः । अपवाग वादिनक्रम त्त लज्जाभयविवर्ज्जितम् । धना दानेमतः शाखा असाप्रीतिकरो नृप ॥ मताभिषिक्त कौलश्चेद तिपानात् कुलेश्वरि । पशुरेव सम न्तव्य कुलधर्मबहिष्कृत ॥ पिबन्नतिशयं मद्यं शोधितं वाप्यशो धितम् । त्याज्यो भवति कौलानां दण्डनीयो पि भूभृतः ॥ ब्राह्मीभा र्यां सुरां मत्ता पाययन्तो द्विजातय । शूद्रं शुभार्यं मासाद्धेन पञ्चा ह्वाणभोजनात् ॥ असंस्कृतसुरा पानाच्छुद्ध्ये दुपवसत्र्यहम् । भु क्त्वाप्यशोधितं मांसमुपवासद्वयं चरे त् ॥ असंस्कृतं मीनमुद्रे खादयन्नुपव सेदह । अवैधपशुमक्षणं नृराज्ञो

दण्डेन शुद्ध्यति ॥ अपिच । वीरघाती ब्रह्मघाती चौरांशी गभस्तथा । स्तेयी महापातकिनस्तत्संसर्गी च पञ्चम ॥ कुलवर्त्म कुलद्रव्य कुलसाधकमेवच । ये निन्दन्ति दुरात्मानस्ते गच्छन्त्यधमागतिम् ॥ नृत्यन्ति रुद्रडाकिन्यो नृत्यन्ति रुद्रभैरवा । मांसास्थिचर्वणानन्दाः सुराकौलद्विषां नृणाम् ॥ इत्यादि । सत्यशीला सदापरहितैषिणी, तान् गर्हयन् नरको न च्छिन्नति या न्तिनकाचित्क्वचित् ॥ सुरामांसादिभिर्देवी गङ्गापि सुप्रसीदति । अत्र प्रमाणं सीताया वाक्यं सुस्पष्टमुच्यते । तथाहि । मध्यन्तु समनुप्राप्य भागीरथ्यास्त्वनिन्दिता । वैदेही प्राञ्जलिर्भूत्वा तां नदीमिदमब्रवीत् ॥ पुत्रो दशरथस्यायं महाराजस्य धीमत । निदेशं पालयत्वेनं गङ्गे त्वदभिरक्षित ॥ चतुर्दश हि वर्षाणि समग्राण्युष्य कानने । भ्रात्रा सह मया चैव पुनः प्रत्यागमिष्यति ॥ ततस्त्वां देवि सुभगे क्षेमेण पुनरागता । यक्ष्ये प्रमुदिता गङ्गे सर्वकामप्रदायिनि ॥ त्वं हि त्रिपथगे देवि ब्रह्मलोकं समीक्ष्यसे । भार्या चोदधिराजस्य लोकेऽस्मिन् सम्प्रदृश्यसे ॥ सा त्वां देवि नमस्यामि प्रशंसामि च शोभने । प्राप्तराज्ये नरव्याघ्रे शिवेन पुनरागते ॥ गवां शतसहस्रञ्च वस्त्राण्यन्नञ्च शोभने । ब्राह्मणेभ्यः प्रदास्यामि तव प्रियचिकीर्षया ॥ सुराघटसहस्रेण मांसभूतौदनेन च । यक्ष्ये त्वां प्रयता देवि पुरीं पुनरुपागता ॥ यानि त्वत्तीरवासीनि दैवतानि च सन्ति हि । तानि सर्वाणि यक्ष्यामि तीर्थान्यायतनानि च ॥ पुनरेव महाबाहुर्मया भ्रात्रा च सङ्गत । अयोध्यां वनवासात्तु प्रविशत्वनघोऽनघे ॥ तथा सम्भाषमाणा सा सीता गङ्गामनिन्दिता । दक्षिणा दक्षिणं तीरं क्षिप्रमेवाभ्युपागमत् ॥ इत्यार्षे रामायणे अयोध्याकाण्डे द्विपञ्चाशत्सर्गः ॥ पुनश्च । कालिन्दीमध्यमायाता सीता त्वेनामवन्दत । स्वस्ति देवि तरामि त्वां पारयेन्मे पतिर्व्रतम् ॥ यक्ष्ये त्वां गोसहस्रेण सुराघटशतेन च । स्वस्ति प्रत्यागते रामे पुरीमिक्ष्वाकुपालिताम् ॥ कालिन्दीमथ सीता तु याचमाना कृताञ्जलिः । तीरमेवाभिसम्प्राप्ता दक्षिणा वरवर्णिनी ॥ इत्यार्षे रामायणे अयोध्याकाण्डे पञ्चपञ्चाशत्सर्गः ॥

सुराकर । पुं० नारिकेलद्रुमे ॥ मद्योत्पत्तिस्थाने ॥ यथा । आकराः सर्वथा सर्वं वर्जयित्वा सुराकरम् ॥

सुराग्र्यम् । न० अमृते सुराणामग्र्य

श्रेष्ठम् ॥

सुराङ्गना । स्त्री॰ देवपत्न्याम् ॥ अप्सरःसु ॥

सुराचार्य्य । पुं॰ बृहस्पतौ ॥ सुराणामाचार्य्यः ॥

सुराजक । पुं॰ भृङ्गराजे ॥

सुराजा । पुं॰ शोभननृपे ॥

सुराजीवी । पुं॰ शौण्डिके ॥

सुरानन्द । पुं॰ हरौ ॥ सुरान् आनन्दयत्यमृतप्रदानेनेति तथा । क्लीं सुरया॰ सुराया वानन्दो यस्य ॥

सुराप । त्रि॰ मद्यपे । सुरापानकर्त्तरि ॥ सुरां पिबति । पा॰ । गापोष्टगिष्यच॰ पिबतेः सुराशीध्वोरिति वार्त्तिकाट्टक् । टित्वात् स्त्रियां ङीप् । सुरापी ॥ ब्रह्महा क्षयरोगी स्यात् सुरापः श्यावदन्तकः । सुवर्णहारी कुनखी दुश्चर्म्मा गुरुतल्पग ॥

सुरापगा । स्त्री॰ गङ्गायाम् ॥

सुरापाणम् । न॰ मद्यपाने ॥ सुराया पानम् अशुद्धौ ॥ वाभावकरणयोरिति पक्षे णत्वम् ॥

सुरापाणा । पुं॰ भूम्नि॰ प्राच्येषु । पूर्व्वदेशस्थेषु ॥ पीयतेऽस्मिन्निति पानम् । कर्म्मणि ल्युट् । सुरापानं येषाम् । पानन्देशे॰ इ॰ णत्वम् ॥

सुरापानम् । न॰ सुरापाणे । मद्यपाने ॥ सुरायाः पानम् । वाभावकरणयोरिति पक्षे णत्वाभाव ब्राह्मोज्झितावेदनिन्दाकौटसाक्ष्यसुहृद्वध । गर्हितानाद्ययोर्जग्धिः सुरापानसमानि षट् ॥

सुराभाग । पुं॰ सुराग्रे । सुराया अग्रभागे ॥

सुरामण्ड । पुं॰ सुराया अग्रभागे । कारोत्तरे ॥ सुराया मण्डः ॥

सुरारि । पुं॰ दैत्ये ॥ सुराणाम् अरिः ॥

सुरारिहा ।) सुरारिहन्ता ।) पुं॰ विष्णौ । श्रीहरौ ॥ सुरारीन् हन्ति ॥ सुरारीणां हन्ता ॥

सुरार्हम् । न॰ हरिचन्दने ॥

सुरालय । पुं॰ सुमेरुशैले ॥ स्वर्गे । सुराणामालय ॥ सुराया निलये ॥

सुराश्रय । पुं॰ इन्द्रे ॥

सुराष्ट्रः । पुं॰ देशविशेषे । सूरत॰ इ॰ भा॰ प्र॰ ॥ शोभनोपवर्त्तने ॥

सुराष्ट्रज । पुं॰ कृष्णमुद्गे ॥ विषविशेषे ॥ न॰ तुवरिकायाम् । सौराष्ट्रमृदि ॥ सुराष्ट्रे जातम् जनी॰ । सप्तम्यां जनेर्डः ॥ त्रि॰ तद्देशजाते ॥

सुराष्ट्रजा । स्त्री॰ तुवरिकायाम् । सौराष्ट्र्याम् ॥ टाप् ॥

सुराह्व । पुं॰ देवदारुणि ॥ मरुवके ॥ हरिद्रुवर्षे ॥

सुरी । स्त्री० देवाङ्गनायाम पुर सुरीणामभवन्मानवी ॥

सुरुङ्ग । पु० शोभाञ्जने ॥

सुरुङ्गा । स्त्री० सुरङ्गायाम् । सन्धिलायाम् । सन्धौ । सौध० कू० प्र० खातविशेषे ॥

सुरुङ्गाहि । पु० सन्धिचौरे । कुञ्जभिले ॥

सुरुच् । त्रि० अतिकमनीये ॥

सुरूप । त्रि० शोभनरूपयुक्ते । सुन्दरे । रुचिरे । मनोज्ञे । मनोरमे । शोभनं रूपं यस्य ॥ विदुषि । विपश्चिति । न० तूले ॥

सुरूपा । स्त्री० भार्ग्याम् । शालपर्ण्याम ॥ सुन्दर्याम । रुचिरायाम् । मनोरमायाम । शोभनरूपयस्या ॥

सुरूहक । पु० गर्द्दभाश्वे । कू० ई० चन्द्र ॥

सुरेज्य । पु० बृहस्पतौ ॥

सुरेज्या । स्त्री० तुलस्याम् ॥

सुरेन्द्र । पु० इन्द्रे ॥

सुरेन्द्रजित् । पु० गरुडे ॥ सुरेन्द्रं जयति । जि० । क्विप् । तुक् ॥ इन्द्रजिति ॥

सुरेभ । पु० देवहस्तिनि ॥ शोभनह स्वर्णे । न० रङ्गे । मृदङ्गे ॥

सुरेवट । पु० रामपूगे सुनिपूगे ॥

सुरेश । पु० भगवति । विष्णौ ॥ शिवे ॥ सुराणामीश स्वामी ।

सुरेशलोक । पु० ब्रह्मलोके ॥ यथा । नयत्रवै कुरुठकथा सुधापगा नसा धवोभागवतास्तदाश्रया । नयत्र यज्ञेशमखा महोत्सवा सुरेशलोकोपि नवैसवीव्यतामिति देवीभागवत ॥

सुरेश्वर । पु० इन्द्रे ॥ शिवे । म रुद्गणार्थशिष्यविशेषे । वार्त्तिककारे ॥

सुरेश्वरी । स्त्री० दुर्गायाम् । मन्दाकिन्याम् ॥ सुराणामीश्वरी ॥

सुरेष्ट । पु० वकवृक्षे । शिवमल्ला म् ॥ शाले ॥ सुरपुन्नागे ॥

सुरेष्टा । स्त्री० ब्राह्म्याम् ॥

सुरोत्तम । पु० सूर्य्ये ॥ त्रि० देवश्रेष्ठे ॥

सुरोत्तर । पु० चन्दने ॥

सुरोद । पु० सुरासिन्धौ । सुरासमुद्रे ॥ सुरा० उदकं यस्य । उत्तरपदस्थ उदकस्योदादेश ॥

सुलक्षण । त्रि० शोभनलक्षणविशिष्टे ॥

सुलक्षणा । स्त्री० उमाया सखीविशेषे ॥

सुलभ । पु० विष्णौ ॥ यथा । पत्रे पुष्पे सुफले सुतोये क्रीतलभ्ये सुसदैवसत्सु । भक्त्यैकलभ्ये पुरुषे पुराणे मुक्त्यै कथं न क्रियते प्रयत्न इति महाभारतम् ॥ त्रि० अनायासप्राप्ये । सुखेन लभ्यते० इति । ईष

दु सुश्चितिलभे : खल ॥

सुलभा । स्त्री० तुलस्याम् ॥ धूम्रपत्रायाम् ॥ माषपर्ण्याम् ॥

सुललाट । त्रि० शोभनभालविशिष्टे । ललाटेयस्यह्यन्तंचतुरङ्गुलं द्व्यंगुलकेरिवकाल्वथ्रुक्तावतुलंरेखासौभाग्यविशिष्टे ॥

सुललितम् । न० माधाह्यक्तविशेषे ॥ हिजवरयुगमिह्रचयविलघुकगणमथकलय । सुललितललितरसपदिसरसिजमुखिभवतियदि । अगतिविदितसुललितमितिवरफणिपतिरिति वदति ॥ यथा । प्रविचल कुवलयनयनजलनिधिकुलतवरयमन । दितितनयनिवहदमनशमनविविधभयशमन । मयिवरसुपनयसुचिरमभिनवजलधररुचिर ॥ त्रि० अतिसुभगे ॥ सुशोभिते ॥

सुलेखा । स्त्री० दुर्गायाम् ॥

सुलोचन । पुं० श्रीकृष्णे ॥ शोभन लोचन नयन • स्थान वाम ॥ मृगे । हरिणे ॥ त्रि० शोभननेत्रविशिष्टे ॥ शोभनेलोचनेयस्यस ॥

सुलोचना । स्त्री० सुनेत्रायाम् ॥ माधवराजपत्न्याम् ॥

सुलोमशा । स्त्री० काकजङ्घायाम् ॥ त्रि० शोभनलोमयुते ॥

सुलोमा । स्त्री० मांसच्छदायाम् ॥ ताम्रवल्याम् ॥

सुलोहकम् । न० पित्तले ॥

सुलोहित । पुं० सुन्दररक्तवर्णे ॥ त्रि० तद्वति ॥

सुलोहिता । स्त्री० अग्निजिह्वाविशेषे ॥

सुवक्त्र । पुं० वनवर्वर्याम् ॥ न० सुन्दराननने । त्रि० तद्वति ॥

सुवचनम् । न० सुप्रलापे । शोभनोक्तौ ॥ शोभन वचनम ॥

सुवचा । त्रि० वाग्मिनि ॥ सुष्ठुवक्ति । वच० । सर्वधातुभ्योऽसुन् ॥ यद्वा । मिथुनेऽसि । उपसर्गविशिष्टोधातुर्मिथुनम् । तवासुलोपवादेऽसि । स्वरैभेद ॥

सुवदन । पुं० श्रीगणेशे । शोभन वदनमस्य ॥ त्रि० सुन्दराननवति ॥ न० शोभनानने ॥

सुवदना । स्त्री० सुन्दराननविशिष्टायानार्याम् ॥ कृतिच्छन्दः २० प्रभेदे ॥ म्रौयासमाभ्रवण्डभिर्मरभनयुताभ्लौगः सुवदना ॥ यथा । प्रत्याहृत्येन्द्रियाणित्वदितरविषयाज्ञासायनयना • त्वांध्यायन्तीनिकुञ्जे परतरपुरुष हर्षोत्थपुलका । आनन्दाश्रुप्लुताक्षीवसतिसुवदना योगैकरसिका • कामारिर्न्य-स्तकामानलुनरकरिपोराधाममसखी ॥ सुष्ठुशोभन वदनयस्या . सा ॥

सुवन । पु॰ दिवानाथे । सूर्य्ये ॥ वह्नौ ॥ सूते॰ सूयतेवा । षूङ्प्राणिगर्भविमोचने । भूसूधूभ्रस्जिभ्य श्छन्दसीति क्युन् ॥

सुवया । स्त्री॰ प्रौढायाम् ॥

सुवर्च्चक । पु॰ सर्ज्जिकाक्षारे ॥

सुवर्च्चला । स्त्री॰ सूर्य्यपत्नीविशेषे । मस्त्वायाम् । अतस्याम् ॥ ब्राह्म्याम् । आदित्यभक्तायाम् । हुलहुल॰ इ॰ प्र॰ शाके ॥ अस्या गुणा यथा । सुवर्च्चला हिमा रूक्षा स्वादुपाका सरा गुरुः । अपित्तला कटुः क्षारा विष्टम्भकफवातजित् ॥ अन्यापि तिक्ता कषाया पाक्या सरा रूक्षा लघुः कटुः । निहन्ति कफपित्तास्र श्वासकासारुचिज्वरान् ॥ विस्फोटकुष्ठमेहास्रयोनिरुक्कृमिपाण्डुता ॥

सुवर्च्चस् । त्रि॰ शोभनमति ॥ अतितेजस्विनि । शोभनवर्च्चोयस्य सः ॥

सुवर्च्चिक । पु॰ सर्ज्जिकाक्षारे ॥

सुवर्च्चिका । स्त्री॰ जतुकायाम् । तद्वल्ल्याम् । जतुकायाम् । निशान्धायाम् ॥ सर्ज्जिकाप्रभेदे । सोरा॰ इ॰ भा॰ प्र॰ ॥ सुवर्च्चिका सर्ज्जिकावद्बोद्धव्या गुणतो जनैः ॥

सुवर्च्ची । स्त्री॰ सर्ज्जिकाक्षारे ॥

सुवर्ण । पु॰ स्वर्णकर्षे । विस्तौ । हेमोर्च्चे । ... षोडशमाषेषु ॥ षोडशभिर्माषैः परिमितपरिमाणविशेषे ॥ सुवर्णालौ ॥ सुवर्णनामनिर्य्यासे ॥ धत्तूरे ॥ लङ्कादिद्वीपवत् समुद्रान्तर्वर्त्तिनिद्वीपविशेषे ॥ कर्णगुग्गुलौ ॥ न॰ सोना॰ इ॰ भा॰ प्र॰ धातुश्रेष्ठे । तत्पर्य्याया यथा । स्वर्णं सुवर्णं कनकं हिरण्यं हेमहाटकम् । तपनीयं शातकुम्भं गाङ्गेयं भर्म्मकर्व्वुरम् ॥ चामीकरं जातरूपं महारजतकाञ्चने । रुक्मं कार्त्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियामिति ॥ तस्य यथार्थत्वसर्व्वदेवतात्मकत्वञ्चोक्तं रामायणे॰ महाभारते च परशुरामप्रतिवशिष्ठवाक्यम् । सर्व्वरत्नानि निर्म्मथ्य तेजोराशिसमुत्थितम् । सुवर्णमेभ्यो विप्रेन्द्र रत्नं परममुत्तमम् ॥ एतस्मात्कारणाद्देवगन्धर्व्वोरगराक्षसाः । मनुष्याश्च पिशाचाश्च प्रयता धारयन्ति तत् ॥ तथा । तस्मात्सर्व्वपवित्रेभ्यः पवित्रं परमं स्मृतम् ॥ तथा । अग्निर्व्वै सकला देवाः सुवर्णञ्च तदात्मकम् । तस्मात्सुवर्णं ददता दत्ताः स्युः सर्व्वदेवताः ॥ तस्मात्पापविनाशनम् ॥ अस्योत्पत्तिर्व्वह्नि॰ गुणाश्च स्वर्णे द्रष्टव्याः ॥ कृष्णागुरुणि ॥ हरिचन्दने ॥ स्वर्णगैरिके । त्रि॰ धने ॥ नागकेशरे ॥ पु॰ न॰ हेमोर्च्चे । अशीतिरक्तिकापरिमिते स्वर्णे ॥ त्रि॰

उत्कृष्टवर्णे ॥ शोभनो वर्णः स्तुतिर्वा सुष्ठु वर्ण्यते वा । वर्ण वर्णने । कर्म्मणि । एरच् ॥

सुवर्णक । पु० आरग्वधवृक्षे ॥ पुष्पे शोभनो वर्णोऽस्य ॥ न० पित्तले ॥

सुवर्णकदली । स्त्री० कनकमोचायाम् । चम्पकरम्भायाम् । चम्पाकेला० इ० भा० प्र० ॥

सुवर्णकार । पु० स्वर्णकारे ॥

सुवर्णकेतकी । स्त्री० हेमकेतक्याम् ॥

सुवर्णगैरिकम् । न० गैरिकप्रभेदे । स्वर्णधातौ । सुरक्तके । सन्ध्याभ्रे । वानीमाटी० पीलागेरु० इ० भा० प्र० ॥ सुवर्णगैरिकन्त्वन्यत्ततोऽरक्ततरं हितम् । तथा गैरिकात् ॥ अस्य गुणाः । गैरिकं मधुरं शीतं कषायं व्रणरोपणम् । विस्फोटाशोऽग्निदाहघ्नवरं स्वर्णादिकं शुभम् ॥

सुवर्णनकुली । स्त्री० महाज्योतिष्मत्याम् ॥

सुवर्णपुष्प । पु० राजतरुण्याम् ॥

सुवर्णप्रसरम् । न० एलवालुके ॥

सुवर्णमाक्षिकम् । न० स्वर्णमाक्षिके ॥

सुवर्णयूथी । स्त्री० सुगन्धायाम् । हेमपुष्पिकायाम् । सोनजुही० इ० भा० प्र० ॥

सुवर्णवणिक् । पु० अम्बष्ठाद्वैश्यकन्यायां जाते वर्णसङ्करजातिविशेषे । कश्चिद्वणिग्विशेषस्तु संसर्गात्स्वर्णकारिण । स्वर्णचौर्य्यादिदोषपतितो ब्रह्मशापतः ॥

सुवर्णवर्ण । पु० विष्णौ । त्रि० रुक्मवर्णे ॥ सुवर्णस्येव वर्णोऽस्य ॥

सुवर्णवर्णा । स्त्री० काञ्चन्याम् । हरिद्रायाम् ॥

सुवर्णविन्दु । पु० विष्णौ हरौ ॥ विन्दवोऽथवा सुवर्णसदृशा अस्य ॥ शोभनवर्णमक्षरम्० विन्दुश्च यस्मिन्मन्त्रे तदात्मकोवा ॥

सुवर्णा । स्त्री० स्वर्णक्षीर्य्याम् ॥ हरिद्रायाम् ॥ वाट्यालके ॥

सुवर्णाह्व । पु० नागकेशरे । धुस्तूरे ॥

सुवर्णी । स्त्री० आखुपर्ण्याम् ॥

सुवर्त्तुलम । न० कालिङ्गे ॥

सुवल्लि । स्त्री० सोमराज्याम् ॥ शोभना वल्लिरस्याः ॥

सुवल्ली । स्त्री० सोमराज्याम ॥ कट्व्याम् ॥

सुवसन्त । पु० मधूत्सवे चैत्राद्याम ॥

सुवसन्तक । पु० वासन्त्याम् । मदनोत्सवे ॥

सुवह । त्रि० सुखवाह्ये ॥ सुखेन वहति । वह० । पचाद्यच् ॥ पु०

वायौ प्रभेदे ॥

सोमोद्भवा । स्त्री० रेवायाम् । नर्मदायाम् ॥ सोमात् सोमवंशजात् पुरूरवसः उद्भवति तीरात्वा निर्गत्वात् ॥ यद्वा । सोमोऽमृतमुद्भवत्यस्याः । स्वर्गप्रदत्वात् । अप ॥ सोमाद्रुद्रादुद्भवति वा । पचाद्यच् । सोमो रुद्र विशेष उद्भवो यस्याः ॥

सौम्य । पुं० उपद्वीपभेदे ॥ त्रि० प्रियदर्शने ॥ सोमदेव । स्वार्थादि ष्योयं ॥

सौरङ्गा । स्त्री० रागाङ्गनान्तरे । सत्सौरङ्गं धनमञ्जरसुरगपतिरिति वर्दिते । यदीह विपरीतमिश्रजनन्तु हिमुदस्तुपनकृति ॥ यथा । यस्मिन् धनस्तनिधिनीलमनसकामनन्दरतो मनम् । सखिपद्मा मिकदापिमधुरधन भवनोषनम् ॥

सोल्लुण्ठ । पुं० सोल्लुण्ठने ॥

सोल्लुण्ठनम् । न० सोपहासं दुरुक्तौ । स्तुतिपूर्वकोपवादे । समुपहसा दिवाक्यवाक्ये ॥ लुण्ठति । लुठ आलस्ये प्रतिघाते च । ल्युट् । लुण्ठनेन सहितम् ॥

सोल्लुण्ठोक्ति । स्त्री० सव्यङ्ग्योक्तौ ॥

सौकर्य्यम् । न० अनायासे ॥ सुकरस्य क्रियायाम् ॥

सौकुमार्य्यम् । न० मार्दवे ॥

सौक्ष्म्यम् । न० सूक्ष्मतायाम् । सूक्ष्मस्य भावः । ष्यञ् । अन्नरस भावे । गुणविशेषे ॥ यथा सर्वरूपस्य सूक्ष्मत्वात् सौक्ष्म्यमुच्यते

सौखरात्रिक । त्रि० सुखरात्रिप्रश्नकर्त्तरि ॥ सुखरात्रिं पृच्छति । पृच्छतौ सुस्नातादिभ्यः इति ठक् ॥

सौखशायनिक । त्रि० सुखशयनप्रश्नकर्त्तरि ॥ सुखशयनं पृच्छति । पृच्छतौ सुस्नातादिभ्य इति ठक् । अनुशतिकादि ॥

सौखसुप्तिक । त्रि० वैतालिके । वैतालिका बोधकराश्चाक्रिका सौखसुप्तिकाः इति अमरः ॥

सौखिक । त्रि० सुखार्थिनि । सौखीन इति भाषाप्रसिद्धे । म० भा० राजधर्मे ॥

सौख्यम् । न० सुखे । सुखमेव । स्वार्थे ष्यञ् । यत्किञ्चिदपि कुर्वाण

सौखैर्दुं खान्यपोहति ॥

सौगन्धिकलम् । न० वीर्यविशेषः ॥

सौगत । पु० बौद्धविशेषः । शून्यवादिनि । माध्यमिके । सुगतो बुद्धो देवता भक्तिरस्य सुगतस्य भक्तिर्वा । भक्तिरित्यण् ॥

सौगन्ध्यम् । न० कत्तृणे । सौगन्धिके ॥

सौगन्धिक । पु० गन्धपाषाणे । गन्धके । सुगन्धव्यवहारिणि । गन्धवणिजि । सुगन्धिभिः प्रसिद्धे । तृणविशेषे । नासायोनौ । यस्य पूतियोनौ जातस्य सौगन्धिको भवेत् । न० कह्लारे । श्वेतोत्पले । सौगन्धिकं भा० प्र० । पद्मरागमणौ । कत्तृणे । नीलोत्पले । कुन्दराजनिर्घण्टः । सुगन्धि । स्वार्थे । विनयादित्वाट्ठक् । भागवते । गन्धोत्थ० श्रीमन्महौषधा । सुगन्धि पुष्पाणाम् । समूहः । तस्मिन्निति ठन् ॥

सौगन्धिका । स्त्री० पद्मभेदे । हे० न० भा० वनपर्व ।

सौचक्कम् । न० सूचकस्य कर्म भावो वा पुरोहितादित्वात् यक् ।

सौचि । पु० सौचिकी ।

सौचिक । पु० सूचिकौ शिल्पितुन्नवाये । यथा सर्वप्रमोदाय मे । शैवस्य सूचकन्यायां मणिबन्धाद्वैश्यात् सौचिकस्तन्तुवायपट्टवस्त्रयुग्मजातम् । सूची शिल्पमस्य । शिल्पमिति ठक् ॥

सौचिक्यम् । न० सौचिकस्य कर्म भावो वा । ब्राह्मणादित्वात् ष्यञ् ॥

सौजन्यम् । न० सौहार्दे । सुजनता । यथा । सौजन्यं वयसं जन्म विभवो लौकिकश्रीरौ । यतो निर्गुणस्य विनयित्वं ज्ञातृत्वं धनं सत्पात्रदानेऽपि । सत्कान्तौ सप्तसु प्रियाप्रियतया धर्मस्य नारायणे सत्पुत्रेण विना भयं धनं तथा यह माध्याम् कुर्मः ।

सौत्रम् । न० सूत्रम् । सूत्रस्य सम्बन्धी । इदम् ॥

सौत्र । पु० सूत्रमात्रे नियतप्रयोगा धातुविशेषाः । त्रि० सूत्रस्यायमिति ॥

सौत्रामणी । स्त्री० सुरादिद्रव्यप्रधानी देवकीयागविशेषः । सौत्रामण्यां सुरा ग्रहाणां ग्रहणीयात् इति श्रुतिविहिता । सौत्रामण्यां ब्राह्मणः । त्रयाणां प्रविष्टेन सुराम । अन्यथा व्यपदीत्यापतितस्त्रि भवेत् ॥

सौदामनी । स्त्री० तडिति । विद्युति । सुदामा गिरावभवत् । सुदाम्नः उत्तरदिक् । तेन एकदिक् अण् । सु

क्षितिप्रकर्षेणभावाद्धिरिपाञ्चौपीन भवत । यथा । सुदामापर्वत सुदामाचन्द्रिकाएवाह्निका । पूर्व वदच प्रकृतिभावो । स्फटिकादिमयपर्वतप्रान्तभवाद्दिविद्युदतिस्फुटाभवतीत्यर्थात ॥ सुदामामाला । तत्रभवाधा । सौदामनी । मात्वा कारेच्छ्य । तडिद्विशेषे ॥ अप्सर प्रभेदे । देवविशेष॰ इत्यमरः ॥

सौदायिकम् । न॰ स्त्रीधनविशेषे ॥ अथाद्वयस्यायन । ऊढयाकन्यया वापि पत्युः पितृगृहेथवा । भर्तुः सकाशात् पित्रोर्वालब्धसौदायिकं स्मृतम् ॥ सौदायिकधनप्राप्यस्त्रीणांस्वातन्त्र्यमिष्यते । यस्मात्तदानृशंस्यार्थं तैर्दत्तं तत्प्रजीवनम् ॥ सौदायिकेसदास्त्रीणांस्वाम्यंपरिकीर्तितम् । विक्रयेचैव दानेचयथेष्टस्थावरेष्वपीति ॥ सुदायेभ्य पितृमातृभर्तृकुलस्थ स्निग्धेभ्यो लब्धं सौदायिकम् । अन्यच्च स्त्रीधन॰ अनैचयम् । इतिदायतत्त्वम् ॥

सौदास । पुं॰ इक्ष्वाकुवंशीयनृपे ॥ कल्माषपादे । मित्रसहे ॥

सौध । पु॰ न॰ राजसदने । सुधालेपोऽस्यास्ति । ज्योत्स्नादित्वाद् ण ॥ सुधयाऽवलिप्तं वा । सौधे ॥ त्रि॰ सुधासम्बन्धिनि ॥ पु॰ दुग्धपाषाणे ॥

सौधभूषणम् । न॰ कटकपाटावाम् । अ॰ना॰ इ॰ क॰ ॥

सौन । त्रि॰ सूनायांभवे ॥

सौनन्दम् । न॰ बलभद्रमुसले ॥

सौनन्दी । पुं॰ बलदेवे ॥ सौनन्दमस्यास्ति । इनि ॥

सौनिक । पु॰ वधस्थानाधिकारिणि ॥ वैतंसिके । मांसिके । मांसिके । आकुनिके ॥ सूनयाचरति । ठक् ।

सौनिकी । स्त्री॰ दीनवोयेध्याम् ॥

सौन्दर्यम् । न॰ सुन्दरताया॰म् ॥ तल्लक्षणं यथा । अङ्गप्रत्यङ्गकानांयः सन्निवेशोयथोचितम् सुश्लिष्टसन्धिबन्धः स्यात्तत्सौन्दर्यमुदाहृतमित्युज्ज्वलनीलमणि ॥ सुन्दरस्यभावः । ष्यञ् ॥

सौपर्णम् । न॰ मरकते ॥ शुण्ठ्याम ॥ गारुत्मतास्त्रे ॥ त्रि॰ सुपर्णसम्बन्धिनि ॥

सौपर्णी । स्त्री॰ पातालगरुडीलतायाम ॥

सौपर्णेय । पुं॰ गरुत्मति । गरुडे ॥ सुपर्ण्याअपत्यम् । स्त्रीभ्योढक् ॥

सौपर्णेयी । स्त्री॰ सुपर्ण्याःपुत्र्याम् ॥ सुपर्ण्याअपत्यं स्त्री । स्त्रीभ्योढ

कः । टिड्ढाणञिति ङीप् ॥

सौप्तिकम् । न० रात्रिमारणे । रात्रियुद्धे ॥ महाभारतस्य पर्व्वविशेषे ॥ त्रि० सुप्तसम्बन्धिनि ॥

सौभम् । न० खचरपुरे ॥ हरिश्चन्द्रपुरे ॥

सौभगम् । न० सुभगत्वे ॥

सौभद्र । पु० सुभद्रातनयेऽभिमन्यौ ॥ सुभद्राया अपत्यम् । अह्वाभ्यो नदीमानुषीभ्यइत्यण् ॥ सङ्ग्रामविशेषे ॥ सुभद्राप्रयोजनमस्य । सङ्ग्रामेप्रयोजनयोद्धृभ्यइत्यण् । ग्रन्थविशेषे ॥ सुभद्रामधिकृत्यकृतो ग्रन्थः । अधिकृत्यकृतेग्रन्थे० इत्यण् ॥ त्रि० सुभद्रासम्बन्धिनि ॥

सौभद्रेय । पु० अभिमन्यौ ॥ सुभद्राया अपत्यम् । स्त्रीभ्योढक् ॥ विभीतकवृक्षे ॥

सौभरम् । न० सामविशेषे ॥

सौभरि । पु० पुराणप्रसिद्धेपरमर्षौ । मुनिविशेषे । *

सौभागिनेय । पु० सुभगासुते ॥ सुभगाया अपत्यम् । कल्याण्यादीनामिनङितिढक्० इनङादेशश्च । हृद्भगेत्युभयपदवृद्धि ॥

सौभागिनेयी । स्त्री० सुभगात्मजायाम् ॥

सौभाग्यम् । न० विष्कम्भाद्यन्तर्गतयोगविशेषे ॥ तज्जातफलं यथा । सौभाग्यजन्मासुभगो मनुष्यः स्त्रीणां जनानां धनवान् गुणज्ञः । उदारचित्तो बलवान् विवेकी महाभिमानी प्रियभाषणश्चेति ॥ सिन्दूरे ॥ टङ्कणे ॥ सुभगत्वे । तल्लक्षणं यथा । अल्पनिद्रोऽल्पभुक् वाग्मी मितभाष्यनसूयकः इति ॥ सुभगस्य कर्म्मभावो वा । ष्यञ् । हृद्भगसिन्ध्वन्ते पूर्व्वपदस्य चेत्युभयपदवृद्धिः ॥ व्रतविशेषे ॥

सौभाग्यकरणम् । न० वाक्यप्रीतौ ॥ य सार्वजन्यं सुभगत्वमिच्छेद्गुणान् सदा स्ववदेत् परेषाम् । प्राप्नोति दोषानसतोऽप्यनेकान् परस्य यो दोषकथां करोति ॥

सौभाग्यचिन्तामणि । पुं० सारकौमुद्युक्तौषधविशेषे ॥

सौभाग्यशुण्ठी । स्त्री० पाकविशेषे । यथा । नागरस्य पलान्यष्टौ घृतदेयं तत्समम् । क्षीरं द्विप्रस्थसंयुक्तं खण्डस्यार्द्धशतं पलम् । पचेन्मृद्वग्निना सम्यक् यथा पाको भवेत्तदा । चूर्णं दद्यात्त्रिजातस्य त्र्योषस्यपलोन्मितम् ॥ भक्षयेत्प्रातरुत्थाय शुचिरश्शूलमारुतम् । सूर्य्यावर्त्तहनुस्तम्भमन्यास्तम्भगलग्रहम् ॥ वर्णकारं ह्यवर्णं वलीपलितनाशनम् । अम्लपित्तप्रशमनं सौभाग्यकरमुत्तममिति पाकावली ॥

सौभ्रात्रम् । न० सुभ्रातुर्भावे ॥ यु

बाहित्वादण् ॥

सौमदत्तिः । पुं॰ क्षत्रियविशेषे । भूरिश्रवसि ॥ सोमदत्तस्याऽपत्यम् । अतइञ् ॥

सौमनसा । स्त्री॰ जातिपत्त्याम् ॥

सौमनसायनी । स्त्री॰ जातिपत्त्याम् । मालतीपत्रिकायाम् । जावित्री॰ कृ॰ भा॰ प्र॰ ॥

सौमनस्यम् । न॰ शोभनमनोभवे ॥ कुसुमसमूहे ॥ श्राद्धेपिण्डदाना नन्तर ब्राह्मणहस्ते पुष्पदानमन्त्रे

सौमनस्यवान् । त्रि॰ प्रीतिमति ॥

सौमनस्यायनी । स्त्री॰ मालतीकलिकायाम् ॥ यथा । मालतीपुष्पकलिकांसौमनस्यायनींविदुरितित्रिकाण्डशेषः ॥

सौमिकः । पुं॰ सोमरससाध्येऽग्निष्टोमादियागे ॥

सौमिकी । स्त्री॰ दीक्षणीयेष्टौ ॥ कृ॰ हे॰ चन्द्र ॥

सौमित्रः । पुं॰ लक्ष्मणे ॥

सौमित्रिः । पुं॰ रामानुजे । लक्ष्मणे ॥ सुमित्रायाअपत्यम् । बाह्वादित्वादिञ् ॥

सौमी । स्त्री॰ ऋग्विशेषे ॥ सोमोदेवताऽस्याः । सोमाट्ट्यण् । ङीप् । यलोपः ॥

सौमेधिकः । पुं॰ सिद्धे ॥

सौमेरव । त्रि॰ सुमेरुसम्बन्धिनि ॥

सौमेरुकम् । न॰ सुवर्णे ॥

सौम्य । पुं॰ सोमात्मजे । बुधे ॥ वत्सरविशेषे ॥ तत्फलयथा । सुभिक्षक्षेममारोग्यसुखञ्चनिरुपद्रवम् । सौम्यहृष्टिभवेद्राजासौम्ये सौख्यंप्रकीर्त्तितमिति ॥ ४२ ॥ भास्करे ॥ द्युतिधरणीविप्रे ॥ उदुम्बरवृक्षे ॥ भूखण्डविशेषे ॥ कृच्छ्रव्रतविशेषे ॥ न॰ मृगशिरोनक्षत्रे ॥ तीर्थविशेषे ॥ करमध्ये सौम्यतीर्थम् ॥ त्रि॰ अनुग्रे ॥ साधौ ॥ मनोज्ञे ॥ सोमदैवते ॥ सोमइवसौम्य । शाखादिभ्योयः । ततःप्रज्ञाद्यण् ॥ सोमोदेवताऽस्य वा । सोमाट्ट्यण् ॥ यद्वा । सोमइवसोम । ततश्चतुर्वर्णादित्वात्ष्यञ् ॥

सौम्यकृच्छ्र । पुं॰ व्रतविशेषे ॥ यथा । पिण्याकाचामतक्राम्बुसक्तूनांप्रतिवासरम् । एकैकमुपवासश्चकृच्छ्रः सौम्योयमुच्यते ॥

सौम्यगन्धी । स्त्री॰ शतपत्त्याम् ॥

सौम्यग्रह । पुं॰ शुभग्रहे ॥ यथा । चन्द्रोऽर्केन्दुज्ञसौरारा पापाः सौम्यास्तथापरे । पापयुक्तोबुधः पापोराहुकेतूचपापदौ ॥

सौम्यता । स्त्री॰ प्रियदर्शनतायाम् ॥

सौम्यत्वम् । न॰ सौमनस्ये ॥ स

वंशीकृतत्वे ॥ प्रतिषिद्धधा षिन्नि ॥

सौम्यधातु । पुं॰ कफे । श्लेष्मणि ॥

सौम्यवपुः । न॰ मनुष्यशरीरे ॥

सौम्या । स्त्री॰ मनुष्यायाम् ॥ मनोज्ञायाम् । दुर्गायाम् । गौर्य्याम् ॥ मालपर्ण्याम् ॥ महाज्योतिष्मत्याम् ॥ गुञ्जायाम् ॥ उत्तरदिशि ॥ ब्राह्म्याम् ॥ मल्लिकायाम् ॥ रुद्रजटायाम् ॥ शम्याम् ॥ महेन्द्रवारुण्याम् ॥ मल्लिकवल्ल्याम् ॥

सौम्याः । स्त्री॰ बहुत्वे॰ मृगशिरशिरस्थासु पञ्चतारकासु । इल्वलासु ॥

सौम्यायनम् । न॰ उत्तरायणे ॥

सौर । पुं॰ शनैश्चरे । मासविशेषे । सूर्य्यैकराशिभोगावच्छिन्नमासे ॥ यथा । आदित्यराशिभोगेन सौरो मास प्रकीर्त्तितइति । एकस्मात्सङ्क्रमाद्वासङ्क्रान्ति सौरोऽभिधीयतइति च ॥ दिनविशेषे ॥ वर्षविशेषे । तुम्बुरुवृक्षे ॥ त्रि॰ सूर्य्यसम्बन्धिनि ॥ न॰ उपपुराणविशेषे । त्रि॰ सूर्य्योपासके ॥ सूर्य्यस्यापत्यम् । तस्येदमित्यण् ॥

सौरज । पुं॰ तुम्बुरुवृक्षे ॥ फलविशेषे । त्रि॰ सौरजाते ॥

सौरदिनम् । न॰ सौरदिवसे ॥

सौरनक्तम् । न॰ व्रतविशेषे ॥ यथा । हस्तयुक्तार्कदिने सौरनक्तं समाचरेत् । स्नात्वार्कं समभ्यर्च्य नीरोगो बहुजीवति ॥ आत्मनो द्विगुणच्छाया यदा सन्तिष्ठते रवेः । सौरनक्तं विजानीयान्न नक्तं निशि भोजनमिति नारसिंहे ६४ अध्याय ॥

सौरभम् । न॰ कुङ्कुमे । वा॰ । सुगन्धितायाम् । विषमवृत्तान्तरे ॥ अयमुद्गतासदृशमेव पदं निहद्गतीयमन्यथा । जायते रनभगैर्ग्रथितं कथयन्ति सौरभमिदं तदीदृशम् ॥ यथा । परिभूतकुसुमतपवनविस्ततगधविभ्रमा । कस्य न हरतीह हरेर्मुखपद्मसौरभकणातवाद्भुता ॥

सौरभेयः । पुं॰ वृषे ॥ सुरभ्या अपत्यम् । स्त्र्यौ ढक् ॥

सौरभेयी । स्त्री॰ माहेय्याम् । गवि । उस्रायाम् ॥ सुरभ्याः स्त्र्यपत्यम् । ढक् । ङीप् ॥

सौरभ्यम् । न॰ मनोज्ञत्वे । सौगन्ध्ये । सुगन्धितायाम् ॥ गुणगौरवे । पुं॰ कुवेरे ॥

सौरमास । पुं॰ सूर्य्यैकराशिभोगावच्छिन्नकाले । यथा । एकराशौ रविर्यावत्कालं मास सभास्कर । अथ षड्भिः सौरमासैरयनं परिकीर्त्तितम् ॥

सौरसम्वत्सर । पु॰ सूर्य्यस्य द्वादशराशिभोगावच्छिन्नकाले । यथा । सौरसम्वत्सरस्यान्ते मानेनानेन तु पश्चात् । अतिरिच्यन्ते दिनानि भृगुनन्दन ॥

सौरसेन । पु॰ देशविशेषे । यथा । मागधाद्दक्षिणे तु दिश्यात्पश्चिमतः स्थिते । सौरसेनाभिधो देशः सूर्य्यवंशप्रकाशकः ॥

सौरसेय । पु॰ कार्त्तिकेये । स्कन्दे ॥ सुरसायाअपत्ये ॥

सौरसैन्धव । त्रि॰ गङ्गासम्बन्धिनि ॥ सुरसिन्धोरयम । अण् । हृद्भगसिन्ध्वन्ते पूर्व्वपदस्य च इत्युभयपदवृद्धि ॥

सौराष्ट्र । पु॰ देशविशेषे ॥ कोङ्कणात्पश्चिमतीर्थं समुद्रप्रान्तगोचरम् । हिङ्गुलाजान्तको देवि दशयोजनदेशकः । सौराष्ट्रदेशो देवेशि सस्यात्तुर्ज्जराभिधः ॥ कुन्दुरुके ॥ न॰ कांस्ये ॥

सौराष्ट्रक । न॰ पञ्चलौहे ॥

सौराष्ट्रमृत्तिका । स्त्री॰ काक्षाम् । तुवर्याम् । फट्करी॰ इ॰ भा॰ प्र॰ ॥

सौराष्ट्रा । स्त्री॰ तुवर्याम् ॥

सौराष्ट्रिकः । पु॰ विषप्रभेदे । सौमल्खार॰ सङ्क्रिया॰ इ॰ भा॰ प्र॰ ॥ सुराष्ट्रविषयेषु जातत्वात्सौराष्ट्रिक उच्यते ॥ त्रि॰ सुराष्ट्रजे सुराष्ट्रदेशविशेषभवे । अध्यात्मादित्वाट्ठञ् ॥

सौराष्ट्री । स्त्री॰ सौराष्ट्रमृत्तिकायाम ॥ स्फटिकायां गुणाः सर्व्वे सौराष्ट्र्यामपि कीर्त्तिताः ॥ सुराष्ट्रे भवा । अण् । ङीप ॥ सौराष्ट्रीकफपित्तघ्नी विसर्पव्रणनाशिनी ॥

सौरि । पु॰ शनैश्चरे । शनिवृक्षे ॥ सूरस्यार्कस्यापत्यम् । अतइञ् । श्रीकृष्णे ॥ सूरीयादववंशस्य शालपौतिमधुमाधवौ । तस्य वसुदेवस्यापिता । तस्य अपत्यम्॰ सौरि कृष्णः । ऋष्यन्धकवृष्णिकुरुभ्यश्च इत्यत्र कुरुशब्दस्य शूरपर्य्यायत्वात् अपवादः ॥ अतएवोक्तं बाह्वादित्वादिञ् असमाप्तम् ॥ आदित्यभक्तायाम् ॥

सौरिकः । पुं॰ स्वर्गे ॥ न॰ सुरानिमित्तधने ॥

सौरिरत्नम् । न॰ नीलमणौ ॥

सौरी । स्त्री॰ रश्मौ । सूर्य्यकिरणे ॥ सूर्य्यस्येयम् । अण । ङीप् । सूर्य्यतिष्येतियलोप ॥

सौव । त्रि॰ स्वकीये ॥ स्वस्येदम । अण्॥

सौवर्च्चलम । न॰ सर्ज्जिकाक्षारे ॥ सुवर्च्चलायाइदम् । तस्येदमित्यण ॥ सच्चर॰ इ॰ प्र॰ लवणे । कृष्णलवणे । अर्ब्बे । रुचके । सुवर्च्चले । वर्च्चे । इत्यादित्वात्सौवर्च्चल ।

प्रत्ययः ॥

सौवर्ण्यं । त्रि० सुवर्णस्य विकारे । कटकादौ । तस्य विकार इत्यर्थे । जातरूपेभ्यः परिमाणइत्यण् ॥

सौवर्णभेदिनी । स्त्री० प्रियङ्गौ ।

सौवर्णी । स्त्री० गान्धार्य्याम् । सुवर्णस्यापत्यम् ॥

सौवस्तिक । पु० पुरोहिते ॥ त्रि० स्वस्तिकृति ॥

सौविद । पुं० राज्ञामागारे रक्षाधिकृते । सौविदल्ल । कञ्चुकिनि । स्वार्थे । वचि समासस्तेनामण पुरस्त्रीणां प्रेक्षकपुरुषान्तर वारणायराज्ञामागारे ये वा धराश्चि युक्तास्ते वर्षवराः सौविदाद्दि शब्दवाच्याः । सुष्ठु वेत्ति । विदज्ञाने । इगुपधेति कः । सुविदएव । प्रज्ञादित्वात् स्वार्थेऽण् । यद्वा । सुविदस्तु राः स्त्रियस्तासामयं रक्षकः । तस्येदमित्यण् ॥

सौविदल्ल । पु० सौविदे ॥ सुष्ठु विदन्ति विदांसमपि० लान्ति वञ्चयन्ति न कुर्वन्ति सुविदल्ला । तासामयं रक्षकः । तस्येदमित्यण् ॥

सौवीर । पु० कोलदन्तरे । कुमालके । शूरसेनात् पूर्वभागे गङ्गया पश्चिमेश्वरे । सौवीरदेशोदेवेविसर्वदिशाधर्म्माश्रमः । न० काञ्जिके । यथा । सौवीरमुद्धवैरामे पत्रेषान्निस्तुषे कृतम् । गोधूमैरपि सौवीरमाचार्य्याः केचिदूचिरे । सौवीरस्तु यवैरामैः पक्वैर्वा निस्तुषैः कृतम् । उदावर्त्तानाहमृद्विग्रहणीरोगगुदाङ्कुरे ॥ सौवीराञ्जने । सौवीराञ्जने । बदरीफले । मरुद्धूरे । यथाह । पच्यमानसुमधुरं सौवीरवदरमत्यन्तम् । सौवीरवदरशीतमेत्रगुरुमुत्रलम् । हृत्पित्तदाहवमथुतृष्णानिवारणमिति ॥ सुवीरदेशभवम् । तत्रभवइत्यण् ॥

सौवीरक । न० सुवीराञ्जने । काञ्जिके । पु० बदरवृक्षे ॥

सौवीरसारम् । न० स्रोतोञ्जने ॥

सौवीराञ्जनम् । न० स्रोतोञ्जने । सुरमाञ्जन० भा० प्र० । सौवीरम् तदञ्जनञ्च ॥ यथा । सौवीराञ्जनमिदं मन्मथसुहृदास्ते विन्यस्य नयनयुगा कथाचयत् । तव नयनमपि च दयितकराग्रे स्थाप्यमितमपीयता मिवाधिति वाङ्कुरो मानसौप्ता ॥

सौशब्द । पुं० गुणविशेषे ॥ तस्य च यथा सुप्तिङ्न्तापरं शब्दमिति सौशब्दमिति ॥

सौष्ठवम् । न० सुष्ठुताथाम ॥ सुष्ठु भावः । उद्गात्रादित्वादञ् ॥

सौस्नातिक । त्रि० सुस्नातप्रष्टरि ॥ सुस्नातं पृच्छति । पृच्छ सौस्नातादिभ्यष्ठञ् ॥

सौहार्द्द । पुं० मित्रतनये ॥ सुहृ

दीपस्य तस्मापत्यमित्यण् । हृद्भगसिन्ध्वन्ते पूर्वपदस्य चेत्युभयपदवृद्धिः ॥ न० सौजन्ये । शोभनहृदयत्वे ॥ सख्ये । मैत्राम् ॥ सुहृदःस्वभाव कर्म वा । मित्रे सुहृदादेः ॥

सौहार्दम् । न० सौहृदे । सख्ये ॥ सुहृदयस्वभाव । ष्यञ् । बाहीकाद्यञ्श्रेणि त्वित्युदादेश ॥

सौहित्यम् । न० तृप्तौ ॥ सुहितस्वभाव ० कर्म वा । पुरोहितादित्वाद्यक् ॥ पर्याप्ते ॥

सौहृदम् । न० सौहार्दे । सख्ये ॥ सुहृदः कर्म भावो वा । युवादित्वादण् ॥ प्रेमणि ॥

सौहृद्यम् । न० सौहार्दे ॥ सुहृदयस्वभाव । ष्यञ् । बाहीकाद्यञ्श्रेणित्वितिपक्षे हृदादेशाभाव ॥

स्कन्द । पुं० कार्त्तिकेये । महासेने । पार्वतीनन्दने ॥ सेनापतीनामहं स्कन्द इत्युक्तेः देवसेनापतिः कार्त्तिकेयो भगवद्विभूति ॥ स्कन्दतिगच्छति० शोषयति वा रेत्याण् । स्कन्दिर् गतिशोषणयोः । पचाद्यच् । तथा च ब्रह्मपुराणम् । स्कन्दितं द्वादशवगणा तेन स्कन्द प्रतापवानिति ॥ द्व्याहारपालविशेषे ॥ नृपतौ ॥ पुराणविशेषे ॥ शरीरे ॥ पारदे ॥ बालग्रहविशेषे ॥

स्कन्दनम् । न० रेचने ॥ क्षरणे ॥ गमने । शोषणे ॥

स्कन्दपुराणम् । न० स्कान्दे महापुराणविशेषे ॥ तच्छोकसंख्याश्लोकाशीति सहस्रैः भागवतेयथा । एकाशीतिसहस्राणि स्कान्दाख्यं परमाद्भुतमिति ॥

स्कन्दांशक । पुं० पारदे ॥

स्कन्ध । पुं० देहावयवविशेषे । भुजशिरसि । अंसे ॥ अमरकोषः यथा । कदलीस्तम्भसङ्काशा भुजस्कन्धाश्चैव नरा । राजानस्ते च विज्ञेया मधवाश्च महाबला : ॥ निर्मांसरोमबहुताविर्गन्नसमप्रकीर्तिता । ख्रतिसमुद्र । स्कन्दते । स्कन्दिर् ० । कर्मणिघञ् । स्कन्देश्चस्वा दृश्यति० बाहुलकाद्नसुन्यपिच पृषोदरादित्वा ॥ नृपतौ ॥ सम्पराये ॥ व्यूहे । समूहे ॥ काये ॥ प्रकाण्डे ॥ यथा । पक्षीप्रकाण्ड . स्कन्ध० आमूलाच्छाखावधिस्तरौरिति । आचार्ये ॥ छन्दोभेदे ॥ विज्ञानादिपञ्चसु ॥ तच० विज्ञानवेदनासंज्ञासंस्कारसंज्ञका पञ्च वे नाभिकोनांनयोप्रसिद्धा ॥ ग्रन्थपरिच्छेदे ॥ पथि ॥ भाशिरादिभाति । रूधाञ्० । चातेनुपेतिच ० । पारस्करादित्वात् सुट् ॥ वास्कन्धते० धाकञते । स्कन्दिर्० । कर्मणिघञ् ॥ पृषो

इरादिः ॥

स्कन्धकम् । न॰ मोघाहशाल्मरी ॥ स्कन्धकमिलितल क्षिप्त यच्चतु-च्छलगणाष्टकेनार्ध्वकात् । तत्तुल्यमपि मदल भर्नासि चतु षष्टिमात्रिकशरीरमिदम् ॥ यथा । अथमितविमलविद्युत्करालकरवालकलितजलधरकाल । उच्चसृष्ट नगस्त्रिं तलजितपथिकाङ्गनानिवहहृदयतट ॥

स्कन्धचाप । पुं॰ वंशादिनिर्मिते शिक्याधारे । विहङ्गिकायाम् ॥

स्कन्धज । पु॰ वटे ॥ शल्लक्यादौ ॥ पवर्गीनयशूरलाद्या स्कन्धजा स शल्लकीमुखा॰ इति हेमचन्द्रः ॥

स्कन्धतरु । पु॰ स्कन्धफले ॥

स्कन्धदेश । पु॰ आसने । द्विरदस्कन्धे ॥ स्कन्धप्रदेशः ॥ स्कन्धमात्रे ॥

स्कन्धफल । पुं॰ नारिकेले ॥ स्कन्धफलान्यत्र ॥ उदुम्बरवृक्षे ॥

स्कन्धफला । स्त्री॰ खर्जूर्याम् ॥

स्कन्धबन्धना । स्त्री॰ मधुरिकायाम् ॥

स्कन्धमल्लक । पु॰ कङ्कखगे ॥

स्कन्धरुह । पु॰ वटवृक्षे ॥

स्कन्धवाह । पु॰ शकटादिवाहक वृषे । शङ्के । अवधूर्त्ते ॥

स्कन्धवाहक । पु॰ वृषे ॥

स्कन्धशाखा । स्त्री॰ वृक्षमुख्यशाखायाम् । शाखायाम् ॥ स्कन्धजा शाखा ॥

स्कन्धशृङ्गः । पुं॰ महिषे । इति कश्चित् ॥

स्कन्ध । न॰ वृक्षमूलाच्छाखावधिक भागे । प्रकाण्डे ॥ अंसे ॥ स्कन्द्यते । स्कन्दिर॰ । स्कन्देस्सलोपश्च असुन्धश्चान्तादेश ॥

स्कन्धाग्नि । पु॰ वडवाग्नौ । समिन्धने क्षतयज्ञाग्निभेदे ॥

स्कन्धानल । पु॰ बृहत्काष्ठाग्नौ ॥

स्कन्धावार । पु॰ कटके ॥ सैन्यस्थितौ ॥ राजधान्याम् ॥

स्कन्धिक । पु॰ स्कन्धवाहकवृषे ॥

स्कन्धी । पु॰ द्रुमे ॥

स्कन्न । त्रि॰ हस्तादितः पतिते अस्य पर्याया यथा । स्रस्त ध्वस्त भ्रष्ट॰ स्कन्न॰ पन्न च्युत गलितमिति ॥ स्कन्द्यते स्म । स्कन्दिर॰ । कर्मणि क्त॰ यथायोग्यं कर्मकर्त्तरि वा ॥ कठिनीभूते ॥

स्कोटिका । स्त्री॰ हापुत्रिकाखगे ॥

स्कोनगरम् । न॰ वाहीकग्रामविशेषे ॥

स्खदनम् । न॰ विदारणे । स्खद स्खदने । ल्युट् ॥

स्खलत् । त्रि॰ चलति ॥

स्खलनम् । न॰ रिङ्गणे ॥ बालाभ्यां हस्तपादाभ्यां चलने ॥ निर्नि मि

स्फुलादिस्त पतने ॥ पिच्छिला दीपतने । धर्मादिस्खलने ॥ स्खल सञ्चलने । भ्वादि० ट ॥

स्खलितम् । न० वृद्ध्युत्पादिनायुद्धमर्यादाच्युतने । छले । छलिते ॥ त्रि० । स्खलनम् । स्खल० । क्त ॥

स्खालित्यम् । न० व्यभिचारे ॥

स्तन । पु० वक्षस्थपाङ्गे । कुचे । पयोधरे । वक्षोजे ॥ स्तनौ पुंसस्यानार्यां विभिन्नभयोर्द्वयम् । यौवनागमनेनार्यां पीवरौभवतः स्तनौ ॥ गर्भवत्याः प्रसूतायाः स्तनौ क्षीरपूरितौ ॥ अरोमशौ स्तनौ पीनौ घनावविषमौ शुभौ ॥ स्तनयोः स्तनत्वकारणौषधं यथा । कुष्ठं नागबलाचूर्णं नवनीतसमन्वितम् लेपयेद्युवतीनां च स्तनयोर्वर्धनं परं स्तनम् ॥ स्तनयोर्लिङ्गयर्त्तयोर्वर्णेद्वयम्० स्तनतिमव्युतिनाकाम् मे : । स्तनमन्वे । पच० कुसी तिघोवा ॥

स्तनम् । त्रि० शब्दायमाने ॥ स्तन० । शट प्रत्यये ॥

स्तननम् । न० ध्वनिमात्रे ॥ मेघगर्जे ॥ कुन्थिते ॥

स्तनधय । न० पतिमासके । स्तना न्धये ॥ स्तनंधयति । धेट् पाने । नासिकास्तनयोर्ध्माधेटोरिति खश् । अरुर्द्विषदिति मुम् ।

स्तनधयी । स्त्री० स्तनपायाम । अ तिबालिकायाम् । स्तनन्धयायाम् ॥ धेट इत्वान्ङीप् ॥

स्तनप । पु० अतिशिशौ । अर्भके ॥ स्तनौ पिबति । पा० आतोनुपे तिक ॥

स्तनपा । स्त्री० शिशायाम । स्तन धय्याम् ॥ टाप् ॥

स्तनभर । पु० स्तनाभोगे ॥

स्तनभव । पु० रतिबन्धविशेषे ॥ यथा । स्कन्धाश्रयमध्युतु कृत्वा यो षित्पदद्वयम् । स्तनोधृत्वारमेत् कामीबन्ध स्तनभव स्मृतः ॥

स्तनमुखम् । न० चूचुके ॥

स्तनयित्नु । पु० वारिधरे, मेघे । मुस्तके । स्तनिते । मृतौ । रोगे ॥ अशनौ । विद्युति ॥ स्तनय ति । स्तनगर्जौदेवशब्दे० चुरादावदन्त : । स्तनिहृषिपुषिगदिभ्यो णेरित्नुच् । अयामन्तेत्यणेरया देश : ॥

स्तनवृन्तम् ।) न०
स्तनाग्रिका ।) स्त्री० स्तनमुखे ॥
स्तनाग्रम् ।) न०

स्तनान्तरम् । न० हृदये ॥

स्तनाभोग । पु० कुचमरे । स्तन भरे ॥ कुचपरिपूर्णतायाम ॥

स्तनालिङ्गनम् । न० बन्धभेदे ॥ तल्लक्षणं यथा । उरसिहृदयेसमुखे

रादिमन्तिवराङ्गीस्तनयुगमुपधत्तेय
त्स्तनालिङ्गनतदति ॥

स्तनितम् । न॰ गर्जिते । मेघनिर्घो
षे ॥ स्तनगदौ देवशब्दे । भावे क्त
॥ त्रि॰ शब्दिते ॥

स्तनितफल॰ । पु॰ विकङ्कटवृक्षे ॥

स्तन्यम् । न॰ दुग्धे ॥ स्तनेभवम् ।
शरीरावयवाद्यत् ।

स्तब्ध । त्रि॰ साभिमाने । अविनी
ते । अप्रगतस्वभावे । अनम्रे । गु
रुदेवतादिष्वप्यनम्रे ॥ स्तम्भिते ।
जडीकृते ॥ स्तम्भ॰ । क्त ॥

स्तब्धरोमा । पुं॰ वराहे । सूकरे ।
रोमाञ्चिनि ॥ स्तब्धानि॰ अनम्राणि
रोमाणियस्य ॥

स्तम्ब । पुं॰ गुल्मे । स्कन्धरहित॰
अप्रकाण्डद्रुमे ॥ तृणयवादिगुच्छे
॥ व्रीह्यादीनामप्रकाण्डे ॥ आला
ने ॥ तिष्ठति॰ अचला । ष्ठा॰ ।
स्थस्तोम्बजवकाविष्टम्भश्च॰ तिष्ठ
ते स्तादेशश्च ॥ तृणादौ ॥

स्तम्बक॰ । पु॰ स्तम्बे ॥ स्वार्थे॰ या
वादिभ्य॰ कन् ॥

स्तम्बकरि: । पुं॰ धान्ये ॥ स्तम्बम्
करोति । स्तम्बशकृतोरिन् । व्री
हिवत्सयोरितिवक्तव्यम् ॥ त्रि॰ स्त
म्बकर्त्तरि ॥

स्तम्बकार । पु॰ गुच्छकारके ॥

स्तम्बघा । पु॰ स्तम्बघ्ने ॥

स्तम्बघन॰ । पुं॰ स्तम्बघ्ने । तृणादि
गुच्छोन्मूलनसाधने ॥ स्तम्बघ्नस्तम्ब
घन॰ स्तम्बोयेननिहन्यते॰ भूध्य
मर॰ । स्तम्बस्य घातक । स्तम्ब
हेयेन । स्तम्बेकर्त्तयप प्रत्यये घञ्
भावेश॰ ॥ नीवारादिग्रहणार्थं ला
ङ्गलमपार्श्वे ॥

स्तम्बघ्न । पुं॰ तृणादुन्मूलकखनि
त्रादौ । स्तम्बघने ॥ स्तम्बोहन्यते॰
येन । स्तम्बेकर्त्तरिक॰ ॥ नीवारा
दिग्रहणार्थं लाङ्गलमपार्श्वे ॥

स्तम्बपू । स्त्री॰ पुरीभेदे । तामलि
प्ते । दिग्विजयटीके । तमोलुप्त॰ शू॰
भा॰ प्र॰ दे़शि ॥

स्तम्बहननम् । } न॰ स्तम्बघ्ने ॥
स्तम्बहननी । } स्त्री॰

स्तम्बेरम । पु॰ दन्तिनि । दन्ताव
ले । कुभे । स्तम्बेरमते । रमु॰ । स्त
म्बकर्णयोरमिजपोरित्यच् । हस्ति
सूचकयोरितिवक्तव्यम् । अन्यत्र
स्तम्बेरन्ता । ततपुरुषेकृतीति॰
हलदन्तादितिमलुक् ॥

स्तम्भ: । पु॰ स्थूणायाम् । थम्भ॰
भा॰ ॥ जडत्वे । अङ्गजाड्ये ॥ स्त
म्भाति । स्तम्भुस्तुम्भुस्कम्भ । घञाद्यच्
भाविघञ्ज ॥ गतिनिरोधे । नि
ष्पृतिभत्तायाम् ॥ गर्वे ।

स्तम्भकार॰ । पु॰ वेष्टने । त्रि॰ स्थूणा
कारके ॥ जाड्यकारके ॥

स्तम्भन । पुं॰ कामबाणविशेषे । यथा । उन्मादनः शोषणश्च तापनः स्तम्भनस्तथा । सम्मोहनश्च पञ्चैते विख्याताः कामसायकाः ॥ न॰ मरणमोहनादिरोधने । अभिचारकर्म्मविशेषे । प्रवृत्तिरोधे । यथा । प्रवृत्तिरोधः सर्व्वेषां स्तम्भनं समुदाहृतमिति ॥

स्तम्भित : । त्रि॰ स्पन्दरहिते । जडीभूते ॥ स्तम्भ॰ स्तम्भोऽस्य । इतच् ॥ जडीकृते ॥

स्तरिमा । पु॰ तल्पे । शय्यायाम् ॥ स्तृणोति । स्तृ आच्छादने । स्तृ भृमृस्तृ॰ इमनिच् ॥

स्तरी । स्त्री॰ धूमे । स्तृणाति । स्तृञ् आच्छादने । अवितृस्तृतन्त्रिभ्य ईः ॥

स्तव । पुं॰ स्तोत्रे । नुतौ । स्तुतौ ॥ स्तूयतेऽनेन॰ स्तवनं वा । ष्टुञ् स्तुतौ । ऋदोरप् ॥

स्तवक । पुं॰ गुच्छे । पुष्पकलिकादिवृन्दे । पुष्पादिसमूहे ॥ स्तोमे । ग्रन्थपरिच्छेदे ॥ समूहे ॥ स्तूयते । ष्टुञ॰ । कृञादिभ्यो वुन् ॥ यथा । तिष्ठति । द्वा॰ स्तोमकनकाभिरामक॰ तिष्ठतिः स्तादेवक ॥

स्तावक : । पुं॰ स्तवकार्थे ॥

स्तवकपाल । पुं॰ तैल॰पर्णी । वै जयन्॰ वृ॰ भा॰ प्र॰ इ॰ ॥

स्तवेय्य । पुं॰ इन्द्रे ॥ इत्युणादिकोषः ॥

स्तव्य । त्रि॰ स्तुत्ये ॥ सर्व्वैः स्तूयते॰ नस्तोताकश्चित् । स्तोतुमर्हः । अर्हे कृत्यतृचश्चेति यत् ॥

स्ताव । पु॰ स्तवने ॥ प्रस्तावे ॥

स्तावक । त्रि॰ स्तवकर्त्तरि । स्तुतिकारके ॥ स्तौति । ष्टुञ् । ण्वुल् ॥

स्तिभि । पुं॰ समुद्रे ॥ स्तभ्नाति । स्तम्भु॰ । क्रमितमोर्व्यादिनिन् । धातुरूत् । अनुनासिकलोपः ॥

स्तिमित । त्रि॰ अचञ्चले । निश्चले ॥ आर्द्रे । क्लिन्ने ॥ तिम्यति स्म । ष्टिम आर्द्रीभावे । अकर्म्मकत्वात्कर्त्तरि क्तः ॥ स्तिमित॰ आर्द्रंच सौवर्णिकमिति भिषक् । अपक्वे ॥ यथा । यौवनः स्तिमिते दीर्घे यौवने कालमातुरः । तावत्काल सलघुत्वमश्नीयात्सुविरलं तत् ॥

स्तिम्भि । पुं॰ समुद्रे ॥ स्तभ्नाति स्तम्भुरोधने । क्रमितमिमस्तम्भामत इच्चेति॰ इन् ॥ बाधायाम् ॥

स्तीर्व्वि । पुं॰ अध्वर्य्यौ ॥ स्तृणाति । स्तृञ् आच्छादने क्विन् ॥ रुधिरे ॥

स्तुत : । त्रि॰ ईडिते । प्रशं ।

पन्नायिते । वर्धिते । अभिष्टुते ॥ स्तूयतेस्म । इञ् । क्त ॥

स्तुतिः । स्त्री० स्तवे । गुणानां कथने । गुणोत्कर्षप्रतिपादिकायां वाचि ॥ साध्वादिष्वर्थं प्रशस्तार्थे वा वाक्ये । स्तूयतेऽनया । इञ० । स्त्रियां क्तिन् ॥ आदरेण यथा स्तौति धनवन्तं यथेच्छया । तथा चेद्विश्वकर्तारं को न मुच्येत बन्धनात् ॥

स्तुतिपाठकः । पुं० भाट० वू० प्र० सहचरजातौ । बन्दिनि । प्रातर्गेये । राजादेर्यशादौ वीर्यादिना स्तुतिकर्त्तरि ॥ स्तुतेः पाठकः ॥

स्तुतिगन्थः । पुं० भोगावल्याम् । बन्दिपाठे ॥

स्तुतिव्रतः । पुं० स्तुतिपाठके ॥

स्तुत्यः । त्रि० स्तव्ये । स्तवनीये ॥ यथा । प्रत्यर्थिगुरवः स्तुत्याः परोक्षे मित्रबान्धवाः । कर्मान्ते दासभृत्याश्च पुत्रा नैव मृताः स्त्रियः ॥ स्तोतुं योग्यः । इञ० । एति स्तुशास्वृदृजुषः क्यप् इति क्यप् । तुक् ॥

स्तुत्या । स्त्री० विद्रुमलतिकायाम् । सौराष्ट्रमृत्तिकायाम् । तुवर्याम् ॥ टाप् ॥

स्तुनकः । पुं० छागे ॥ स्तु० म० चं० पा ॥

स्तुभः । पुं० छागे ॥ स्तुभ्नोति । स्तुन्

भुरोधने । मूलविभुजादित्वात् क अभितुमशोपीनद्यात ॥

स्तुषेय्य । त्रि० स्तोतव्ये । स्तूयते । इञ० । स्तुवः क्सेय्यश्छन्दसि ॥ छान्दसोऽयम् ॥

स्तूपः । पुं० मृदादिकूटे । राशीकृतमृत्तिकादौ । समुच्छ्राये ॥ स्तौति । इञ० । स्तुवो दीर्घश्चेति पः ॥

स्तेनः । पुं० चौरे । तस्करे । प्रच्छन्नचौरे । प्रच्छन्नवञ्चकास्त्वेते ये स्तेनाटविकादयः इति मनुः । यः परद्रव्यमिति विभिन्नेयानाम परस्वं स्वत्वहेतुमन्तरेणैव स्वत्वमारोपयति स स्तेन इति लोकप्रसिद्धम् ॥ स्तेनयति । स्तेन चौर्ये । पचाद्यच् ॥ परमेयजमातिष्ठतस्तेनानानियपैनृप । स्तेनानां नियपादुग्रवधिराष्ट्रवर्द्धते ॥ न० स्तेये । चौरस्य कर्मभावयोः ॥

स्तेमः । पुं० आर्द्रीभावे । क्लेदने । समुन्दने ॥ स्तिमनम् । स्तिम आर्द्रीभावे । घञ् ॥

स्तेयम् । न० चौरस्य भावः कर्म वा चौर्य्ये । यथा मार्गेण परद्रव्यस्य हरणं ॥ स्तेयलक्षणन्तु । प्रच्छन्नं वा प्रकाशं वा निशायामथवा दिवा । यत्परद्रव्यहरणं स्तेयं तत्परि

स्तौलितम् ॥ अपिच । अन्यायेनप
रस्वग्रहणस्तेयमुच्यते॰ इति ॥
स्तेनस्यभाव कर्म वा । स्तेनाद्यन्न
लोपश्च ॥ महापातकेषु ब्राह्मणस्
वर्णहरणं ॥ निः स्वेपस्त्रापहर
णं नराश्वरजतञ्च । भूमिवज्रमणी
नाञ्चरुक्मस्तेयसमंस्मृतम् ॥

स्तेयफल । पुं॰ कण्टकवृक्षे । तेज
फले ॥

स्तेयी । पुं॰ चौरे ॥ स्वर्णकारे ॥ स्ते
यमस्त्यस्य । अतइनि ॥

स्तैनम् । न॰ स्तेये ॥

स्तैन्य । पुं॰ चौरे ॥ न॰ स्तेनस्यभा
वे॰ कर्मणि च । चौर्य्ये ॥ स्तेनस्य
भाव कर्म वा । स्तेनाद्यन्नलोपश्चेत्य
च॰ स्तेनादिति योगविभागात् ष्यञ् ॥

स्तैमित्यम् । न॰ जडतायाम् ॥ श
रीरस्यार्द्रचर्मावगुण्ठितत्वमितिवै
द्या ॥

स्तोक । पुं॰ चातके ॥ त्रि॰ अल्पे ॥
स्तुच्यते । ष्टुचप्रसादे । घञ् । न्यङ्
क्वादित्वात् कुत्वम् ॥ स्तूयतेवा ।
बाहुलकात्तन् क ॥

स्तोकक । पुं॰ चातके । स्तोकक
जलमस्य ॥ स्तोकमायतिवा । कै
शब्दे । आतोऽनुपसर्गे क ॥

स्तोतव्य । त्रि॰ स्तवनीये । स्तुत्ये ॥

स्तोता । त्रि॰ स्तवकर्त्तरि ॥ स्तौति
ष्टुञ् । तृच् ॥

स्तोत्रम् । न॰ स्तवे ॥ स्तूयतेऽनेन
ष्टुञ् । दाम्नीतिकरणे ष्ट्रन् । ति
तुचेतिनेट् ॥ प्रगीतमन्त्रसाध्यायां
स्तुतौ । उद्गात्रादिनागीयमाने ऋ
ग्जाले । प्रगीतमन्त्रसाध्यगुणिनि
ष्ठगुणाभिधानंस्तोत्रमितियाज्ञिकानां
व्यवहार ॥

स्तोभ । पुं॰ न॰ अर्थशून्यवर्णे ॥
स्तोभ । आत्मानंविच्छेदेहेलनेस्त
मनेऽपिचेति हेमचन्द्रः । साङ्ग्य
पारिप्लव्य वा स्तोभं हेलनमेव वा । वे
कुण्ठनामग्रहणमशेषाघहरं विदुरि
त्यत्र॰ स्तोभं गीतालापपूरणार्थं क्ष
तमिति श्रीधर स्वामिन ॥

स्तोभित । त्रि॰ प्रोत्साहिते ॥

स्तोम । पुं॰ समूहे । यज्ञे । की
र्त्ते ॥ स्तूयतेऽनेन । ष्टुञ् । अ
र्त्तिस्तुसुतिमन् ॥ सोमयागेष्ठ दे
गे क्रियमाणायां पृष्ठादिसम्बन्धा
या स्तुतौ ॥ मन्त्रसमूहे ॥

स्तोमहारः । पुं॰ सर्पहारे ॥

स्तौमवल्ली । स्त्री॰ काण्डीरे । ना
सासवेदने । काण्डवेल॰ इ॰
गौ॰ भा॰ प्र॰ लताप्रभेदे ॥

स्तौपिकम् । न॰ बुद्धद्रव्ये । चोचा॰
इ॰ भा॰ प्र॰ ॥

स्त्यानम् । न॰ स्निग्धे ॥ प्रतिध्वनौ
॥ घनत्वे ॥ आलस्ये ॥ स्त्यैष्ठ्यै
शब्दसङ्घातयोः । क्तः ॥ अकर्म

च्युतायाम् । गुरुणाभिद्यमाणस्त्र्यासनादिकर्मनिवृत्तायामितिभावत ॥ निश्चये ॥

स्त्येन । पु० चौरे ॥ अमृते । सुधायाम् । स्त्यायति । स्त्यै० । श्या । स्त्याहनश्यिभ्यश्च ॥

स्त्री० । स्त्री० स्तनकेशवत्याम् । अस्या पर्यायायथा । स्त्रीयोषिदबलायोषानारीसीमन्तिनी-वधू । प्रतीपदर्शिनीवामावनितामहिलातथेति ॥ स्त्यायतिगर्भोऽस्याम् । स्त्यै० । स्त्यायतेर्ड्रट् । टिलोप । यलोप । टिड्ढेतिङीप ॥ वृषककर्कन्याद्विस्मकरमीनराशिषु ॥ अस्थूकाय भेदे ॥ गौस्त्री । यथा । शोपस्त्रीभि । कृष्णोरेमे ॥ देवतिर्यङ्मनुष्येषुपुन्नामाभगवान्हरि० । स्त्रीनाम्नीलक्ष्मीमैत्रेयनानयोर्विद्यतेपरमितिविष्णुपुराणम् ॥ प्रसनार्थमहाभागा पूजार्हाश्चदीप्तय । स्त्रिय श्रियश्चगेहेषु नविशेषोऽस्तिकश्चन ॥

स्त्रीकरणम । न० रतबन्धे ॥

स्त्रीगवी । स्त्री० धेनौ ॥

स्त्रीचित्तहारी । पु० शिवी ॥ त्रि० नारीमनोहारिणि ॥

स्त्रीचिह्नम् । न० भगे । योनौ ॥ स्त्रीणामवाच्यदेशस्तनिम्ननाभीवलक्ष्य । अभेदेपिमनोभेदात्मन : प्राये

णवजस्यते । असम्पूर्णखण्डद्विधाभिन्नमपाङ्गाद्धारधूपितम् । येरमन्तेनमस्तेभ्य साहसकिमतःपरम् ॥ नारीलक्षणे ॥ स्त्रियाश्चिह्नम्

स्त्रीचेष्टितम् । द० स्त्रीणाव्यवहारे ॥ नासाध्यातिविषमचेष्टितत्वसुमा यथा । अरण्येणवेणीविनिगूहितेनविदूरथमहिषीजघान । विषप्रदिग्धेनचनपुरेणदेवीविरक्ताकिलकाशिराजमिति । तस्याश्चरित्रन्तुब्रह्मवैवर्तप्रकृतिखण्डे १४ ऽध्याये द्रष्टव्यम् ॥

स्त्रीचौर । पु० कामुके । लम्पटे ॥ त्रि० योषिद्धर्षरि ॥ स्त्रिया चौर ॥

स्त्रीजित । पु० स्त्रैणे । स्त्रीवशीभूते ॥ वस्तुगत्यास्त्रीजितोयोनिन्दित सर्वथैवहि । यथा । सनिन्दितश्चाप्यशुचि पुमांश्चस्त्रियाजित । निन्दन्तिपितरोदेवाबान्धवा । स्त्रीजितनरम ॥ स्त्रीजितमनसामातापितमाताचनिन्दतीति ॥ अपिच । अशुध्येद्विप्रोदशाहेनजातकेमृतकेयथा । भूमिपोद्वादशाहेनवैश्य पञ्चदशाहत । शूद्रोमासेनवेदेषुमातृवद्धीनसङ्कर । अशुचि स्त्रीजित अशुध्येद्विताहनकालत ॥ नगृह्णन्तीच्छयातस्य पितर पिण्डतर्पणम् । नगृह्ण

न्तिचटैवास्वतश्च पुष्पजलादिकम् ॥ स्नानेनैव किं तपसा जपहोमप्रपूजनैः । विधवा चैवधर्म्मशास्त्रोभिर्यस्य मनो हृतमिति श्रीदेवीभागवते तुलस्युपाख्यानम् ॥ तत्रस्वर्ग्गोपि निषिद्धः । यथा । स्त्रीजितस्य च मात्र पालसर्वं पुण्यं प्रणश्यति । नमूनीपातकी पापात् पापिनां स्त्रीजितात परः ॥ इति । स्त्रियाजित ॥

स्त्रीधनम् । न । स्त्रीस्वास्यदीमूलधने । यस्मिन् धने पतिनिरपेक्षतया स्त्रिया अधिकारस्तत्तम् ॥ तद्विधा । पितृमातृसुतभ्रातृदत्तमध्यग्न्युपागतम् । आधिवेदनिकं बन्धुदत्तं शुल्कान्वाधेयकमिति ॥ मनुश्च । अध्यग्न्यध्यावाहनिकं दत्तञ्च प्रीतिकर्म्मणि । भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम् ॥ नारदोपि । अध्यग्न्यध्यावाहनिकं भर्त्तृदायस्तथैव च । भ्रातृदत्तं पितृभ्याञ्च षड्विधं स्त्रीधनं स्मृतम् ॥ याज्ञवल्क्य । पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम् । आधिवेदनिकाद्यञ्च स्त्रीधनं परिकीर्त्तितम् ॥ तदेव मन्वादिसम्मतषट्कस्त्रीधनकीर्त्तनात् षट्त्वसङ्ख्याविवक्षिता । किन्तु स्त्रीधनकीर्त्तनमात्रपराणि मुनिवचनानि । तदेव स्त्रीधनं यत्र दत्तं स्वातन्त्र्येण दान विक्रय भोगान् कर्त्तुमधिकरोति । तदिदं किञ्चित् षड्विधाद्यन्यदाय-न । प्राप्तं शिल्पैस्तु यद्वित्तं प्रीत्या चैव यदन्यतः । भर्त्तुः स्वाम्यमेवैतच्छेषं तु स्त्रीधनं स्मृतम् । अन्यतश्चेति । पितृमातृभर्त्तृकुलव्यतिरिक्तात् । यल्लब्धम् । शिल्पेन वा यदर्जितम् । तद्भर्त्तुः स्वाम्यम् । स्वातन्त्र्यम् । अनापद्यपि भर्त्ता ग्रहीतुमर्हति । तेन । स्त्रिया अपि धनमस्त्रीधनमस्वातन्त्र्यात् । एतद्व्यतिरिक्तधनन्तु । स्त्रिया एव । दानाद्यधिकारात् ॥ कुलार्णवस्थे तौ श्रीमहानिर्वाणे श्रीसदाशिव । पितृभिः । श्वशुरैर्वापि दत्तं यद्धर्म्मसम्मतम् । स्वशक्त्योपार्ज्जितं यच्च स्त्रीधनं तत् प्रकीर्त्तितमिति ॥ स्त्रियाः । धनम् ॥ न भर्त्ता नैव च सुतो न पिता भ्रातरो न च । आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णव इति दायभाग । प्रभविष्णवः । प्रभवः ॥

स्त्रीधर्म्म । पुं । ऋतौ । पुष्पे । आर्त्तवे । रजसि ॥ स्त्रीणामनुष्ठेये ॥ तत्र मनुः । बालया वा युवत्या वा वृद्धया वापि योषिता । न स्वातन्त्र्येण कर्त्तव्यं किञ्चित् कार्य्यं गृहेष्वपि ॥ बाल्ये पितुर्वशे तिष्ठेत् पाणिग्राहस्य यौवने । पुत्राणां भर्त्तरि प्रेते न भजेत्

स्त्रीस्वतन्त्रताम् ॥ पित्रा भर्त्रा सुतैर्वापि नेच्छेद्विरहमात्मनः । एषां हि विरहेण स्त्री गर्ह्ये कुर्यादुभे कुले ॥ सदा प्रहृष्टया भाव्यं गृहकार्य्येषु दक्षया । सुसंस्कृतोपस्करया व्यये चामुक्तहस्तया ॥ यस्मै दद्यात् पिता त्वेनां भ्राता वानुमते पितुः । तं शुश्रूषेत जीवन्तं संस्थितञ्च न लङ्घयेत् ॥ मङ्गलार्थं स्वस्त्ययनं यज्ञश्चासां प्रजापतेः । प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारणम् ॥ अनृतावृतुकाले च मन्त्रसंस्कारकृत् पतिः । सुखस्य नित्यं दातेह परलोके च योषितः ॥ विशीलः कामवृत्तो वा गुणैर्वा परिवर्ज्जितः । उपचर्य्यः स्त्रिया साध्व्या सततं देववत् पतिः ॥ नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषितम् । पतिं शुश्रूषते येन तेन स्वर्गे महीयते ॥ पाणिग्राहस्य साध्वी स्त्री जीवतो वा मृतस्य वा । पतिलोकमभीप्सन्ती नाचरेत् किञ्चिदप्रियम् ॥ कामन्तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः । न तु नामापि गृह्णीयात् पत्यौ प्रेते परस्य तु ॥ आसीतामरणात् क्षान्ता नियता ब्रह्मचारिणी । यो धर्म्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम् ॥ अनेकानि सहस्राणि कुमारब्रह्मचारिणाम् । दिवङ्गतानि विप्राणामकृत्वा कुलसन्ततिम् ॥ मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्य्ये व्यवस्थिता । स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः ॥ अपत्यलोभाद्या तु स्त्री भर्त्तारमतिवर्त्तते । सेह निन्दामवाप्नोति पतिलोकाच्च हीयते ॥ नान्योत्पन्ना प्रजास्तीह न चाप्यन्यपरिग्रहे । न द्वितीयश्च साध्वीनां क्वचिद्भर्त्तोपदिश्यते ॥ पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते । निन्द्यैव सा भवेल्लोके परपूर्व्वेति चोच्यते ॥ व्यभिचारात्तु भर्त्तुः स्त्री लोके प्राप्नोति निन्द्यताम् । शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते ॥ पतिं या नाभिचरति मनोवाग्देहसंयता । सा भर्त्तृलोकमाप्नोति सद्भिः साध्वीति चोच्यते ॥ अनेन नारीवृत्तेन मनोवाग्देहसंयता । इहाग्र्यां कीर्त्तिमाप्नोति पतिलोकं परत्र च ॥ इति मानवे धर्म्मशास्त्रे ऽध्यायः ॥

स्त्रीधर्म्मिणी । स्त्री॰ ऋतुमत्याम् ॥ स्त्रीधर्म्मो रजोऽस्त्यस्याः । अत इनिठनाविति । ङीप् ॥

स्त्रीधवः । पुं॰ पुरुषे ॥

स्त्रीपरः । पुं॰ कामुके । षिड्गे ॥

स्त्रीपण्योपजीवी । पुं॰ सम्भोगार्थमन्यस्मै स्त्रियं दत्त्वा तद्वेतनोपजीविनि ॥

स्त्रीपुंसौ । पुं॰ मिथुने । द्वन्द्वे ॥ स्त्री च पुमांश्च । अचतुरेत्यच् ॥

स्त्रीपुंसलक्षणा । स्त्री॰ पेटायाम् ॥

स्त्रीय सर्वाणि चाप चिह्नलनश्चग्ना लिकयश्यामसा ॥

स्त्रीपुंधर्म्मः । पुं० स्त्रीपुंसयोर्द्धर्म्मः । स च मानवे नवमाध्याये द्रष्टव्यः ॥

स्त्रीपूर्व्वः । पुं० स्त्रीजितः ॥

स्त्रीप्रमाणः । पुं० कुटुम्बिनि ॥ स्त्रीप्रमाणोऽस्य । अप्पूरणीप्रमाण्योरित्यप् ॥

स्त्रीप्रशंसा । स्त्री० नारीश्लाघायाम् । सा यथा । जयेधरित्र्याः पुरमेव सारं पुरे गृहं सद्मनि चैकदेशः तत्रापि शय्या शयने वरस्त्री रत्नोज्ज्वला राज्यसुखस्य सारम् ॥ रत्नं निविभूषयति योषा भूष्यन्ते वनिता न रत्नकान्त्या । योषा तेऽवनिता हरत्यरत्ना नो रत्नानि विनाङ्गनाङ्गसङ्गम् ॥ आकारं विनिगृह्णतारिपुबलजेतुः समुत्सिष्टतां तन्त्रचिन्तयतां कृतप्रतव्यापारशाखाकुलम् । मन्त्रिप्रोक्तनिषेविणां च्छिन्नभुजामाश्रङ्किनां सर्व्वतो दुःखान्नो निधियति नामसुखलवः कान्ता समालिङ्गनम् ॥ श्रुतदृष्टस्पृष्टस्मृतमपि नृणां ह्लादजननम् न रत्नं स्त्रीभ्योऽन्यत् क्वचिदपि कृतं लोकपतिना । तदर्थं धर्म्मार्थौ सुतविषयसौख्यानि च ततो गृहे लक्ष्म्यो मान्याः सततममवलामानविभवैः ॥ येऽप्यङ्गना

नां प्रवदन्ति दोषान् वैराग्यमार्गेण गुणान् विहाय । ते दुर्ज्जना मे मनसो वितर्कः सद्भाववाक्यानि न तानि तेषाम् ॥ प्रब्रूत सत्यं कतरोऽङ्गनानां दोषोऽस्ति यो नाचरितो मनुष्यैः । धार्ष्ट्येन पुम्भिः प्रमदा निरस्ता गुणाधिकास्ता मनुनात्र प्रोक्तम् ॥ सोमस्तासामदाच्छौचं गन्धर्व्वः शिक्षितां गिरम् । अग्निश्च सर्व्वभक्षत्वं तस्मान्निष्कसमाः स्त्रियः ॥ ब्रह्मणा पादतो मेध्या गावो मेध्याश्च पृष्ठतः अजाश्वा मुखतो मेध्याः स्त्रियो मेध्यास्तु सर्व्वतः ॥ स्त्रियः पवित्रमतुलं नैता दुष्यन्ति कर्हिचित् मासि मासि रजो ह्यासां दुष्कृतान्यपकर्षति ॥ जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः । तानि कृत्याहतानीव विनश्यन्ति समन्ततः ॥ जायायां जनितो वा सम्भवः स्त्रीकृतो नृणाम् । हे कृतघ्नाः स्त्रियो निन्दां कुर्व्वतो वः कुतः शुभम् ॥ दम्पत्योर्व्युत्क्रमे दोषः समः शास्त्रे प्रतिष्ठितः । नरा न तमवेक्षन्ते तेनात्र वरमङ्गनाः ॥ बहिर्लोमा तु षण्मासान् वेष्टितः खरचर्म्मणा । दारातिक्रमणे भिक्षां देहीत्युक्त्वा विशुध्यति ॥ न शतेनापि वर्षाणामपैति मदनाशयः । तदाभावाद्या निवृत्तं नराधैर्य्यैर्योषित ॥

अद्याधाष्टिमसाधूनांनिन्दतामनघ।
शिव । मुख्यत्वमिदमीरितानि
त्वयोरितिजप्यताम ॥ पुरुवट्
लानिक्तामिनीनांकुरुतेयानिरद्दीन
तानिपश्चात् । सुक्तनव्रतयाङ्गना
गतासू नवगुणप्रविमन्तिसमजिह्व
म ॥ स्त्रीरत्नमेगीतिमरव यद्यनि
स्त्रीपसमप्रध्यनीश्वरोसी। राज्य
स्सारोऽयमनङ्गनाखदद्यानलो
द्दीपनवानवृत्तिम ॥ कामिनीप्रय
मयौवनान्वितामन्दवल्गुमृदुपोक्ति
तखनाम् । उत्सवीसमवलम्ब्य
यारति सानधाहभुवनेऽस्तिमेम
ति । तवदेवमुनिषिद्धचारचै
र्मान्यमाद्यपिवसेव्यसेवनात् । व्र
तथातृभवमेस्तिकिसुत्तयद्दव , स
मवलम्व्यनखिवम् ॥ चात्रमको
टान्तसिद्धिनिवद्धपुस्त्रीप्रयोगेवज
गत्समस्तम् । क्रीडानकायमवतुर्मुख
त्वमीश्वापलोभाङ्गमिवोयुवत्या ॥
बृहन्नारायणीसंहितायाम् ७१ अध्या
ये ॥

स्त्रीप्रिय । पु॰ घटपदातिथौ ॥ चा
मकरे ॥

स्त्रीमुखप । पु॰ दोहदे ॥

स्त्रीयाचा । स्त्री॰ योषित्प्रयाचे ॥
यथा । कुलीरकन्याघटसंस्थितेरवौ
सितप्रवारेप्रथमाभयोत्तराम् । वि
चायचाचानितासुयच्छतेविप्रिषु वि
शेषोऽन्यदपिसमुक्तम् ॥ प्रथमाप्र
तिपत् । उत्तरा॰ उत्तरायनम् ॥

स्त्रीरोग पु॰ नारीणामामये ॥

स्त्रीसंज्ञा । स्त्री॰ पिपीलिकायाम् ॥

स्त्रीसभम् । न॰ योषितासमूहे ॥
स्त्रीणांसभास्त्रीसभामितिनपुंसकत्व
म् ॥

स्त्रीस्वभाव । पु॰ मण्डके । सौ
विदल्ले ॥ योषितांगीत्ये ॥ यथा ।
एषाहिप्रकृतिस्त्रीणामाहृष्टेरघुन
न्दन । समस्थमनुरज्यन्तिविषमस्थ
त्यजन्तिच ॥ शतह्रदानांलोलत्वं
शस्त्राणांतीक्ष्णतांतथा । गरुडानि
लयोः शैघ्र्यमनुगच्छन्तियोषित ॥
ब्रह्मवैवर्त्ते ब्रह्मखण्डे यथा । हृ
दयंक्षुरधाराभंशरत्पद्मोत्समंमुख
म् । सुधासमसुमधुरवचन
स्वार्थसिद्धये ॥ प्रकोपेविषतु
ल्यंतदनुनयोगकुत्सितम । दु
र्ज्ञेयंतद्भिप्रायंनिगूढकर्मवेशल
म् ॥ तदातासांमविनयप्रवलसोष
सवरम् । इदोकार्यव्यथालृका
र्यंशुश्रूषायादुरत्यया ॥ पुंसश्चाष्ट
गुणंकाम शस्त्रकोमोऽगद्गु
रो । आहारोद्विगुणोनित्यंनैष्ठुर्यं
चचतुर्गुणम् ॥ कोप पुंस . ष
ड्गुणंव्यवसायंनिश्चितम् ।
सर्वमेदोषनिवहा व्याख्यातमपि

तामव ॥ काक्रीडार्किंमुखपुंसी विधम् नाश्रयवेश्मनि । वेज. प्रष्ट सम्योगेदिशालापेवष : खय ॥ भनषयस्त्वतिप्रीतोस्या सक्तीचप् खय । साहित्येपीतस्य नष्ट ब्बसे मानवाचनम् ॥ सर्वनामस्व विस्ता सैवस्नानूनारीशुर्किंमुखम् ॥ यावज नीचतिजलोसमीकोयेग्यतापर । पुमान्नारीभागोत्सर्ग समर्थस्तावदे वहि ॥ रेतिगिष निर्गुण स्तद्वयो विलापितीप्रियम् । सो आाच.रत यातस्मैदृहत्याचारमस्पकमिति ॥

स्वेण : । त्रि० स्त्रीसम्बन्धिनि ॥ स्त्रि याश्रयम्० स्त्रोप्रभव० स्त्रोभिवर ति० स्त्रोभ्योहितोवा । स्त्रोपुंसा भ्यांनञ् सञाविति नञ् ॥ स्त्रिया म्० स्त्रेणी ॥

स्त्यागारम् । न० स्त्रोघारहे ॥

स्थ. । पु० स्थसि ॥ तिष्ठत्यस्मिन् । ष्ठा० । घञर्थेक ॥

स्थग' । त्रि० धूर्त ॥

स्थगनम् । न० अपिधाने । चन्तर्धौ ।

स्थगित । त्रि० आच्छादिते । स वी ते । कदुवे । स्तब्धे ॥

स्थगितगी । त्रि० लव्धवाचि ॥

स्थगी । स्त्री० ताम्बूलपात्रविशेषे । ताम्बूलकरङ्क । पानवट्टा० दू० भाषा० प्रसिद्ध ॥

स्थगितम् । न० स्थलसोमनि । च स्वरे ॥

स्थगिलशायी त्रि० चत्वरशायिनि ॥

स्थगी ० शिते । शीङ् शयने । ब्र ते० इति णि नि

स्थगु । न० । ठो ॥

स्थण्डिलम् । न० चत्वरे । यज्ञे । अजिरे । अग्निस्योन्नतायांपरिष्कृतायांभूमौ ॥ यज्ञार्थं परिष्कृतायांभुवि ॥ यज्ञे परिष्कृतस्यांनिघ्नतांस्थ ण्डिलचत्वरे । इतिशब्दरत्नावली ॥ होमनिमित्ताऽग्निस्थापनार्थं परिमितभूमौ । यथा । रम्ये परिष्कृते देशेतुषाङ्गारादिवर्जिते । इस्तमा त्रप्रमाणेनस्थण्डिलं रचयेत्सुधीरि तिमत्स्यनिर्वाणतन्त्रम् ॥ वभित्स्तत्रस्थितायामपि । तस्मात्सम्यक्परीक्ष्ये वक्तव्यं शुभवेदिकम् । इस्तमात्रं स्थण्डिलं वालुकाभिर्मिश्रितमकर्मकोत्ति ॥ क्रियायोगसारेपि । कुण्डमे वविधं तस्मात्स्थण्डिलं वासमाश्रये दिति । शारदातिलकेपि । नित्य नैमित्तिकंकाम्यंस्थण्डिलेवासमाच रेत् । इस्तमात्रन्तुतत्कुर्याच्चतुरस्रं समन्ततइति ॥ कीर्त्तावाघ्रभूमौ ॥ स्थलन्त्यस्मिन् । स्थलस्थाने । ति ष्ठन्त्यस्मिन्निति वा । ष्ठा० । मिथि लाद्यस्वेतिसाधु ॥

स्थण्डिलशायी । पु० स्थाण्डिले ॥ य स्थण्डिलेवतवशाच्छेतेस्थण्डिल

शाय्यसौ । स्थण्डिले कुशाद्यास्तीर्य
शेते । ब्रते० णिनि ॥
स्थण्डिलसितकम् । न० वेद्याम् ॥
इ० हा० ली ॥
स्थण्डिलेशय । पुं० स्थाण्डिले ।
ब्रतेन स्थण्डिले शेते । शीङ्० अधि
करणे शेतेरित्यच् । अलुक् ॥
स्थपति । पु० बृहस्पतौ । बृहस्पति
सवकर्त्तरि । जीवेष्टियाजके । ग
ीष्पतीष्ट्या स्थपतिरित्यमर । स
यज्येतिसम्बन्ध ॥ कुबेरे । कञ्चु
किनि । सौविदे । यज्वनि ॥ का
रुभेदे । शिल्पिविशेषे । राज० था
बौ० बू० भा० प्र० ॥ तल्लक्षणं य
था । वास्तुविद्याविधानज्ञो लघुह
स्तोजितश्रम । दीर्घदर्शी च शूरश्च
स्थपति परिकीर्त्तित इति ।
स्थानस्थ । सुपिस्थ इत्यत्र० स्थ
इतियोगविभागात्क । स्थप
ति । यहा । तिष्ठन्त्यस्मिन् ।
ष्ठा० । घञर्थे क । स्थासौपति
स ॥ त्रि० अससमे ।
स्थपुट । त्रि० विषमोन्नते ॥ विष
मसञ्चारजीविनि ॥
स्थलम् । न० जलशून्याकृत्रिमभूभा
गे । स्थल्याम् ॥ स्थलति । स्थल०
। पचाद्यच ॥ वस्त्रगृहे ।
स्थलकन्द । पु० वन्यास्यकन्द । बन
ओलइतिभाषाप्र० ॥

स्थलकमलम् । न० स्थलपद्मे ॥
स्थलकुमुद । पु० करवीरे ॥ शु०
रा० वट ॥
स्थलपद्म । पुं० मानके । मान
कच्० श० भा० । न० पुष्प
प्रभेदे । छत्रपत्रे । तमालके ॥ प्र
पौण्डरीके ॥ स्थलपद्मं साधुपुष्प
इष्टिकन्तु पुण्डरीयकमितिरभस ॥
स्थलपद्मिनी । स्त्री० स्थलपद्मे ॥
स्थलपाकजम् । न० पक्वमांसविशेषे
॥ यथा स्थलेन पक्वायन्मांसतज
र्त्तं य स्थलपाकजम् ॥
स्थलमञ्जरी । स्त्री० अपामार्गे ॥
स्थलविहङ्गम । पु० मयूरादौ ॥
स्थलश्च विहङ्गम ॥
स्थलशृङ्गाट ।) पु० गोक्षुरे ।
स्थलशृङ्गाटक ।)
स्थलसीमा । पु० स्थण्डिले ॥
स्थला । स्त्री० पुरुषेणासंस्कृतायां
भूमौ । स्थलति । स्थल० । प
चाद्यच् । टाप ॥
स्थली । स्त्री० अकृत्रिमायाम्भूमौ
॥ जानपदेत्यादिनीष् ॥
स्थलेरुहा । स्त्री० घृतकुमार्याम् ।
दग्धायाञ्च । त्रि० स्थलजाते ।
स्थले रोहति । रुह० । इगुपधेति
क । तत्पुरुषेकृतीत्यलुक् ॥
स्थलेशय । पु० मृगादौ ॥ स्थ
लेशेते । अधिकरणे शेतेरित्यचो

ऽस्य । अथवासीत्यलुक् । त्रि० स्थमाश्रयिनि ॥

स्थवि । पुं० स्थावरे । तन्तुवाये । तिष्ठति । ष्ठा० । कृविघृष्विच्छविस्थविकीकिदिविभ्यः किन् । निपातनात्सत्वम् । नाके । स्वर्गे ॥

स्थविर । पुं० । ब्रह्मणि । वृद्धे ॥ न० शैलेये । अश्मपुष्पे ॥ त्रि० वृद्धे । यथा । नतेन वृद्धो भवति येनास्य पलितं शिरः । यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुरिति मनुः । अचली । तिष्ठति । ष्ठा० । अजिरशिशिरेति किरच् । तिष्ठतेर्वुक् । ह्रस्वश्च ।

स्थविरा । स्त्री० वृद्धायाम् । महाश्रावण्याम् ॥

स्थविष्ठ । त्रि० अतिस्थूले । स्थूलतमे । अयमेषामतिशयेन स्थूलः । स्थूलदूरेतीष्ठन् साधुः ॥ वैराजरूपे स्थविष्ठे भगवद्रूपे ॥

स्थवीयान् । त्रि० स्थूलतरे । अयमनयोरतिशयेन स्थूलः । ईयसुन् । स्थूलदूरेत्यादिना यणादिलोपो गुणश्च ॥

स्थाणु । पुं० शम्भौ । शिवे । प्रलयेऽपि तिष्ठति एकरूपेण । ष्ठा० । स्थो णुरिति णुप्रत्ययः । स्थितौ सानि पृथिव्यादीनि तिष्ठन्त्यस्मिन्निति वा । कीले । गन्धद्रव्यविशेषे । जीवके । पुं० न० शाखापत्रादिरहिततरौ । ध्रुवे । शङ्कौ । त्रि० स्थैर्यान्विते । स्थिरे । अविचारिणि । सदैकरूपे ॥

स्थाणुप्रिया । स्त्री० कुरबकवर्णिन्यामम्लायाम् ॥

स्थाणुवटतीर्थम् । न० तीर्थविशेषे ॥

स्थाणुतीर्थम् । न० तीर्थविशेषे । स्थाणोः शिवस्य लिङ्गेनोपलक्षितं तीर्थम् । स्थाणुतीर्थम् ॥ स्थाणोः स्थाणुरूपस्य ॥

स्थण्डिल । पुं० स्थण्डिलशायिनि । स्थण्डिले चत्वरे शयितुं नियमोऽस्य । स्थण्डिलाच्छयितरि व्रते इत्यण् ।

स्थानकम् । न० अलङ्कारादिषु चकितमाकोटादौ यथा स्थानक विश्रमणात कथयामि ते । माकोटमध्ये विनिवेश्य नगरे कठ । सकल विश्वरीमुकुट का वरापीति । इदमलङ्कारे तस्मात् विद्यते तस्या न्तरे० माकोटादिका बूहकल्पितमित्यर्थः ॥

स्थानीया । स्त्री० स्थानीयाभिधा त्यादिश्याम् ॥

स्थानेश्वर । पुं० कुरुक्षेत्रस्थित लिङ्गविशेषे ।

स्थानव्यः । पुं० धान्ये ।

स्थानम् । न० सादृश्ये । अवकाशे ॥

स्थितौ। वसतौ। ग्रन्थसन्धौ। भाज
ने। राज्ञोऽष्टवर्गस्यापचयोपचयाभा
वेन स्थितौ॥ अष्टवर्गस्यापचय
क्षयः। तस्यैवोपचयो वृद्धिः। त
स्यैवोपचयेनाप्यपचयः स्थानम्।
तदुक्तम्। क्षयः स्थानञ्च वृद्धिश्च
त्रिवर्गो नीतिवेदिनाम्। क्षयवृद्धो
रभावेन स्थानमुक्तं मनीषिभिरिति
॥ राज्ञां चिन्तनीयेषु दण्डकोषपुररा
ष्ट्रेषु चतुर्षु॥ तिष्ठत्यनेनेति। स्था +
करणे ल्युट्। तच्च दण्डादेरनेने
ति। दण्डो हस्त्यश्वरथपदातयः।
तेषां पोषणरक्षणादि राज्ञा चिन्तनी
यम्। कोषोऽर्थनिचयः। तस्याय
व्ययादि। पुरस्य रक्षणादि। राष्ट्रं
देशः। तद्वासिमनुष्यपश्वादिरक्षा
रक्षणमन्यादि च राजा चिन्तयेत्॥
मोक्षे॥ तिष्ठत्यस्मिन् न तु कदा
चिच्च्यवते। स्था + अधि ल्यु
ट्॥ च धार्थे॥ गृहे॥ ॥सामा
न्यस्य स्थानमिति मीमांसकाः। त
द्विविधम् पाठसादेश्यमनुष्ठान
सादेश्यञ्च। स्थानक्रमयोरन्यत
रम्। पाठसादेश्यं पुनर्द्वि
विधम्। यथासङ्ख्यपाठः सन्नि
धिपाठश्चेति। तत्रैन्द्राग्नमेकादश
कपालं निर्वपेत्। वैश्वानरं द्वाद
शकपालं निर्वपेदित्येवं क्रमविहि
तेषु। इन्द्राग्नी रोचना दिवेत्यादौ

नां याज्यानुवाक्यामन्त्राणां यथासङ्
ख्यं प्रथमस्य प्रथमं द्वितीयस्य द्वितीय
मित्येवं रूपो विनियोगो यथासङ्
ख्यपाठात्। प्रथमपठितमन्त्रस्यैकं
मध्याकाङ्क्षायां प्रथमतो विहित
कर्म्मैव प्रथममुपतिष्ठते समानदेशत्वा
त्। एवं द्वितीयमन्त्रस्यापि वैकृता
ङ्गानां प्राकृताङ्गानुवादेन विहितानां
सहमपठितानां विकृत्यर्थत्वं सन्नि
धिपाठात्। यथा। आमनहोमाना
म्। तेषां हि मध्याकाङ्क्षायां
सन्निकृष्टविकृत्यपूर्व्वसम्बन्धित्वेन सम्ब
ध्यते। उपस्थितत्वात्। अतस्तेषा
मपि विकृतिसन्निधिपाठादर्थक्यापत्ते
। पशुधर्म्माणामग्नीषोमीयार्थत्वम
नुष्ठानसादेश्यात्। औपवसथ्येऽह्नि।
अग्नीषोमीयः पशुरनुष्ठीयते। तस्मि
न्नेव दिने। तेषां धर्म्माः पठ्यन्ते। अतस्ते
षां धर्म्माणां मध्याकाङ्क्षायामनुष्ठेयत्वे
नोपस्थितपशुपूर्व्वशेषभाव्यत्वेन
सम्बध्यते। तच्च स्थानं समाख्यात
प्रबलम्। अत एव शुन्धध्वमन्त्रः सा
न्नाय्यपात्रम्। पाठसादेश्यात्।
न तु पौरोडाशिकमिति समाख्यया पु
रोडाशपात्रमिति॥ सम्बन्धविशि
ष्टे पदमिति मीमांसकप्रसिद्धे। यथा
यथा। पितृस्थानीयः। पितुः स्था
नमस्येति बहुव्रीहिः॥ स्थीयतेऽ
त्र। स्था + अधिकरणभावेष्वाल्युट्

। तिष्ठन्त्यस्मिन्नन्व्वाङ्कृतिव्युत्पत्त्या क्वचित्स्थानशब्दोऽर्थवाची । नि कटे । स्वधर्मानुष्ठायिनामसङ्गम्य वर्त्तिनाञ्च स्थानविशेषप्राप्तिर्यथा । वर्णानामाश्रमाणाञ्चसम्यग धर्मानु पालिनाम् । असम्यग् वर्त्तिनालो कान् ब्रह्माचक्रे यथाचयत् ॥ प्राजा पत्य ब्राह्मणानास्मृत स्थान क्रिया-वताम् । क्षत्रियाणातथाचैन्द्रं सङ् ग्रामेष्वनुवर्त्तिनाम् । वैश्यानांमा रुत स्थान स्वधर्ममनुवर्त्तिनाम् । गान्धर्वंशूद्रजातीनांपरिचर्यानुका रिणाम ॥ अष्टाशीतिसहस्राणांय तीनामूर्ध्वरेतसाम । स्मृत तेषान्तु यत्स्थान तदेवगुरुवासिनाम् । स प्तर्षीणाञ्चयत्स्थान स्मृत तद्वनौक साम् । प्राजापत्य गृहस्थान गृहध र्मानुवर्त्तिनाम् ॥ न्यासिनान्तुपर स्मृतयोगिनाममृतंस्मृतम् । ए कान्तवासिनांब्रह्मध्यायिनांपरम प दम ॥ तामिस्रमन्धतामिस्रमहा रौरवरौरवम् । असिपत्रवन घोर कालसूत्रमवीचिमत् ॥ वेदनिन्द कानान्तुयज्ञव्याघातकारिणाम् । स्थानमेतत्समाख्यात स्वधर्म्मविनि वर्त्तिनाम् ॥ इतिवह्निपुराणे सर्ग कथननामाध्याय ॥

स्थानचम् । न॰ चालयाणि ॥ नगरे ॥

स्थानचञ्चला । स्त्री॰ वर्वरावर्त्ते ॥

स्थानच्युत । त्रि॰ स्थानभ्रष्ट । यथा । स्थानस्थितस्यपद्मस्यमित्रेवरुण भास्करौ स्थानच्युतस्यताबेवक्षौ दशोषणकारकौ ॥ इतिग॰ पु॰ ॥

स्थानपाल । पु॰ स्थानरक्षके ॥

स्थानभ्रष्ट । त्रि॰ पदच्युते ॥ यथा । स्थानस्थितानि॰ पूज्यन्तेपूज्य न्तेचपदंस्थिता । स्थानभ्रष्टानपू ज्यन्तेकेशादन्तानखानरा ॥ इति गारुडेऽध्याय ११५ ॥

स्थानाध्यक्ष ।) त्रि॰ स्थानरक्षके ॥
स्थानिक ।)

स्थाना । त्रि॰ स्थानविशिष्टे । स्थानी भति ॥

स्थानीयम् । न॰ पुर्याम् । पत्तने । निगमे । नगरे ॥ प्राकारादिनादु र्गीजनविस्तीर्णनगर स्थानीयम । स्थानायहितम् । तस्मैहितमि ति॰ छ ॥ त्रि॰ । तभवे ॥ स्था नसम्बन्धिनि ॥

स्थाने । अ॰ कारणार्थे । हेतौ । यु क्ते ॥ साहश्ये । सास्येस्थानस्यक रणम । स्थानशब्दात्॰ तत्करोती तिणिजन्तादेप्रत्यय ॥

स्थापक । त्रि॰ स्थापनकर्त्तरि ॥ स्था पयति । स्था॰ । णिजन्तात्ण्वुल् ॥

स्थापत्य । पुं॰ राज्ञोऽन्तःपुरगारक्षकौर स्थाधिकृते । सौविदल्ले । कञ्चुकि नि ॥ तिष्ठन्त्युपुरक्षा । घञर्थे

क। ग्रामाद्राणाधिपतिः पालकः। अधिपतिरिति। चतुरर्थादिस्वात् स्वार्थे ष्यञ्॥ न० अधीभावे॥

स्थापनम्। न० रोपणे। निवेशने॥ प्रसवने॥ समाधौ॥ स्थितिहेतुप्रयत्ने॥ स्थापयति। ष्ठा०। ल्युट्॥

स्थापना। स्त्री० स्थापने। निवेशने॥ मनुष्याद्याप्रयत्ने॥

स्थापनी। स्त्री० पाठायामोषधौ॥

स्थापित। त्रि० निक्षिप्ते। न्यस्ते।

स्थाप्य। त्रि० रक्षितधने। न्यस्तधने॥

स्थाम। न० सामर्थ्ये॥ शिष्टधर्मेन। ष्ठा०। सर्वधातुभ्यो मनिन्॥

स्थायी। पु० भावभेदे। रत्यादिभावेषु यथा। रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चाष्टौ स्थायिभावाः प्रकीर्त्तिताः॥ समवेत्य समुद्भूत स्थातुं यश्च तिष्ठते। भाव स्थायीस विज्ञेयोऽभिचारीतरोऽन्यथेति॥ त्रि० स्थिरे। स्थितिमति॥ येऽपि राजा स्वदेशे दुर्गं कृत्वा तिष्ठति स स्थायीत्युच्यते॥ तिष्ठति। ष्ठा०। आच्छादित्वात् णिनिः। चातोयुक् चिण्कृतोरितियुक्॥

स्थायुक। पु० एकग्रामाध्यक्षे॥ स्थानशीलमस्य। ष्ठा०। लषपतपद्स भूवृषेत्युकञ्॥ त्रि० स्थिरे॥

स्थालम्। न० स्वर्णादिनिर्मितभोजनपात्रे। थाल इ० भा० प्र॥ तिष्ठत्यत्र। ष्ठा०। स्थाचतीत्यालच्॥

स्थाली। स्त्री० ओदनादिपचनपात्रे। पिठरे। उखायाम्। कुण्डे। हाण्डी इ० भा० प्र॥ तिष्ठति ष्ठा०। स्थाचतिमृजिरालजालचालञ्। जातेरितिङीष्॥ पाटलावृक्षे॥

स्थालीपाक। पु० भोजनपक्वान्नादौ॥ मासाष्टकाश्राद्धे स्थालीपाकश्च मांसप्रतिनिधित्वे यथा गोभिलः। अपि वा स्थालीपाकं कुर्वीतेति। तद्विधानन्तु। स्थालीपाकं पशुस्थाने कुर्याद्यद्यनुकल्पकम्। श्रपयेत् सवत्सायास्तरुण्या गोः पयस्यनु। इति छन्दोगपरिशिष्टोक्तं ग्राह्यम्। अन्विति• ओदनचरौ पचत्॥

स्थालीपुरीषम्। न० स्थालीमले दग्धान्ने॥

स्थालीपुलाक। पु० न्यायविशेषे॥ यथा। स्थालीस्थतण्डुलाएतेषु कविक्लिन्नभागिन। समकालाग्निसंयोगभागित्वात् प्रतिपन्नवत्। इति स्थालीपुलाकन्यायेन वैदिकलिङ्गत्वाच्च देवतापूर्वमर्थत्वकल्पनात्। प्रतिपन्नत्वस्तमर्दनादिनास्फु

टितत्वेन स्थालीमितमलमासत्वम्॥

स्थालीबिलम् । न० पाकपात्रस्याभ्यन्तरे । तथाख्या शून्यभागे ॥

स्थालीबिलीय ।) स्थालीबिल्य ।) त्रि० पाकयोग्य तण्डुलादौ ॥ स्थालीबिलमर्हति इत्यर्थे स्थालीबिलादित्वात् क्रमेण छयतौ ॥

स्थालीवृक्ष । पु० नन्दीवृक्षे । अश्वत्थभेदे । बेलियापीपर० हू० भा० प्र० ॥

स्थावर । पु० पर्व्वते ॥ न० धनुषि । शीदण्डे ॥ त्रि० जङ्गमेतरे । अचलवस्तुनि ॥ स्थितिशीले ॥ स्थानशील अर्थे भासि लिवरच् ॥

स्थावरगुल्म । पु० एकस्थानस्थितैपहातसमूहे । था० हू० भा० प्र० । स्थावरस्यौगुल्मस ॥

स्थावरादि । न० वत्सनाभविषे ॥

स्थाविरम् । न० वार्द्धक्ये ॥ तत्तु सप्ततिवर्षात्परं भवति । यथा । अष्टौ षड्गाङ्कविद्वालस्तनयस्ततश्च्यते । कत्रात् सप्ततेरूर्द्धं वर्षीयान्नवतेः परमिति स्मृतिः ॥ स्थविरस्य भावः कर्म्म वा । युवादित्वादण् ॥

स्थासक । पु० चार्च्चिक्ये ॥ जलादिवुद्वुदे ॥ वुद्वुदाकारमण्डले ॥ हस्तबिम्ब तत्रनिर्माणम् द्वाया

म् । सौवा० हू० भा० प्र० ॥ तिष्ठति । स्था० । बाहुलकात् उस । स्वार्थे कन् ॥

स्थास्नु । त्रि० स्थिरतरे ॥ स्थानशील । ग्लाजिस्थश्च ग्स्नु ॥ आयिनि ॥ भावले स्नुः ॥

स्थिक । पु० कटिप्रोथे । हू० म० र० सी ॥

स्थित । त्रि० प्रतिज्ञातवति । सप्रतिज्ञे । ऊर्द्ध्वे । निश्चले । स्थिरे । वर्त्तमाने । समुत्थिते ॥ स्था० । क्त । द्यतिस्यतिमास्थामित्तिकारान्तादेश । मर्यादयान्विते । निवृत्तिगतिकोर्योरिप स्थित । प्रोच्यते जन ॥

स्थितधी । त्रि० स्थितप्रज्ञे । स्थिता निश्चला धीर्यस्य ॥

स्थितप्रज्ञ । त्रि० असम्मूढ । परमात्मयाथात्म्यविदुषि ॥ स्थिता प्रतिष्ठिता आत्मानात्मविवेकजा प्रज्ञा यस्य ॥ स्थिता निश्चला० परब्रह्माहमस्मीति प्रज्ञा यस्य वा । अस्य लक्षणं यथा । प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् । आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते इति ॥

स्थिति । स्त्री० अवस्थाने । ऊर्द्धाव स्थाने । मर्य्यादायाम् । न्यायपथ स्थितौ । सस्थायाम । ईश्वरेच्छा निरुद्धस्य सर्व्वलोकस्य सर्गावरेनि योगस्थापने । विद्यमानतायाम् सृष्टिप्रलययोर्मध्ये । सीमनि । स्थानम् । इा० । स्थागापापचोभा वे० क्तिनि । तिष्ठत्यनया । बाहुलकादधिकरणे क्तिन ॥

स्थितिस्थापक । पु० सस्कारविशेषे । अन्यथाकृतस्य पुनस्तदवस्थापादके घटादिपृथिवीवृत्ती ।

स्थिर: । पु० शनैश्चरे । मोक्षे । दे वे । नगे । पर्व्वते । वृक्षे । का र्त्तिकेये । वृषभे । वृषे । वृष सि ह्लचिक्कुम्भराशिषु । न० न त्त्वविशेषेषु । यथा । उत्तरात्रय रोहिण्योभास्करस्तु व स्थिरम् । तत्र स्थिर बीजगेह शान्त्यारामादिसि ध्यतीति ॥ त्रि० कठिने । अच ले । दृढप्रयत्ने । रसाद्यैनचिर कालस्थायिनि शरीरे । तिष्ठति । इा० । अजिरशिशिरशिथिलस्थिर स्फिरस्थविरखदिरा । इति किर च्० टिलोप । षड्भावविकार रहितेसद्वस्तुनि ॥

स्थिरकर्म्मा । त्रि० आफलोदयका रिणि ॥

स्थिरगन्ध: । पु० चम्पके ॥ त्रि० स्थि रस्थायिसौरभयुक्ते । स्थिरोगन्धो यस्मिन् ॥ *

स्थिरगन्धा । स्त्री० पाटलायाम् ॥ के तक्याम ॥

स्थिरचक्र । पु० मञ्जुघोषाभिधेजि नविशेषे । त्रि० सुस्थसैन्ये ॥

स्थिरच्छद । पु० भूर्जपत्रे । स्थि रा छदायस्य ॥

स्थिरच्छाय । पु० देवद्रुमे । स्थिराच ञ्चलाछायायस्य स. । वृक्षमात्रे । छायावृक्षे ॥

स्थिरजिह्व । पु० मत्स्ये ॥

स्थिरजीविका । स्त्री० स्थिरवर्त्ती । शाल्मली । त्रि० स्थिरवृत्तिमति ॥

स्थिरजीविता । स्त्री० शाल्मलिवृक्षे ॥

स्थिरतर । त्रि० स्थाणौ । स्थेयसि । अतिस्थिरे । अतिशयेनस्थिर । द्विवचनविभज्येतितरप् ॥ एकरू पतयातिस्थिरे ।

स्थिरदंष्ट्र पु० भुजङ्गमे । वराहा कृतिविष्णौ । ध्वनाविघ्नजय: ॥

स्थिरदारु । पु० शाकवृक्षे ॥

स्थिरपत्र । पु० हिन्तालै ।

स्थिरपुष्प । पु० चम्पके । बकुले ॥

स्थिरपुष्पी । स्त्री० तिलकद्रुमे ॥

स्थिरफला । स्त्री० कूष्माण्डाम ।

स्थिरबुद्धि । त्रि० स्थिरप्रज्ञे । लब्ध श्रवणमननफले । स्थिरानिश्चला सन्न्यासपूर्व्वकवेदान्तवाक्यविचार

परिपाकेषसत्त्वं सम्यग्ज्ञानस्थैर्यमनि विविचित्तानिश्चितात्मत्वादिबुद्धिर्यस्य ॥

स्थिरमति । स्त्री॰ निश्चलायांबुद्धौ ॥ परमार्थवस्तुविषयायामतौ ॥ त्रि॰ तद्वति ॥ स्थिरापरमार्थवस्तुविषयामतिर्यस्य ॥

स्थिरयोनि । पु॰ द्रुमे ॥

स्थिरयौवन । पु॰ विद्याधरे ॥ त्रि॰ चिरस्थायितरुणावस्थे ॥ स्थिरयौवनमस्य ॥

स्थिररङ्गा । स्त्री॰ नील्याम् ॥

स्थिररागा । स्त्री॰ दारुहरिद्रायाम् ॥

स्थिरश्री । पु॰ विष्णौ ॥ त्रि॰ निश्चलश्रीविशिष्टे ॥ स्थिराश्रीर्यस्मि न्॰ यथवा ॥ स्थिरोपायोधिकृत्य . स्थिरश्रीरेवजायते । यत्तु नैवश्रीतिचपलाचपलाश्रियमिति मत्स्यपुराणम् ॥

स्थिरसाधनक । पु॰ सिन्धुवारवृक्षे ॥

स्थिरसार । पु॰ शाकवृक्षे ॥

स्थिरा । स्त्री॰ भुवि । धरित्र्याम् । विश्वम्भरायाम् ॥ शालपर्ण्याम् ॥ शाल्मलिवृक्षे ॥ तिष्ठति । छा॰ । अजिरशिशिरेत्यादिनाकिरच्॰ टिलोप । टाप् । काकोल्याम ॥

स्थिराङ्घ्रिप । पुं॰ नारिकेलवृक्षे ॥

स्थिरायु । स्त्री॰ शाल्मलिद्रुमे ॥ त्रि रमायुर्यस्याः ॥ चिरस्थायिसदृशा

शिवमैत्रीवतिशाल्मलिरितिवचना त् ॥

स्थूणा । स्त्री॰ गृहस्याधारभूतेस्तम्भे काष्ठमयीलिङ्गर्विकाष्ठूणाभवति । स्थूणौ॰ कृ॰ भा॰ प्र॰ गृहपूर्व . स्थूणामन्दशाले । यथागृहक्षूणमिति ॥ सूर्म्याम् ॥ तिष्ठति । छा॰ । राखासाक्षेतिसाधु ॥ कुणपरे ॥ इतिहेमचन्द्र ॥

स्थूर । पुं॰ मनुष्ये ॥ तिष्ठति । छा॰ । स्थ किच्च स्थूरम् ॥ स्थूलस्थायवृतिमर्जतुयेगपुरस्कारात् स्थिरश्चेत्यर्थ ॥

स्थूरी । पु॰ खरवृषभवत्पृष्ठेभारवाहकोऽश्वे ॥

स्थूल । पु॰ पिराजि । पनसे ॥ न॰ कूटे । समूहे । त्रि॰ निष्प्रभे ॥ जडे ॥ उपचिताववये । पौनी । पीवि । पोवरे । मोटा॰ कृ॰ भा॰ ॥ स्थूलशरीरे । चात्मनउपाधिविशेषे ॥ स्थूलोदेहोऽहमप्रत्ययादात्मेतिलोकायतभेद । तन्न । मृतस्थूलयोरपिसङ्घातविशेषात्मत्वप्रसङ्गात् । एकस्यस्वभूतस्यचेतन्याद्यर्थनात् । सङ्घातस्यावस्तुत्वात् ॥ स्थूलयति । स्थूलपरिवृद्धौ । चुरादर न्त । पचाद्यच् ।

स्थूलक । पुं॰ तृणविशेषे । स्थूल्य

षे । खरच्छदे । उलुखड॰ ष्ट॰ गौ॰ दे॰ भा॰ प्र॰ ॥ त्रि॰ स्थूले ॥

स्थूलकङ्गु । पु॰ वरकधान्ये ॥

स्थूलकणा । स्त्री॰ स्थूलजीरके ॥

स्थूलकण्टक । पु॰ जालवर्बूरे ॥

स्थूलकण्टकिका । स्त्री॰ शाल्मलिवृक्षे ॥

स्थूलकण्टा ।)
स्थूलकण्टिका ।) स्त्री॰ वृहत्याम् ॥

स्थूलकन्द । पु॰ हस्तिकन्दे ॥ शूरणे ॥ मानकन्दे ॥ रक्तलशुने । रक्तशुने ॥

स्थूलकाय । पु॰ स्थूलशरीरे ॥

स्थूलकाष्ठधृक । पु॰ वृहत्काष्ठाग्नौ । स्कन्धानले ॥

स्थूलकाष्ठाग्नि । पु॰ स्कन्धाग्नौ ॥

स्थूलकुण्ड । पु॰ शाणे ॥

स्थूलकेशर । पु॰ सिद्धस्थानविशेषे ॥ स्थूलाख्यात्स्थूलकेशरे॰ ष्ट॰ तिरेवीगोता ॥

स्थूलग्रन्थि । स्त्री॰ वचाप्रभेदे । महाभरा॰ ष्ट॰ भा॰ ॥

स्थूलचञ्चु । पु॰ महाचञ्चुशाके ।

स्थूलचाप । पु॰ तूलपरिष्कारार्थं धनुषि । तूलचापे ॥ ष्ट॰श॰ र॰मा ॥

स्थूलजीरक । पु॰ कृष्णजीरके । उपकुञ्चिकायाम् । कलौञ्जी॰ म॰ गरैला॰ ष्ट॰ भा॰ प्र॰ ॥

स्थूलताल । पु॰ हिन्तालि ॥

स्थूलत्वचा । स्त्री॰ काश्मर्याम् । गम्भार्याम् ।

स्थूलदण्ड । पु॰ देवनले ॥

स्थूलदर्भ । पु॰ मुञ्जे ॥

स्थूलदला । स्त्री॰ घृतकुमार्याम् ॥

स्थूलनाल । पु॰ देवनले ॥

स्थूलनास ।)
स्थूलनासिक ।) पु॰ सूकरे ॥ त्रि॰ पीनमासायुक्ते ॥

स्थूलपट । पु॰ स्थूलशाटके । पटलि । पटगतौ॰ पटविस्तारेवा । पचाद्यच । स्थूलश्चासौपटश्च ॥ त्रि॰ स्थूलवस्त्रवति । यथा । क्षत्रगृहा स्थूलपटायवगौधूमगोभिम । प्रतर्येपिनसौदन्तिवद्दि कन्यानजायते ॥

स्थूलपट्ट । पु॰ कर्पासे ॥

स्थूलपट्टाक । पु॰ स्थूलवस्त्रे ॥

स्थूलपाद । पु॰ हस्तिनि । व्याधिनास्थूलचरणे ॥

स्थूलपुष्प । पु॰ वकवृक्षे ॥

स्थूलपुष्पिका । स्त्री॰ गिरिकापराजितायाम ॥

स्थूलप्रपञ्च । पु॰ विराजि ।

स्थूलफल । पु॰ शाल्मलिवृक्षे ॥

स्थूलफला । स्त्री॰ शणपुष्प्याम् ॥

स्थूलभद्र । पु॰ श्रुतकेवलिनामनि

ऽभेदे ॥

स्थूलभुक् । न० अष्टयुक्तचैतन्ये० विश्वशब्दाभिधेये ॥ स्थूलान्विषयान् भुङ्क्ते । भुज० । क्विप् ॥

स्थूलभूतम् । न० पञ्चीकृताकाशादिभूते अपञ्चीकृतानामेवभूतानांपरस्परव्यवहारप्रोक्तिनिकायव्यवहारनिर्वाहकतदीयधर्माधर्मापेक्षपरमेश्वरसाक्षिद्रष्ट्यादिनिमित्तापेक्षयाविभागेन मिलितानांस्थूलतापत्तौ । पञ्चीकृतभूते ॥

स्थूलमरिचम् । न० कक्कोले ॥

स्थूलमूलम् । न० चोरकमूलके ॥

स्थूललक्ष' । त्रि० बहुदाने ॥ स्थूलैर्महद्भिर्लक्ष्यते । लक्ष० । कर्मणिघञ् ॥

स्थूललक्ष्य । त्रि० दानशौण्डे । बहुप्रदे । बहुदाने ॥ स्थूलकूटबहुधनम् ॥ स्थूलैर्महद्भिर्लक्ष्यतेवा । लक्ष० । कर्मणियत् ॥

स्थूलवर्मकृत् । पु० ब्रह्मयष्ट्याम् ॥

स्थूलवल्कल । पु० रक्तलोध्रे ॥

स्थूलवृत्तफल । पु० मदनवृक्षविशेषे । स्निग्धपिण्डीतके ॥

स्थूलवैदेही । स्त्री० गजपिप्पल्याम ॥

स्थूलशर । पु० मद्दाशरे । सुरपर्णे ॥

स्थूलशरीरम् । न० आत्मनउपाधिविशेषे । अन्नमयकोषे ॥ यथा । स्व

स्वादिपञ्चीकृतभूतसम्भव भोगालयसुखादिकम्मणाम् । शरीरमाद्यन्तवदादिकर्मजं मायामयं स्थूलमुपाधिरात्मन ॥

स्थूलशाटक । पु० स्थूलवस्त्रे । वराशौ ॥ शटति । शटरुजादौ वलच् । स्थूलश्चासौशाटकश्च ॥

स्थूलशाटका ।)
स्थूलशाटिका)　स्त्री० स्थूलवस्त्रे
स्थूलशाटि ।)

। वराशौ ॥

स्थूलशालि । पुं० महाशालौ । स्थूलतण्डुले ॥

स्थूलशिरा । पु० ऋषिविशेषे ॥ न० बृहन्मस्तके ॥ त्रि० तद्युक्ते ॥ स्थूल शिरोयस्य ' ॥

स्थूलशीर्षिका । स्त्री० क्षुद्रपिप्पलिकायाम् ॥

स्थूलषट्पद । पुं० वरोलि । वोलता० हू० गौ० भा० प्र० ॥

स्थूलस्कन्ध । पुं० लकुचे ॥

स्थूलहस्त । पु० करिशुण्डायाम । हस्तिहस्ते ॥ त्रि० पीनभुजे ।

स्थूला । स्त्री० स्थूलैलायाम् । कृष्णपिपीलिकायाम् । गन्धपत्रायाम । एर्वारौ ॥ गजपिप्पल्याम् ॥ स्थूलमीश्वरप्रायादिकायाम् ॥

स्थूलाशा । स्त्री० गन्धपत्रायाम ॥

स्थूलाम्रः । पु॰ महाराजाम्रे ॥

स्थूलास्य । पु॰ सर्पे ॥ त्रि॰ वृहन्मुखे

स्थूलैरण्ड । पु॰ महैरण्डे ॥ स्थूलैरण्डोगुणाढ्यः स्यात्सवीर्यं विपक्तिषु ॥

स्थूलैला । स्त्री॰ बृहदेलायाम् ॥ अस्यागुणायथा । स्थूलैलाकटुका पाकेरसेचानलकृल्लघु । रूक्षोष्णा श्लेष्मपित्तास्रकण्डूश्वासतृषापहा ॥ हृल्लासविषवस्त्यास्यशिरोरुग्वमिकासनुत् ॥

स्थूलोच्चय । पु॰ गण्डोपले । गण्डाश्मनि । स्थूलोपले ॥ असाकल्ये । अकात्स्न्र्ये । वैरण्डे ॥ गजानांमध्यमगतौ ॥ नौचैर्गतम्॰ स्थूलोच्चय॰ बौधिमार्गकृतिति कोहस्तिगतय ॥ उच्चयनम् । विअ॰ । एरच । स्थूलस्योच्चय । गजानांदन्तरन्ध्रे ॥

स्थेमः पु॰ स्थैर्ये । स्थिरस्यभाव पृथ्वादित्वादिमनिच् । प्रियस्थिरेतिस्थादेश ॥

स्थेय । पु॰ विवादपदस्यनिर्णेतरि । अध्यक्षे । प्राड्विवाके ॥ तिष्ठत्यस्मिन्विवादपदनिर्णयार्थम् । स्था॰ । बाहुलकादधिकरणे॰ अचोयत् । ईद्यति ॥ पुरोधसि । त्रि॰ अतिस्थिरे ॥

स्थेयान् । त्रि॰ स्थास्नौ । स्थिरतरे ॥ अयमनयोरतिशयेनस्थिरः । द्विवचनविभज्योपपदेतरबीयसुनाविती यसुनि॰ प्रियस्थिरेतिस्थादेश ॥ स्त्री॰ स्थेयसी ॥

स्थेष्ठ त्रि॰ स्थिरतमे ॥ अयमेषामतिशयेनस्थिरः । अतिशायनेतमबिष्ठनाविती ष्ठनि॰प्रियस्थिरेतिस्थादेश ॥ सुस्थिरे ॥

स्थैर्यम् । न॰ स्थिरत्वे । अचञ्चलत्वे । मोक्षसाधनेप्रवृत्तस्याऽनेकविधविघ्नप्राप्ताबपितदपरित्यागेनपुनः पुनर्यत्नाधिक्ये ॥ स्थिरस्यभावः । ष्यञ् । स्तब्धत्वे ॥

स्थोरी । पुं॰ भारवाहितुरगे ॥

स्थौणेयम् । न॰ ग्रन्थिपर्णप्रभेदे । कुकुरौंधास्थौणधौ । गांठयाला॰ कु॰ गौ॰ दे॰ भा॰ प्र॰ ॥ अस्यप्रभेदागुणाश्चयथा । ईश्वरसुगन्धिस्थौणेयपुनेर॰ कृतिलेके । स्थौणेयकं वर्हिवर्हं शुकवर्हं च कुक्कुरम् । ग्रौणेरोम शुकस्तापिशुकपुष्पं शुकच्छदम् ॥ स्थौणेयकं कटु स्वादु तिक्तं स्निग्धं त्रिदोषनुत । मेधाशुक्रकरं त्वच्यंरक्षोऽग्नोज्वरजन्तुजित् ॥ हन्तिकुष्ठास्रदटदाहदौर्गन्ध्यतिलकालकान्॰ कृतिभा॰ प्रकाश ॥

स्थौणेयकम् । न॰ सुगन्धद्रव्यभेदे ।

बर्हिशिखे । स्थौणेये ॥
स्थौरी । पु० स्वरक्षणभवत्पृष्ठेनभार
वाहकोऽश्वे । पृष्ठ्ये । स्थ सम्बेद
म् । तस्येदमित्यण् । स्थूरीरिक
स्वम् । स्थौरबलमस्यास्ति । इनि ॥
स्थौलत्व्यम् । न० बहुप्रदत्वे ॥ *
स्थौल्यम् । न० स्थूलत्वे ॥ स्थूलस्य
भावः । ष्यञ् ॥
स्नपनम् । न० अभिषेचने ॥ स्नाने
॥ यथा । धूजनात् स्नपनं श्रेष्ठं स्न
पनात्पर्णामृतम् । तर्पणान्मा
सदानन्तु महिषाजनिपातनमिति
दुर्गोत्सवप्रकरणे तिथ्यादितत्त्वम् ॥
स्नपितः । त्रि० स्नापिते ॥ सिक्ते ॥
स्नातेर्ण्यन्तात् क्तः । अर्त्तिह्रीत्या
दिना पुक् । मिताह्रस्वः ॥ आ
प्लुते ॥
स्नवः । पुं० स्रवे । स्रवणे । क्षरणे
॥ स्नवनम् । आप्रस्रवणे । स्नुदो
रप् ॥
स्नसा । स्त्री० स्नायौ ॥
स्नातः । त्रि० आप्लुते । कृतस्नाने ॥
यथा । स्नातोऽधिकारी भवति दैवे
पैत्रे च कर्म्मणि । अस्नातस्य क्रियाः
सर्व्वा भवन्ति हि यतोऽफलाः ॥
प्रातः समाचरेत् स्नानमतो नित्य
मतन्द्रितः ॥ इति प्रायश्चित्ततत्त्वम्
। स्नात्वा कर्म्माणि कुर्वीत । शिरः
स्नातश्च कुर्वीत दैवं पित्र्यमथापि वेति

स्मृतिः ॥ आप्लौचे । भावे क्तः ॥
स्नातकः । पु० आप्लुतव्रतिनि । स
माप्तवेदपाठे० अगृहस्थे । आश्र
मान्तरगतिसमाप्तवेदव्रते । कृत
स्नाने ॥ यथाह हारीतः । त्रयः
स्नातका भवन्ति । विद्यास्नातको०
व्रतस्नातको विद्याव्रतस्नातकश्चेति
। तत्र य. समाप्य वेदमसमाप्य व्रता
नि समावर्त्तते० स विद्यास्नातकः
। यः समाप्य व्रतानि० असमाप्य
वेदं समावर्त्तते स व्रतस्नातकः । य
उभयं समाप्य समावर्त्तते स विद्याव्र
तस्नातको भवति ॥ अत्र भवन्ति च
य पक्षाः । यथा । मन्त्रब्राह्मणा
त्मकं वेदमधीत्याननुदृष्य च स्नाया
दित्येकः पक्षः । साङ्गवेदमधी
त्याननुदृष्य च स्नायादित्यपरः । य
न्त्रमाचमप्यधीत्य यद्यविद्यायाम्यस्य
स्नायादिति तृतीयः पक्षः । यत्र
विद्याविरहेऽपि यत्र माचेऽधीतेन स्ना
यादिति निषेधः । यतो वेदाध्ययन
वेदविहिताग्निहोत्रादिकर्म्मानुष्ठा
नप्रयोजनमिति ॥ स्नातिस्म । आ
० । गत्यर्थाकर्मकेति क्तः । स स्ना
र्थाकन् ॥ यावादिषु० स्नातवेदस
माप्ताविति पाठाद्वा कन् ॥ गृहस्थ
ब्राह्मणे ॥
स्नानम् । न० मज्जने । आप्लावे । आ
प्लवे ॥ स्नानं षड्विधं भवति । यथा

ष्टषड्‌ख । नित्यं नैमित्तिकं काम्य क्रियाङ्गमलकर्षणम् । क्रियास्नान तथाषष्ठ मीठास्नान प्रकीर्त्तितमिति ॥ त्रिविधस्नानानांतत्पर्यावगम्यताम् । तथाषड्‌वस्मृति ॥ आग्नेयादिप्रभेदेनतत्तप्रोक्तं चतुर्विधम् । यथा । आग्नेय भस्मना स्नानमवगाह्यन्तुवारुणम् । आपोहिष्ठेतिचब्राह्म वायव्य गोरजःस्मृतमिति ॥ आप्लुत्यौ । भावेल्युट् ॥ स्नानं तर्पणपर्य्यन्तमाप्लाव्य देव पूजनम् । आह्निकस्त्वितसन्ध्यान्त विप्राणाम्स्तुतोऽस्तुतम ॥ तत्रप्रात स्नान प्रथ सन्तिदृष्टादृष्टकरं हितम् । सर्वमर्हतिपूतात्माप्रात स्नायीजपादिकमितिदक्ष । दृष्टञ्च कर्माधिकार । अदृष्टजपादिद्वारा परलोकसिद्धि . ॥

स्नानतृणम् । न० कुशे ॥

स्नानीयम् । न० स्नानसाधनेचूर्णादौ ॥ स्नान्त्यनेन । ष्णा० । कृत्यल्युटोबहुलमित्यनीयर् ॥

स्नान्ती । स्त्री० जलमवगाहमाना- याम ॥

स्नायी । त्रि० स्नानकर्त्तरि ॥

स्नायु । स्त्री० वायुवाहिन्यानाड्याम ॥ वसायाम् ॥ स्नाति । ष्णा० । बाहुलकादुण् । आतोयुक्चिण्कृतो ॥

स्नाय्वर्म्म । न० नेत्ररोगप्रभेदे । तल्लक्षणं यथा । स्थिर प्रस्तारिमांसाढ्य शुष्कस्नाय्वर्मपञ्चममितिमाधवकर ॥

स्नावा । पु० रसिके ॥ स्नाति । ष्णा० । स्नामदिपद्यर्त्तिपृशकिभ्योवनिप् । धीवावत् ॥

स्नावरी । स्त्री० नद्याम् ॥ स्नान्त्यस्याम । ष्णा० । वनिप । वनोर चेतिङीप् ॥

स्नावा । स्त्री० शिरायाम् ॥ स्नुप्रस्रवणे । स्नावयतिशरीरमितिस्नावा ॥

स्निग्ध । पु० बहुवारे । रक्तैरण्डे ॥ सरलद्रवे । मयके ॥ न० समूहगन्धे । जवादिके ॥ सिक्थके ॥ त्रि० स्नेहयुक्ते । अरूक्षे । चिक्कणे । मसृणे ॥ सहजेनगतुकेनवास्नेहेनयुक्ते । प्रिये । वत्सले । स्निह्यतिस्म । ष्णिहप्रीतौ । अकर्मकत्वात्कर्त्तरिक्त । वादुहेतिच ॥ मतिवुद्धिपूजार्थेभ्यश्चेतिचादवर्त्तमाने वाक्त . ॥

स्निग्धकन्दा । स्त्री० द्रोणपर्ण्याम् । भूमिकदल्या ॥

स्निग्धतण्डुल । पुं० षष्टिशाली ॥

स्निग्धता । स्त्री० स्नेहे ॥ प्रियत्वे ॥

स्निग्धदारु । न० देवदारुणि ॥ देवदारुप्रभेदेपूतिकाष्ठे ॥ सरलद्रवे ॥

स्निग्धपत्र । पु० गर्जरतृणे ॥ घृत

करञ्जे । गुच्छकरञ्जे ।

स्निग्धपत्रा । स्त्री॰ बदर्य्याम् ॥ पालङ्क्याम् ॥ काश्मर्य्याम् ॥

स्निग्धपर्णी । स्त्री॰ गम्भार्य्याम् ॥

स्निग्धपिण्डीतक । पु॰ मदनवृक्षविशेषे । स्थूलवृक्षफले ॥

स्निग्धफला । स्त्री॰ कर्कटीप्रभेदे । बालुङ्क्याम् । मूत्रलायाम् ॥

स्निग्धा । स्त्री॰ मेदायाम् ॥

स्नु । पु॰ प्रस्थे । सानौ । पर्व्वतसमभूभागे । कौटिल्यम॰ । स्नुता । आप्रस्रवे॰ आशौचेषा । मितद्र्वादित्वात्॰ डु ॥ स्त्री॰ स्नयौ ॥

स्नुक्छद । पुं॰ चौर । स्नुक्क्षीवृक्षे ।

स्नुत । त्रि॰ स्यन्न । स्नुतजलादौ । स्नूयतिस्म॰ । प्त॰ क्त ॥

स्नुषा । स्त्री॰ सुतस्त्रियाम् । पुत्रवध्वाम् ॥ स्नौति । प्नु॰ । स्नुतक्षिक्षायुषिभ्य क्विदितिस॰ ॥ स्नुषाम् ॥

स्नुक् स्त्री॰ स्नुह्याम् ॥ स्नुह्यति । ष्णुह उद्गिरणे । क्विप् । बाहुलेति कुत्वम । तदभावे हो ढः इति ढत्वे स्नुट स्नुड ॥

स्नुहा । स्त्री॰ स्नुहीवृक्षे ॥ भागुरिमते॰ स्नुहटाप् ॥

स्नुहि । स्त्री॰ स्नुह्याम् । स्नुह्यति । ष्णुह॰ । सर्व्वधातुभ्य इन् ॥

स्नुही । स्त्री॰ सिहुण्डे ॥ इगन्तात् स्नुहि कृदिकारादक्तिन इति पक्षे ङीष् ॥

स्नेह । पु॰ सौहृदे । प्रेम्णि । प्रियतायाम् ॥ तामसीय चित्तवृत्तिविशेष॰ यस्मिन् सत्यन्यदीये हानिवृद्धी स्वस्मिन्नारोप्येते । अन्यविषय प्रेमापरपर्य्याय स्नेह ॥ यथा । स्मृत्वा वियोगजदुःखं त्यज स्नेह प्रियेजने । अतिस्नेहपरिष्वङ्गाद्वर्त्तिरार्द्रापि दह्यतीति । स्नेहयति प्रीणयति पुरुषम् । ष्णिह॰ । पचाद्यच् । स्निह्यन्ति पुरुषा यस्मिन् । अधिकरणार्थे॰ घञ ॥ घृतादिरसविशेषे ॥ यथा स्नेहश्चतुर्विध प्रोक्तो घृत तैल वसा तथा । मज्जा च॰ त पिबेन्मर्त्य किञ्चिदभ्युदिते रवौ ॥ स्थावरो जङ्गमश्चैव द्वियोनि स्नेह उच्यते । तिलतैलं स्थावरेषु जङ्गमेषु घृतं वरमिति ॥ द्वाभ्यामभिस्तु भवा॰ यमकस्त्रिवृतो महान् ॥ न्यायमते॰ चूर्णादिपिण्डीभावहेतौ॰ गुणविशेषे॰ जलमात्रवृत्तौ ॥ जलीयपरिमाणावद्य नित्योऽन्यत्त्वनित्य । तैलादावस्य प्रकर्षोऽस्यत स्नेहादहो भवति । यथोक्त भाषापरिच्छेदे । स्नेहो जलेऽसौ नित्यो यमनित्योऽवयविन्यसौ । तैलान्त

इतत्प्रकर्षाद्दहनस्यानुकूलतेति ॥

स्नेहनम् । ष्णिह॰ । भावे घञ् ॥ स्निह्यतेयेनवा ॥ स्नेहस्य तु खमूलत्वमुक्तं गारुडे ११४ऽध्याये । यथा स्नेहोभयतश्च स्नेहो दुःखभाजनम् । स्नेहमूलानि दुःखानि तस्मिंस्त्यक्ते महत्सुखमिति ॥ स्निग्धतायाम ॥ यथा । स्नेह प्रसुलच्यो वाग् जिह्वादन्तमेव नखस्य । सुतधनसौभाग्ययुता स्निग्धैस्तैर्निर्धनारूक्षैरिति ॥

स्नेहा । पु॰ व्याधिप्रभेदे ॥ सहृदि ॥ चन्द्रे ॥ स्निह्यति । ष्णिह॰ । स्नुस्नुघनपूषक्रिस्य्यादिना॰ कनिन॰ निपातनात् साधु ॥

स्नेहनम् । न॰ तैलमर्दने । स्नघणे । अभ्यङ्गे ॥ स्निह्यतेयेन । ष्णिह॰ । ल्युट ॥

स्नेहपानम् न॰ कुल्याम् । चर्ममयैतैलादिभाण्डे ॥ स्नेहस्य तैलघृतादे पात्रम् ॥

स्नेहप्रिय । पु॰ प्रदीपे ॥ त्रि॰ तैलादिप्रिये ॥

स्नेहफल । पु॰ तिले । पादपे ॥

स्नेहभू । पु॰ श्लेष्मणि ॥ त्रि॰ स्निग्धभूमौ ॥

स्नेहरङ्ग । पु॰ तिले ॥

स्नेहवती । स्त्री॰ मेदायाम ॥ स्नेहोऽस्त्यस्याम् । रसादिभ्यश्चेति मतुप् । ङीप् ॥

स्नेहपक्ष । पु॰ प्रिये । प्रदीपे ॥

स्नेहवस्ति । स्त्री॰ अनुवासनवस्तौ । तैलपिचकारी॰ इ॰ भा॰ ॥ यथा । वस्तिर्द्विधाऽनुवासाख्यो निरूहश्चतत परः । यः स्नेहैर्दीयते सस्यादनुवासननामकः ॥

स्नेहबीज । पु॰ पियालवृक्षे ॥ त्रि॰ स्नेहकारणे ॥

स्नेहाश । पु॰ प्रदीपे । दीपे ॥

स्नेही । पु॰ वयस्ये ॥ त्रि॰ स्नेहयुक्ते ॥

स्नेहु । पु॰ व्याधिभेदे ॥ चन्द्रे ॥ स्निह्यति । ष्णिह॰ । भृमृशीङ्स्नि हीत्यादिनाउ ॥

स्पन्द । पु॰ स्पन्दने । प्रस्फुरणे ॥ स्पन्दते । स्पदि किञ्चिच्चलने । पचाद्यच ॥

स्पन्दनम् । न॰ स्पन्दे । किञ्चिच्चलने ॥

स्पर्द्धक । त्रि॰ स्पर्द्धाकारे ॥

स्पर्द्धा । स्त्री॰ सङ्घर्षे । पराभिभवेच्छायाम् ॥ स्पर्द्धतेऽनयेति ॥ साम्ये ॥ क्रमसमुन्नतौ ॥ स्पर्द्ध सङ्घर्षे । भिदाद्यङ् ॥

स्पर्द्धालु । त्रि॰ स्पर्द्धायुक्ते ॥ स्पर्द्धालाति । ला॰ । मितद्वादित्वात्॰ डु ॥

स्पर्श° । पु॰ रुजायाम ॥ सन्तापे ॥

स्वापि ॥ स्पृशति । स्पृशता धनस्पर्शनयोः । पद्मजे च च॰ सम् स्पृशत्पताप्रवृत्तिकर्त्तरि घञ् ॥ यथा, स्पर्शेन स्पर्शं भावेघञ् ॥ इति ॥ स्पर्शके । कादिमावसानवर्गा चरे । उपतापे । रोगविशेषे । स्पर्शके ॥ मणिविशेषे । पारस॰ इ॰ भा॰ प्र॰ ॥ त्वगिन्द्रियविषये । स्पर्शने । त्वगिन्द्रियमात्रग्राह्यगु णविशेषे ॥ सत्रिविध । शीतो ष्णानुष्णाशीतभेदात् । पृथिव्यपते जोमारुद्वृत्ति । तत्र शीतस्पर्श । उष्णस्तेजसि । अनुष्णाशीत पृथि वीवाय्वोः । रूपरसगन्धस्पर्शाः पृथिव्यां पाकजाः । अनित्याश्च । जलादावपाकजाः । नित्या अनित्याश्च । नित्यगता नित्याः । अनित्यगता अनित्याः अथाहुः । कठिन पार्थिव स्पर्श शीतो बालवह्निजो । मृदुर्वायोरिति स्पर्शविशेषाकृत्कीर्तिताः ॥ स्प र्शसामान्ये स्पर्शविशेषाणामवृत्ति ॥ इन्द्रिये स्पृश्यन्ते॰ वृत्तिव्युत्प त्त्या॰ शब्दादिविषयेषु ॥ मात्रा मात्रे॰ । ॰ ॥ स्पर्शनम् । स्पृश स्पर्शे । अकर्त्तरिचकारकेसंज्ञा यामितिघ ॥ पुराणे॰ एका दशविध स्पर्शउक्तोयथा । उष्णा शीत सुखेदु ख' स्निग्धोविश

दएवच । खरोमृदुश्लक्ष्णश्चलघु गुरुरितिक्रमात् ॥ कामिनस्तु । शब्दादीनाम्पञ्चानामध्यस्पर्श सुख वरम् । आनन्दरसमूलं नान्य दस्तिसुखमितीत्याहु ॥

स्पर्शक । पु॰ स्पर्श ॥ त्रि॰ स्पर्शनकारि ॥

स्पर्शज्ञानम् । न॰ त्वाचप्रत्यक्ष ॥

स्पर्शन । पु॰ श्वसने । वायौ ॥ स्पृशति । स्पृश॰ । नन्द्यादित्वाल्ल्युः ॥ न॰ दाने । स्पर्शे ॥ स्पृशभावेल्युट् ॥

स्पर्शमणि । पु॰ स्पर्श । पारस॰ इ॰ प्र॰ मणौ ।

स्पर्शमणिप्रभवम्॰ । न॰ काञ्चने । स्वर्णे ॥

स्पर्शलज्जा । स्त्री॰ लज्जालुवृक्षे ॥

स्पर्शशुद्धा । स्त्री॰ शतमूल्याम् ॥

स्पर्शस्पन्द । पु॰ भेके ॥

स्पर्शा । स्त्री॰ कुटलायां ॥

स्पर्शानन्दा । स्त्री॰ रतिमदायाम् ॥ अप्सर सु ॥ स्पर्शेन॰ स्पर्शेनानन्दोऽस्या ॥

स्पर्शित । त्रि॰ प्रतिपादिते ॥

स्पश । पु॰ सम्पराये । युद्धे ॥ प्रणिधौ । चरे । हेरिके । अस्याप योयथा । यथार्हवर्णं प्रणि धिरपसर्पश्चर स्पश । चारश्च गूढपुरुषश्चेति ॥ स्पशति । स्प

ऽसंस्पर्शनवस्तनयोः । पक्षाद्यच् ॥

स्पष्ट । त्रि० स्फुटे । प्रव्यक्ते । उल्बणे । प्रकटे ॥ स्पशयतेस्म । स्पश० । ण्यन्तात् क्त । बाढ़ान्तेति साधु ॥

स्पष्टीकृत । त्रि० व्यक्तीकृते ।

स्पार्शन । पु० स्पर्शे । स्पर्शेनगच्छति शीघ्रत्वात् ॥

स्पाशित । त्रि० स्पष्टे । स्पश० । क्त । बाढ़ान्तेति साधु ॥

स्पृक्का । स्त्री० सुगन्धिद्रव्यविशेषे । शाकभेदे पृक्कायाम् ॥ गुणास्तु । स्पृक्का स्वादी हिमा वृष्या तिक्ता निखिलदोषनुत् । कुष्ठकण्डूविषस्वेददाहाश्रज्वररक्तहृत् ॥ स्पृशति । स्पृश स्पर्शने । बाहुलकात् कक् ॥

स्पृणा । स्त्री० भुजङ्गवालिनीवृक्षे । कङ्कालिका० इ० गौ० दे० भा० प्र० ॥

स्पृशी । स्त्री० कण्टकार्याम् ॥ स्पृशति । स्पृश० । इगुपधेति क । गौरादि ॥ *

स्पृश्य । त्रि० स्पर्शनीये ।

स्पृष्ट । त्रि० कृतस्पर्शे ॥

स्पृष्टास्पृष्टम् । न० परस्परस्पर्शने ॥

स्पृष्टस्पृष्टि । अ० परस्परस्पर्शने । इ० च भटी० इ वाकृत० इ० भा० ॥ यथा । तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे । नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यति ॥ आपद्यपि च कष्टायां भये सौहित्ये तथा । मातापित्रोर्गुरोश्चैव निर्देशे वर्त्तनात्तथा ॥ स्पृष्टास्पृष्टि० इत्यव्ययं क्रियाव्यतीहारे । तत्रैतन्न दुष्यतीत्यर्थः ॥

स्पृष्टि । स्त्री० स्पर्शे । पृक्तौ ॥ स्पर्शनम् । स्पृश क्तिन् ॥

स्पृहणीय । त्रि० श्लाघ्ये ॥ कमनीये । मनोहरे ॥

स्पृहयालु । त्रि० सस्पृहे । स्पृहाशीले । लोभिनि ॥ स्पृहयति० तच्छील । स्पृहेच्छायाम् । स्पृहिगृहीत्यालुच् ॥

स्पृहा । स्त्री० दोहदे । इच्छायाम् । काङ्क्षायाम् । भिदादेराकृतिगणत्वात्स्पृहेरङ् ॥ धर्माविरोधेन प्राप्तीच्छायाम् ॥ उक्तञ्च वेतुपरधनेषुदृष्टमात्रेषु० येनकेनाप्युपायेनादित्सायाम् ॥ तृष्णात्मिकायां चित्तवृत्तौ ॥ सुखानुभवकाले० तज्जातीयसुखस्यकारणं धर्ममननुष्ठाय यद्वै तदाकाङ्क्षारूपायांतामसचित्तवृत्तौ ॥ भ्रान्तिरेषा ॥ तन्मानिन्द्यात्प्रशंसेयथा । गणे ब्रतश्रद्धायामातप कल्पतरुस्तथा । तपस्याकामधेनुश्च तस्मात तपसि स्पृहा ॥ ऐश्वर्य्यं ब्राह्मणानाञ्च क्षत्रियाणां चतथाविशाम् । शूद्राणाञ्चसेवा

यास्पृहावेदेष्वनिन्दिता ॥ क्षत्रिया
णांस्वतपःक्लेशस्पृहातीवप्रशंसिता ।
ब्राह्मणानांविवादेषुस्पृहातीवविनि
न्दिता ॥ क्षत्रियाणांरणेधर्मेरणे
मृत्युर्नगर्हितः । रणेस्पृहाब्राह्म
णानांलोकेवेदेविडम्बना ॥ तपोध
नानांविप्राणांवनानांयुगेयुगे ।
शान्तिस्वस्त्ययनंकर्मविप्रधर्मोनस-
ङ्कर ॥ इतिब्रह्मवैवर्ते गणपतिख
ण्डे ३५ ऽध्याय ॥

स्पृक्का पु॰ फलपूरे । मातुलुङ्ग
के । त्रि॰ स्पृहार्हे । वाञ्छनीये ॥

सप्रष्टा । त्रि॰ उपतापके । उपतप्त
रि । स्पृशति । स्पृश सम्पर्शने ।
तृच् । अनुदात्तस्येत्यमागमः ॥

स्पर्शनम् । कात्यायनीदेवीबलमि-
तिभाषितज्ञो । सम्प्ते ॥ स
न्तापे ।

स्फट । पु॰ स्फटायाम् ॥ स्फुटन्ति ॥
स्फुटविकसने॰चुरादि । विभज
भावि॰पचाद्यच् । पृषोदरादि॰ ॥

स्फटा । स्त्री॰ फणायाम । स्फट ॥
टाप ॥

स्फटिक । पं॰ स्वनामख्यातिप्रसिद्धे
मणौ । सूर्यकान्ते । भासुरे । शा
लिपिष्टे । शीतशिवे ॥ अस्यगुणा
दयोयथा । स्फटिकः समवीर्यश्च
पित्तदाहार्त्तिदोषनुत् । तस्याक्ष
मालाजपतांदत्तेकोटिगुणंफलम् ॥

परीक्षाऽस्ययथा । यद्गङ्गातोयबिन्दु
च्छविविमलतमंनिस्तुषंनैवरुक्ष्यं
स्निग्धंशुद्धान्तरालंमधुरमतिहिमं ।
पित्तदाहापहारि । पाषाणेयन्निघृष्टं
स्फुटितमपिनिजांस्वच्छतांनैवजह्या
त्तत्प्राहुर्जातुलभ्यंशुभमुपचि
तिदंवरत्नंस्फटिकरत्नम् ॥ इतिराजनि
र्घण्ट ॥ अपिच । मुक्ताविद्रुम
वज्रेन्द्रवैदूर्यस्फटिकादिकम् ।
चिरत्नसरःशीतंकषायंस्वादुलेख
नम् । चक्षुष्यंधारणात्सर्वपापाल
क्ष्मीविनाशनमितिराजवल्लभः ॥
तस्योत्पत्तिपरीक्षेयथा । कावेरी
विन्ध्ययवनचीननेपालभूमिषु । ला
ङ्गलीव्यकिरन्मेदोदानवस्यप्रयत्नतः
आकाशशुद्धं तैलाढ्यमुत्पन्नंस्फटि
कंततः । मृणालशङ्खधवल
किञ्चिद्वर्णान्तरान्वितम् ॥ नतत्तुल्यं
हिरत्नानामथपापवनाशनम् ।
संस्कृतंशिल्पिनासद्योमूल्यंकिञ्चि
ल्लभेतत ॥ इतिगारुडे ७९ अध्या
य ॥ तथा । हिमालयेसिंहले
विन्ध्याटवीतटेतथा । स्फटिक
मुत्पद्यतेनानारूपसमप्रभम ॥ हि
माद्रौचन्द्रसङ्काशंस्फटिकंतद्द्वि
भवेत । सूर्यकान्तंतथैवान्यच्
कान्तंतथापरम् । सूर्यांशुस्पर्शम
न्त्रवह्निंवमतियत्क्षणात । सूर्यका
न्तंतदाख्यातंस्फटिकरत्नवेदिभिः

पूर्णेन्दुकरसंस्पर्शादमृतं स्रवति क्षणात् । चन्द्रकान्तं तदाख्यातं दुर्लभं तत्कलौ युगे ॥ अशोकपल्लवच्छायं दाडिमीबीजसन्निभम् । विन्ध्याटवितटे देशे जायते मन्दकान्तिकम् ॥ सिंहले जायते कृष्णमाकरे श्यामनीलकम् । पद्मरागभवेऽप्येवं त्रिविधः स्फटिको भवेत् ॥ स्वच्छं निर्मलं स्रवतीव जलं शुचि । ज्योतिर्ज्वलनमाश्लिष्टं सूताज्योतीरसहिज ॥ तदेवलोहिताकाररागावर्तं सुदृढतम् । आनीलतत्पाषाणा प्रोक्ता राजमयशुभम् । ब्रह्मसूत्रमययत्तः प्रोक्ता ब्रह्ममयं द्विजैः स्फटिकपरीक्षा । इति भोजराजकृतयुक्तिकल्पतरुः ॥

स्फटिका । स्त्री॰ स्फट्याम् । रङ्गदायाम् । स्फटिकायाम् । फटकरी॰ इ॰ भा॰ प्र॰ पाषाणः ॥

स्फटिकाचल । पु॰ स्फटिकोऽद्भिति । कैलासे ॥

स्फटिकात्मा । पु॰ स्फटिके ॥

स्फटिकाभ । पु॰ कर्पूरे ॥

स्फटिकारि । स्त्री॰ स्फटिकायाम् ॥

स्फटिकारिका ।) स्त्री॰ स्फटिकायाम् ॥
स्फटिकारी ।)

स्फटी । स्त्री॰ स्फटिकायाम् ॥

स्फुरणम् । न॰ स्फुरणे ॥ स्फरस्फुरण कुत्सकारी पञ्च केचित्पठन्ति॰ स्वार्थे यत्नादन्यायुच् ॥

स्फटिकम् न॰ स्फाटिकोपले ॥

स्फाटिका । स्त्री॰ स्फटिकोपले । फटकरीति भाषा ॥ अस्या गुणाः यथा । स्फाटिका तु कषायोष्णा वातपित्तकफव्रणान् । निहन्ति श्वित्रवीसर्पान् योनिसङ्कोचकारिणीति ॥

स्फाटिकोपल । पु॰ स्फटिकायाम् ॥ स्फटिके ॥

स्फाटिकोद्भित । पु॰ कैलासे ॥

स्फाति । स्त्री॰ वृद्धौ । स्फायनम् । स्फायी वृद्धौ । क्तिन् ॥ * ॥

स्फायित । त्रि॰ वृद्धिङ्गते ॥

स्फार । पु॰ विकटे ॥ करकादेर्बुद्बुदे ॥ त्रि॰ विपुले । विशाले ॥ यथा । तस्मिन्निहपर्णास्फारसमस्ताः वस्तुदृष्टय । इमास्ता प्रतिबिम्बन्ति सरसीव तटद्रुमाः ॥ स्फायते । स्फायी॰ । स्फायितस्त्रीति रकः ॥ यद्वा । स्फुरणम् । स्फुरस्फुरणे । घञ् । स्फुरति स्फुलत्योर्घञीत्यत्वम् ॥

स्फिगघातनक पु॰ कटफले ॥

स्फगदेश । पु॰ बालधिमूलप्रदेशे ॥

स्फिक् । स्त्री॰ कटिप्रोथे । कटिदेशस्थमांसपिण्डे । स्फायते । स्फायी॰ । बाहुलकाद्विच्प्रत्ययः ॥

स्फेटति । स्फिट हिंसायाम् । क्विप । स्फिगप्पूतेतिनिपातनात् । टस्य चकृतिमुकुट ॥

स्फिर । त्रि॰ प्रचुरे ॥ स्फायते । स्फायी॰ । अजिरशिशिरेतिकिरच्टिलोपश्च ॥

स्फीत । त्रि॰ समृद्धे ॥ विकसिते ॥ स्फायतेस्म । स्फायी॰ । क्त । स्फायः स्फीनिष्ठायाम् ॥ अथ स्फोतिकामचूतिस्फीतमाच- ष्टे॰ चूतिश्च तादृचकृ । अल्लोपश्चिलोपौ ॥

स्फुट । स्त्री॰ दूर्वायां ॥ पादस्फोटे । स्फुटति । स्फुट॰ । क्विप ॥

स्फुट । त्रि॰ व्यक्ते । स्पष्टे । सच घटादीनांविषयेन्द्रियसन्निकर्षज न्यसविल्पकाप्रमाणमिदाहृतमिति प्रसिद्धमेव । प्रफुल्ले ॥ व्याप्ते ॥ सिते । शुक्ले । स्फुटति । स्फुटवि कसने । इगुपधेतिक ॥ स्फुटते । भिन्ने ॥

स्फुटता । स्त्री॰ विशदार्थतायाम् ॥

स्फुटनम् । न॰ विदरे । विदरणे ॥ स्फुट॰ । कुटादि॰ । ल्युट् । विकसने ॥

स्फुटबन्धनी । स्त्री॰ ज्योतिष्मत्याम् । पारावताङ्घ्र्याम् ॥

स्फुटल । पु॰ तुम्बुरुवर्णे । शू लघ्ने ॥

स्फुटा । स्त्री॰ फणायाम् ॥ स्फुट॰ क । टाप ॥

स्फुटि । स्त्री॰ पादस्फोटामये । विपादिकायाम ॥ निर्भिन्नकर्कटीफले । दूर्वाकृतिकायाम् । स्फुट॰ इ॰ भा॰ प्र॰ ॥

स्फुटित । त्रि॰ विकचे । विकसिते ॥ दीर्णे । भिन्ने ॥ अस्फुटत् । स्फुट॰ । क्त ॥

स्फुर । पु॰ फलके ॥ स्फुरणे ॥

स्फुरणम् । न॰ स्फरणे । स्फरणमा • इतिभाषा ॥ यथा॰ चक्षुःस्फुरणमेवस्फुरणम ॥ किञ्चिच्चलने ॥ भाने ॥ कम्पने ॥ स्फुरस्फुरणे सञ्चलनेच । कुटादि । ल्युट ॥

स्फुरत् । त्रि॰ कम्पनयुक्ते ॥ दीप्यमाने ॥

स्फुरितम् । न॰ स्फुरणे ॥ त्रि॰ मनस काल्पनायाम ॥ उल्लसिते ॥ उज्ज्वले ॥ प्रतिफलिते ॥

स्फुर्क । पु॰ कालस्कन्धे । तिन्दुके ॥

स्फुर्थु । पु॰ वज्रपतनजनितध्वनौ ॥ स्फूर्थौ ॥

स्फुलम् । न॰ तम्बू॰ इ॰ प्र॰ वस्त्रवेश्मनि ॥

स्फुलिङ्ग । त्रि॰ अग्निकणे । चिनगारी॰ इ॰ भा॰ ॥ स्फु॰ इत्यनुकरणशब्द । स्फुना॰ फूत्कारेण॰

लिङ्गति० गच्छति । लिङ्गगतौ । पचाद्यच् ॥

स्फुलिङ्गा । स्त्री० अग्निकणजातौ ॥ जातावपिनङीष् । अजादिषुपाठात् । टाप् ॥

स्फुलिङ्गिनी । स्त्री० अग्नेर्जिह्वाविशेषे ॥

स्फूत्कार । पु० फूत्कारे ॥

स्फूर्जक । पु० तिन्दुकवृक्षे । तेंदू० बृ० भा० प्र० ॥ स्फूर्जति । ट्वोस्फूर्जावज्रनिर्घोषे ॥ ण्वुल् ॥

स्फूर्जथु । पु० वज्रनिर्घोषे । वज्रपातध्वनौ ॥ स्फूर्जनम् । ट्वोस्फूर्जा० । ट्वितोऽथुच् । मेघनादे । तड़ुत्कोये ॥

स्फूर्जन । पु० तिन्दुके ॥

स्फूर्ति । स्त्री० स्फुरणे ॥

स्फूर्तिमान् । त्रि० पशुपतौ ॥ यथा । पाशुपतिक पाशुपतविद्य स्फूर्तिमान्मतः । इतित्रिकाण्डशेष । स्फूर्तिविशिष्टे ।

स्फेमा । पु० स्फिरत्वे । प्रचुरतायाम् ॥ स्फिरस्यभाव । पृथ्वादिभ्यइमनिच् । प्रियस्थिरेत्यादिनास्फादेश ॥

स्फेय । त्रि० प्रचुरतरे । स्फिरतरे ॥ द्वयोरनयोरतिशयेनस्फिरम् । ईयसुन् । प्रियस्थिरेतिस्फादेश ॥

स्फेरम । त्रि० भूयिष्ठे ॥

स्फेष्ठ० । त्रि० अतिशये । भूयिष्ठे । अयमेषामतिशयेनस्फिर । इष्ठन् । प्रियस्थिरेतिसाधु ॥

स्फैयकृत । पु० स्फ्याकृतेपक्षे । अण् ॥

स्फोट । पु० स्फोटके । विस्फोटे । पिडके । शब्दव्यापारे । स्फुटति० व्यज्यतेऽर्थः० स्फुटत्यर्थोयस्मादितिवा । स्फुटविकसने । घञ० अच्वा ॥

स्फोटक । पु० फोड़ाइतिख्याते० रोगे । पिडके ॥ स्फोटति स्फुटिर् विशरणे । ण्वुल् ॥

स्फोटनम् । न० विदारणे ॥

स्फोटनी । स्त्री० मणिशङ्खादिवेधोपकरणे । आस्फोटयत्याम् । स्फोटयत्यनया । स्फुटभेदने चुरादि । करणेल्युट् ॥

स्फोटबीज ।)
स्फोटबीजक ।) पु० बातारीभल्लातके ॥

स्फोटायन । पु० मुनिविशेषे । काशीवति । स्फोटप्रतिपादनपरे० वैयाकरणे । स्फोटोऽयनपरायणं यस्य ॥

स्फोटिका । स्त्री० खञ्जनिकायाम् । हापुचिकाया ॥

स्फ्य । पु० यज्ञाङ्गभूते० खड्गा

कारकादि

स्म । अ॰ अतीते ॥ पादपूरणे ॥ प्रसिद्धे ॥ स्मयते ॥ स्मिङ् ईषद्धसने । अन्येभ्योऽपीति ड ॥ स्मि । पा॰ ङस्तस्ययोगा ॥

स्मय । पु॰ अद्भुते ॥ गर्वे ॥ स्मयनम् । स्मिङ्॰ । एरच् ॥

स्मर । पु॰ कामे । पञ्चशरे ॥ स्मरयति॰ उत्कण्ठयति । स्मृ आध्याने । पचाद्यच् । स्मर्यतेऽनेनवा । पुंसि संज्ञायाम् घ ॥ अन्तःकरणधर्मे स्मरणाख्ये ॥ स्मरणम् । भावे घञ् ॥

स्मरकूपक । पु॰ भगे । स्मरागारे । योनौ ॥

स्मरगृहम् । न॰ भगे । स्त्रीचिह्ने ॥

स्मरचक्र । पु॰ रतिबन्धविशेषे ॥ यथा । धृत्वाथामकरेणाङ्घ्रिपद्मद्वयोपरिस्थितम् । हठस्मरतेक्का मे स्मरचक्रं प्रकीर्त्तितम् ।

स्मरच्छत्रम् न॰ योनौ ।

स्मरणम् । न॰ चिन्तायाम् । स्मृतौ ॥ आध्याने ॥ स्मृ चिन्तायाम् । ल्युट ॥ अलङ्कारविशेषे ॥ यथा । यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः । स्मरणम् ० य पदार्थः केनचिदाकारेण नियतो यदा कदाचिदनुभूतोऽभूत् । स कालान्तरे स्मृतिप्रबोधाधायिनि॰ तत्समानेष्व वस्तुनि दृष्टे सति यत् तस्य अर्थस्य वैतद्वेत् स्मरणम् । उदाहरणम् । निमग्नाभिकुहरेषु यदम्भसा प्लावितं चलदृशां लहरीभिः । तद्व्यकुहरैः सुरताय स्मारिता सुरतकण्ठरुतानाम् ॥ यथा वा । करतुङ्गाहितजलोदा॰ यथामुखीविसिन्धाधरपुटस्य । सम्भरिस्मपद्मजस्य स्मरणमहकृष्णसरोरुहस्य । अपरस्तत यथा । करयुगपरीतयशोदास्तनमुखविनिवेशिताधरपुटस्य । स्मृतपाद्मजन्म जनमत्वकृष्णस्य रोमाञ्चमिति ॥

स्मरणापत्यतर्पक । पुं॰ कच्छपे ॥

स्मरदशा । स्त्री॰ कामावस्थायाम् ॥ सादृश्यविधा यथा । नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः । निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः ॥ उन्मादो मूर्च्छा मृतिरित्येता स्मरदशा दशैव स्युरिति ॥

स्मरदायी । त्रि॰ कामे ह्लादकी ॥

स्मरध्वज । पु॰ वाद्य । शिश्ने ॥ न॰ योनौ ।

स्मरभूजा । स्त्री॰ ज्योत्स्नायाराणौ ॥

स्मरप्रिया । स्त्री॰ कामपत्न्याम् । रतौ ॥

स्मरमन्दिरम् । न॰ भगे । योनौ ॥

स्मरलेखनी । स्त्री॰ शारिकापक्षिणि ॥

स्मरवल्लभ । पु॰ अनिरुद्धे ॥

स्मरवीथिका । स्त्री॰ वेश्यायाम् ॥

स्मरवृद्धि । स्त्री॰ कामवृद्ध्याख्यौषधौ । मदनायुधे ॥ स्मरवृद्धिवर्या ॥

स्मरसख । पु॰ वसन्ते ॥ कामोद्दीपकत्वात् ॥ स्मरसखा । टच ॥

स्मरसह । त्रि॰ कामोद्दीपके ॥ सहते । सह॰ । पचाद्यच् । स्मरस्य सहः ॥

स्मरस्तम्भ । पु॰ उपस्थे । मेढ्रे ॥ स्मरस्य स्तम्भ इव स्तम्भः ॥

स्मरस्मर्य्य । पु॰ गर्दभे ॥

स्मरहर । पु॰ शिवे । स्मरं हरति । हरतेरनुद्यमनेऽच ॥

स्मरागारम् । न॰ भगे ॥

स्मराङ्कुश । पुं॰ कररुहे । नखे ॥

स्मराम्र । पु॰ राजाम्रे ॥

स्मरासव । पु॰ लालायाम् । मुखसुरे । मद्यप्रभेदे ॥

स्मरेष्ट । पुं॰ आम्रे ॥

स्मर्त्तव्य । त्रि॰ स्मरणीये । यथा । स्मर्त्तव्यः सततं विष्णुर्विस्मर्त्तव्यो न जातु चित् । सर्वे विधिनिषेधाः स्युरेतयोरेव किङ्कराः ॥

स्माय । पु॰ गूढहसिते ॥

स्मारक । त्रि॰ स्मरणकारके ॥

स्मार्त्त । त्रि॰ स्मृतिशास्त्रविदि । स्मृतिविहिते । स्मृतिसम्बन्धिनि ॥ न॰ स्मृतिशास्त्रोक्तकर्म्मणि । यथा । श्रौतं कर्म्म स्वयं कुर्य्यादन्योऽपि स्मार्त्तमाचरेत् । अशक्तौ श्रौतमप्यन्यः कुर्य्यादाचारमन्ततः ॥

स्मार्त्तयज्ञ । पु॰ यज्ञविशेषे ॥ स च तुर्विधो यथा । देवयज्ञः पितृयज्ञो भूतयज्ञस्तथैव च । मनुष्ययज्ञस्त्वेव स्मार्त्तयज्ञश्चतुर्विधः ॥

स्मितम् । न॰ ईषद्धास्ये ॥ तल्लक्षणं यथा । ईषद्विकसितैर्दन्तैः कटाक्षैः सौष्ठवान्वितम् । अलक्षितद्विजद्वारमुत्तमानां स्मितं भवेदिति ॥ ष्मिङ् ईषद्धसने । भावे क्तः ॥ त्रि॰ विकसिते ॥

स्मितदृक् । त्रि॰ स्मेराक्षे ॥

स्मृत । त्रि॰ स्मृतिविषये । कृतस्मरणे ॥ यथा । आब्दिके पितृकार्य्ये च मासश्चान्द्रमसः स्मृतः । विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः ॥

स्मृति । स्त्री॰ धर्म्मसंहितायाम् । मन्वादिप्रणीतधर्म्मशास्त्रे ॥ स्मर्य्यते धर्म्मानुष्ठानप्रकारोऽनया । स्मृ चिन्तायाम् । स्त्रियाम् क्तिन् । वेदार्थं स्मृत्वा पूर्व्वं रचितत्वाद्वा ॥ शास्त्रमार्गे । स्मर्य्यते वेदमनयेति स्मृतिः ॥ महर्षिभिर्वेदार्थस्मरणात् स्मृतिः । तद्योगादन्योऽपि स्मृतिः ॥ स्मरणे । कर्त्तव्यानुसन्धा

मे ॥ धिर्यि । इच्छायाम ॥ अनुभूतविषयज्ञाने । ज्ञान्याश्रितक्रियाजन्यसंस्कारजन्यज्ञानं स्मृतिरिति रसमञ्जरी । ज्ञाताचार्योपदिष्टार्थानुसन्धाने । अनुभवान्यसंस्कारजन्यज्ञाने । यथा । विभुर्दृष्ट्वा द्विगुणयानं बुद्धिस्तु द्विविधा मता । अनुभूति स्मृतिश्चाद्यानुभूतिश्चतुर्विधेतिभाषापरिच्छेद ॥ सा स्मृतिर्द्विधा । यथार्था च अयथार्था च । तत्र प्रमाजन्या यथार्था अप्रमाजन्याऽयथार्था ॥ अनुभूतविषयाऽसम्प्रमोषप्रत्यये ॥ पूर्वानुभवसंस्कारजज्ञाने । चिरानुभूतार्थस्मरणशक्तौ । एतज्जन्मनि पूर्वानुभूतार्थविषयायावृत्तौ ॥ योगिनां तु जन्मान्तरानुभूतार्थविषयापि स्मृतिर्भवति ॥ अनुभूतप्रियादीनामर्थानां चिन्तनं स्मृतिः । तत्र आस्य कार्श्यं श्वासाश्रुनिःश्वसिता इव । तत्पर्याया । चिन्ता । आध्यानम् । चिन्तिया । ध्यानम् । स्मरणम् । अर्त्ति । स्मरणम् स्मृ ध्याने । क्तिन् ॥

स्मृतिमान् । त्रि॰ पूर्वानुभूतार्थविस्मरणशीले । स्मृतिविशिष्टे । स्मृतिरस्यास्तीति वा । मतुप् ॥

स्मृतिविभ्रम । पुं॰ स्मृतेर्विभ्रमे ॥

स्मृतिविरुद्ध । त्रि॰ धर्मशास्त्रविपरीते ॥ यथा कूर्मपुराणे हिमालयप्रतिदेशवाक्यम् । यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन् विविधानि च । श्रुतिस्मृतिविरुद्धानि निष्ठा तेषां तु तामसी ॥ कापालं भैरवं चैव यामलं वाममार्हतम् । एवमादीनि चान्यानि मोहनार्थानि तानि वै ॥ मया सृष्टानि चान्यानि मोहायैषां भवार्णवे॰ कूर्मे । लोकप्रवृत्तिकारोपि कानिचित्कथितानि वेदमार्गनिवर्त्तनम् ॥

स्मृतिशास्त्रम् । न॰ धर्मसंहितायाम् ॥

स्मृतिहेतु । पुं॰ स्मरणबीजे । वासनायाम् । संस्कारे । भावनायाम् ॥

स्मेर । पुं॰ प्रकाशे । त्रि॰ प्रकाशयुक्ते ॥ ईषद्धसनशीले ॥ स्मयते स्मिङ् ईषद्धसने । नमिकम्पिस्म्यजसकमहिंसदीपो रः

स्मेरास्य । त्रि॰ स्मितमुखे ॥

स्यद । पुं॰ जवे । वेगे ॥ सवेगगतिवचनेऽसत्यप्रयोग स्यन्दतेऽनेन । स्यन्दू प्रस्रवणे । स्यदो जवे इति घञन्तो निपातित ॥ वेगाख्यगुणे ॥

स्यन्द । पुं॰ स्यन्दने ॥

स्यन्दन । पुं॰ तिनिशवृक्षे । नेमि

नि । रथद्रौ । पतिसुतकी ॥ पतौ तक्षण्याऽश्व्र्हदे ॥ न॰ स्तुतौ । व र्षा ॥ नीरे । सलिले ॥ पु॰ न॰ रथे ॥ त्रि॰ स्रवणे ॥ स्यन्दते स्य न्द॰ । बहुलमन्यत्रापीतियुच् । स्यन्दनशब्दार्थद्रव्यमकाद्युच॰ ॥ तिवायुच् ॥ यद्वा । स्यन्दते॰ प्रवर्तते । स यन्द॰ । नन्द्यादि ल्याल्युः ॥

स्यन्दनद्रुम । पु॰ तिनिशवृक्षे ॥

स्यन्दनारोह । पु॰ रथिनि । रथा रूढेयोद्धरि ॥ स्यन्दनमारोहय ति । रुह॰ । कर्मण्यण् ॥

स्यन्दनाह्वय । पु॰ तिनिशे । ति न्दके ॥ स्यन्दनमाह्वयोयस्यस

स्यन्दिनि । पु॰ तिनिशद्रुमे ॥

स्यन्दनिका । स्त्री॰ क्षुद्रनद्याम् ॥

स्यन्दनी । स्त्री॰ लालायाम् । मूत्र नाड्याम् ॥

स्यन्दी । त्रि॰ स्रवणशीले ॥

स्यन्दनी । स्त्री॰ लालायाम् ॥ प्र श्र स्यन्दते । स्यन्द॰ । पावश्यके तिणिनि ॥

स्यन्न । त्रि॰ स्रवितजलादौ ॥ स्यन्दते स्र । स्यन्द॰ । क्त । रदाभ्यामि तिनत्वम् ॥

स्यम् । त्रि॰ स्तुते । रौणे ॥

स्यमन्तक । पु॰ श्रीकृष्णाकण्ठस्थमणौ । मणि स्यमन्तकोहस्तेभ्रुजमथ्य

तुकौस्तुभद्युतिहिमचन्द्र॰ ॥ सौरभा द्रुपदीयवतुर्थ्यांचन्द्रदर्शनैस्यमन्त कोपाख्यानश्रुत्वावक्ष्यमाणमन्त्रेणा भिमन्त्रितजलंपिबेत् । मन्त्रस्तु । सिंहः प्रसेनमवधीत्सिंहोजाम्व वताहत । सुकुमारकमारोदी स्तवह्येषस्यमन्तकइति ॥

स्यमीक । पु॰ मुनिविशेषे ॥ पा दपे । वर्षे ॥ नाकौ । वल्मीके ॥ स्यमति । स्यम् शब्दे । स्यमी रीटचेतिकन् ॥

स्यमीका । स्त्री॰ नीलिकायाम् ॥

स्याद्वादी । पु॰ जिने ॥

स्याल । पु॰ पत्नीभ्रातरि । श्याले ॥ स्यामयति । स्यमवितर्के पृषो दि । पञ्चपृषोदरादि ॥

स्यूत । पु॰ प्रसेवे । वस्त्रग्रथनादि निर्मितेर्थलादृतिख्याते ॥ त्रि॰ ग्र थिते । प्रोते । ग्रुना॰ द्र॰ भा॰ ॥ क्तसीवने । सीव्यतिस्म । षिवु तन्तुसन्ताने । क्त । च्छ्वोःशूडूठ । य णादेश ॥

स्यूति । स्त्री॰ स्च्यादिनावस्त्रा दिसीवने । सेवने । सीवना॰ द्र॰ भा॰ प्र॰ ॥ षिवे क्तिन् । ऊठ । सन्ततौ ॥

स्यून । पु॰ किरणे ॥ सूर्य्ये ॥ प्रौतकटे ॥ सीव्यतेऽनेनवा । षि वु॰ । सिविद्र्यूचेतिन । दीर्घो

स्वारणसामध्यास्तुण ॥

स्यूम । पुं॰ किरणे ॥ सूत्रतन्तौ । सौव्यतिषिव् ॥ । अविसिविसिस्युषिभ्य किदितिमन् । ज्वरत्वरेत्यूठ् ॥

स्यूगभा । स्त्री॰ सागमापत्येषु ॥ यथा । अर्जुनस्य हनेमायामिषेशाया भिखरिडन । सौदृक्तिमम गाभामिमागमा स्योगभाब्रवीति ॥ सागमाकर्णं टोपोऽमात दपत्यामि- स्योगभा ॥

स्योगवि : । पु॰ कर्माटपूर्वे ॥ कुबीरात्स्योग विरितिथिमायडशी घ ॥

स्योत । वि॰ स्यूते ॥

स्योन । पुं॰ किरणे ॥ सूर्ये ॥ सौनकटि । सौव्यति । षिव् । बाहुलकान्न । वस्वठ् । अन्तरङ्गत्वाद्यण् । गुणश्च ॥ न॰ आनन्दे । वि॰ समीचीने । सुखकारिणि ॥

स्योनाक । पुं॰ श्योनाके । पर्याये ॥ स्योनेनातति॰ अतसत वा॰ । अक॰ । प्रवादम्॰ घञ्वा ॥

स्रंसनम् । न॰ अर्द्धगतदोषस्याधोनयने । अधः पतने ॥ स्रंसि

स्रंसी । पु॰ पीलुवृक्षे ॥ स्रंसयतिमलम । अधःपतने । आवश्यकेणिनि

स्रंसनीफल । पु॰ भण्डीरे । शिरीषवृक्षे ॥

स्रक् । स्त्री॰ मालायां ॥

स्रक्सुगन्ध । पु॰ भूमिचम्पकाम् ॥

स्रग्धरा । स्त्री॰ प्रकृतिच्छन्द २१ प्रभेदे ॥ तल्लक्षण यथा । म्रभ्नै र्यानांत्रयेणत्रिमुनियतियुतास्रग्धरा कीर्त्तितेयम ॥ यथावा । कर्णं ताटङ्कयुक्त वलयमपिसुवर्णं स्वमञ्जीरयुग्म पुष्प गन्ध वस्त्रौ हिजवरकथितान पुरस्त्रयुक्तान्भक्त्याद दधाना सुललितरसनारूपवत्कुण्डलाभ्यां मुग्धाश्रीयानचित तरलयति वलान् स्रग्धराकामिनीव ॥ यथा । भ स्मप्रोताक्षिमालावलयितविलसत्बाहुदण्डप्रचण्डाधिगत्याशिलास्मुण्डावलिश्वलितरणत्कारकण्ठोपकण्ठ । कुर्वन्योगं मत्युद्गतगहनचलद्धर्घरध्वानसुचक्रे त्वत्पुत्रे समाधैर्विदधतिगुणिनः । कान्दु कन्नोडितानि ॥

स्रग्विणी । स्त्री॰ जगतीच्छन्द १२ प्रभेदे ॥ तल्लक्षण यथा । कीर्त्तितैषाचतूरेफिकास्रग्विणी । यथा वृन्दतोशी प्रवीनयानि मिंताश्चात कुन्दशीवल्लताशोभती । मध्यमेघ

ऽपि पीतवासाहरेर्मूर्त्तिराव सांवय्यौरसिस्रग्विणी ॥ माला व्याम् ॥

स्रग्वी । पु॰ भूतवन्याच्छन्दपादे ज यन्ययायासज विश्राम छन्दौ ॥ त्रि॰ कुसुममालाधारिणि ॥ स्रगस्य सैऽस्य । अस्मायामेधास्रजोविनि रिति विनि ॥

स्रज्स्‌ । स्त्री॰ मूर्द्धन्यस्तपुष्प दामनि ॥ माल्ये ॥ सृज्यते॰ सृज्यतेवा । सृजविसर्गे । ऋत्वि गिष्यादिना॰ कर्म्मणि॰ कर्त्तरि वाक्विन्॰ अमागमश्च । कुत्वम् ॥ अतिशक्वरीछन्द १५ प्रभेदे । तल्लक्षणं यथा । स्रगियमभिधर सनवरचितयति । यथा । ध यिसहचरि॰ रुचिरतरगुणमयीस्र ग्दिमवपतिरनपगतपरिमला । स गिवनिहसविलसनुपमरसासुमुखि मुदितदनुजदलनहृदये ॥

सृज्वा पु॰ प्रजापतौ ॥ पटसक्तवे ॥ रज्जौ ॥

स्रव । पु॰ स्रवे ॥ स्रवणम् । सुगतौ । ऋदोरप् ॥ वारिप्रवाहे । यथा हरिमचन्द्र । निर्झरस्रुमार . स रि । तत्र . सव प्रस्रवण मिति ॥

स्रवण्यम् । न॰ सच्छिद्रद्रुते . अग्नै ' अनेकत्तनिर्गमे । वरणे ॥ स्रु॰ । स्फुट् ॥ मूत्रे ॥

स्रवत्तोया । स्त्री॰ रुदन्त्यां ॥

स्रवद्गर्भा । स्त्री॰ पतितगर्भायाङ्गवि । अवतोकायाम ॥ पतितगर्भाया म् ॥ स्रवन् गर्भोयस्याः ॥

स्रवद्रङ्ग । पु॰ पण्यवन्ध्यौ । हाट॰ ब जार॰ इ॰ भा॰ प्र॰ ॥

स्रवन्ती । स्त्री॰ नद्याम् ॥ सिरिति । नि म्नगायाम् ॥ स्रवति । स्रु॰ । श ट मद । उगितश्चेतिङीप् । श प श्यनेरितिनुम् ॥ शुल्मस्थाने ॥ औषधिभेदे ॥ अरन्याम् ॥

स्रवा । स्त्री॰ मूर्वायाम् । मुरहरा॰ इ॰ भा॰ प्र ॥ स्रवति । स्रु॰ । अच् । सुगत्यादेशो । टाप । जौ वन्त्याभोषधौ ॥ जीवन्याम् ॥

स्रष्टा । पु॰ प्रजापतौ । निर्म्मातरि । वेधसि । ब्रह्मौ । शिवे ॥ विष्णौ ॥ सृजति । सृजविसर्गे । तृच् । सृजिदृशोरित्यम ।

स्रस्त । त्रि॰ च्युते ॥ स्रस्तेस्म । स्रु सुध्वंसु सने । गत्यर्थाकर्म्मकेति कर्त्तरिक्त . ।

स्रस्तम् । न॰ च्युते ॥

स्रस्तर पु॰ न॰ वीरवाक टे । पल्ल वादिशय्ये ॥ पुं॰ कुशमुष्टौ ॥

स्राक् । अ॰ द्रुते । झटित्यर्थे ॥ स्र पाके । सम्पदादित्वात्क्विप् । स्रा मकति । वक्रकुटिलायाम्गतौ ।

क्विप् ॥

स्राम । वि॰ एकनेत्रे । यस्यसद्याच्च नासिकायास्रवतितस्मिन ॥

स्राव । पु॰ क्षरणे । आगर्भाधाना चतुर्थमासपर्यन्त गर्भस्यक्षरणे ॥

स्रावकम् । न॰ मरीचे ।

स्रावणी । स्त्री॰ ऋद्धिवृद्धे ॥

स्रावित । त्रि॰ गालिते ॥

स्रुग्दारु । न॰ व्याघ्रपादवृक्षे । विक ङ्कते ॥

स्रुघ्न । पु॰ नागराख्ये॰ नगरे । तदुपान्तदेशे । मथुरायामिव॰ मथुरावत्स्रुघ्ने प्राकाराकृतिकौमुदी ॥

स्रुघ्नी । स्त्री॰ सर्जिकाक्षारे ॥

स्रुक्॰ग् । स्त्री॰ खादिरेयज्ञपात्र विशेषे । तद्भेदायथा । पूर्वाप्रभृत्यु र्व्वीतुस्रुवौभेदा स्रुव विवस्त्यमर. । तत्पट्टपत्राकृतिर्ध्रुवा । उपभृच्चन्द्राकारा । जुहूरर्द्धचन्द्रा कृति । वैकङ्कतीध्रुवाप्रोक्ता आश्वत्थीचोपभृन्मता । जुहू. प लाशकाष्ठस्तुखादिरस्स्रुवोमत. ॥ स्रुवादिकन्तुयज्ञादौपात्रमित्यभि- धीयते । स्रुव॰ पुमानेकहस्तोवा हुमात्रात्स्रुगीरिता । तद्विशेषा यथायथा स्त्रीत्वक्रूपभद्भुवे तिमध्द्रत्नावली । स्रवतिघृतादि कम् । स्रुस्रवणेस्रुव॰ क्विप्वचि॰ इतिक्विप्प्रत्यय . ऊकारश्चारया

र्थः । कहूत् । कुत्वम् ॥

स्रुतः । त्रि॰ क्षरितजलादौ । स्रे । गतौ । च्युते । स्रुयतेस्म । स्रुगतौ । क्त

स्रुता । स्त्री॰ हिङ्गुपत्र्याम् ॥

स्रुव । पु॰ यज्ञपात्रविशेषे । स्रु चि ॥ स्रवति । स्रु॰ । अच । संज्ञापूर्वकत्वान्नगुण । उव ङ् ॥ यद्वा । स्रवतिघृतादिकम । स्रुवस्रुवर्णे । स्रुव क. ।

स्रुवा । स्त्री॰ होमपात्रान्तरे । स्रुचि ॥ मूर्वायाम् ॥ शल्लक्याम् ॥ टाप् ॥

स्रुवावृक्ष । पु॰ विकङ्कते । स्वा दुकण्टके ॥ स्रुवायावृक्ष ॥

स्रू । स्त्री॰ होमपात्रविशेषे । यज्ञोपकरणे ॥ स्रवे । निर्झरे । स्रवन्तीघृतादिकम् । स्रुस्रवसे । क्विप्वचिप्रच्छिश्रिस्रुद्रुकटप्रज्वादी र्घोऽसम्प्रसारणञ्चेतिक्विप्दीर्घौ ।

स्रोतम् । न॰ स्रोतसि ॥

स्रोतईश । पु॰ समुद्रे । स्रोत सामीश ॥

स्रोत । न॰ जलनिःसरणे । प्र वाहे । वेगेनचलज्जले ॥ इन्द्रि ये ॥ शरीरस्थनवच्छिद्रेषु ॥ स्र वति । स्रुगतौ । स्रुरीभ्यांतु ट्चेत्यसुन्॰ तुडागमश्च ॥

स्रोतस्वती । स्त्री॰ नदीमार्गसरि

ति । ङीपवत्याम् । स्रोतांसि सन्त्य
स्याः । तदस्यास्तीति मतुप् । मा
दुपधायाश्चेति वत्वम् । उगितश्चे
ति ङीप् ॥

स्रोतस्विनी । स्त्री० सरिति । स्रो
तांसि सन्त्यस्याः । अस्मायामेधा
स्रजो विनिः । मान्तत्वान्न लोपः ॥

स्रोतोऽञ्जनम् । न० सौवीरे । कापो
ताञ्जने । यामुने । अथ लक्ष
णादयो यथा । तत्र स्रोतोऽञ्जनं ल
क्ष्म सौवीरञ्च तमीरितम् । वल्मी
कशिखराकारं भिन्नमञ्जनसन्निभम्
। घृष्टन्तु गैरिकाकारमेतत् स्रोतो
ञ्जनमुत्तमम् । स्रोतोञ्जनसमं ज्ञेय
सौवीरं तत्तु पाण्डुरम् । स्रोतो
ञ्जनं स्मृतं स्वादु चक्षुष्यं कफपित्तनुत्
। कषायं लेखनं स्निग्धं ग्राहि छर्दि
विषापहम् । हिध्माक्षयास्रहृच्छी
तसेवनीयं सदा बुधैः । स्रोतोञ्ज
नगुणाः सर्वे सौवीरेऽपि मता बुधैः
॥ किन्त्वेतयोरञ्जनयोर्मध्ये ह स्रोतोञ्ज
नमुत्तमम् ॥ इति भावप्रकाशः
स्रोतोऽञ्जनन्तु तद्विद्यादञ्जना-
भ पदञ्जनमिति मदनपालः ॥ अपि
च । स्रोतोञ्जनमतश्रेष्ठं विशुद्धं सि
न्धुसम्भवम् । इष्टेः काण्डमलं
रक्तं हृक्केदृग्जोपहम् ॥ यथाऽक्ष
पापक्षयहतेमाक्लान्तपो । नैव
रोगानजायन्ते तस्मादञ्जनमाचरेत्

स्रोतोञ्जनं तथा सुरमेति प्रसिद्धम् ॥
अञ्ज्यते नयनमनेन चक्षुष्यत्वात् ।
अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु । क
रणे ल्युट् । स्रोतसोऽञ्जनं स्रोतो
ञ्जनम् ॥

स्रोतोभेदक । पु० प्रवहज्जलानां सि
तुभेदादिनाद्विधान्तरमिति ॥

स्रोतोवहा । स्त्री० नद्याम् ॥

स्र . सिन्धु । स्त्री० गङ्गायाम् ॥

स्व । पु० आत्मनि ॥ ज्ञातौ । पुं०
न० धने ॥ न० द्वितीयभवने ।
त्रि० आत्मीये ॥ स्वनति । स्वनश
ब्दे अन्येभ्योपीति ड ॥

स्वक । त्रि० स्वीये । आत्मीये ॥

स्वकम्पन । पु० वायौ ॥

स्वकर्मकृत् । त्रि० निजकार्यक
र्त्तरि ॥

स्वकीय । त्रि० आत्मसम्बन्धिनि ।
स्वीये । निजे । आत्मीये ॥ स्वस्ये
दम् गहादित्वाच्छ इति छ कु
गागमश्च ॥

स्वकुलक्षय । पु० मत्स्ये ॥ निजव
शनाशे ॥ त्रि० तत्कर्त्तरि० तद्विशि
ष्टे च ॥

स्वगतम् । न० मनोगते ॥ त्रि० आ
त्मप्राप्ते ॥ आत्मनोगते ॥

स्वगुप्ता । स्त्री० आत्मगुप्तायाम् । शू
कशिम्ब्याम् ॥ लज्जालौ ॥

स्वगृह । पु० कलिङ्कारपक्षिणि ॥

। पु॰ न॰ निजात्मवे

स्वङ्ग । वि॰ सुरूपे । सुन्दराङ्गवि शिष्टे । सिंहसहनने श्रीमभा जि आक्तौ शात्वधमश्वलक्षितान्यङ्गान्य स्य ॥ न॰ शोभनावयवे ॥

स्वच्छ । पु॰ स्फटिके ॥ न॰ मौ क्तिके ॥ वि॰ प्रकाश्यगुणदोषस स्वस्वशुभ्रेपरमात्मनि ॥ निर्मले ॥ यथा । आसनबसनपात्रशय्या या ननिकेतनम् । गृहस्थानस्तुमातस्य स्वच्छ तृस्वच्छत्र यत्नतीङ्कतिक्रमेमिश न्ये ॥

स्वच्छटी । स्त्री॰ अङ्गुलिमोटने । अ ङ्गुलिसन्देशे ॥

स्वच्छन्द । वि॰ स्वतन्त्र । स्वतन्त्रो भावत स्वैरीस्वच्छन्दोनिरवग्रह्ह स्थमर ॥ स्व आत्मा छन्दोऽभि प्रायोऽस्य ॥

स्वच्छन्दचारी । वि॰ स्वच्छन्द वि हरणशीले ॥

स्वच्छपत्रम् । न॰ अभ्रके ॥ स्वच्छस्य तत्पत्रश्च ॥

स्वच्छमणि । पु॰ स्फटिके ॥

स्वच्छवालुकम् । न॰ विमलोपरसे । निर्मले ॥

स्वच्छा । स्त्री॰ श्वेतदूर्वायां

स्वज । पु॰ सर्प्पे ॥ पुत्रे ॥ न॰ रक्ते ॥ वि॰ आत्मजाते ॥

स्वजन । पु॰ ज्ञातौ । सगोत्रे ॥ सुखात्मीयसासौजनश्च । आत्मी येबन्धुवर्गे ॥ आश्रितश्चाश्रवाहौ ॥

स्वजा । स्त्री॰ कन्यायाम् ॥

स्वतन्त्र । वि॰ स्वच्छन्दे । निरव ग्रहे ॥ यथा । सभयादभय प्राप्तस्त दर्थं यततेऽथ । सपुन सभयं गन्तु स्वतन्त्रश्च प्रशोच्यमीति ॥ न॰ अन्यतन्त्रानपेक्षे । तन्त्रविशेषे । स्वकोपभावे ॥

स्वतन्त्रपक्ष । पु॰ व्यासादिमुःस्मृ त्यविरुद्ध तदेकपोधपर्यालोचनया श्रुतितग्रादिश्रुत्यर्थप्रतिपक्षसम र्थ स्विकल्प ॥

स्वत । अ॰ आत्मनश्चत्यर्थे ॥

स्वत्वम् । न॰ शास्त्रसम्मतयथेष्टविनि योगार्हत्वे । स्वसम्पदार्थविशेषप्रदा र्थे ॥

स्वदनम् । न॰ अशने ॥ आस्वादे ॥ लेहे ॥

स्वदृष्टान्त । पु॰ स्वरघें । स्व स्त्री य दृष्टान्तोयस्य ॥

स्वधर्म । पु॰ स्ववर्णाश्रमोक्ताचा रे ॥ यं वर्णमाश्रम वाप्नतियोविहि त स्वधर्म ॥ स्व स्वकीयो धर्म्म ॥

स्वधा । अ॰ पितृभ्योदीयमानेऽन्ने । पितृणामन्ने ॥ पितृदाने । यथा । पितृणांसुरपतीयम् निभिर्मनु भिर्मरे । पूजितापितृदानेषुनिनि

यथाक्रमयथाविभीतिभागवतम् ॥ पिव्यदानमन्ने । देवहविर्दाने । यथा स्वाहादेवहविर्दानेश्रौषट्वौषट्वषट्स्वधेत्यमरः । अथपितरोदेवता हूतिमत्तैस्तंपिदेवा ॥ स्वमात्मा नश्रीरंपोषयतीतिस्वधा ॥ स्वधा पितृणामन्नमितिश्रुति ॥ देवपितृहविर्दाने । स्वधतेऽनेन । स्वद आस्वादने । आप्रत्यय । पृषोदरादित्वाद्धस्य ॥

स्वधा । स्त्री पितृदाने ॥ स्वधाऽस्त्यस्याम् । अच् । टाप । पितृपत्न्याम् ॥ स्वाभूधरीभूतिव्युत्पत्ते । नमः स्वधायैस्वाहायै० भूतिप्रयोगश्च ॥

स्वधाप्रिय । पु० कृष्णतिले ॥

स्वधाभुक् । पु० पितृगणे । द्विम पितरि ॥ देवे ॥

स्वधाम । न० स्वरूपविस्फुरणे ॥

स्वधायी पु० पितृषु ॥ स्वधागमनशीलः । सुप्यजातौणिनिस्ताच्छील्ये ॥

स्वधावाचनम् । न० श्राद्धेऽग्रयेकाल विशेषे ॥ यथा । अवनेमुक्त्वांत् कुतपाद्यानमुक्तंचतुष्टयम् । मुक्तंपञ्चकन्त्वेवस्वधावाचनमिष्यते ॥ कुतपादूर्ध्वंमुहूर्तंचतुष्टयं० मुहूर्तपञ्चकस्वकुतपात्पूर्वम्० अर्धादिनमुहूर्तंकुतपः ।

स्वधावोच्यतेऽस्य । अच० । अधिकरणेल्युट् ॥

स्वधिति । पु० स्त्री० कुठारे । यथा । द्वयोः कुठारः स्वधितिः परशुश्चपरश्वधः इत्यमर ॥ स्वं धिवति । धिधारणे । क्तिच् ॥ छेदनीयमात्मन्यधारयति ॥

स्वन । पु० शब्दे । निनादे । निनदे । ध्वनौ ॥ स्वननम् । स्वनशब्दे । स्वनत्सोमैतिपाणेऽप् ॥

स्वनक्र । पु० रतिबन्धविशेषे ॥ यथा । भुक्ताबाहुतथाकण्ठपादौ तोपरिचिर स्थित । गूढस्वकाम वेतुकामीस्वनचक्र प्रकीर्तितःइति रतिमञ्जरी ॥

स्वनित । वि० ध्वनिते ॥ न० गर्जिते । मेघशब्दे ॥ स्वन्यते स्म । स्वन० । क्त ॥

स्वनिताह्वय । पु० तण्डुलीयशाके । अल्पमारिषे ॥

स्वनुष्ठित । वि० सर्वाङ्गोपसंहारेण सम्पादिते ॥

स्वनोत्साह । पु० गण्डके ॥

स्वप । वि० स्वपनशीलत्वादे । सुभो इत्यें ॥

स्वपन । वि० निद्रामनुभवति ॥ स्वपिति । सिञ्चप० । नट यथा देश ॥

स्वपति । पुं० आत्मे ॥ निजभर्तरि ॥

स्वपनम् । न० निद्रायाम् । ञिष्वप् शये । ल्युट् ॥

स्वपिण्डा । स्त्री० पिण्डखर्ज्जूर्य्याम् ॥

स्वप्न । पु० निद्रायाम् । शयने । स्वपे ॥ प्रसुप्तस्य विज्ञाने । जाग्र द्वासनामये । जागरितसंस्कारज प्रत्यय सविषय स्वप्नदृश्यतानत्व यं जन्म कारणस्यार्द्धविकाशे यथा- । जाग्रदवस्थायां यद्दृष्टं यच्छ्रुत तज्ज नितवासनया निद्रासमये य प्रपञ्चो यत्प्रतीयते सा स्वप्नावस्थेति वासु देवसरस्वती ॥ तथाच । वार्त्ति ककारेणाप्युक्तं जागरितवासना नुसारेण मनसस्तद्याभासाकाराव भासन स्वप्नशब्दितम् ॥ यथाह । इन्द्रियाणामुपरमे मनोऽनुपरतं य दि । सेवते विषयानेव तद्विद्यात् स्व प्नदर्शनमिति । सच सप्तविधो यथा । दृष्ट. श्रुतोऽनुभूतश्च प्रार्थितः कल्पितस्तथा । भाविको दोषजश्चे ति स्वप्न सप्तविध. स्मृतश्चेति ॥ स्वप्नजाग्रदादिकल्पनया तस्य त्रैवि ध्यमाह । स्पष्टस्मृतिरथास्पष्टस्मृ तिरस्मृतिरित्यमी । स्वप्नभेदा. । स्वप्नमध्ये जाग्रत्स्वप्नसुषुप्तयइति ॥ तस्य तृतीयं स्वप्नस्थानमिति श्रुतिः ॥ स्वपितव्येन । ञिष्वप् शये । वृहक्ष्विद्रुपन्य निस्वपिभ्यो निदिति नङ् ॥ स्वप्नोऽन्यथाग्रहणं सर्पादेर रज्ज्वामिति भाष्यम् । यथा रज्ज्वां सर्पोऽग्रहमाणोऽन्यथाग्रहणं । तथा त्मनि देहादिग्रहणमन्यथाग्रहणम् । आत्मनो देहादिवैलक्षण्यस्य श्रुति युक्तिसिद्धत्वात् ॥ अन्यथाग्रहणत स्वप्नो निद्रातत्त्वमजानत । विपर्या सेतयोः क्षीणे तुरीय पदमश्नुते ॥

स्वप्नकृत् । पु० सुनिषण्णके ॥ जीवे ।

स्वप्नक् । त्रि० शयालौ । निद्रा शीले । स्वप्नशील । ञिष्वप् । स्वपितृषोर्नजिङ् ॥

स्वप्नदृक् । पुं० जीवे । स्वप्नं पश्यति । दृशिर० । क्विप् ॥

स्वप्नस्थान । पु० तैजसे । स्थूल प्रपञ्चलयस्थानस्वप्नव्यष्ट्युपहितचैत न्ये । स्वप्न स्थानमस्य ॥

स्वप्नान्त । पु० स्वप्नमध्ये । स्व प्नविक्षेपे ॥ सुषुप्तिस्थाने । स्व प्नस्यान्तोऽवसानं यस्मिन् ॥

स्वप्रकाश । पुं० अन्यानपेक्षप्रका शे । चन्द्रसूर्य्यादिप्रकाशनिरपेक्षे । स्वयमेव भासमाने ब्रह्मणि । दृश्यानां जडानां बुद्ध्यादीनां दर्शनं स्वप्रका शद्रष्टारं विना न घटते । यथोक्तं च श्रीधरस्वामिभिः । न प्रकाशैरमिथ्यु स्थितं त्प्रकाशैकसंबंधना । स्वप्रका शं तमात्मानमप्रकाशः कथं स्पृशे दिति । स्वेनात्मनैव प्रकाशते । काशृ दीप्तौ । पचाद्यच् ॥

स्वप्रमाणकः । वि० स्वतःसिद्धे ॥

स्वभाव । पु० सहजधर्मविशेषे । संसिद्धौ । प्रकृतौ । स्वरूपे । निसर्गे । स्वभावश्चान्तरः कश्चिद्येन सदाऽसदासदसद्वा कर्म निष्पद्यते । जन्मान्तरकृतधर्माधर्मादिशुभाशुभसंस्कारे । इदानीन्तनजन्मारम्भे प्राक्तनसंस्कारे ॥ स च सात्त्विकादिभेदात्त्रिविध अनाद्यविद्यायाम् ॥ अतएवाविर्भावे ॥ यथा । वह्निर्दहत्यनपेक्षौ तु स्वभावोऽयं प्रकीर्तितः । निसर्गः स्वस्वरूपत्वं लोकेऽपि भवति द्विधा । निसर्गः सुदृढाभ्यासजन्यः संस्कार उच्यते । अन्यस्तु तत्सिद्धः स्वरूपभावः धूम्यतद्रूपसुज्ज्वलनोऽनमणि । स्वो भावः सत्ता यस्य सः स्वभावः अन्याधीनसत्ताकः ॥

स्वभावोक्ति । स्त्री० अर्थालङ्कारविशेषे । यथा । स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम् । अयोस्तदेकाश्रययोः रूपवर्णं सस्य नष्ट । उदाहरणम् । पश्चादङ्घ्रीप्रसार्य्य त्रिकनतिविततं द्राघयित्वाङ्गमुच्चैरासज्याभुग्नकण्ठो मुखमुरसि सटां धूलिधूम्रां विधूय । घासग्रासाभिलाषादनवरतचलत्प्रोथतुण्डस्तुरङ्गो मन्दं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेणेति ॥ स्वभावो

क्तिरलङ्कारो यथावस्तुवर्णनमिति तद्व्याख्यानम् ।

स्वभू । पुं० विष्णौ । हरौ ॥ ब्रह्मणि । प्रजापतौ । परमेष्ठिनि । स्वतोभवति । भू क्विप् ॥

स्वमेक । पु० संवत्सरे ॥ यथा । स्वमेकमेकं वरदाहताभवतिस्म श्रिया । रुधिरेणोरगाश्च तर्पिता विधिवत् पैतिपुराणम ॥ स्वमेक संवत्सरीयव्योमाद्भूतिस्मृति ॥

स्वयंहारिका । स्त्री० स्त्रीविशेषे ॥

स्वयङ्कृत । त्रि० आत्मनाकृते ॥ स्वयङ्कृतेनेति तत्पुरुषः ॥

स्वयङ्गुप्ता । स्त्री० शूकशिम्ब्याम् ।

स्वयङ्ग्रह । पु० प्रार्थनाविनाग्रहणे ॥

स्वयन्दत्त । पु० द्वादशविधपुत्रान्तर्गतपुत्रविशेषे ॥ यथाहमनुः । मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् । आत्मानं स्पर्शयेद्यस्मै स्वयन्दत्तस्तु स स्मृत इति । आत्मानं स्वयं दत्ते० तवाहं पुत्रो भवामीति ० स्वयन्दत्त उपनत स्वयमागत इति यावत् ।

स्वयम् । अ० आत्मनेत्यर्थे । आप्० कू० भा० प्र० ॥ सुष्ठु अयते । अय गतौ । अम् ॥

स्वयमुपस्थित । त्रि० स्वयमागते ॥

स्वयम्प्रकाश । त्रि० स्वतः साधना

न्मिन्दिष्टतयाऽथ समाने ।

स्वयम्प्रा । त्रि॰ स्वयम्प्रकाशे स्व प्रभाप्रकाशिनि । पु॰ चतुर्थ मन्वन्तरे इन्द्रगणे चतुर्थाश्रति

स्वयम्भु । पु॰ विरिञ्चौ ॥ इतिशब्द पक्षे च ॥

स्वयम्भुवा । स्त्री॰ स्वपर्विणि । धूम्र पत्रायाम् ॥

स्वयम्भू । पु॰ चतुराननी । ब्रह्मणि । काले ॥ परमात्मनि । परमेश्वरे । परमात्मा हि स्वयं भवति स्वेच्छया शरीरपरिग्रहं करोति॰ नत्वितरजीववत्कर्माधीनदेह यद्वा । स्वयमेव स्वतन्त्रो भवतिसर्व्वदाऽपरत न्त्रोजनकरहितत्वात् । स्वयमेवभव ति । भुवक्विप् ॥ अनेकार्थे । जिने ॥ जिनचक्रवर्त्तिविशेषे । रुद्रतनये । माषपर्ण्याम् ॥

स्वयम्भू । स्त्री॰ माषपर्ण्याम् । लि ङ्ग्याम् । शृ॰ रा॰ नि॰ मट॰ ॥

स्वयम्वर पु॰ विवाहविशेषे । स्वय म्वरे । यत्र कन्यापरीक्षाकालस्वय मेतिकामिनीवरं तत्र । अभिधि धा॰ । स्वयम्वरस्तुविधिविधैविधिः परिकीर्त्तित । राज्ञां विवाहयोग्यो चैवनान्येषां कथितं किल ॥ शु ल्का स्वयम्वरश्चैकोद्वितीयश्चपणाभि ध । यथा राम सीताभङ्गैश्च्यम्बकस्य धराऽऽसनम् ८ तृतीय शौर्य्यशुल्कश

शूराणां परिकीर्त्तितम्बुधैः ॥ शौर्य्य शुल्कं शौर्य्यमेवशुल्कार्थचिह्नम् । यस्मिन्वीर्य्यवती॰ तेनसर्व्वान्राज्ञो जित्वा कन्या हरणीयेतिदेवीभाग वतेतृतीयस्कन्धे १८ऽध्याय ॥

स्वयम्वरा । स्त्री॰ स्वयं वरायाम् । स्वे च्छया कृतपतिवरणायाम् । पतिंवरायाम् । वर्य्यायाम् ॥ स्वयं वृणोतिपतिम् । वृञ् सम्भक्तौ । स त्राणांभक्तिविधाविसर्व्वतप्रि इमश्चुतिवप् ॥

स्व: । अ॰ प्रेत्य । परलोके ॥ स्वर्गे । नाके । त्रिदिवे । सुरलोके ॥ यथा । यन्नदुःखेनसम्भिन्नं नचग्रस्तमन न्तरम् । अभिलाषोपनीत यत्सुखन्तत् पदंस्व: ॥ आकाशे । नभसि । व्योम्नि । शोभने । सू ष्ट्यक्ष्योपतापयो: । सूयतेप्रेरयति॰ कृतिषु । अन्तर्भावितण्यर्थात्सूत न्धातोरेतत्प्रेरणार्थकात्। कर्म्मणि क्विप् ॥ य द्वा । सूयते॰ अपापनो॰ उपरता पयते॰ कृतिकर्त्तव्यत्वमितिक्विप् सं ज्ञायाम् ॥

सूर । पु॰ सूर्य्येऽर्के ॥ सूदासा सुदाससुरेशु । सूरति । सवत ष्टोपतापयो: । पचाद्यच् । सुरा अन्य दाढ्यस्त्वात् । उदासाद यो पि सुराउच्यन्ते । उभक्ष । उदा साद्यादुदासस्य सुरितसूराव्य ।

चतुर्थः प्रचयो नामोष्यतौसौछान्द
स स्मृत इति । उदात्तादिभिः स्व
यं राजन्त इति नागोज्युक्तेश्च । स्व
र इति कण्ठगतमाधुर्यमिति भगव
त्पूज्यपादाः ॥ श्रुत्यारम्भेऽनुरण
नः । तदुक्तम् । श्रुत्यनन्तरभावी
यः स्निग्धोऽनुरणनात्मकः । स्व
तो रञ्जयति श्रोतृचित्तं स स्वर उच्यत
इति ॥ शब्दे ध्वनौ ॥ यथा । करि
हयरथौघभेरीमृदङ्गसिंहाब्दनिस्व
नाभ्रूपा । गर्दभजर्जररूक्षस्वरा
श्च न सौख्यसत्त्वा इति ॥ नासा
समीरणे ॥ निषादादिसप्तसु ॥ ते
यथा । निषादर्षभगान्धारषड्जम
ध्यमधैवताः । पञ्चमश्चेत्यमी सप्त
तन्त्रीकण्ठोत्थिताः स्वराः ॥ च
षाड्गारद । षड्जं रौति मयूर
स्तु गावो नर्दन्ति चर्षभम् । अजा
विकौ च गान्धारं क्रौञ्चो नदति मध्य
मम् । पुष्पसाधारणे काले कोकि
लो रौति पञ्चमम् । अश्वस्तु धैवतं रौ
ति निषादं रौति कुञ्जर इति ॥ स्व
रोऽयं श्रुतिस्थानेषु स्वनन् हृदयरञ्जन
कृत्यन्ये च ॥

स्वरत । अ॰ स्वरितेत्यर्थे ॥ आद्या
दित्वात्तसिः ॥ यथा । दुष्टः श
ब्दः स्वरतो वर्णतो वेति ॥

स्वरपत्तनम् । न॰ सामवेदे ॥ इ॰
ति॰ शेष ॥

स्वरभङ्ग । पुं॰ गलरोगविशेषे ॥

स्वरभङ्गी । पु॰ पक्षिविशेषे ॥

स्वरभेद । पुं॰ स्वरभङ्गरोगे ॥

स्वरमण्डलिका । स्त्री॰ वीणाविशेषे ॥

स्वरलासिका । स्त्री॰ वंशाम ॥

स्वरस । पु॰ वस्त्रनिष्पीडितरसे ॥
यथा । अहतात्तत्क्षणाकृष्टाद्द्रव्या
त्क्षुण्णात्समुद्भवेत् । वस्त्रनिष्पीडि
तो यः स स्वरसो रस उच्यते ॥ अहतः
कीटाग्निशीतादिभिरनुपहत ॥
शिलापिष्टकल्के ॥ यथा । स्वेर
स स्वरस प्रोक्तः कल्कोऽयमपि
पिष्टितइति ॥ कषायविशेषे ॥ य
था । सद्यः समुद्धृताद् द्रव्याद्वस्त्र
न्नादिपीडनात् । यो रसस्त्वभिनि
र्यातिस्वरसः सम्प्रकीर्त्तितइति ॥
अपिच । पिष्टः कल्कोविनीयस्त्व
रस पीडितो रस । क्वाथ का
षायो निर्यूहो निर्यासो वैष्णवस्तथेति
रत्नमाला ॥

स्वरा । स्त्री॰ ब्रह्मणोज्येष्ठपत्न्याम् ।
गायत्रीसपत्न्याम् ॥

स्वरांश । पुं॰ सङ्गीतेस्वरस्यार्द्धपा
देवा ॥

स्वराट् । पुं॰ स्वतो भासमानेसवित
रि ॥ इन्द्रियानपेक्षतः सिसृक्षा
मेपरमेश्वरे ॥ स्वेन राजते । रा
जृदीप्तौ ॥ सत्सूद्विषेत्यादिना क्वि
प् ॥

स्वरापगा । स्त्री० मन्दाकिन्याम् ॥

स्वरालु । पुं० वचायाम् ॥

स्वरित : । पुं० मध्यस्वरे । उदात्तानुदात्तत्वे वर्णधर्मौ समाक्रियेते यस्मिन् तस्मिन्नपि ॥ शब्दनिष्ठधर्मविशेषे । स्वर . सन्तापे । क्तच् ॥

स्वरु . । पुं० शस्त्रे । शादिन्याम् । वज्रे ॥ यूपखण्डे । यूपितव्यमार्गे प्रथमपतितशकले ॥ यूपैकदेशप्रादेशमात्रकाष्ठे ॥ अध्वरे ॥ शरे । वाणे ॥ स्वरति० अर्यतेवा । स्वृ शब्दोपतापयोः । शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च- उः ॥

स्वरुचि : । त्रि० स्वच्छन्दे । स्वतन्त्रे ॥ स्त्रीस्वेच्छायाम् ॥

स्वरु : । पु० स्वरौ । वज्रे ॥ शोभनानि अरूंषि धारा यस्यासौ ॥

स्वरूपम् । न० स्वभावे । निसर्गे ॥ स्वस्वरूपम् । स्वमेव रूपं यस्य वा । परमानन्दप्रकाशात्मात्मन स्वरूपम् । येनधर्मेण यद्रूप्यते तेन तत्तस्य स्वरूपम् ॥ त्रि० प्राज्ञे । विदुषि ॥ मनोज्ञे ॥ प्राज्ञरूपस्वरूपाभिरूपाबुधमनोज्ञयोरित्यमर ॥

स्वरूपलक्षणम् । न० अध्यासाधिष्ठानत्वेन लक्ष्ये० सर्वज्ञे ॥

स्वरूपस्थिति । स्त्री० समाधिविशेषे ॥ यथा । समाप्तसर्वसङ्कल्पायाश्चित्तायद्रूपस्थिति । जाग्रन्निद्राविनिर्मुक्तासा स्वरूपस्थिति परेति ॥

हरिद्राराग । त्रि० अस्थिरस्नेहे । अल्पसौहृदे ॥ हरिद्रारागवद्रागोऽस्य । हरिद्रारागश्चास्थिरत्वात् तथैतिव्यावत् । यथा । अथ मोचामुररागो भवहरिद्रारागउच्यते इति हलायुध ॥

हरिद्रु । पु० द्रुमे । वृक्षे ॥ दारुहरिद्रायाम ॥ वृक्षविशेषे । पीतदारुणि । पीतकाष्ठे । हलदुवा० इति भा० प्र० ॥ हरितपिङ्ग० पीतोऽङ्कुरश्च ॥ यद्वा हरिभिद्रवति । द्रुगतौ । हरिमितये द्रुव

हृतिम् ।

हरिद्वारम् । न० तीर्थविशेषे । गङ्गा-
द्वारे । मायापुर्याम् ॥

हरिधामा । पु० मुञ्जे ॥

हरिनाम । न० श्रीहरेराख्याने ॥

हरिनेत्रम् । न० श्रीहरेश्चक्षुषि । श्वे-
तपद्मे ॥

हरिनेत्र । पु० पेचके । घूके ॥

हरिन्मणि । पु० गारुत्मते । मरक-
तमणौ ॥ हरिद्वर्णोमणिः । आदा
पार्थिवादि ॥

हरिन्मुद्ग । पु० आरण्यमुद्गे ॥

हरिपदम् । न० विष्णुचरणे ॥ रवेः
सङ्क्रान्तिविशेषे ॥ यथा । वृष
सिंहक्रमतोऽश्वमेधवैदूर्यपद
मिति । २ । ५ । ८ ११ ॥

हरिपर्णम् । न० मूलके ॥

हरिप्रस्थ । पु० इन्द्रप्रस्थे ॥

हरिप्रिय । पु० कदम्बवृक्षे ॥ विष्णु
क्रान्ते ॥ पीतभृङ्गराजे ॥ बन्धूके ॥
शङ्खे ॥ करवीरे ॥ न० उशीरे ॥
कृष्णचन्दने । कालीयके ॥

हरिप्रिया । स्त्री० लक्ष्म्याम् । पद्मा
लयायाम् ॥ हरेः प्रिया ॥ तुलस्या
म् ॥ वनखर्जूरे ॥ गङ्गादिषु तत्सु
॥ यथा । गङ्गासरस्वतीलक्ष्मीर्वा ता
स्तिस्रः प्रियाहरेः । तुलसीसहि
तास्तास्तु चतस्रः कीर्तिताः शुभाः
इति देवीभागवतम् ॥

हरिवालुकम् । न० एलवालुके । ऐले
ये ॥ हरिवर्णवालुकम् ॥ पु० हा
रीतपक्षिणि ॥

हरिभक्त । पु० हरिसेवके ॥ तल्लक्ष
णं यथा । सर्वजीवेषु यो विष्णुभावयी
तु समताधिया । हरौ करोति भक्तिं
स हरिभक्तः सचस्मृतः ॥

हरिभद्रम् । न० हरिवालुके ॥

हरिभुक् । पु० मयूरे ॥ सर्पे ॥

हरिमा । पु० काले ॥ हरति । हृञ्
• । हृभृधृसृस्तृशृभ्य इमनिच् ॥

हरिमन्थ । पु० अग्निमन्थे । गणि
कारिकायाम् ॥ चणके ॥ हरिभि
र्मथ्यते । मन्थविलोडने ॥ कर्मणि
घञ् ॥

हरिमन्थक । पु० चणके ॥ स्वार्थे
क ॥

हरिमन्थज । पु० चणके ॥ हरी
न्मन्थ जनयति । जनी० अन्येष्व
पीति ड ॥

हरिमन्दिरम् । न० विष्णोर्यतने ॥
तिलकविशेषे ॥ यथा । तिलकान्
ऊर्ध्वपुण्ड्राख्य मध्यच्छिद्र विनारद । य
दिक्षु नित्यं तस्माद् बिम्बं वा हरिमन्दि
रम् ॥ हरिः सर्वान्तरात्मान्ते ब्रह्माद्यै
र्नाविशेत । तस्मात्तिलक मध्य
स्थ हरिमन्दिरमिति पद्मपुराणम् ॥
अपिच । नासिकायास्त्रिभागेषु
भागे मूलेनवमावयेत् । मध्ये

दध स्थानं मृगमा हृमनौषिधः इति ॥

हरिद्र । पु० पीतवर्णद्रुमे ॥

हरिलोचन । पु० तिर्यग्यने । कुलीरे ॥

हरिवंश । पु० महाभारतपर्वविशेषे ॥ श्रीकृष्णान्वये ॥

हरिवान् । पु० इन्द्रे । त्रि० हरिविशिष्टे ।

हरिवर्षम् । न० निषधहेमकूटयोर्मध्यस्थवर्षविशेषे ॥ यथा । निषधाद्धरिवर्षं यथास्यती हेमकूटत इति ॥ अपिच । इलावृतं मेलावृत्त निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयो ऽयुतयोजनोत्से आहरिवर्षं किम्पुरुषभारतानां यथासंख्यमिति श्रीभागवतम् ॥

हरिवल्लभा । स्त्री० लक्ष्म्याम् । तुलस्याम् । जयायाम् ॥

हरिवासर । पु० न० द्वादश्याः प्रथमे पादे ॥ यथा । द्वादश्याः प्रथमः पादो हरिवासरसंज्ञकः । तमतिक्रम्य कुर्वीत पारणं विष्णुतत्परः इति ॥ इतिविष्णुधर्मोत्तरसंहिता ॥

हरिवाहन । पु० गरुडे ॥

हरिविक्रम । पु० हरेः पराक्रमे ॥ योविदेवावरयोः समुच्छितौजायतेहि हरिविक्रमास्य यदितिलज्जितीक्रियाविशेषे ।

हरिवीजम् । न० हरिताले ॥

हरिश्वम् । न० हरिवर्षे ॥

हरिशयनम् । न० हरेर्निद्रायाम् । तस्याषाढशुक्लैकादश्यामिति प्रसिद्धम् ॥

हरिश्चन्द्र । पु० नृपतिविशेषे । यताल्लीभस्ते । शिवकृती । खटिविशेषे ॥ प्रस्कराल्लहरिश्चन्द्राद्धत्तौ इति साधु ॥ चन्द्रस्य दैवौद्यानेतीर्थविशेषे ॥ इतिदेवीगीता । शुभेश्च गौहरिश्चन्द्रवृत्यागमः ॥

हरिश्चन्द्रपुरम् । न० सौभे । खपुरे । जङ्गीपुरे । हरचन्द्रावली० मू० भा० प्र० ॥

हरिषेण । पु० जिनचक्रवर्तिविशेषे । हरिसुते । यथा । हरिषेणोहरिसुतो जयो विजयनन्दनः । ब्रह्मसूनुश्च दत्तः सर्वेप्येवानुक्रमतः ; ॥ हरि सिनायक । पतिसन्नोथा मगाद्विनिष ॥

हरिसुत । पु० स्मरे । कामे । मीनकेतने । हरिषेणे ॥

हरिहय । पु० इन्द्रे । मणिपतौ । हरिर्हयो यस्य । अश्वविशेषे । यथा । श्वकाचिद्वागरोमाभिसुवर्णाभानि यस्यतु । हरिः सवर्णतोऽश्वस्तु पीतकौशेयसप्रभ इति शालिहोत्र ॥ सूर्ये ॥

हरिहर । पु० संयुक्तहरिहरमूर्तौ ॥

यथा हरिहरमनुहरसाधीपारप यातुमिच्छसिचेत्तनुलघे रूपत भयउवहृसिचस्तुतएव नजानासि । हरिहरस्वेपम् । न० हरिद्वेषे ॥ हरिहरात्मक । पु० शिवस्तुषभे ॥ गरुडे ॥

हरीतकी । स्त्री० स्वनामख्यातप्रसिद्धपथ्यावृक्षे । तत फले ॥ तत्पर्यायायथा अभयाचव्यथापथ्याचयस्थापूतनाऽमृता । हरीतकीहैमवतीचेतकीश्रेयसीशिवेति ॥ अस्याः प्रभेदागुणाश्चयथा । हरीतक्यमृतोत्पन्नासप्तभेदेरुदीरिता । तस्यानमानिवर्णाश्चवक्ष्याम्यथयथाक्रमात् ॥ विजयारोहिणीचैवपूतनाचामृताऽभया । जीवन्तीचेतकीचेतिनाम्नासप्तविधास्मृता ॥ अलाबुवृत्ताविजयावृत्तारोहिणीमता । स्वल्पत्वक्पूतनास्थिमांसाऽमृतास्मृता पञ्चास्राचाभयाप्रोक्ता जीवन्तीस्वर्णवर्णभाक् त्र्यस्राप्रोक्ताचेतकीविज्ञातिहाभासाकृतमलक्षणम् ॥ विन्ध्याद्रौविजया हिमाचलभवाचाङ्गनतकीपूतनासिन्धौस्याद्धरोहिणीतुविजयाजातापतिष्ठानके । चम्पायाममृताऽभयाचजनितादेशेसुराष्ट्राह्वयेजीवन्तीतिहरीतकीनिगदितासासप्तभेदाबुधै ॥ सर्वप्रयोगेविजयाचरोहिणीक्षतेषुलेपेषुचपूतनोदिता

। विरेचनेस्यादमृताप्रशस्ताजीवन्तिकाचादिगुणाचिरोगजित् ॥ चूर्णार्थंतकीसर्वव्याधिहराचजातिभेदादिषु ॥ चेतकीसर्वरूपाचापरिकीर्तितामयघ्नीभयावहन्तिताम् । सूत्रय थारोगमियप्रयोगैरनलाक्षयागुणाख्यानकदाचिदन्यथा ॥ चेतकीचद्विधाप्रोक्ताश्वेताकृष्णाचवर्णतः । षडङ्गुलायताशुक्लाकृष्णात्वेकाङ्गुलास्मृता ॥ काचिदास्वादमात्रेणकाचिद्गन्धेनभेदयेत् । काचित्स्पर्शेनदृष्ट्यान्याचतुर्धाभेदयेत्शिवा ॥ चेतकीपादपच्छायामुपसर्पन्तियेनराः । भिद्यन्तेतत्क्षणादेवपशुपक्षिमृगादयः ॥ चेतकीतुधृताहस्तेयावत्तिष्ठतिदेहिनः । तावद्भिद्येततैवेगैःप्रभावान्नात्रसंशयः ॥ नृपाणांसुकुमाराणांकृशानांभेषजद्विषाम् । चेतकीपरमाशस्ताहितासुखविरेचनी ॥ सप्तानामपिजातीनांप्रधानविजयास्मृता । सुखप्रयोगसुलभासर्वव्याधिषुशस्यते ॥ विन्ध्यपञ्चनिमज्जतियासाश्रेष्ठागुणवतीभिषक्प्रवरै । यस्यायस्याभूयोनिमज्जनसागुणाढ्यामता ॥ हरतेप्रसभंव्याधीन्भूयस्तत्कतियद्गुणम् । हरीतकीतुसाप्रोक्तातस्यानिरुक्तिपर्यायाः ॥ हरीतकीतुवणायाच्छनुसार्या गच्छ हे । शिविनच्छयरस्रीवंगुवंलानेवप्रयाति ॥ इतिराजनिघण्टः ॥ अपिचभावप्रकाशे । मधुस्निग्धच मारुतासुर्वीसम्पचयाद्भसि । निमज्जेत्सासुप्रशस्ताकथितातिगुणाप्रदा ॥ नवादिगुणयुक्तत्वं तथैकत्रचिकर्मता । हरीतक्याःफलेयच्छयद्यत्कर्त्रुमुच्यते ॥ चर्विताबर्द्धयत्यग्निंपेषितामलशोधिनी । स्विन्नासङ्ग्राहिणीपथ्याभृष्टाप्रोक्तात्रिदोषनुत् ॥ उन्मीलिनीबुद्धिबलेन्द्रियाणांनिर्मूलिनीपित्तकफानिलानाम् ।

विषसिद्धीमूत्रग्रहण्मतानां हरीतकीयात् सहभोजनेन ॥ अन्नपानकृतान् दोषान् वातपित्तकफोद्भवान् । हरीतकी हरत्याशु भुक्तस्योपरियोजिता ॥ लवणेन कफं हन्ति पित्तं हन्ति सशर्करा । घृतेन वातजान् रोगान् सर्वरोगान् गुडान्विता ॥ सिन्धूत्थशर्कराशुण्ठीकणामधुगुडैः क्रमात् । वर्षादिष्वभया प्राश्या रसायनगुणैषिणा ॥ अध्वातिखिन्नो बलवर्जितश्च रूक्षः कृशो लङ्घनकर्षितश्च । पित्ताधिको गर्भवती च नारी विमुक्तरक्तस्त्वभयां न खादेत् । इति ॥ अस्याः सैवमिदि नयुद्धिमाह्वालिन्दास । क्षषाभयानागरपूर्वं सैन्धवारखोविधेया लघुभेन्द्यभेद्गे । अथ क्षयेर्योन्द्सि हैक्ष्यवासरे पथ्याजयानन्दपलोधु धीमतीति ॥ हरीतक्या फलं हरीतकी । विकारोवयवयोरत्यग्रत्यप्रत्ययस्य हरीतक्यादिभ्यश्च इति लुप् । लुपियुक्तवद्व्यक्तिवचने । हरीतक्यादिषु व्यक्तिरिति लिङ्गमेवप्रकृतिवत् न सङ्ख्या ॥ पथ्याभयाशुषशुष्की वातपित्तहरोगुरु ॥ अस्यापाकं पाकाद्ध्यादिशभोय ॥

हरीश्वर । पु॰ हनूमति ॥ वालिवानरे ॥ सुग्रीवे ॥

हरीषा । स्त्री॰ पक्वमांसप्रभेदे ॥ यथा । पाकपात्रे तु हस्तिमांसखण्डानि निःक्षिपेत् । पानीयं प्रचुरं सर्पिः प्रभूतं हिङ्गु जीरकम् ॥ हरिद्रामार्द्रकं शुण्ठीलवणं मरिचानि च । तण्डुलांश्चापि गोधूमान् जम्बीराम्लरसान् क्षिपेत् ॥ यथा सर्वाणि वस्तूनि सुपक्वानि भवन्ति हि । तथा पचेत् निपुणो हि मण्डस्थितिर्यथा ॥ एषा हरीषा बलकृद्वातपित्तापहा गुरुः । शीतोष्णा शुक्रदा स्निग्धा सरा सन्धानकारिणी ॥ इ॰ भा॰ अ॰ ॥

हरेणु । पु॰ सतीने । कलाये । ऋ सायस्त्रिपुटः प्रोक्तः सतीनो वर्तुलो मतः । हरेणुस्त्रिपुटो ज्ञेयो विशिष्टाय सुदाहृतः ॥ हरति । हृञ्॰ । कृहृभ्यामेणुः ॥ स्त्री॰ रेणुकायाम् । भक्षगन्धिन्याम् ॥ कुलयोषिति ॥

हरेणुक । पुं॰ कलाये ॥

हर्त्ता । त्रि॰ हरणकर्त्तरि ॥ हरति । हृञ्॰ । तृच् ॥

हर्त्म । न॰ जृम्भणे ॥ इ॰ म॰ र॰ को ॥

हर्म्मित । त्रि॰ क्षिप्ते । दग्धे ॥

हर्म्यम् । न॰ धनिनां वासः । अट्टालिकादिना शोभितधवलगृहम् ॥ यथा । रम्यं हर्म्यतलं नवाः सुनयनाः गुञ्जद्विरेफा लताः प्रोन्मीलन्नवमालती सुरभयो वाताः सशीतांशवः । किन्तु

प्रान्तपतत्पतङ्गपवनव्यालोलदीपाङ्कुरच्छायाचञ्चलमाकलय्य सकलं सन्तोषमालम्बताम् ॥ हर्षयति मनः हृष्० । नन्द्यादित्वात् ल्युट् ॥

हर्यक्ष । पु० सिंहे ॥ हरिणी पिङ्गले अक्षिणी यस्य । बहुव्रीहौ षच् ॥ कुबेरे ॥

हर्यश्वः । पु० वायौ ॥ इन्द्रे ॥ हर्यति । हर्य गतिकान्त्योः । भृमृदृशियजिपर्विपच्यमितमिनमिहर्षिभ्योऽतच् ॥ हर्यत सर्वे स्पृहणीयत्वादिति उणादिभाष्यम् ॥

हर्यश्व . । पु० इन्द्रे । हरिहये ॥ द्व० शब्दः ॥

हर्ष । पु० मुदि । प्रीतौ । धर्मे । सुखे ॥ स्वप्रियलाभेष्टागमाप्तिपातादिहेतुरानन्दोऽभिव्यक्तचिह्न स्वभावविशेषो हर्षः स्मृतः ॥ हृषतुष्टौ ॥ घञ् ॥

हर्षक । पु० पर्वतविशेषे ॥ त्रि० हर्षकारके ॥

हर्षक्षय . । पुं० धातुक्षये ॥

हर्षण । पु० चक्षुरोगभेदे ॥ श्राद्धदेवे ॥ योगविशेषे ॥ तथ्यालस्यमाशु सुखारुणास्फुटपद्मने च आश्लप्रथनं विनयोपपन्नः । प्रसूतिकालेयदि हर्षणं च स्याद्धर्मशीलो यजनं कदाचित ॥ न० हर्षे ॥ त्रि० हर्षके । हर्षकारके ॥

हर्षमाण । त्रि० विकुर्वाणे । प्रमनसि । हृष्टमानसे । हर्षति । हृषु अलीके । ताच्छील्ये चानश् ॥

हर्षयित्नु । पु० पुत्रे । सुते ॥ न० काञ्चने । स्वर्णे ॥ हर्षयति । हृषतुष्टौ । तनित्नुर्णिलुक् च । त्रि० हर्षकारके ॥

हर्षल । पु० विलक्षितायाम् ॥ द्व० त्रि० शेष० ॥

हर्षणी । स्त्री० विजयायाम् ॥

हर्षित . । त्रि० हृष्टे । सञ्जातहर्षे ॥ हृषु० । क्त । हर्षः सञ्जातोऽस्य वा । इतच् ॥

हर्षुल । पुं० मृगे ॥ कामिनि । कामुके ॥ हृष्यति । हृषतुष्टौ । हृषेरुलच् ॥

हलम् । न० लाङ्गले । गोदारणे । सीरे ॥ हलति । हलविलेखने । पच् ॥ अघ्नोऽश्वमेधस्यादेशोऽयथा । अष्टागवधर्म्यं हलं षड्गवं जीवितार्थिनाम् । चतुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनामिति हारीतः ॥

हलदण्ड । पु० ईषायाम् । हलयुगयोर्मध्यकाष्ठे ॥

हलदी । स्त्री० हरिद्रायाम् ॥ द्व० र० घट ॥

हलधर ।) पु० बलदेवे ॥ श्रालिके ॥
हलभृत् ।)

हलपद्धति । स्त्री० लाङ्गलपद्धतौ । सीतायाम् । हलरेखायाम् । हलस्यपद्धतिः ॥

हलप्रवाह । पु० सौरकर्षणे ॥

हलभूति । स्त्री० कृषिकर्मणि ॥

हलभृति । पु० मुनिविशेषे । उपवर्षे । कृषिकर्मणि ॥

हलराध्यम् । न० चातुर्ल्ये । नागपुष्पकी । तरवट० द्रू० नाम्नी रभाष प्र० ॥

हलरेखा । स्त्री० सीतायाम् ॥ हलस्यरेखा ॥

हला । अ० नाट्योक्त्या सख्याने ॥ समानाभिस्तथा सख्यो हलाभाष्याः परस्परमिति भरत ॥ हल० । बाहुलकाद् डाप्रत्ययः ॥

हला । स्त्री० सख्याम् ॥ वारुण्याम् ॥ मद्ये । क्षितौ ॥ भूमौ ॥

हलायुध । पु० बलदेवे ॥ हलमायुधं यस्य ॥ हलस्य बलभद्रस्यागमनादागत ज्वलद्दितिवरासन्ध युद्धे इति विष्णुपुराणम् ॥

हलाह । पु० चित्रिताश्वे ॥

हलाहल । पु० ब्रह्मसर्पे ॥ हयभाली ॥ हली । बुद्धभेदे ॥ पु० न० विषप्रभेदे ॥ हलति जठरम् । हल० । अच् । नञ्मति० चा हलति वा । अच् । अहलम् । चा हल वा ।

लत कर्मधारय ॥ स्त्री० पद्मनायाम ॥ हल्याम् ॥

हलि । पु० महाहलि । लग्नायाम् । कृष्टसमीकरणार्थस्थूलकाष्ठे ॥

हली । पु० बलभद्रे ॥ हलोऽस्यास्य । सुखादिभ्यश्चेतीनि ॥ कर्षके ॥

हलिनी । स्त्री० लाङ्गलिकायाम् ॥ हलसमूहे ॥

हलिप्रिय । पु० कदम्बवृक्षे । हलिनो बलदेवस्य प्रिय० सुराया अधिवासनत्वात् ॥

हलिप्रिया । स्त्री० सुरायाम् । मदिरायाम् ॥ हलिन० सङ्कर्षणस्य प्रिया ॥

हली । स्त्री० कलिकायाम् ॥

हलीनः । पुं० कितव्याम् । शाकवृक्षे ॥

हलीमक । पु० पाण्डुरोगप्रभेदे ॥ यदा तु पाण्डोर्वर्णः स्याद्धरितश्यावपीतकः । बलोत्साहक्षयस्तन्द्रा मन्दाग्नित्वं मृदुज्वरः ॥ स्त्रीष्वहर्षोऽङ्गमर्दश्च श्वासतृष्णारुचिर्भ्रमा । हलीमकं तदा तस्य विद्यादनिलपित्ततः इति माधवमिश्र ॥ पाण्डौ पाण्डुरोगिणि ॥

हलीषा । स्त्री० लाङ्गलदण्डे ॥

हल्यम् । त्रि० हलकृष्टक्षेत्रे । कृष्टे ॥ हलेन कृष्टम्० हलस्य कर्ष० । मतजनहलादितियत् ॥

हल्या । स्त्री॰ हलसमूहे ॥ हलानां समूहः । पाशादिभ्यो यः ॥

हल्लकम् । न॰ रक्तसन्ध्यके । रक्तसौधीतिख्याते । हेला॰ इ॰ गो॰ भा॰ प्र॰ पुष्पे ॥ रक्तवर्णविकालविकाशिपुष्पविशेषे॰ इत्यन्ये ॥ हलति । हलविकसने । ण्वुल् ॥ यद्वा । हलनम् । सम्पदादित्वात् क्विप् । हलं लाति । लादाने । आतोऽनुपसर्गे कः । स ह्रायाकन् ॥

हल्लनम् । त्रि॰ प्रचलायिते । इ॰ ज॰ धर ॥

हल्लीषम् । न॰ योषितामण्डलीनृत्ये ॥ स्त्रीणां हल्लीषसहनर्त्तनमिति त्रिकाण्डशेषः ॥

हल्लीषकम् । न॰ स्त्रीणां मण्डलिकानृत्ये ॥ मण्डलेन तु यन्नृत्यं स्त्रीणां हल्लीषकन्तु तदिति हेमचन्द्रः ॥ एकस्य पुंसो बह्वीभिः स्त्रीभिः सह क्रीडने ॥ तत्तु रासक्रीडा । यथा । गोपीनां मण्डलीनृत्यबन्धे हल्लीषकं विदुरिति कोषात् । तत्तच्च रासशब्दाद्द्रष्टव्यम् ॥

हव । पु॰ आह्वाने । निदेशे ॥ आह्वाने । हूतौ ॥ अध्वरे । सप्ततन्तौ ॥ ह्वानम् । ह्वेञ् स्पर्द्धायाम् शब्दे च । भावेऽनुपसर्गस्य ह्वः सम्प्रसारणञ्च ॥ हूयतेऽनेनेति वा ॥ आहवे॰ इ॰ तवैदविद । आहूयन्ते

परस्पर युद्धार्थं योद्धारोऽत्र ॥

हवङ्ग । पु॰ कांस्यपात्रे दधिमिश्रितान्नभक्षणे । इतिकश्चित् ॥

हवनम् । न॰ होमे ॥

हवनायु । पु॰ अग्नौ ॥

हवनी । स्त्री॰ हवनकुण्डे ॥

हवनीयम् । त्रि॰ हविषि । होमीयद्रव्ये ॥ हूयते हु॰ अनीयर् ॥

हविषी । स्त्री॰ होमकुण्डे ॥

हविरशन । पु॰ अग्नौ ।

हविर्गन्धा । स्त्री॰ शम्या ॥

हविर्गृहम् ।
हविर्गेहम् । } न॰ हवनगृहे । होत्रीये ॥

हविर्भुक् । पु॰ अङ्गिरसः पुत्रे पितरि ॥ अग्नौ ॥ हवींषि । भुङ्क्ते । भुज॰ । क्विप् ।

हविर्भूः । स्त्री॰ पुलस्त्यस्य पत्न्याम् ॥

हविर्मन्थ । पु॰ अग्निमन्थे । श्रीपर्णे ॥

हविष्कृत् । स्त्री॰ देवानामर्थे या हविः सम्पादयति तस्याम् ॥

हविष्मत् । पु॰ हविर्भुजि । त्रि॰ आज्यादिमति ॥ ध्यानभावनावति ॥

हविष्यम् । न॰ हवनीये ॥ भोज्यभेदे ॥ मुन्यन्नादिषु ॥ घृते ॥ हविषि हितम् । उगवादिभ्यो यत् ॥

हविष्यान्नम् । न॰ हविष्ये । व्रतादा

यज्ञीयद्रव्यविशेषे ॥ हविष्यघृत दुग्धञ्च ॥

हवि । न॰ होतव्यद्रव्ये । साम्नाय्ये । देवतोद्देशेनाग्नौ क्षिप्यमाणद्रव्ये । त्यागप्रकृतिक्रियाया साक्षात् कर्मकारके ॥ तद्द्विविधम् । पुरोडाशरूपमाज्यरूपञ्च ॥ घृते । सर्पिषि ॥ हविषा परिणामीय यदेतद् खिलं जगत् ॥ हूयते । हुदानाद नयो अर्चिशुचिहुसृपीच्छादिछर्दि सि ॥ मुन्यन्नानिपय सोमामां संयस्वानुपस्कृतम् । अक्षारलवण श्चैवप्रकृत्याहविरुच्यतइतिमनु ॥

हवुषा । स्त्री॰ हपुषायाम ॥

हवै । अ॰ कृतार्थस्मरणार्थौनिपा- तौ ॥ प्रसिद्धार्थद्योतकौवैदेनि पातौ ॥

हव्यम् । न॰ दैवेऽन्ने । हवनीये । हूयन्ते प्रीयन्ते देवा येन॰ हूयते॰ प्रक्षिप्यते वा । हु॰ । अचोयत् । गुणावादेशौ ॥

हव्यपाक । पु॰ चरौ ॥ पच्यते । पचे कर्मणि घञ् । हव्यस्य तत्॰ पाकश्च यत्र । भावे घञ् । पच नम्॰ पाक । हव्यस्य पाक॰ पाकोऽधिकरणम् ॥

हव्यवाह: । पु॰ अग्नौ ॥

हव्यवाहन । पुं॰ अग्नौ ॥ हव्य वा हयति । वहणाद्दृहेल्युः ॥

हव्याश ।)
हव्याशन ।) पु॰ अग्नौ ॥
हव्येश ।)

हस । पु॰ हास्ये ॥ हसनम् । ह सेर्हसने । स्वनहसोर्वेत्यप् ॥

हसन् । त्रि॰ हास्यकुर्वति ॥ हसेर्लट शतृ ॥

हसनम् । न॰ हास्ये ॥ हसि॰ । ल्युट् ॥

हसनी । स्त्री॰ अङ्गारधान्याम् ॥ ह सति । हसि॰ । करणल्युट्इतिल्यु ट् । टिड्ढेतिङीप् ॥

हसनीमणि । पु॰ पर्णीके । अ ग्नौ ॥

हसन्तिका । स्त्री॰ हसन्त्याम् । अङ्गा रधान्याम् ॥

हसन्ती । स्त्री॰ अङ्गारधान्याम् ॥ मल्लि काप्रभेदे ॥ शाकिनीविशेषे ॥ हस ति । हसि॰ । लट शतृ । उगितश्चे ति ङीप् । शप्श्यनोर्नित्यम् ॥

हसितम् । न॰ अट्टहास्ये ॥ हास्ये ॥ त्रि॰ विकसिते । फुल्ले ॥ हसि॰ । नपुंसकेभावेक्त ॥

हस्त । पु॰ करे । पञ्चशाखे । शये । पाणौ । शब्द॰ च॰ भा॰ प्र॰ ॥ करिकरे शुण्डायाम् । स्तु॰ च॰ भा॰ प्र॰ ॥ मानभेदे । चतुर्विंशत्यङ्गुलमितेसप्रकोष्ठकरे ॥ यथा । यथानातवङ्गलैरेकमङ्गुलं चाष्ट भिर्भवेत । अदीर्घयोजितैर्हस्त

चतुर्विंशत्यङ्गुलैरिति । शिखो पुरागम । द्रुमेदे । चयोदशर्क्षे । हस्तायाम् ॥ यथा । पुष्योहस्तोमैत्रमथाश्विनस्वस्वार्थाद्रे, सर्वद्विगद्दारक्ताचोति ॥ वैद्यायराभ्राते ॥ यथावैद्यहस्त • काचसम् हस्त्यर्थे । हसति • हसतेवा । हसे • । हसिस्मृग्रिण्यितितन् ॥ चि • हस्ता यांजाते ॥ ग्रविष्टाफलानुतोष्यचोलुक । न • चर्मप्रसेविकायां ॥

हस्तधारणम् । न • परित्राणे ॥ प्राहर्तुमुद्यतस्य हस्तस्य धारण रोध । रथवाश्वपृष्ठे हस्तस्थापनं वा ॥ भुक्यहर्षे ॥

हस्तपुच्छम् । न • कन्युषि । कलमणि । हार्षीका • हु • भा • प्र • ॥

हस्तवारणम् । न • परित्राणे । मारणोद्यतस्य निवारणे ॥ हस्तेन • • हस्तस्य वा • वारणम् ॥ कारेणनिषेधे ॥

हस्तविम्बम । न • चन्दनादिनादेहविलेपनविशेषे । स्थासके ॥

हस्तसिद्धि । स्त्री • भृतौ । वेतने ॥ हस्ताभ्यांसाध्यासिद्धि ॥

हस्तसूत्रम् । न • करसूत्रे । कङ्गणा • इतिविवाहप्रसिद्धे ॥

हस्ता । स्त्री • अश्विन्यादौत्रयोदशर्क्षे ॥ तत्रजातफलंयथा । दाताथशस्वोसुतरामनस्वोभूदेवदेवार्चनतत्

न नयज्ञ । प्रसूतिकालेकिलयस्य हस्ताहस्तस्थितातस्य समस्तसम्पत् ॥

हस्ताङ्गुलि । स्त्री • करशाखायां ॥

हस्तामलकम । न • करस्थितामलकीफले ॥ करस्थितसच्छफले । वेदान्तग्रन्थविशेषे । पु • शङ्कराचार्यशिष्यविशेषे ॥

हस्तावसेचनम् । न • उत्तरापोशाने ॥

हस्तास्त्रम् । न • प्रहरणे । हथियार हु • भा • प्र • ॥

हस्तकन्द । पु • वृहत्कन्दविशेषे । कुष्ठहन्तरि • गजकन्दे ॥

हस्तिकन्दक । पु • हस्तिकन्दे । स्वार्थेक ॥

हस्तिकरञ्ज । पु • महाकरञ्जे ॥

हस्तिकर्ण • । पु • उरवूके । एरण्डे । रक्तैरण्डे । स्वनामख्यातेपलाशप्रभेदे ॥ हस्तिकर्णं परङ्घ्रो मेधायुर्वलवर्द्धन ॥ हस्तिकन्दे ॥ गणदेवताप्रभेदे ॥

हस्तिकर्णक ।) पु • हस्तिकर्णी
हस्तिकर्णदल ।)

भिधेपलाशे । किंशुके ॥

हस्तिकारवी । स्त्री • अजमोदायां ।

हस्तिशौलि । गोपघोंटायाम् ॥

हस्तिगिरि । पु • काञ्चीदेशे ॥

हस्तिघोषा । स्त्री • कोशातकीप्रभेदे । महाकोशातक्याम् । तुंनिया • घोयातोरई • हु • भा • ॥

हस्तिचेष्टितम्

हस्तिपालिणी । स्त्री० महाकरञ्जे ॥

हस्तिचेष्टितम् । न० गजेङ्गिते ॥ तद्यथा । तत्रादौ दन्तकल्पनविधानम् । दन्तस्य मूलपरिधिं द्विरायतं प्रोज्झ्य कल्पयेच्छेषम् । अधिकमनूपचराणां न्यूनं गिरिचारिणां किञ्चित् ॥ कल्पितदन्तच्छेदलक्षणानि । श्रीवत्सवर्द्धमानच्छत्रध्वजचामरानुरूपेषु । छेदे दृष्टेष्वारोग्यविजयधनवृद्धिसौख्यानि ॥ प्रहरणसदृशेषु जयो नन्द्यावर्ते प्रनष्टदेशाप्तिः । लोष्टे तु लब्धपूर्वस्य भवति देशस्य सम्प्राप्तिः ॥ स्त्रीरूपेऽस्वविनाशो भृङ्गारेऽभ्युत्थिते सुतोत्पत्तिः । कुम्भेन निधिप्राप्तिर्यात्राविघ्नश्च दण्डेन ॥ ४ ॥ कृकलासकपिभुजङ्गेष्वसुभिक्षव्याधयो रिपुवशित्वम् । गृध्रोलूकध्वाङ्क्षश्येनाकारेषु जनमरकः ॥ ५ ॥ पाशेऽथवा कबन्धे नृपमृत्युर्जनविपत् स्रुते रक्ते । कृष्णश्यावे रूक्षे दुर्गन्धे चाशुभं भवति ॥ शुभच्छेदलक्षणानि । शुक्लः समः सुगन्धिः स्निग्धश्च शुभावहो भवेच्छेदः । गमनस्खलनफलानि च दन्तस्य समानि भङ्गेन । अथ शुभाशुभमाह । मूलमध्यदशनाग्रसंस्थिता देवदैत्यमनुजाः क्रमात्ततः । स्फीतमध्यपरिपेलवं फलं शीघ्रमध्यचिरकालसम्भवम् ॥ अथ विशेषफलमाह । दन्तभङ्गफलमत्र दक्षिणे भूपदेशबलविद्रवप्रदम् । वामतः सुतपुरोहितेभयान् हन्ति साटविकदारनायकान् ॥ पुनरपि । आदिशेदुभयभङ्गदर्शनात् पार्थिवस्य सकलं कुलक्षयम् । सौम्यलग्नतिथिभादिभिः शुभं वर्द्धते शुभमथोऽन्यथा भवेत् ॥ दन्तभङ्गस्य विशेषफलमाह । क्षीरमिष्टफलपुष्पपादपेष्वापगातटविघट्टनेन वा । वाममध्यरदभङ्गखण्डनेऽसन्नाशकृद्दतोऽन्यथापरम् ॥ ११ ॥ अथ गजेङ्गितमाह । स्खलितगतिरकस्मात्त्रस्तकर्णोऽतिदीनः श्वसिति मृदु सुदीर्घं न्यस्तहस्तः पृथिव्याम् । द्रुतमुकुलितदृष्टिः स्वप्नशीलो विलोमो भयकृदहितभक्षी नैकशोऽसृक्शकृत्कृत् ॥ १२ ॥ शुभचेष्टितमाह । वल्मीकस्थाणुगुल्मक्षुपतरुमथनः स्वेच्छया हृष्टदृष्टिर्यायाद्यात्रानुलोमं त्वरितपदगतिर्वक्त्रमुन्नम्य चोच्चैः । कक्ष्यासन्नाहकाले जनयति च मुहुः शीकरं बृंहितं वा तत्काले वा मदाप्तिर्जयकृदथ रदं वेष्टयेद्दक्षिणं च ॥ प्रवेशनं वारिणि वारणस्य ग्राहेण नाशाय भवेन्नृपस्य । ग्राहं गृहीत्वोत्तरणं द्विपस्य तोयात्स्थलं वृद्धिकरं नृपस्य ॥ १४ ॥ इति वाराही ९२ अध्यायः ॥

हस्तिच्छाया

हस्तिच्छाया । स्त्री० गजच्छायायाम् ॥ कुञ्जरच्छायायाम् ॥

हस्तिजिह्वा । स्त्री॰ नाडीविशेषे यथा । हस्तिजिह्वोत्पलप्रख्या नाडी तस्याः पुरः स्थिता । तस्याद्दक्षा या । सव्यभागस्थमूर्द्ध्वादिपादाङ्गुष्ठान्तमाश्रिता । हस्तिजिह्वाख्या नाडी दक्षिणे चक्षुषि स्थितेति ॥

हस्तिदन्त । पु॰ मूलके । मूली॰ इ॰ प्र॰ मूले ॥ नागदन्ते । खूंटी इ॰ भा॰ प्र॰ ॥ हस्तिनो रदे ॥

हस्तिदन्तकम् न॰ मूलके ॥

हस्तिदन्तफला स्त्री॰ एर्वारौ । काकडी॰ इ॰ भा॰ प्र॰ ॥ हस्तिदन्तवत् फलान्यस्याः ॥

हस्ती । पु॰ मतङ्गजे । पीलौ । अस्य पर्यायास्तु दन्ती दन्तावलो हस्ती॰ द्विरदोऽनेकपो द्विपः । मतङ्गजो गजो नागः कुञ्जरो वारणः करी । इभः स्तम्बेरमः पद्मीति ॥ हस्तः शुण्डोऽस्यास्ति । हस्त इनिः ॥ हस्तिनापुरस्य निर्माणकर्त्तरि सुहोत्रराजपुत्रे ॥ यथा । बृहत्क्षत्रस्य सुहोत्रः पुत्रः सुहोत्राद्धस्तीति विष्णुपुराणम् ॥ नारीहित् कामुकोन्मत्तगजराजाद्दावनथा तद्वाचामुक तन्तुपरले हविषोद्दतीति कालिकापुराणम् ॥

हस्तिनख । पु॰ नगरीपाणौ । पूर्द्वारि मृत्कूटे । पुरद्वाराऽऽवरणार्थं कृते मृत्कूटे । दुर्गपुरद्वारसमीपे युद्धार्थं यद्रक्तटमल्कं सोपानयुक्तमृत्कूटं यवक्षिस्था॰ विपक्षे शुण्डादिकं क्षिप्यतीति तत्र हस्तिनखश्चन्ये ॥ कूटं पूर्द्वारि यद्धस्तिनखस्तस्मिन्नथामर । हस्तिनो नख इव । हस्तिनो नखस्य तद्धितिवा । खनुपबद्धारणे । अन्ये त्वपौति ॥

हस्तिनपुरम् ।)
हस्तिनापुरम् ।) न॰ गजाह्वयेहास्तिनपुरे ॥ हस्ती नामराजा॰ तेन निर्मितत्वात् ॥

हस्तिनी । स्त्री॰ गजयोषायाम् । करिण्याम् ॥ धेनुकायाम् । वशायाम् ॥ आद्यपदार्थे हस्तिनीप्रसूतीत ह्यममास्कालिदास । आवीतदापिक्करभेकलभ करिण्याश्चेय प्रसूयतद्वृतिश्चविभीनभक्षौ । चत्राख्ये यो नरपतेर्यदिभूमिदेवैतद्दानमस्ति तदुपक्रमणान्तयेत॰ इति ॥ नारीजातिविशेषे ॥ तल्लक्षणं यथा । स्थूलाधरा स्थूलनितम्बभागा स्थूलाङ्गुली स्थूलकुचा सुशीला । कामोत्सुका गाढरतिप्रिया च नितम्बखर्वा खलु हस्तिनीयमिति ॥ हट्टविलासिन्याम् ॥ हस्तिशुण्डयाम् ॥

हस्तिनीदुग्धम् । न॰ हस्तिन्याः क्षीरे ॥ तद्गुणा यथा । वृष्यं हस्तिनीदुग्धं मधुरं तुवरं गुरु । स्निग्धं बल्यं हिमं स्निग्धं चक्षुष्यं स्थिरताकरमिति ॥

हस्तिनीपुरम् । न० हस्तिनापुरे ॥
हस्तिप । पु० हस्तिपके ॥ ह
स्तिनं पाति । पा० । आतोनुपे
सिक ॥
हस्तिपक । पु० हस्त्यारोहे । आधो
रणे । निषादिनि ॥ स्वार्थे कन् ॥
हस्तिपद । पु० हस्तिकन्दे ॥
हस्तिपर्णिका । स्त्री० राजकोषात-
क्याम् ॥
हस्तिपर्णी । स्त्री० राजकोषातक्याम्
। मेनुका० इ० भा० प्र० ॥ एर्वारौ
। कर्कट्याम् ॥ मोरटायाम् ॥
हस्तिमद । पु० गजमदे । दाने ॥
हस्तिमल्ल । पु० सुरद्विपे । ऐरावते
। अभ्रमातङ्गे ॥ विनायके । विघ्न
राजे ॥ शङ्खनागे ॥
हस्तिमुख । पु० गणेशे ॥ हस्तिन
मुखं यस्य ॥
हस्तिरोहणक । पुं० मवावरण्डे ॥
हस्तिलक्षण । न० गजस्वरूपे ॥ तन्नि
रूपणं यथा । भद्रो मन्दो मृगो मिश्र
इत्येते गजजातयः ॥ तत्रादौ भद्र
लक्षणम् । मध्वाभदन्ताः सुविभ
क्तदेहा न चोपदिग्धा न कृशाः क्षमा
श्च । गात्रैः समैश्चापधनुर्विशा
लवराहतुल्यैर्जघनैश्च भद्राः ॥ मन्द
लक्षणं यथा । वक्षोऽथ कक्ष्यावलय
श्लथाश्च लम्बोदरस्त्वग्बृहती गलश्च
। स्थूलाच कुक्षिः सह मेचकेन सैंही

च दृङ्मन्दमतङ्गजस्य ॥ २ ॥ मृग
सङ्कीर्णलक्षणन्तु । मृगास्तु ह्र
स्वाधरवालमेढ्रास्तन्वङ्घ्रिकण्ठद्वि
जहस्तकर्णाः । स्थूलेक्षणाश्चेति य
थोक्तचिह्नैः सङ्कीर्णनागा व्यतिमि
श्रचिह्नाः ॥ ३ ॥ अथैतेषामुन्नति
दैर्घ्यपरिणाहानां प्रमाणमाह । प
ञ्चोन्नतिः सप्त मृगस्य दैर्घ्यमष्टौ
च हस्ताः परिणाहमानम् । एकद्वि
वृद्धावथ मन्दभद्रौ सङ्कीर्णनागोऽनि
यतप्रमाणः ॥ अथैतेषां वर्णमदल
क्षणमाह । भद्रस्य वर्णो हरितो मद
श्च मन्दस्य हारिद्रकसन्निकाशः ।
कृष्णो मदश्चाभिहितो मृगस्य सङ्कीर्ण
नागस्य मदो विमिश्रः ॥ ५ ॥ गजा
नां शुभलक्षणान्याह । ताम्रोष्ठता
लुवदनाः कलविङ्कनेत्राः स्निग्धो
न्नताग्रदशनाः पृथुलायतास्याः ।
चापोन्नतायतनिगूढनिमग्नवंशा
स्तन्वेकरोमचितकूर्मसमानकुम्भाः ।
॥ ६ ॥ विस्तीर्णकर्णहनुनाभिल
लाटगुह्याः कूर्मोन्नतैर्द्विनवविंश
तिभिर्नखैश्च । रेखात्रयोपचितवृ
त्तकराः सुवालाधन्याः सुगन्धिम
दपुष्करमारुताश्च ॥ दीर्घाङ्गुलिरक्त
पुष्कराः सजलाम्बोदनिनादबृंहि
ताः । बृहदायतवृत्तकन्धरा धन्या भू
मिपतेर्मतङ्गजाः ॥ ८ ॥ अथाशुभल
क्षणान् गजानाह । निर्मदाभ्यधि

काष्ठीनमखाङ्गान् कुञ्जवामनकानिव विषाणान् । इत्यकीशफलपुष्कर हीनान् श्यावनीलयवलासिततालून ॥ खल्पवक्‍त्रकहमत्कुणषण्ढान् हस्तिनीस्त्वगजलक्षयुक्ताम् । गर्भिणीस्वन्तरित परदेशप्रापयेद्बुध विद्धफलास्तो ॥ १० ॥ अयकुञ्जा टीनालक्षणानितु । सर्वविषयको जघन पृष्ठसध्यसह्यन्नत । प्रमा णाठोमरक्राभि सकुवणीडारखा धस ॥ आनाहायामसंयुक्तोगो तिक्षणोभवेद्गज । वामन सम संख्यातोभस्तुर्नायं यत्र प्रद । सर्वलक्षणसम्पूर्णोदृश्यो सुपरिवर्जित । सतृक्षुण ससमाख्यात सर्वयानेप्रायणालक ॥ पाटवे । स न्निकर्ष । आयत्यमागभ्रगच्छत । सम टे ऽभ्यनियुक्तं गजलक्षणेन पूजित ॥ अलन्नाभ्यधिकं यत्रजि सारेभस्तनान्तरम् । विशाट सवि निर्दिष्टोदुर्गतिनिन्दितोगज । इतिवाराहा ६२ अध्याय ॥

हस्तिलीध्र ।) पु॰ लोध्रे ॥ इति
हस्तिलोध्रक ।) राजनिर्घण्ट ॥

हस्तिवाह । पु॰ अङ्कुशे ॥

हस्तिविषाणी । स्त्री॰ कदल्याम् ॥

हस्तिशाला । स्त्री॰ चतुरे । गजगृहे पीलुस्थाने ॥

हस्तिशुण्डा ।) स्त्री॰ क्षुपविशेषे । ह
हस्तिशुण्डी ।) स्तिन्याम् । भूरुण्ड्याम् । हातीशूंड़ा॰ इ॰ गौ॰ भा॰ प्र॰ । अस्थिसंहारे ॥ यथा । इन्द्रवल्ल्यस्थिसंहारीहस्तिशुण्डीनगाविशेषितिहारावली ॥

हस्तिश्यामाक । पुं॰ हस्तिश्यामाको हस्तिगोधूमविशेषशस्य ॥

हस्त । अ॰ पाणौ ॥

हस्तेकरणम । न॰ पाणिग्रहणे । विवाहे ॥

हस्त्यध्यक्ष । पु॰ गजाध्यक्षे ॥ तल्लक्षण यथा । हस्तिशिक्षाविधानज्ञो वन्यजातिविशारद । क्लेशक्षमस्तथाराज्ञोहस्त्यध्यक्ष प्रशस्यते ॥ इतिमात्स्ये १८९ अध्याय ॥

हस्त्यायुर्वेद । पु॰ हस्तिचिकित्साशास्त्रे । गजायुर्वेदे ॥

हस्त्यारोह । पु॰ हस्तिपके । निषादिनि ॥ तल्लक्षणन्तु । एतैरेवगुणैर्युक्त स्थानासनविशेषवित । हस्त्यारोहोनरेन्द्रस्यसर्वकर्मस्विशस्यते इतिमात्स्ये १८९ अध्याय । एतेईस्त्यध्यक्षगुणै ॥ हस्तिपमा रोहति । कर्त्तृ सञ्ज्ञायण् ॥

हस्त्यलुकम । न॰ कापूरालुके । दीर्घतायुक्ते॰महाशरीरकन्दविशेषे ।

हस्त । त्रि॰ मूर्खे । हसति । हसि॰

। स्फायितश्चोतिरक ॥

हट्टम । न॰ हालाहले । इ॰ श॰ च॰ ध्वा ।

हड्ड । पु॰ हाहानाम्निगन्धर्वे ॥

हा । अ॰ विषादे । शुचि । शोके ॥ अर्त्तौ पीडायाम् । दुःखे । कुत्सायाम् । विस्मये । आर्त्तौ ॥ अहङ्गति । शोकाख्याने । क्रि प ॥ यथा । प्रारब्धे निरुद्योगी गाम्भीर्ये प्रसूनक । विश्वस्तव्यो भवस्यामीहानर कीनहन्यते ।

हाकलि । स्त्री॰ मात्रावृत्तभेदे ॥ लक्षणन्तु । द्विजगणसगणभगणक लिताभवतिचतुर्दशकलकलित । अन्तेगुरुमुपधाययदाहाकलिरेषाभवतितदा ॥ यथा । कौमुदकुमुदवन्धुवदनाश्मितपीयूषजनितमदना । चपलविलोचनजितहरिणीहरतिमनाप्रमनस्तरुणी ।

हाङ्गर । पु॰ मत्स्याख्ययादसि ॥

हाटक । पु॰ न॰ स्वर्णे । हेमनि । कनके । हटति । हटदीप्तौ । वल ल् । हाटयतिवा । क्वुन् । धत्तूरे । त्रि॰ स्वर्णनिर्मिते ॥

हाटकेश । पु॰ पातालाधिपतीश्वरे ॥ हाटकाख्यरसविशेषश्चेश्वर ॥

हाटकेश्वर । पु॰ गोदावरीतीरस्थे शिवविशेषे ॥

हातव्य : । त्रि॰ त्यक्तव्ये ॥ यथा । बीभत्साविषयाज्जुगुप्सिततमः कायोवयोगत्वरप्रायोबन्धुभिरध्वनीव पथिकैर्योगोवियोगावहः । हातव्योयमसारएषविरस सप्तापरूद्याद्दिकसर्वस्येवहितावचेतसिपुन कस्यापिपुण्यात्मन ॥

हाडम् । न॰ हृतौ । वेतने ॥ प्रथने ॥ पु॰ राक्षसे ।

हानम् । न॰ त्यागे । उत्सर्गे ॥ आच्छिन्नेकोपरमे ॥

हानि । स्त्री॰ अल्पत्वे ॥ अपचये । क्षतौ ॥ आयुष क्षणएकोपिनलभ्यः स्वर्णकोटिभि । सचेन्निष्फलतायातिकाहानिस्ततोधिका । विनाशे । हानम् । ओहाकत्यागे । म्लस्याह्वाभ्योनि ॥ यहा । हीयते । ओहाक् । वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्विति नि ॥

हानु । पु॰ दन्ते ॥ इति त्रिकाण्डशेष ॥

हान्तम् । न॰ हृतौ । मरणे ॥ इन्ति । हन॰ । भसञिगमिनमिहमिवश्यर्थातृहिभ्यस्तिष्टन् ।

हापनीय । । ॰ वर्जनयोग्ये ।

हापित । त्रि॰ त्याजिते । हामिङ्गमिते ॥

हापुत्रिका ।) स्त्री॰ पक्षिविशेषे ॥
हापुत्री ।)

तत्पर्य्यायो यथा । अथ सर्पौ० खञ्जनिकातुलिका० स्फोटिकेति चिक्काण्डशेष । गोभण्डीर वङ्ककोरो हारपुत्रोरञ्जभङ्गिकेति हारावली ॥

हारिका । स्त्री० जृम्भणे । जृम्भायाम् । उपपुष्पिकायाम् । जम्भाई० इ० भा० ॥

हायन । पु० अर्चिषि । ज्वाले । अग्ने शिखायाम् ॥ व्रीहिप्रभेदे । नीवारादिरितिमुकुट । षष्टिकादिरित्यन्ये । शालिजातिविशेषे० इति भरत ॥ पु० न० संवत्सरे । शरदि । वर्षे ॥ जहाति त्यजत्युदकम् । ओहाक् त्यागे । आधान् जिहीते व्याप्नोति वा । ओहाङ् गतौ । हस्रोश्चालयोरिति ल्यु भयलघाट ।

हार । पु० मुक्तावली । मुक्तादाम्नि । युधि । सङ्ग्रामे । सयुगे । गुरुवर्णे० ऽ० ॥ सुग्रीववानरस्य श्वशुरे । न० हरिश्चरिते ॥ त्रि० मनोहरे । मनोह्रियतेऽनेन । हृञ० । घञ् ॥ यद्वा । हारपतिमन० स्वार्थे अण्प्रत्ययः ॥ हरणम् । भावे घञ् ।

हारक । पु० कितवे । चौरे ॥ गद्यभेदे ॥ विज्ञानविशेषे । शाखोटवृक्षे ॥ भाजकाङ्के ॥ त्रि० हरणके

र्त्तरि ॥ हरति हृञ० । ण्वुल् । इ क्रियते । बाहुलकात् कर्मणि वा ण्वुल् ॥

हारहारा । स्त्री० कपिलद्राक्षायाम् ॥

हारहूरम् । न० मद्ये ॥ पु० हैमवन्द्र ॥

हारहूरा । स्त्री० द्राक्षायाम् ॥

हारहूरका । स्त्री० गोस्तन्याम् ॥

हारावली । स्त्री० पुरुषोत्तमकृतकोषविशेषे ॥ हारपङ्क्तौ ॥

हारि । स्त्री० पथिकसन्ततौ । पथिकपङ्क्तौ ॥ द्यूते पराजये ॥ त्रि० मनोज्ञे । रुचिरे । शुभे ॥ हरति । हृञ० । बाहुलकादिञ् ॥

हारिकण्ठ । पु० कोकिले ॥ त्रि० हाराऽन्वितगले ॥

हारिणिक । पु० मृगयौ ॥ हरिणान् हन्ति । मांसमत्स्यमृगान् हन्तीति ठक् ॥

हारिणी । स्त्री० अत्यष्टिछन्द १७ प्रभेदे । तल्लक्षणन्तु । वेदत्वश्वैर्म्भनमयलागसैतृलद हारिणी । यथा । यथानित्यं सुतिकबलयश्री मालिनो लोचनेराग लौघोऽधरकिसलयेलाक्षारसारञ्जनम् । गौरीकान्ति प्रकृतिरुचिरारम्याङ्गराग च्छटासाकसारञ्जनिनकथराधाम नो हारिणी ॥ हारवत्याम् ॥

हारित । पु० पक्षिविशेषे । हारी

ते ॥ हारमित ॥

हारितकम् । न॰ शाके ॥

हारिद्र । पु॰ कदम्बवृक्षे । नीपे ॥ विषविशेषे ॥ यथा । हरिद्रातुल्य मूलोयोहारिद्र । समुदाहृत ॥ हरिद्रावर्णे ॥ त्रि॰ हरिद्रारञ्जिते ॥ हरिद्रयारक्तम् । हरिद्रामहारजना भ्यामञ् ॥

हारिद्रव । पु॰ मैत्रायणीयानांशाखा प्रभेदे ॥

हारिद्रुमत पुं॰ गौतमगोत्रेमुनिवि शेषे ॥ हरिद्रुमतोऽपत्यम् । अण् ॥

हारी । त्रि॰ हारविशिष्टे ॥ हारोस्त्य स्य । इनि ॥ हर्त्तरि ॥ अवश्य ह रति । हञ्॰ । णिनि ॥

हारी । स्त्री॰ मौक्तिके । यथा । मुक्ता मुक्ताफलशुक्तिबीज हारीचमौक्तिक मितिशब्दरत्नावली ॥

हारीत : । पुं॰ धर्मशास्त्रप्रवर्त्तकेमु निविशेषे ॥ कैतवे । धूर्त्ते ॥ पक्षि विशेषे । हरिताहारीतलङ्गतिलो कप्रसिद्धे ॥ अस्यमांसगुणायथा । हारीतोरूक्षउष्ण ' स्याद्रक्तपित्तक फापह ।स्वेदस्वरकर प्रोक्तईष द्वातकरश्च : ॥ हारीतोरक्तपीत' स्यादृष्यादिवीऽपिसकथ्यते " हारी मोत ॥ हारोस्त्यस्मिन वा । इ नि । हारिमनोहरमितंगमनम स्य ॥ यद्वा । हारयति । क्षिप । ए

तिस्म । ईङ्गतौ । गत्यर्थेतिक्त ' । हारयासावीतश्च ॥

हारीतक । पु॰ हारीतखगे ॥ स्वा र्थेक ॥

हार्द्दम् । न॰ प्रेमणि । स्नेहे ॥ अ भिप्राये ॥ हृदयस्यकर्म । युवादि त्वात्॰ हायनान्तयुवादिभ्योणित्य ण् । हृदयस्यहृल्लेखितिहृदादेश ' ॥ हृद्मर्थेष्यञ्वा ॥

हार्द्दी । त्रि॰ स्नेहवति ॥

हार्य्य ' । पु॰ कलिद्रुमे । विभीतकि हरणीयाङ्के । भाव्ये ॥ अर्थे ॥ त्रि॰ हर्त्तव्ये ॥ हर्त्तुंयोग्य ' । ह ञ्॰ । ऋहलोर्ण्यत् ॥

हाल ' । पु॰ बलदेवे ॥ शालिवाह नभूपतौ ॥ हलि ॥ हलति । ह लविलेखने । ज्वलतिकसन्तेभ्यो ण ॥

हालक :। पुं॰ पीतहरितवर्णाश्वे ॥

हालहलम् । न॰ पुं॰ हालाहलेविषे ॥ हालिवहलति॰ जठरम् । हल॰ । पचाद्यच । हलमिवहलतिवा । अच् । प्रज्ञाद्यण् ॥ मथ्यमाने ब्धौ हालहलमभवत् । क्षीरोदौमथिते तृष्णान्ते पुष्पादजायत्

हालाहल । पु॰ न॰ हालाहले ॥

हाला । स्त्री॰ सुरायाम् । बलदेवप्र यायाम् । वरुणात्मजायाम ॥ ह

लक्षणम् । हल० । ज्वलतीतिण
हल्यतेऽनयासा । हलस्येतिच
ञ ॥ हालाहलंहस्तिपैक हालातु
साम्परीरूपम् । तालमद्यं ॥

हालाक्षस्थानम । न० चित्रस्वराभि
धेदेश्या स्थाने ॥

हालाहल । पुं० न० विषप्रभेदे ॥
तत्स्वरूपन्तु । गौस्तनाभफलोगुच्छ
स्तालपत्रच्छदस्तथा । तेजसायस्य
द्यन्ते समीपस्थाद्रुमादय क्लिष्ठा
न्यायाहिमालये । दक्षिणाब्धितटे
देशेकोङ्कणे पिचजायते ॥ हालेव
चाहलति । हल० पचाद्यच् ॥
हालाहलोनैवविष विषं रमादर ज
नाव्ययमेवमन्वते । येगेनजाग
र्त्तिनिपीयतच्चिव स्मरनृरमांसुप्त
तिनिद्रयाहरिः ॥

हालाहल । पु० कीटविशेषे । च
च्छुनिकायाम् । कुटिलकीटके ॥

हालाहलधर । पुं० सर्पे । हाला
हलस्यधरोधारकः ॥

हालाहला । स्त्री० मञ्जनिकायाम् ।
गिरिकायाम् । बालमूषिका
याम् ॥

हालाहली । स्त्री० मदिरायाम् ॥

हालिक । पु० कर्षकवृषे । सैरि
कि । हलेनखनति । तेनदीव्यतिच
रतीतिठक् । हल वहति० हल
स्यायशा । हलसीराट्ठक् ॥

हालिनी । स्त्री० स्थूलपलस्याम् ॥

हाली । स्त्री० कनिष्ठश्यालिकायाम् ।
यथा । कनिष्ठाश्यालिकाहालीयन्ति
काकेलिकुञ्चिकेतिहेमचन्द्र ॥ म
दिरायाम् ॥

हालु । पुं० दन्ते ॥

हावः । पु० आह्वाने । स्त्रीणांविला
सादौ । नारीणांशृङ्गारभावसूक्ति
यासु ॥ यथा । स्त्रीणांविलासोवि
व्वोकोविभ्रमोललितं तथा । हेला
लीलेत्यमोहावा क्रियाशृङ्गारभा
वजा ॥ शृङ्गारात्० इत्यादे०
भावान्मनोविकाराद्वजाता । क्रि
याश्चेष्टाश्च शृङ्गाराद्याविलासादि
काहावशब्दवाच्याइत्यर्थः ॥ हवन
म् । हुङ्कारादनयो । क्वचित्पवा
दविषयेप्युत्सर्गोऽभिनिविशते० कृत्य
व् विषयेघञ् । इतिघञ् प्रक्रिया
। तेनाप्यपिबोध्य लीलाविला
सौविच्छित्तिविभ्रम किलकिञ्चि
तम् । मोट्टायितकुट्टमितविब्बोको
ललिततथा । विहृतञ्चेतिमन्तव्या
दशस्त्रीणांस्वभावजाइति ॥ हूय-
न्ते रागिणोऽनेनेतिहावः । यद्वाहूय
न्ते रागिणः कामातुरानेनेतिहा
वः । अविकारे कारणे घञ् ॥
यथोक्तम् । युवानोऽनेनहूयन्तेना
रीभिर्मदमानसैः । अतोनिरुच्यतेहा
वस्तेविलासादयोमताइति ॥ हाव

ष्टवायतिशोषयति वैशोषर्थे ।
ङ ॥

हास । पु० हास्ये ॥ हसनम् । हसे हसने । स्वनहसोर्वेतिपक्षे घञ् ॥ प्रकाशे ॥

हासिका । स्त्री० हासे । हासो० कृ० भा० ॥ हसे० । धात्वर्थनिर्देशेण्वुल् । प्रकाशे ॥

हास्तिकम् । न० गजतायाम् । करिसमूहे ॥ हस्तिनांसमूह । अचित्तहस्तिधेनोष्ठक् ॥ हस्तिनीनांसमूहो वा ॥ भस्य ढेतद्धितेपुंवद्भाव ॥ वि० हस्त्यारोहे ॥ हस्तिनाचरति० गच्छति । चरतीतिठक् ॥

हास्तिनम । न० हस्तिनापुरे ॥ हस्तिदघ्न । गजपरिमाणे ॥ हस्तिप्रमाणमस्य । पुरुषहस्तिभ्यामण्चेत्यण् । इनण्यनपत्येऽन्तप्रकृतिभाव ॥

हास्तिनपुरम । न० हस्तिनापुरे ॥

हास्तिनायन । पु० हस्तिनोगोत्राऽपत्ये ॥ नडादित्वात्फक् । हास्तिनायनेतिटिलोपाभाव ॥

हास्यम । न० रसविशेषे । हसे हासे । यथा । विकृताकारवाग्वेशचेष्टादेः कुहकाद्भवेत । हास्योहासस्थायिभाव श्वेत प्रथमदैवत ॥ विकृताकारवाक्चेष्ट यदालोक्यहसेज्जन । तदत्रालम्बनप्राहुस्तच्चेष्टोद्दीपनमतम् ॥ अनुभावो क्षिसङ्कोचवदनस्मेरतादिक निद्रालस्यावहित्याद्या अत्रस्युर्व्यभिचारिण ज्येष्ठानांस्मितहसितेमध्यानांविहसितावहासितेच । नीचानामपहसितं तथातिहसितंषड्भेदा ॥ ईषद्विकासिनयनं स्मितं स्यात्स्पन्दिताधरम् । किञ्चिल्लक्ष्यद्विजंतत्रहसितं कथितं बुधै । मधुरस्वरविहसितंसांसशिर कम्पमवहसितम । अपहसितंसास्राक्षं विक्षिप्ताङ्गभवत्यतिहसितम । हसि० । कर्तरिण्यंत ॥ वि० परिहसनीये ॥

हाहलम् । न० हालाहले ॥

हाहा । अ० विस्मये । शोके ॥

हाहा । पु० गन्धर्वविशेषे ॥ हहाहूहूश्चैवमाद्यागन्धर्वास्त्रिदिवौकस इत्यमर ॥ हा इतिशब्दं जहाति । आ हाकत्यागे । विच् । शसिङसाडस् । अव्युत्पत्तिपक्षे० शसि० हाहान् । आतोधातोरित्यस्याप्रवृत्ते ॥

हाहाकार । पु० शोकध्वनौ ॥ हाहाशब्दे । हाहाकरणम् । भावेघञ् ॥

हाहालम् । न० हालाहले ॥

हूहू । पु० देवगन्धर्वे ॥ सान्तोयम । गन्धर्वैहाहाहूहूप्रभृतीगन्धर्वोगायनेषुचेतिसाहसाङ्क । गन्धर्वप्रभेदहाहाहूहूरितिवाचस्पति ॥

हाहाहूहू । पु० गन्धर्वे ।

हि च पादपूरणे ॥ हेतौ । विशेषे । अवधारणे । प्रश्ने । हेत्वपदेशे । सम्भ्रमे ॥ असूयायाम् ॥ अव्ययं ॥ विद्वदनुभवप्रसिद्धौ । हिनोति । हि गतौ । क्विप् । सम्पापूर्वकत्वाद्गुणाभाव । क्विपि तुगभावो वा । भाविवाप्रत्ययौ ॥

हिंसक पु० व्याघ्र । हिंस्रपशौ । अथर्ववेदज्ञब्राह्मणे ॥ शत्रौ । त्रि० हिंसाकर्त्तरि । नृशंसे । घातुकी ॥ हिनस्तीत्यर्थे । हिसि हिंसायाम् । निन्दहिंसक्लिशेति वुञ् । शरणागतबालस्त्रीहिंसकान्संवसेन्नतु चीर्णव्रतानपि सदा कृतघ्नसहितानिमान् ॥

हिंसा । स्त्री० चौर्यादिकर्मणि ॥ आदिनाव धनत्यागसताडनादयोऽपि ग्राह्याः । घाते । वधे । प्राणिवधे ॥ स्वायत्तकारितानुमोदितभेदेन त्रिविधा । कायवाङ्मनोभिः प्राणिनां पीडने ॥ प्राणव्यवच्छेदे । स्वाभिप्रायप्रकटने परव्यवच्छेदने ॥ कायक्लेश मनोदुःख वधवाप्राणिनांतु । य प्रवर्त्तयति हिंसा हिंसेति समासतः इति देवल ॥ हिंसनम् । हिसि० । गुरोश्च हलः ० टाप् ॥ अहिंसावश्यं वानिवसन्ना तमवानुहिंस । नाऽवेदविहितां हिंसामापद्यपि समाचरेत् ॥ अथ तद्धेतुर्यो हिंसाश्वमेधादिकोदीषादित्यशुद्धिः साधमायेत्यतआह । या वेदविहिता हिंसा नियतास्मिंश्चराचरे । अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभौ । इति मनुः । या श्रुतिविहिता कर्मविशेषदेशकालादिनियता । अस्मिन् जगति स्थावरजङ्गमात्मनि० अहिंसामेवतां जानीयात्० हिंसाजन्याधर्मविरहात् । ईश्वरपशुहननम्० अधर्म० प्राणिहननत्वात्० ब्राह्मणहननवदित्याद्यनुमानम० उपजीव्यशास्त्रबाधोद्देवनप्रवर्त्तते । इष्टान्तीक्तब्राह्मणहननस्याप्यधर्मत्वे । शास्त्रमेवोपजीव्यम् । वेदाद्धर्मो हि निर्बभौ । यस्मादनन्यप्रमाणको धर्मो वेदादेव निःशेषप्रकाशत० इति कुल्लूकभट्ट ॥ यज्ञार्थं ब्राह्मणैर्वध्याः प्रशस्ता मृगपक्षिणः । भृत्यानाञ्चैव वृत्त्यर्थं मगस्त्यो ह्याचरत्पुरा ॥ बभूवुर्हि पुरोडाशा भक्ष्याणां मृगपक्षिणाम । पुराणेष्वपि यज्ञेषु ब्रह्मक्षत्रसवेषु च इति मनु ॥ पुरातनेष्वपि ऋषिभिः कृतयज्ञेषु भक्ष्याणां मृगपक्षिणां मांसैः पुरोडाशा अभवन् । तस्मात्० यज्ञार्थमद्यतनैरपि मृगपक्षिणो वध्या इति कुल्लूकभट्ट ॥

हिंसाकर्म । न० अथर्ववेदोक्तमन्त्र न्यासादिनिष्पादितमारणोच्चाटनादि क्रियायाम् । अभिचारे ॥ हिंसा फलकर्म । मारणपापादिवादि ॥
हिंसात्मक । त्रि० हिंसास्वभावे ॥
हिंसारु । पु० व्याघ्रे ॥
हिंसालुक । पु० खादुकेशुनि । वा टलमा० खावया० कुत्तारू०भा० ॥
हिंसित : । त्रि० प्राप्तहिंसे । हिंसां प्राप्ते ॥ यथा । यस्तु कन्यां पिताद त्त्वा न प्रयच्छति तां पुनः । सोऽपि दण्ड्यस्तेन हिंसितानृतस्य च । ॥ द्र० मारादयु० ॥
हिंस्रीर । पु० व्याघ्रे ॥ त्रि० खले । दुष्टे ॥ हिनस्ति हिंसि० । हि सीरच्चीरकी । खरेभेदे ॥
हिंस्र । पु० घोरे ॥ भीमसेने ॥ हरे ॥ त्रि० हिंसाशीले । घातके । घातुके ॥ हिंसायां हि सनेदोषः भावेनिवृत्ता । कृपाकार्यसताम्प्रवद हिंस्रेषुचजन्तुषु । हिंसायामहि दोषश्चहि कावाजनीश्वर ॥ द्र० ब्र० वै० कृ० जन्मखण्डे ८५ अध्याय : ॥ हिनस्ति । हिंसि० । नमिकम्पिस्म्यजसकमहिंसदीपो र ॥
हिंस्रक । पु० हिंस्रपशौ । व्याघ्रे ॥ स्वार्थे क ॥
हिंस्रपशु । पुं० हिंसकजन्तौ । व्या घ्रे । हिंसके ॥
हिंस्रा । स्त्री० चीस० डु० भा० प्र० ष्ठे । काकोदुम्बर्याम् ॥ जटामांस्या म ॥ वसायाम् ॥ हिनस्ति । हि सि० । र । टाप् ॥ गवेधुकायाया म ॥ नाड्याम ॥
हिक्का । स्त्री० ऊर्द्ध्ववातप्रवृत्तौ शब्दवि शेषे ॥ रोगोपसर्गविशेषे ॥ रोगवि शेषे ॥ यथाविप्रक्रष्टनिदानमाह । विदाहिगुरुविष्टम्भिरुक्षाभिष्यन्दिभो जनैः । शीतपानाशनस्थानरजो धूमैस्तथानिलैः ॥ व्यायामकर्म भाराध्ववेगाघातापतर्पणैः । हि क्काश्वासश्चकासश्चतृष्णासमुपजायते ॥ अपतर्पणम् । अनशनादि ॥ सम्प्राप्तिमाह । मारुत कफेनानु गत पञ्चहिक्काकरोतिहि । अन्नजां यमलांक्षुद्रांगम्भीरांमहतींतथा ॥ सामान्यलक्षणम् । मुहुर्मुहुर्वायुरु देतिसस्वनोयकृत्प्लिहान्त्राणिमुखा दिवक्षिपन् । सघोषआशुहिन स्त्यसून्यतस्ततस्तुहिक्काभिधीय तेबुधैरिति ॥ हिनस्तिइतिहिक्का । पृषोदरादित्वाद्रूपसिद्धिः । हि गितिकायति० शब्दंकरोतीतिवा ॥ हिक्कनम् । हिक्कअव्यक्तेशब्दे । गु रोश्च टाप् ॥ यथा । हिक्कय ते । हिक्कहिसाम् । पचाद्यच् ॥
हिक्कार । पु० सामभक्त्यन्तरे । प्रस्ता

भक्तिकस्थसाम्न प्रथमायामभक्तौ ॥

हिङ्गु । न॰ मूलविशेषस्य निर्यासेऽपधूप नि ॥ अस्य पर्यायो गुणाश्च यथा । सहस्रवेधि जतुकं बाल्हीकं हिङ्गु रामठम ॥ हिङ्गूष्णं पाचनं रुच्यं तीक्ष्णं वातबलासहृत् । रसे पाके च कटुकं स्निग्धं सद्वर्ह्निदीपनम् ॥ शूलगुल्मोदरानाहकृमिघ्नपित्तवर्द्धनमिति ॥ हिनोति, हिगतौ हृद्वीव । हिमगच्छति वा । मृगय्वादि, ॥ वंशपत्न्याम् ।

हिङ्गुनाडिका । स्त्री॰ नाडीहिङ्गुनि । रामठ्याम ॥

हिङ्गुनिर्य्यास पु॰ निम्बवृक्षे ॥ हिङ्ग्वाकारो॰ हिङ्गुगन्धो वा निर्य्यासो यस्य ॥ हिङ्गुरसे ॥

हिङ्गुपत्र । पु॰ इङ्गुदीवृक्षे । हिंगोटाख्य॰ भा॰ प्र॰ ॥ हिङ्गुन, पत्रमिवपत्रं यस्य ॥

हिङ्गुपत्री । स्त्री॰ कारव्याम् । पृथ्वीकायाम् । वंशपत्न्याम् ॥ अस्या गुणा यथा । हिङ्गुपत्री भवेद्रुच्या तीक्ष्णोष्णा पाचनी कटु । हृद्वस्तिरुग्विबन्धार्शः श्लेष्मगुल्मानिलापहा ॥ हिङ्गुपत्रमिवपत्रमस्या ॥ हिङ्गुन पत्रे ॥

हिङ्गुपर्णी । स्त्री । वंशपत्न्याम् ॥

हिङ्गुल । पु॰ न॰ कुरुविन्दे, हंसपादे ॥ अस्य नाम । नि॰ लक्षणा नि॰ गुणाश्च यथा । हिङ्गुलं दरदं म्लेच्छं चित्रासञ्चूर्णपारदम् ॥ दरदस्त्रिविध प्रोक्तश्चर्मारः शुकतुण्डकः । हंसपादस्तृतीयः स्याद्गुणवानुत्तरोत्तरः ॥ चर्मारः शुक्लवर्णः स्यात्सपीतः शुकतुण्डकः । जपाकुसुमसङ्काशो हंसपादो महोत्तमः ॥ तिक्तं कषायं कटु हिङ्गुलं स्यान्नेत्रामयघ्नं कफपित्तहारि । हृल्लासकुष्ठज्वरकामलाश्च प्लीहामवातौ च गरं निहन्ति ॥ ऊर्द्ध्वपातनयुक्त्या तु डमरुयन्त्रपाचितम् । हिङ्गुलं तत्समुत्थं तु शुद्धमेव न शोधयेत् ॥ शोधनं विधिस्तु । मेषीक्षीरेण दरदमम्लवर्गैश्च भावितम् । सप्तवारान् प्रयत्नेन शुद्धिमायाति निश्चितम् ॥ शोधितस्य गुणाः सूक्ष्मास्तिक्तकषाय मिश्राद्रना ॥ हिङ्गुलाद्रसाकर्षण विधिर्यथा । निम्बूरसैर्निम्बपत्ररसैर्वा याममात्रकम् । घृष्ट्वा दरदमूर्ध्वन्तु पातयेत्सूतयुक्तिवत् । ततः ऊर्ध्वपठरीलग्नं ग्रहणीयाद्रसमुत्तमम् । शुद्धमेव हि तत्सूतं सर्वकर्मसु योजयेत् ॥ इ॰ भा॰ प्र॰ ॥ सिन्दूरे ॥

हिगुला । स्त्री॰ देशविशेषे । यथा । ब्रह्मरन्ध्रे हिंगुलायां भैरवो भीमलोचन । कोट्टवी सा महामाया त्रिगुणा या दिगम्बरी ॥ इति मन्त्रचूडा

महीपीठमाला ॥ वामनपुराण मपि यथा । अन्याश्चोत्तरे दिक्संस्था तासां स्वर्लिङ्गलिङ्गिता । ततस्ता माहेश्वरावर्णप्रभाभैरवमूर्त्तिमान शङ्करो वरदो वीरो यत्र देवाः समर्चयन् । तत्र सर्वाः पूजयिष्यन्ति सुराश्चैव पितरस्तथा ॥ यक्षविद्याधरा देवा मानवाश्च शुभङ्करि । त्वां तोष्यन्ति सदा देवि वरलिप्सोत्कवारे च स्वर्कीर्त्तिशुभ नामयस्मा दुधिरञ्चिर्चिता । त्वं वै वसुधाधरेदेनचर्चि ता भूतानुयाता हरिचर्माम्बरा महीसमन्तादिवचारसुन्दरी त्वत् गता हैङ्गुलमाद्यसुरमर्मिति ॥

हिंगुल । पु॰ हिंगुले ॥

हिंगुलिका । स्त्री॰ कण्टकार्याम् । भण्टाक्याम् ॥

हिंगुली । स्त्री॰ वार्त्ताक्याम् । सिंह्याम् । भण्टाक्याम् ॥ हिंगुला ति । ला॰ । आतोनुपेतिक । गौरादित्वान् ङीष ॥ वृहत्याम् । कण्टकार्याम् ॥

हिंगुलु पु॰ न॰ रञ्जनद्रव्यविशेषे ॥ यथा । दारदन्तु हिंगुलु स्यात् हिंगुलं रसपारदमिति विकाण्डशेष ॥

हिंगुशाटिका । स्त्री॰ वनाल्याम् ॥

हिंगूलम् । न॰ चालुविशेषे । मधुमूलै । मौचालु॰ द्रू॰ गौ॰ दे॰ भा॰ प्र॰ ॥

हिज्ज । पु॰ हिज्जले ॥

हिज्जल । पु॰ वृक्षले । निचुले । जलवेतसविशेषे ॥ यथा । वृक्षलो हिज्जलश्चापि निचुलश्चाम्बुजस्तथा । जलवेतसवद्वेद्यो हिज्जलोऽय विषापहः । इति भावप्रकाशः ॥ हिनोति । हिगतौ वृद्धौ च । क्विप् । हित् जलमस्य ॥ समुद्रवेतसवृक्षेऽन्ये ॥ समुद्रफलेतिख्यातवृक्षपरे ॥

हिन्ताल । पु॰ हस्तिपादवृक्षे । निगडे । चन्दुकौ । इति हेमचन्द्र ॥

हिडम्ब ।) पु॰ असुरविशेषे ॥
हिडिम्ब ।)

हिडिम्बजित् ।)
हिडिम्बनिसूदन ।) पु॰ भीमसेने ॥
हिडिम्बभित् ।)

हिडिम्बा । स्त्री॰ हिडिम्बासुरभगिन्याम ॥

हिडिम्बापति ।)
हिडिम्बारमण ।) पु॰ हनूमति । रामदूते । अर्जुनध्वजे ॥

हिण्डनम् । न॰ भ्रमणे । रते ॥ यामे ॥ क्रीडायाम ॥ हिडिगत्यनादरयो । ल्युट् ॥

हिण्डक । पु॰ लग्नाचार्ये ॥

हिण्डिर । पुं॰ फेनडीरे ॥

हिण्डी । स्त्री॰ शिखरवासिन्याम् । दुर्गायाम ॥ द्रू॰ शिo शेष ॥

हिरण्डीप्रियतम । पु॰ शिवे ॥

हिरण्डीर । पु॰ समुद्रफेने । अब्धि कफे । फेने । हिरण्डीतिशब्दमीरयति । ईरगतौ कम्पने च । पचाद्यच । अण् वा ॥ यद्वा । हिरण्डते • कृतस्ततो गच्छति । हिण्डि॰ । बाहुलकादीरन् ॥ बार्ताकी ॥ पुरुषे ॥ रूपके । ० वलुण्ड गवि ॥

हितम् । न॰ आप्तवाक्ये । परिणामे सुखकरवाक्ये । त्रि॰ पथ्ये । उत्तरकालेष्टफलवति । अनुकूले ॥ गते ॥ धृते ॥ आप्ते । उपकारिणि ॥ भुव अ मा । दधातेः ॥ अङ्गणे ॥

हितक । पु॰ शिशौ ।

हितकारी । त्रि॰ मङ्गलकारके ॥

हितप्रणी । पु॰ चारे ॥ हिते ॥

हितावली । स्त्री॰ औषधविशेषे । अङ्गारकुष्ठके ।

हितैषी । त्रि॰ हितार्थिनि । हितेच्छाकारिणि ॥ हितमिच्छतीति णिनि ॥ विमलकलुषीभवच्चेतः कथयत्येव हितैषिणं रिपुञ्च ॥

हितोक्ति । स्त्री॰ पथ्यवचने ॥

हितोपदेश । पु॰ सत्परामर्शदाने ॥ विष्णुशर्म्मकृते नीतिग्रन्थविशेषे

हिन्ताल । पु॰ वृक्षविशेषे । अस्य पर्यायगुणाश्चयथा । हिन्ताल स्थूलतालश्च मध्यपत्रोऽश्वहृत् । स्थिरपत्रो द्विधा शेय स्थिरपत्रो स्थिरच्छदः । गर्भस्रावी नीलतालो भीमपत्रो वृक्षराटक । अम्लसारो हृद्याल स्याच्चतुर्दशधाभिधः ॥ हिन्तालो मधुराम्लश्च कफकृत्पित्तदाहनुत् । श्रमतृष्णापहो रोचिरिति शिरोऽतिदोषकृत् ॥ तृणराजविशेषम् । यथ हर्षिष्ठ । गुवाताल हिन्तालास्तथा तालो बकुलको । खर्जूरनारिकेलो वसमेतिदरागका वृति ॥ पूगवैटस्तुहिन्ताल श्रीव किरिटितत्फलमितिचिकाण्डशेष ॥ हीनोऽल्पश्चालः । पृषोदरादि ॥

हिन्दु । पु॰ कालौ । साम्प्रदायिनां चतुर्वर्णानासम्यक्ष्यम् ॥ यथोक्त मेरुतन्त्रे २३ प्रकाशे । पश्चिमाम्नाय मन्त्रास्तुप्रोक्ताः पारस्यभाषया । अष्टोत्तरशताशीतिर्येषां संसाधनात् कलौ ॥ पञ्चखाना सप्तमीरा नव साहा महाबला । हिन्दुधर्मप्रलोप्तारो जायन्ते चक्रवर्तिनः ॥ हीनञ्च दूषयत्येव हिन्दुरित्युच्यते प्रिये । पूर्वाऽम्नाये नवशतं षडशीति प्रकीर्त्तिता । फिरङ्गभाषया मन्त्रास्तेषां संसाधनात् कलौ अधिपा मण्डलानाञ्च संग्रामेष्वपराजिता । इंरेजा नवषट् पञ्चलण्डजाश्चापि भाविनः ॥

हिन्दोल । पुं॰ श्रावणशुक्लपक्षविहितभगवद्यात्राविशेषे । दोलयात्रेति प्रसिद्धे षड्रागान्तर्गतरागविशेषे ॥ यथा । भैरवः कौशिकश्चैव हिन्दोलो दीपकस्तथा । श्रीरागो मेघरागश्च षडेते पुरुषाह्वयाः इति ॥

हिन्दोलक । पुं॰ यानविशेषे । दोलायाम् । प्रेङ्खायाम् ॥

हिन्दोलनम् । न॰ दोलने ॥

हिन्दोला । स्त्री॰ दोलिकायाम् ॥

हिबुकम् । न॰ लग्नाच्चतुर्थभवने ॥

हिम । पुं॰ चन्दनवृक्षे ॥ कर्पूरे ॥ चन्द्रे । हेमन्तर्त्तौ ॥ हिमालयपर्वते ॥ न॰ तुषारे । रजनीजले ॥ तत्पर्यायो यथा । अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् । प्रालेयं मिहिकेति ॥ चन्दने ॥ नवनीते ॥ मौक्तिके ॥ पद्मकाष्ठे ॥ रङ्गे ॥ शीते ॥ त्रि॰ शीतले ॥ हन्ति । हन॰ । हन्तेर्हिचेति मक् ।

हिमक । पुं॰ विकङ्कतवृक्षे ॥

हिमकर ।) हिमकिरण ।) पुं॰ चन्द्रे । कर्पूरे । हिमाः कराः किरणा यस्य सः ॥

हिमकूट । पुं॰ शिशिरर्त्तौ ॥ हिमकदम्बे ॥

हिमगिरि । पुं॰ हिमालयपर्वते ॥

हिमज । पुं॰ मैनाकाचले । मेनकापुत्रे । हिमात् जात । जनी॰ । पञ्चम्यामिति ड॰ ॥ न॰ हिमोद्भवे ॥

हिमजा । स्त्री॰ गौर्याम् । पार्वत्याम् ॥ हिमात् हिमालयात् जाता । जनी॰ । ड॰ । टाप् ॥ शठ्याम् । क्षुद्रायाम् । क्षीरिण्याम् ॥

हिमझटि । पुं॰ भूमिकायाम् । कुहेलिकायाम् ॥

हिमतैलम् । न॰ कर्पूरतैले ॥

हिमदुग्धा ।) हिमदुग्धिका ।) स्त्री॰ क्षीरिण्याम् ॥

हिमदुर्दिनम् । न॰ पक्षिहिमे । हिमनिपातितेन दुःखदायकदिने ॥

हिमद्युति । पुं॰ इन्दौ । चन्द्रे ॥ हिमा द्युतिर्यस्य सः ॥

हिमद्रुमः । पुं॰ महानिम्बे ॥

हिमनामा । पुं॰ कर्पूरे ॥ हिमस्य नामान्येव नामान्यस्य ॥

हिमप्रस्थ । पुं॰ हिमगिरौ ॥

हिमवान् । पुं॰ उमागुरौ । नगाधिराजे । हिमालये ॥ शतद्रुचन्द्रभागाद्या हिमवत्पादनिःसृता । सतांनिधिर्यो हिमवान् भोगिनामालयोऽचलः ॥ हिममस्त्यस्मिन् । मतुप् । वत्वम् ॥

हिमवत्सुत । पुं॰ हिरण्यनाभे । मैनाकाचले ॥

हिमवत्सुता । स्त्री॰ उमायाम् ।

गौर्याम् ॥ हिमवत्सुता ॥ ग
ङ्गायाम् ॥ इ० ध० य ॥
हिमवत्सुतारुध । पु० । भौमि
तीर्थविशेषे ॥
हिमवालुक । पु० कर्पूरे ॥ इ०
राजनिघण्टः ॥
हिमवालुका । स्त्री० कर्पूरे ॥ हि
मावासौवालुकाच ॥
हिमशर्करा । स्त्री० यावनाल्याम् ॥
हिमशैल । पु० हिमवति । मे
नाधवे ॥ हिमप्रधान शैल ॥
हिमशैलजा । स्त्री० पार्वत्याम् ॥
हिमसंहति । स्त्री० महाहिमे ।
हिमान्याम् ॥ हिमानांसंहति ॥
हिमह । पु० आदित्ये ॥ वह्नौ ॥
हिम जाड्यं हन्तीति हिमह । ड
हिमहासक । पु० हिन्तालवृक्षे ॥
हिमा । स्त्री० नागरमुस्तके ॥ सू
क्ष्मैलायाम् ॥ रेणुकायाम् ॥ पृ
क्कायाम् । भद्रमुस्तायाम् ॥ च
विकायां ॥
हिमांशु । पु० चन्द्रमसि । हि
मांशवोयस्य ॥ कर्पूरे ॥
हिमांशुभिख्यः । पु० कर्पूरे ।
न० रौप्ये ॥
हिमाग । पु० हिमालये ॥ हि
मप्रधानोगः ॥
हिमागम । पु० हेमन्ते ॥ हि
मस्यागमोयस्मिन् ।

हिमाचल । पु० हिमालये ॥
हिमात्यय । पु० वसन्तर्तौ ॥ हि
मस्यात्ययोयस्मिन् ॥
हिमाद्रि । पु० हिमशैले ॥
हिमाद्रिजा । स्त्री० पार्वत्याम् ॥
हिमाद्रेर्जाता । जनी० । ड ।
टाप् ॥ क्षीरिण्याम् ॥
हिमाद्रितनया । स्त्री० पार्वत्याम् ॥
हिमाद्रितनयापति । पु० शिवे ॥
हिमानी । स्त्री० हिमसंहतौ ॥ मह
द्धिमम् । हिमारण्ययोर्महत्त्वइति
ङीषानुकौ ॥ यथा । आगतावत
चरैवहिमानीसेव्यताम सुरतरङ्गि
णीसदा । कृष्णवर्त्मनिगुणानुकूल
यन्तीकौवनैपुलवधन्यनुरागम् ॥
यावनालशर्करायाम् ॥
हिमाराति । पु० वीतिहोत्रे । ध
नञ्जये ॥ किरणमालिनि । सूर्ये ॥
हिमस्यआराति ॥
हिमाल । पु० हिमशैले ॥ हिमेन
आलाति । आतभूषणादौ ॥ कः ॥
हिमालय । पु० भारतवर्षस्यो
त्तरवर्त्ते । उदगद्रौ । नगपतौ ।
मेनाधवे । उमागुरौ ॥ स्थावराणां
मध्ये भगवतोविभूतिरयम् ॥ हि
मस्यालय ॥ शुक्लखदिरे ॥
हिमालयसुता । स्त्री० पार्वत्याम् ॥
हिमालया । स्त्री० भूम्यामलक्याम् ॥
हिमाब्जम् । न० उत्पले ॥

हिमावती । स्त्री० स्वर्णक्षीरीयाम् ॥ हिममस्त्यस्याः । मतुप् । शरादीनाञ्चेति दीर्घः ॥

हिमाश्रया । स्त्री० स्वर्णजीवन्त्याम् ॥

हिमाह्वय । पु० कर्पूरे ॥

हिमिका । स्त्री० तृणोपरिपतितहिमे । इति कश्चित् ॥

हिमेलु । त्रि० हिमार्त्ते । हिमकम्पिते ॥ हिमं न सहते । हिमाच्चेलुः ॥

हिमोत्तर । त्रि० शीतर्त्ते ।

हिमोत्तरा । स्त्री० कपिलद्राक्षायाम् ॥

हिमोत्पन्ना । स्त्री० यावनाल्याम् ॥

हिमोद्भवा । स्त्री० शट्याम् ॥ क्षीरिण्याम् ॥

हिम्य । पु० भूमि हिमवति पर्वते ॥ प्रशस्तं हिममस्मिन्नस्ति । अन्येष्वपि दृश्यत इति यप् ॥

हिरणम् । न० रेतसि । स्वर्णे । वराटे ॥ हिरण्यमिव वराटः पृ० हेमचन्द्रः ॥

हिरण्मय । पु० सुरज्येष्ठे । ब्रह्मणि । विश्वसृजि ॥ न० भारतवर्षादिनवखण्डान्तर्गतवर्षविशेषे । त्रि० तेजोमये ॥ सुवर्णमये ॥ हिरण्यस्य विकारः । मयट् । दाण्डिनायनेति टिलोपो निपात्यते । हिरण्मयी० छन्दसि मलोपो निपात्यते । हिरण्ययेन सवितेति दर्शनात् ॥

हिरण्यम् । न० रेतसि । द्रव्ये ॥ शातकुम्भे । स्वर्णे ॥ वराटे ॥ अक्षये ॥ मानभेदे । अकुप्ये ॥ रूप्ये ॥ श्वेतपर्वतादुदीच्यां स्थितवर्त्तमानवर्षविशेषे ॥ हर्यति । हर्यं गतिकान्त्योः । हर्यतेः कन्यन्हिरच्च ।

हिरण्यक । पु० देवदत्तादेर्हिरण्याध्यक्षायाम् ॥ हिरण्ये कामः । धनहिरण्यात् कामे इति कन् ॥

हिरण्यकशिपु । पु० कश्यपाद्दित्यां जातदैत्यविशेषे ॥ हिरण्यकशिपुरस्य ।

हिरण्यकशिपुः । पु० निधौ ॥

हिरण्यकामधेनु । स्त्री० षोडशमहादानान्तर्गतमहादानविशेषे ॥

हिरण्यकोष । पु० घटिताघटितहेमरूप्ययोः ॥ यथा । हिरण्यकोशाकुप्यानि हेम्नि रूप्ये कृताकृते । इति हेमचन्द्रः ॥ अमरस्तु । स्यात्कोशश्च हिरण्यञ्च हेमरूप्ये कृताकृते । ताभ्यां यदन्यत्तत्कुप्यमित्याह ॥

हिरण्यगर्भ । पु० ब्रह्मणि । लोकेशे । चतुरानने ॥ हिरण्यं हिरण्मयमण्डम् । तद्गर्भ इव तदन्तर्वर्त्तित्वात् । यथाह मनुः । तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिन्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामह इति ॥ यद्वा हिरण्यं हिरण्मयमण्डं गर्भोऽस्य ॥ अथवा । हिरण्यं हिरण्मयं सुवर्णं प्रचुरम् । तद्वत्प्रकाशमण्डं ब्रह्मा

ण्डगर्भे उदरे यस्य स हिरण्यगर्भः । विराडदेहान्तर्गतवैराजपुरुषस्तदन्तर्यामिणश्चाभेदेनोपासनात् हिरण्यगर्भोपासकैः कर्तव्ये लिविषयेय निरुक्तिः सङ्गच्छते । द्युपतयएव तेनयद्युरन्तमनन्ततयोत्वमपि यदन्तराण्डं निश्चयानुसारेण । खल्वरजांसि वान्ति यस्यासाविह यच्छुतयस्त्वयि विफलत्वं तन्निरसनेन भवन्निधनादृतिवेदस्तुत्यन्तत्वात् ॥ यद्वा । विराडपरनाम्नो हि हिरण्मयब्रह्माण्डस्य गर्भीभूतत्वात् वर्तित्वात् वैराजपुरुष एव हिरण्यगर्भ इत्युच्यते इति ॥ अथवा हिरण्यवेदस्तद्वामस्य यद्वा व्यगर्भे उदरे यस्य स । हिरण्मयद्रव्यं वराटिकार्णं रेतसोऽपि त्यभिधानादिति ॥ समष्टिलिङ्गशरीराभिमानिनि चैतन्ये • ज्ञानक्रियाशक्तिमदन्तःकरणोपहितस्यात्मज्ञानक्रियाशक्तिप्रधाने ॥ सूक्ष्मरूपे । प्राणे । सूत्रात्मनि । ईशे । ईश्वरे ॥ हिरण्यगर्भो नाम सूक्ष्मप्रपञ्चाभिमानी • सूर्यमण्डलान्तर्गतः सूक्ष्मसमष्टिदेहोपलिक्षात्मा चक्षुर्गोलकानुगतेन्द्रियानुयायश्च स सारिणोऽर्थान्तरमिति व्याख्यातारः । मायोपाधिकः परमात्मा लिङ्गशरीरसमष्ट्यभिमानेन हिरण्यगर्भ इत्युच्यते । यथादिपुरुषपादिर्जीव ईश्वर इत्युच्यते । यथा । स वै शरीरी प्रथमः स वै पुरुष उच्यते । आदिकर्ता स भूतानां ब्रह्माग्रे समवर्त्तत इति स्मृतेः । विष्णौ ॥ शालग्रामविशेषे ॥ महादानविशेषे ॥

हिरण्यदंष्ट्र । पुं० असुरविशेषे । भग्नदंष्ट्रे ॥

हिरण्यद । पुं० समुद्रे ॥ त्रि० स्वर्णदातरि ॥

हिरण्यदा । स्त्री० भूमौ ॥

हिरण्यनाभ । पुं० मैनाकाचले ॥ हिरण्मयमिव नाभिरस्य । अच् प्रत्यन्वेत्यचाजितियोगविभागाद्व ॥

हिरण्यबाहु । पुं० शोणनदे । हिरण्यवाहावस्य ॥

हिरण्यरेता । पुं० हुतभुजि अग्नौ ॥ हिरण्यरेतोऽस्य ॥ सूर्ये ॥ चित्रकवृक्षे ॥ शिवे ॥

हिरण्यवत् । पुं० वैश्रवणे । न० निधिविशेषे ॥ त्रि० सहिरण्ये ॥ हिरण्यमस्त्यस्य । अन्येभ्योऽपीति मत्प्रत्ययः ॥

हिरण्यवर्ण । त्रि० शुद्धस्वर्णे ॥

हिरण्यवर्णा । स्त्री० नद्याम् ॥ इ० हे० न्द्र

हिरण्यवाह । पुं० शोणनदे । हिरण्यं वहति । कर्मण्यण् ॥

हिरण्यग्रीव । पुं० ब्रह्मोपद्माद्रिविशेषे ।

हिरण्यस्तूप । पु॰ ऋषिविशेषे । अ ङ्गिरस पुत्रे ॥

हिरण्याक्ष । पु॰ काश्यपाद्दित्यांसमुत्पन्ने॰ आद्यदैत्यविशेषे ॥

हिरण्याश्व । पु॰ तुलापुरुषादिषोडशमहादानान्तर्गतमहादानविशेषे ॥

हिरण्याश्वरथ । पु॰ षोडशमहादानान्तर्गतमहादानविशेषे ॥

हिरुक् । अ॰ विनार्थे ॥ हिरुक्चार्थाश्रिताः ॥ मध्यार्थे ॥ हिनोति । हिगतौ । रुक् प्रत्यय । सामीप्ये ॥ अधमार्थे ॥

हिलमोचि । स्त्री॰ हिलमोचिकायाम् ॥

हिलमोचिका । स्त्री॰ ब्राह्म्याम् । आचार्याम् । चक्राङ्ग्याम् । हिल ञ्चा॰ ञ्चू॰ गौ॰ भा॰ प्र॰ हिलसा ख्यशाके । यथा । शोथ कुष्ठ वाक पित्त हरतेहिलमोचिका । हिलति । हिलभावकरणे । इगुपधेतिक । मोचयति । मुचेण्वुल् । हिलाचासौमोचिका । छायोपोरितिह्रस्व ॥ युक्ते ॥

हिलमोची । स्त्री॰ हिलमोचिकायाम् ॥

हिस्र । पु॰ शरारिपक्षिणि ॥

